FOREWORD

The Sanskrit lexicon by Amarasimha, called Namalingānuśāsana, popularly known as Amarakosa, occupies an honoured position in the history of Sanskrit lexicography Its popularity is evinced by a host of commentaries written upon it by eminent scholars of various regions and religions The earliest available commentary of Ksiraswāmi is undoubtedly a unique production of its kind due to the wealth of information about the different shades of meanings as well as the derivation of words Four earlier commentaries mentioned by him are those of Upādhyāya (Acyutopadhyāya), Ganda (?), Narāyana and Śri Bhoja (probably Bhojarāja, the famous king of Dhara) but they are available neither in print nor known to exist in MS form. Ksiraswāmī, a reputed grammarian hailing from Kashmir, belonged to the last quarter of 11th cent and the first quarter of 12th cent He is in fact a source of inspiration to the latter commentators who by their erudite commentaries have attempted to make Amarakośa better known to the scholars of Sanskrit language Tikasarvaswa of Sarvananda (1159 A D), Kāmadhenu of the Buddhist Subhuticandra (which possesses the rare merit of being translated into Tibetan), Padacandrikā of Raimukuta composed in 1431 A D based upon a comparative study of 16 earlier commentaries, Ramaśramī or Vyakhyāsudha of Bhanuji Diksita alias Ramaśrama, written in the first half of 17th cent, Amaratika by Bharata Mallika of Bengal written before 17th cent —*these* are some of the most important commentaries of Amarakośa available in print each of which possesses a unique distinction of its own on account of wealth of rich *materials* as regards the distinctive shades of meanings preserved by Sanskrit words

The present commentary on Amarakosa by Krsnamitra which is being present here for the first time is a welcome addition to the commentarial literature on this popular Sanskrit lexicon The commentary gives the derivation of the words as has been already

done by Bhanuji Dīkṣita in his Vyākhyāsudhā and is indeed indebted to it.

Kṛṣṇamitra proposes to present here a popular commentary on a popular Sanskrit lexicon unburdened as it is by an erudition of super type. And in this attempt he is eminently successful.

The learned editor Shri Satyadeva Mishra is to be heartily congratulated on the production of this excellent edition. He has taken ample labours to make the edition as useful as possible. He has given in English the meaning of each Sanskrit word of the text and has added a very useful and reliable index of words appearing in the book, besides several valuable appendices for cross references. In his introduction he discusses the value of the commentary and settles its date by arguments at once convincing and authentic. Though based upon a single MS. the edition is quite reliable and free from mistakes and lacunae. I have great pleasure in bringing this book to the notice of Sanskrit scholars and hope the learned editor will bring to light other valuable works of Sanskrit and earn the gratitude of students and scholars alike.

Varanasi
24-4-72

Baldeva Upadhyaya
Director (Retired), Research Institute,
Sanskrit University, Varanasi

INTRODUCTION

The *Amarakosa* or Namalinganusasana of Amarasimha is the earliest lexicon available to us Amarasimha was a Bauddha, who knew Mahayana and was well acquainted with the works of Kalidasa He as a legend goes, was one of the nine jewels of Vikramaditya's court[1] This legend however, is not of much significance, as it contemporises the literatures flourished in different centuries[2] According to Professor K G Oka's convincing view, Amarsimha was a predecessor of Isvarakrsna, the author of the *Sankhya Karika* fame, and *Amarakosa* is a work of the 4th century A D[3]

The *Amarakosa* occupies a unique place among all lexicons While other lexicons contain either synonymous or homonymous words, the *Amarakosa* contains both It treasures over twenty thousands of words in a compass of just fifteen hundred verses No other lexicon has been so authoritative and popular as the *Amarakosa* All lexicons of later origin and glosses of classical Sanskrit literature are replete with quotations from the *Amarakosa* Thousands of sanskrit scholars

1 The other eight are Dhanvantari 2 Ksapanaka 3 Sanku 4 Vetalabhatta 5 Ghatakarpara 6 Kalidasa 7 Varahamihira and 8 Vararuci

2 History of Sanskrit Literature by S N Das Gupta and S K De Vol I pp 229 30 (University of Calcutta 1962)

3 Introduction on *Amarakosa* with the commentary of Ksirasvamin p 9 (Poona 1913)

learn it by heart even today. Its popularity is evidenced also by the mass of commentaries written on it by the scholars belonging to different religions. The *Śabdakalpadruma* and the *Amara-bhāratī* preserve the list of as many as forty-one commentaries. These are (1) *Vyākhyā-pradīpa* by Acyutopādhyāya (2) *Kriyā-kalāpa* by Āśadhara (3) *Kāsikā* by Kāśīnātha (4) *Amarkoṣodghāṭana* by Kṣīrasvāmin (5) *Bālabodhinī* by Gosvāmin (6) *Amarakaumudī* by Nayanānanda Rāmacandra (7) *Amarakośa-pañjikā* by Nārāyana Śarman (8) *Śabdārthadīpikā* by Nārāyanavidyāvinoda (9) *Subodhinī* by Nīlakantha (10) *Amarakośamālā* by Paramānanda (11) *Amarakośapañjikā* (second) by Bṛhaspati (12) *Mugdhabodha* by Bharatamallika (13) *Vyākhyāsudhā* or *Rāmāśramī* by Bhānujidīkṣita or Rāmāśrama (14) *Gurubālabodhinī* by Mañjubhatta (15) *Sārasundarī* by Mathureśavidyālankāra (16) *Amarapadapārijāta* by Mallinatha (17) *Budhamanoharā* by Mahādevatīrtha (18) *Amaraviveka* by Maheśvara (19) *Amarabodhinī* by Mukundaśarman (20) *Trikandacintāmaṇi* by Raghunātha Cakravartin (21) *Amarakośa-vyākhyā* by Rāghavendra (22) *Trikāndaviveka* by Rāmanātha (23) *Vaisamya kaumudī* by Rāmaprasāda (24) *Amarakośa vyākhyā* by Ramaśarman (25) *Amaravṛtti* by Rāmasvāmin (26) *Pradīpamañjarī* by Rāmeśvara Śarman (27) *Padacandrikā* by Rāyamukuta (28) *Amaravyākhyā* by Lakṣmana Śāstrī (28) *Amarabodhinī* by Lingabhatta (30) *Padamañjarī* by Lokanātha (31) *Vyākhyāmṛtam* by Śankarācārya (32) *Amaratīkā* by Śrīdhara (33) *Tīkāsarvasvam* by Sarvānanda (34) *Amarapadyamukuta* by Rangācārya (35) *Bṛhadvṛtti*———— (36) ————by Appayadikṣita (37) *Gurubālabodhinī* by Bhanudikṣita (38) ————by Mānyabhaṭṭa (39) ————by Lingamāsūri

(40) *Amarakośa*padavivṛti———and (41) *Kāmadhenu* ———. A good number of commentaries preserved in the Government and private libraries of India and abroad are still coming to light. Eighteen commentaries other than the listed above are available in the Government Oriental Manuscripts Library, Madras.[4] Some of these commentaries are in languages other than Sanskrit. Another commentary on the text by Viṣṇu is referred to by Professor E. D. Kulakarni in his Introduction on the *Dharaṇi-kośa*.[5] I come across two more rare commentaries on the text namely *Amarasūcikā* by Bhikṣu Fategiri and Amarakośaṭīkā by Ācārya Kṛṣṇa-

4. (i) *Nāmaliṅgānuśāsana-vyākhyā* by Tiruvenkaṭācārya (R 1241), (ii) *Nāmaliṅgānuśāsana-vyākhyā* by Ravivarmarāja (R 4930), (iii) *Nāmaliṅgānuśāsana-vyākhyā* by Jātavedadīkṣita (R 3552), (iv) *Nāmaliṅgānuśāsana* with Kanarese commentary (D 19538), (v) *Nāmaliṅgānuśāsana* with Kanarese Meaning (R 4552), (vi) *Nāmaliṅgānuśāsana* with Telugu meaning (D 1657), (vii) *Nāmaliṅgānuśāsana* with Telugu commentary (D 1665), (viii) *Nāmaliṅgānuśāsana* with Telugu commentary by Nāgadevabhaṭṭa (D 1674), (ix) *Nāmaliṅgānuśāsana* with Telugu meaning by Namadi Venkatarāya (R 947 (a)), (x) *Nāmaliṅgānuśāsana* with Telugu commentary by Rāmacandrādhīvarin (R 949), (xi) *Nāmaliṅgānuśāsana* with Telugu commentary by Kasturimallakavi (R 958), (xii) *Nāmaliṅgānuśāsana* with Tamil commentary by Venkateśvara, (xiii) *Nāmaliṅgānuśāsana* with Tamil commentary by Vaidyanāthādhīvarin (R 11098 (a)), (xiv) *Nāmaliṅgānuśāsana-padārthavivaraṇa* (R 1253), (xv) *Amarakośapadavivṛti* by Vengalalingayasūri (D 1697), (xvi) *Nāmaliṅgānuśāsana-vyākhyā* by Raviśarmarāja (R 4427), and (xviii) *Nāmaliṅgānuśāsana-vyākhyā* by Subhūticandra (R 2933).
5. See, Introduction on *Dharaṇikośa* of Dharaṇīdāsa, p. 10 (Poona, 1968)

mitra in 1961, while I was preparing a list of 500 Sanskrit Manuscripts in my family possession. The first is an indexical work which enumerates the words and verses used in the *Amarakośa* for each word. It frequently quotes critical and aphoristic excerpts from the *Vyākhyāsudhā* of Bhānuji Dikṣita.[6] It is incomplete. The available fragment of 16 folios contains the commentary for the first 9 sections (*vargas*) of the first *Kāṇḍa*. The second by Ācārya Kṛṣṇamitra which is offered here to Sanskrit scholars is a brilliant exposition of the text on the lines of Kṣīrasvāmin's *Amarakośodghāṭana* and Bhānujidikṣita's *Vyākhyāsudhā*.

The present edition of Kṛṣṇamitra's commentary is based on the single manuscript mentioned above, as no other copy of the work has come to my notice as yet. The MS. bears the library No. 32 and dates back to 1868 V. S. (=1811 A. D.) It is written on country paper. It consists of 244 folios of $12\frac{1}{2}\times4\frac{3}{4}$ inches. The folios belonging to each *Kāṇḍa* are separately numbered. Each folio contains 8-10 lines on average except the folios Nos. 51 and 52 of the third *kāṇḍa* which contain fifteen lines. The MS. is fairly correct. It is written with black ink in a big, bold and readable hand writing. Most of the vocables are indicated by straight strokes upon them. Yellow pigment is used to cancel the wrong letters. The corrections are made in the left or right margin of the respective folios The name of the scribe is Vasīlāla.

6. शिवो मे स्ता शिवा येन शिवायामरमर्चिराम् । विदधे बाल्बोधाय पर्त्तेर्पिर्युर्थस्थभिक्षुक ॥१॥ नामसङ्ख्योदिपधानामधिकारमिह स्मरेत् । उक्त व्याख्यासुधाया यत्तद्व्याख्यान क्वचित्क्वचित् ॥२॥
(Invocatory verses of the *Amarasucika*) (No 511)

The author of the commentary is Acārya Kṛṣnamitra, as is evident from the colophons at the chapters' end. That he was a devotee of Lord Viṣṇu, is obvious from the introductory verse and the commentary's commencement with invocation to Śrī Rāma. His mention of over 500 colloquial words (See Appendix) in the commentary which are still used in the Avadhi and Bhojapuri regions suggests that he was a native of Northern India. His use of Nepala,[7] *Uttarāpatha*[8] and *Uttaradesa*[9] also strengthens the same conclusion.

The name, Kṛsnamitra is not unknown to Sanskritists. We know of the grammarian Kṛsnamitra who wrote Bhāvapradipa on the *Śabdakaustubha*, and *Siddhāntakaumudi atnārnava* on the *Siddhāntakaumudi*. This Kṛsnamitra was the son of Rāmasevaka who belonged to the 18th century A D. Among my hereditary manuscripts, I have one on the Āyurveda, namely *Yogataranginī* the authorship of which is ascribed to Kṛsnamitra. The reference to a Kṛsnamitra Ācarya (18th 19th centuries) who wrote about a score of philosophical works is found in the Bibliography of Indian philosophy, Vol I edited by Karl H. Potter.[10] There

7 cf *Amarakośaṭīkā*, 2 4 128

8 Ibid 2 4 129

9 Ibid 2 4 153

10 (i) *Anumiti paramarśa* (NV), (ii) *Bādha buddhi pratibandhakatā vicara* (NV), (iii) *Bhaṭṭarkataranginī* (NV), (iv) Pradipa on Bhāvānanda's *Bhavarandi*, (v) Tīkā on Gadadhara's *Gadadhari*, (vi) *Laghunyayasudha* (NV), (vii) *Laghusāmagrivyapti* (NV), (viii) *Laghutarka sudhā* (NV), (ix) Tika on Raghunathaśiromani's *Nañvāda*, (x) Vyākhya on *Padārthatattva nirūpana*, (xi) *Padārthapārijāta* (V), (xii) *Ratnāvalivādasudhāṭika* (NV).

is also a gloss by Krsnamitrâcārya on the Kumârasambhava of Kalidāsa[11] Since these works are not accessible to me, I am unable to say if their author is only one or different It is also not possible to maintain the identity of the lexicon's commentator with his name sal es If the frequent references to Panini's *Astadhyāyī*, Patañjali's Mahabhāsya and Katyāyana's *Vaitika* by Krsnamitra in his commentary are of any significance, he may be said to be identical with the Krsnamitra who composed commentaries on Bhattoji Diksita's *Śabdakaustubha* and *Siddhāntakaumudi* But the materials in my possession are too scanty to support this surmise

The other works and authors mentioned by Krsnamitra in his commentary are

Amaramala (1 6 6), *Kāvya* (1 6 18), *Kavyadarśa* (3 3 22), *Kumarasambhava* (3 4 13), *Gita* (3 3 37, 3 3 45, 3 3 103, 3 3 146, 3 3 212 and 3 4 6) *Carakasamhita* (3 3 42), *Chandogya Upanisad* (3 3 110) *Dvirupakosa* (1 1 33), *Nagānanda* (3 4 17), *Natyasastra* (1 7 10) *Pañcatantra* (3 3 37, 3 3 48), *Pracya* (1 7 4), *Prañca* (1 4 7), *Bhattalollata* (1 7 21), *Bhartrhari* (3 3 131), *Bhaguri* (1 3 13), *Bhai apra Kaśa* (2 4 48), *Manu* (2 1 7, 2 1 8 and 2 7 14) *Mala* (2 2 13), *Mudraraksasa* (3 3 79) *Meghaduta* (3 5 9), *Medini* (1 6 6, 3 3 7, 3 3 10 3 3 13 14, 3 3 16, 3 3 60, 3 3 169, 3 3 198,

---

(xiii) *Samagrii ādartha* (NV) (xiv) Commentary on Iśvara krsna s *Sankhya kārika* (s) (xv) *Tika* on Gadadhara's *Śakti vada* (xvi) *Siddhanta rahasya* (NV) (xvii) *Tarka pratibai dha rahasya*, (xviii) *Prakaśa* on Raghunathaśiromani s *Tattva cintamani* Didhiti and (xix) *Tattvamimamsa* (pp 355 356) (Delhi, 1970)

11 Cf A History of Sanskrit Literature by S N Dasgupta and S K De, Vol I fn 1, p 74 (University of Calcutta, 1966)

3.3.225, 3.3.231 and 3.6.18), *Rakṣita* (2.9.18), *Raghuvaṁśa* (3.3.22, 3.3.43, 3.3.95 and 3.3.144), *Rabhasa* (3.6.18), *Rāmāśrama* (1.7.7 and 2.4.156), *Viśva* (1.1.44, 3.3.58, 3.3.115, 3.3.121, 3.3.140, 3.3.141 and 3.6.18), *Viṣṇu Purāṇa* (3.3.22), *Veṇīsaṁhāra* (3.3.136), *Vaidya* (2.6.66), *Śakaṭāyana* (1.1.6), *Śiśupālabadha* (3.5.9), *Sabhya* (1.8.4), *Saṅgīta-ratnākara* (1.7.9), *Saṅgītaśāstra* (1.7.6), *Sudhā* (2.8.16), *Smṛti* (1.1.55) and *Svāmī* (1.6.6, 1.1.35, 1.3.4, 1.3.16, 1.3.19, 1.3.27, 1.3.36, 1.8.3, 1.8.4, 2.4.121, 2.4.124, 2.6.71, 2.9.18, 2.9.26, 2.9.27-28, 3.3.12, 3.3.133, 3.3.168, 3.6.8 and 3.6.18).

Most of the works and authors listed above are of earlier orgin and they do not provide clues in ascertaining the date of Kṛṣṇamitra. What is relevant here is the references to earlier commentators of the *Amarakośa*, namely Kṣīrasvāmin and Rāmāśrama. They are also frequently quoted by Kṛṣṇamitra as *anye*, *apare*, *eke*, *kecit* and *yattu*. Rāyamukuṭa is twice quoted. There are also references to some commentators preceding and succeeding Kṣīrasvāmin. But it is not possible to identify them in view of the absence of their commentaries. Kṣīrasvāmin, Rāyamukuṭa and Rāmāśrama are not only quoted as authorities but are sometimes adversely criticised by *Kṛṣṇamitra*. Kṣīrasvāmin and Rāyamukuṭa are certainly older to Rāmāśrama who is also called Bhānujidīkṣita. Since Kṛṣṇamitra explicitly quotes Rāmāśrama and his *Vyākhyāsudhā* on the *Amarakośa*, we can accept the *Vyākhyāsudhā's* date as the earlier limit to the date of Kṛṣṇamitra's commentary, the later limit being of course A. D. 1811, the date of the MS. in my possession Bhānuji is generally assigned to the earlier half of the 17th century A. D. Prof. P. K. Gode

identifies Kirtisimha, the Baghel patron of Bhanuji with Fateh Singh, the founder of Sohawal state in Baghelkhanda in central India, and ascribes Bhānuji to the period A D 1620 to 1660[12] Since Bhanuji's commentary exerts much influence on Krsnamitra, and enjoys a celebrated position in his commentary, we may assume that Krsnamitra composed his commentary nearly a century after the composition of Bhanuji's *Vyakhyasudha* i e sometime in the fifties of the 18th century A D This can also be confirmed by the date of the manuscript which is the later limit of the commentary's date As the MS is dated A D 1811, Krsnamitra must have composed his commentary many years earlier than this date In short, the commentary might have been written in the later half of the 18th century

Now a word about the edited text All attempts have been made to make the book useful and free from mistakes English meanings of the words are given in footnotes and the number of the synonyms is given in rectangular brackets Best efforts have been made to verify quotations and mention their original sources In cases of alterations and corrections, the readings of the manuscript have been given in the footnotes B K and M are the main abbreviations used for Bhanuji Diksita, Krsnamitra and the manuscript respectively Inspite of all possible care, some misprints have occurred especially in the footnotes because of oversight in proof reading for which I crave pardon from scholars

---

12 Cf A contemporary Manuscript of Bhanuji Dikṣita's Vyakhyasudha in studies in Indian Literary History by P K Gode, Vol III, pp 26 30 (Poona 1956)

I feel called upon to express my gratitude to the Ministry of Education and Social Welfare, Government of India for assisting me financially in the publication of this rare text. I am highly thankful to Dr. R. Raghavan, Prof. and Head of the Deptt. of Sanskrit (Rtd.) from whom I received inspiration and advice in bringing out the edition. Grateful thanks are due to Dr. T. M. P. Mahadevan, Director, Centre of Advanced Study in Philosophy, University of Madras, and Dr. K. Kunjunni Raja, Prof. and Head of the Deptt. of Sanskrit, Madras University and Dr. V.P. Upadhyaya, Prof. and Head of the Deptt. of Sanskrit, Gorakhpur University (Rtd.) for their valuable suggestions. Sincerest thanks are due to Shri A.P. Tripathi, Shastri, Reporter, Bihar Vidhan Sabha, Patna for taking very great pains in making all arrangements for timely publication of the book, and for easing all problems arising from my overseas stay. I am also thankful to many of my colleagues and friends, especially Shri R. N. Choudhary who extended their whole-hearted co-operation by supplying some materials useful in preparing the introduction.

Finally, I wish to thank my wife Indira Mishra for her active co-operation in preparation of the work.

Kuala Lumpur
21-1-1972.

Satyadeva Mishra

CONTENTS

अमरकोशः

कृष्णमित्रटीकोपेतः

प्रथमः काण्डः

१. स्वर्गवर्गः

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ॥ १ ॥

टीका

श्रीरामायनमः । कोशव्युत्पादनं रेखागवयन्यायमाश्रितम् ।
पद्यार्पितपदं प्रेष्ठं प्रेप्सनामद्वयार्थकम् ॥

यस्येति—हे धीराः स भगवान् सेव्यताम् ।[1] धैर्यशालिनामेव सेवाक्षमत्वादुक्तं धीरा इति । स कः ? यस्य गुणाः शाम्यादयोऽणिमादयो[2] वा अनघा निष्पापाः । कथं भूतस्य ? ज्ञानदययोः सिन्धोः, समुद्रस्येव विपुलाधारस्य ज्ञानवत्त्वेन परोपकार-योग्यतामेव्यस्त्वं सूचितम्[3] ज्ञानिनोऽपि प्रयोजनाभावे[4] विमुखकारणेत्याशङ्कानिवृत्तये दयोपादानम् । अगाधस्य अपरिच्छिन्नमहत्त्वस्य[5] नास्ति क्षयो यस्य सोऽक्षयः ।[6] कस्मै प्रयोजनाय ? श्रिये चामृताय च । चद्वयोपादानमुभयो प्राधान्यसूचनाय । नास्ति मृतं मरणं यत्रेत्यमृतत्वाय मोक्षार्थम् ॥ १ ॥

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥ २ ॥

स्वप्रवृत्तिप्रयोजनं दर्शयति—समाहृत्येति । अन्यतन्त्राणि[7] कोशलिङ्गानु-शासनानि समाहृत्य एकीकृत्य सम्पूर्णं न्यूनतारहितं नामलिङ्गबोधकं शास्त्रमुच्यते अनुशिष्यते[8] विविच्य बोध्यतेऽभिधानेन[9] वा संक्षिप्तैः लघूकृतैः प्रतिसंस्कृतैः प्रत्येकं

1. M. reads सेव्यतां 2. M. शम्यादयोऽणिमादयो । 3. M. सूचितं
4. M. ज्ञानिनोऽपि प्रयोजनाभावे 5. M. अपरिच्छिन्नमहत्त्वस्य 6. M. सोऽक्षयः
7. M. अन्यतन्त्राणि 8. M. अनुशिष्यते 9. M. बोध्यतेऽभिधानेन ।

क्रमकथनेन कृतोत्कर्षेरसारादारहितैरिति वा वर्गे सजातीयसमूहे सम्पूर्णं[1] लक्ष्यलक्षणमुक्तम् ॥ २ ॥

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्।
स्त्रीपुन्नपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥ ३ ॥

लिङ्गज्ञानोपायमाह—प्रायश इति। प्रायशो बाहुल्येन[2] रूपस्यावन्तादेर्भेदेन[3] स्त्रीपुन्नपुंसकं ज्ञेयम्। यथा—'लक्ष्मी पद्मालया पद्मा' [अ० १ १. २७] 'पिनाकोऽजगवं[4] धनुः' [अ० १. १. ३५]। कुत्रचित्साहचर्यात्, यथा—'अश्वयुगश्विनी' [अ० १ ३ २१]। क्वचित्तेषां स्त्र्यादीनां विशेषतो विधानात्कथनात्, यथा—'भेरी स्त्री दुन्दुभिः पुमान्' [अ० १ ७ ६], 'क्लीबे त्रिविष्टपम्', [अ० १. १ ६] इति ॥ ३ ॥

भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः।
कृतोऽत्र[3] भिन्नलिङ्गानामनुक्तानां क्रमादृते ॥ ४ ॥

भेदेति। अत्रामरकोशे भिन्नलिङ्गानामन्यत्रानुक्तानां भेदं बोधयितुं द्वन्द्वो न कृतः, तथाहि सति परवल्लिङ्गं स्यात्, यथा—'कुलिशं भिदुरं पविः' [अ० १. १. ४७] इति, न तु कुलिशभिदुरपवय इति। तथैकशेषोऽपि[5] न कृतः, तथाहि सति शिष्यमाणस्यैव लिङ्गं प्रतीयेत, यथा—'नभः स श्रावणो नभाः' [अ० ३ ३ २३२] इति, न तु सश्रावणौनभसौ इति। तथा सङ्करो लिङ्गान्तरसन्निधौ लिङ्गान्तरस्य प्रयोगो न कृतः। साहचर्याद्धि तल्लिङ्गता प्रतीयेत, यथा—'स्तवः स्तोत्रं नुतिः स्तुतिरिति' [अ० १. ६ ११], न तु स्तुतिः स्तोत्रं स्तवो नुतिरिति। एतच्च क्रमादृते यत्र सग्रहश्लोकादौ क्रममात्रं विवक्षितं तत्र भिन्नलिङ्गानां द्वन्द्वादयः कृता एव, यथा—'वर्गाः पृथ्वी पुरक्ष्माभृद्वनौषधिमृगादिभिः' [अ० २. १. १] इति, न तु क्रमाभावेऽपि[6] 'रक्षोगन्धर्वकिन्नराः' [अ० १. १. ११] इत्यत्र कथं द्वन्द्व इति चेत्सत्यं क्रमग्रहणमुपलक्षणं तत्रापि हि क्रमवद्विशेषलिङ्गबोधनेच्छा नास्ति ॥ ४ ॥[7]

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ॥ ५ ॥

त्रिलिङ्ग्यामिति। यत्र त्रयाणां लिङ्गानां समाहारस्तत्र त्रिष्विति पदं प्रयुक्तमिति परिभाष्यते। यथा—'त्रिषु स्फुलिङ्गोऽग्निकणः' [अ० १.१. ५७]।

1. M सपूर्ण 2 M बाहुल्येन। 3 M. आवन्तादेर्भेदेन 4 M पिनाकोऽजगवं
5 M. कृतोऽत्र। 6 M क्रमाभावेऽपि 7. cf Kṛṣṇaswami's Commentary, Amarakos'dghatana, P 2.

तथा मिथुने स्त्री पुल्लिङ्गे द्वयोरिति पदं ज्ञेयम्। यथा—'वह्नुर्द्वयोर्ज्वालकीलौ' [अ० १. १. ५७]। तथा यत्र किञ्चिल्लिङ्गं निषिद्धन्तत्र तद्भिन्नं बोद्धव्य,[1] यथा—'व्योमयानं विमानोऽस्त्री' [अ० १. १. ४८] ति। अत्र स्त्रीत्वे निषिद्धे पुन्नपुंसकयोर्लाभ। तथा तु शब्दोऽन्ते[2] यस्यायशब्द आदिर्यस्य तत्पूर्वं न भजते, किन्तूत्तरान्वयि। 'नगरी त्वमरावती' [अ० १. १ ४५], 'जवोऽथ[3] शीघ्रं त्वरितम्' [अ० १. १. ६४] इति ॥ ५ ॥

स्वरव्ययं स्वर्ग-नाक त्रिदिव-त्रिदशालयाः।
सुरलोको-द्यो-दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥ ६ ॥

स्वरिति। यद्यपि भाष्यमते सञ्ज्ञाशब्दा अव्युत्पन्नास्तथापि स्वरवर्णादि सुढयर्थं शाकटायनमतेन व्युत्पत्ति प्रदर्श्यते। स्वरति अप्राप्त्या[4] उपनापयति स्व। 'स्व शब्दोपतापयो' (स्वा० प० अ०) विच्। सुष्ठु अर्ज्यते स्वर्गं। न्यङ्क्वादित्वात्कु, वजोरिति तु निष्ठायामनिट् (७. ३. ५९) इति निषिद्धम्।[5] नास्त्यकं दु खमत्र 'नभ्राण्नपात्' (६. ३. ७५) इति[6] नञ् प्रकृत्या। तृतीया द्यौस्त्रिदिव। दिवशब्दोऽदन्तोऽपि। 'द्यौ[7] स्त्री स्वर्गे च गगने दिवं क्लीबं तयो स्मृतम्।' इति मेदिनी—(१५८ ११) वचनात्। स्वामी तु दिवौकस इत्यादि वृत्तिविषयेदन्तमाह। त्रिभिर्ब्रह्मादिभिर्दीव्यन्ति प्रकाशन्त इति वा 'इगुपधत्वात्'—(३. १. १३५) क। त्रिदशाना देवानामालय. स्थानम्। द्योतन्तेऽस्या द्यौ। 'बाहुलकात्' (३. ३. १) द्युतेर्डो। दीव्यन्त्यस्या द्यौ दिवेर्दिवि विवपि 'च्छ्वो' (६. ४. १९) इत्यूट् स्यात्[8]। तृतीयं विष्टपं विशन्त्यत्र सुकृतिन इति विशो क [प्रत्यय] स्तस्य तुट्। केचित्तु—उणादौ पिष्टपेति पठित्वा वस्य पकारादेशमाहु। तथा चामरमाला—'त्रिपिष्टो विष्टपोऽप्यस्त्री' इति ॥ ६ ॥[9]

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ ७ ॥

आदितेया दिविषदो लेखा अदितिनन्दनाः।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥ ८ ॥

---

1. M. बोद्धव्य 2. M शब्दः चान्ते 3 M. जवेऽथ 4 M. अप्राप्त्या 5 The View Criticised, here, is of Rāya Mukuṭa. See Bhānuji Dikṣita's Commentary Rāmās'rami, p. 4. Chow. Edn, 1970. 6 M. नभ्राण्नपा'दि 7. M.द्यौ 8 M. दिवेर्दिवि विवपि च्छ्वोरूठ् स्यात् 9. Heaven. [9]

बहिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः ।
वृन्दारका दैवतानि पुंसि वा देवताः[1] स्त्रियाम् ॥ ६ ॥

न म्रियन्ते अमरा । 'पचाद्यच्' (३ १ १३४)। निष्क्रान्ता जराया निर्जरा । दीव्यन्तीति देवा । 'पचाद्यच्' (३ १ १३४) । त्रिर्दश त्रिदशा । 'सङ्ख्ययाऽव्यया—'(२ २ २५) इति बहुव्रीहि । तिस्रो दशा अवस्था येषा ते त्रिदशा इति वा । विबुध्यन्ते विबुधा 'इगुपध—'(३ १ १३५) इति क । सुरन्ति सुरा । सुर ऐश्वर्ये (तु० प० सें०) क । सुरा इत्येषामिति वा । सुष्ठु पर्व चरित येषा त [सुपर्वाण]। सुष्ठु मनो येषा ते सुमनस । दिवि ओका निवासोऽस्य । दिवमोक इति वा, पृषोदरादित्वात् (६ ३ १०९) इत्यस्य ॥ ७ ॥ आदित्या अपत्यान्यादितया । 'कृदिकारात् (ग० सू० ४ १ ४५) इति ङीपन्तात् 'स्त्रीभ्यो ढक्' (४ १ १२०)। दिवि सीदन्ति वर्तन्ते दिवि,षद षद्लृ 'सत्सूद्विष[2]—'(३ २ ६१) इति क्विप् । 'हृद्द्युभ्या च' (वा० ६ ३ ९) इति ङेरलुक् । 'सुषामादिषु च (८ ३ ९८) इति ष । पक्षे द्युसद । लिख्यन्त चित्रादौ लेखा । 'अकर्तरि—'(३ ३ १९) इति कर्मणि घञ् । 'दित्यदित्या—'(४ १ ८५) इति ण्य, आदित्या । ऋशब्दोऽदितिवाची, ततो भवन्ति ऋभव । 'मितद्र्वादिभ्य उपसङ्ख्यानात्' (वा० ३ २ १८०) डु । नास्ति स्वप्नमेषाम् [अस्वप्ना] । म्रियन्तेऽत्रेति मर्तो[3] भूलोक । 'हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्' (उ० ३ ८६) । तत्र भवा अप्युपचारान्मर्ता ।[4] 'नवमूरमर्तर्यविष्टेभ्य—(वा० ५ ४ ३६) इति स्वार्थे यत् । तद्भिन्ना अमर्त्या । अमृतमन्धोऽन्नमपाममृतान्धस ॥ ८ ॥ बहिरग्निर्मुखं यषा ते । क्रतून् क्रतुषु वा भुञ्जते । गीरव निग्रहानुग्रहसमर्था वाणोऽस्त्र[5] येषा त गीर्वाणा । प्रशस्त वृन्द यषा वृन्दारका । 'शृङ्गवृन्दाभ्यामारकन्' (वा० ५ २ १२०) । देव एव देवता सैव दैवत तदन्तात् स्वार्थे प्रज्ञाद्यण् (५ ४ ३८) । रूपभेदात् क्लीबता । पुंसीत्युक्ते पुंस्त्वम् । देवपर्यायाणा पुंस्त्वात्तच्छङ्कानिवृत्तये स्त्रियामिति ॥ ९ ॥[6]

आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवता ॥१०॥

आदित्यादयो द्वादशत्वादिसङ्ख्यना सङ्घचारिण्यो देवता । एकत्व तु समुदाय, वृत्ता शब्दा अवयवेष्वपि वर्तन्त इति[7] न्यायात् । विश्वेदेवास्त्रयोदश, श्राद्धाग्रे

1 M देवता 2 M सत्सूद्विष-3 M मर्तो 4 M—मर्त्या 5 M वाणोऽस्त्र
6 Gods [26] 7 M वर्तन्ते इति

विमान्तीति । 'अपूप्रुपि' (उ० १.१४२) इति क्वन् । वसन्तीति वसवोऽष्टौ । 'शृस्वृस्निहि—' (उ० १.१०) इत्यु । तुष्यन्तीति तुषिता षड्विंशत् । ['रुचि-वचि—' (उ० ४ १८५)[1] इति] कित्च् । आभासन्ते, आभास्वरा चतुष्षष्टि । 'स्थेशभास—' (३ २ १७५) इति वरच् । अनन्त्यनेनानिला , एकोनपञ्चाशत् । 'सलिकल्यनि—' (उ० १.५४) इति इलच् । महाराजशब्दोऽस्त्यया महाराजिका , षट्त्रिंशद्शते । 'महाराजप्रोष्ठपदाट्ठञ्' (४ २ ३५) । साध्यन्ते, आराध्यन्त साध्या द्वादश । एकादश रुद्रा ॥१०॥[2]

विद्याधरोऽप्सरा-यक्ष-रक्षो-गन्धर्व किंनराः ।
पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः ॥११॥

विद्याया धरा जीमूतवाहनादय गुटिकाञ्जनादिधारिणश्च । अप्सु सरन्ति । 'सरतेरसुन्' (उ० ४ २३३)[3] । यक्ष्यन्ते पूज्यन्ते । 'यक्ष पूजायाम्' (चु० आ० से०) । 'अकर्तरि च कारके—' (३ ३.१९) इति घञ् । रक्षन्त्यस्मो रक्षासि । 'रक्ष पालने' (भ्वा० प० से०) । 'सर्वधातुभ्योऽसुन्' (उ० ४ १८९) । गन्ध-मर्वन्ति गन्धर्वा तुम्बुरुप्रभृतयो गायना । 'अर्व गतौ' (भ्वा० प० से०) । 'शकन्ध्वादि' (वा० ६ १.९४) । अश्वमुखात् कुत्सिता नरा किंनरा । पिशाचा पिशिताशना । गूहन्तीति गुह्यका । ण्वुल् 'पृषोदरादित्वात्' (६ ३ १०९) यगागम । निधिरक्षका य यक्षास्त गुह्यका । सिद्ध्यन्तीति सिद्धा विश्वावसुप्र-भृतय । भूतिरस्यास्ति भूत । 'अर्श आदि—' (५ २ १२७)[4] देवा योनिरुत्पत्ति-रेषा देवयोनय , देवाना देवयदृष्टसहितेभ्य परमाणुभ्यो जायन्त वा ॥११॥[5]

असुरा दैत्य-दैतेय-दनुजेन्द्रारि-दानवाः ।
शुक्रशिष्या दितिसुताः पूर्वदेवा सुरद्विष- ॥१२॥

अस्यन्ति देवानसुरा: । 'असेरुरन्' (उ० १ ४२) । सुरविरुद्धत्वाद्वा । दितिर्दं-गुत्वासुरमाता[6] । दीयन्ते । 'स्त्रीभ्यो ढक्' (४ १.१२०), दैतेय. । इन्द्रस्या-

1. M कपिकशति 2 Nine groups of deities (Ganadevata) [1 each] 3 According to the context, the reference should have been made to the Unadi sūtra 'सर्तेरप्पूर्वा-दसि' (४ २३६) which means that the affix असि comes after the root 'सृ' (to move) preceded by the word अप् 4 M अर्श आद्य- 5 Ten kinds of demi gods (devayonis) 6 M. दितिर्दनुश्चासुरमातरौ।

रय ।[1] शुक्रस्य शिष्या । अनीतिवशाद्देवत्वादभ्रष्टा । सुरान् द्विषन्ति सुरद्विषः । 'सत्सूद्विष—' (३ २ ६१) इति क्विप् ॥१२॥

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।
समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः ॥१३॥
षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः —

सर्वं जानाति सर्वज्ञः । सुष्ठु गतं ज्ञानं यस्य सः[2] । बुद्ध्यते बुद्धः । 'मतिबुद्धि' (३ २ १८८) इति क्तः । धर्मेण राजते धर्मस्य राजेति वा । तथेति सत्यार्थे, तथा सत्यं गतं ज्ञानं यस्य । समन्तं पूर्णं भद्रमस्य । भगं माहात्म्यमस्यास्ति । मारं कामं जयति । क्विप् । जयति तपसा लोकं लोकजित् । जयति भवं जिनः । इणषिञ्-' (उ० ३ २) इति नः ॥१३॥ दिव्यचक्षुर्दिव्यश्रोत्रं पूर्वनिवासानुस्मृतिरात्मज्ञानं वियद्गमनं कायव्यूहादिसिद्धिश्चेति षडभिज्ञा[3] ज्ञायमानानि यस्य । दशबलानि यस्य [illegible] । 'दानं शीलं क्षमा वीर्यं ध्यानप्रज्ञाबलानि च[4] । उपायः प्रणिधिर्ज्ञानं दशबुद्धबलानि वै ॥' अद्वयं विज्ञानातिरिक्तवस्तुनिषेधात् । अद्वैतं वदति । 'आवश्यक-' (३ ३ १७०) णिनिः । विनयत्यनुशास्ति[5] । 'ण्वुल्' (३ १ १३३) । मुनिषु इन्द्रः । श्रिया योगभूत्या घनो निबिडः । शास्तीति शास्ता । औणादिकस्तृच्, तेन इट् न ।[6]

शाक्यमुनिस्तु यः ॥१४॥
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।
गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥१५॥

यस्तु सर्वेषु जातः शाक्यमुनिर्बुद्धावतारः[7] ॥१४॥ शाकोऽभिजनोऽस्य[8] शाक्यः । 'शण्डिकादिभ्यो ञ्यः' (४ ३ ९२) शाक्यसिंहः इत्यत्युपमितसमासः, भीमो भीमसेन इति वत् । शाक्योऽपि[9] सर्वार्थेषु सिद्धा निष्पन्नः । शुद्ध ओदनो यस्य सः शुद्धोदनो राजा । 'शक न्ध्वादि' (वा० ६ १ ९४) । तदपत्यं शौद्धोदनिः । गौतमस्तद्गोत्रावतारात् तच्छिष्यत्वाद्वा । 'तस्येदम्' (४ ३ १२०) इत्यण् । अर्कस्य बन्धुः, सूर्यवंश्यत्वात् ॥१५॥[10]

---

1 M इन्द्रस्य भरय [illegible] M स 3 M षट् कभिज्ञा । 4 M च
5 M विनयति अनुशास्ति 6 Buddha [18] 7 M शाक्यमुनि बुद्धावतार [illegible] M शाक अभिजनो स्य 9 M शाक्योऽपि 10 Gautama Buddha [7]

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः ॥१६॥
धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः ॥१७॥

बृंहति वर्धते ब्रह्मा । 'बृहेर्नोऽच्च'[1] (उ० ४.१४५) इति मनिन् । धातोर्नस्याकारादेश । आत्मना भवति । 'भुव सञ्ज्ञान्तरयो ' (३ २.१७९) इति क्विप् । अनेनैव स्वयम्भूशब्देऽपि[2] सिद्धे पुनर्वचनं स्वम्भूनिवृत्त्यर्थम् । सुरेषु ज्येष्ठ । परमे व्योमनि चिदाकाशे तिष्ठति । 'परमे स्थ कित्' (उ० ४ १०) इतीनि [3] । 'तत्पुरुषे कृति—' (६ ३ १४) इति सप्तम्यलुक् । पितृणा मरीच्यादीना पिता । हिरण्यं हिरण्मयमण्डं, तस्य गर्भ इव । हिरण्यस्य गर्भो वा, ब्रह्माण्डप्रभवत्वात् । लोकानामीश । चत्वार्याननान्यस्य[4] ॥१६॥ दधातीति धाता । धातो 'तृच्' ३.१.१३३) । अब्जं योनिरस्य । द्रुह्यत्यसुरेभ्यो द्रुहिण । 'बहुलमन्यत्रापि' (उ० २. ४९) इतीनच् । गुणाभावश्च । विरिङ्क्ते सृते विरिञ्चि. । 'अच इ' (उ० ४. १३९) । पृषोदरादित्वात् (६.३.१०९) नुम् । कमलमासनमस्य । सृजति स्रष्टा । प्रजाना पति. । विदधाति, विसृजति । 'विधाञो वेध च[5]' (उ० ४ २२४) इत्यसुन् । वेधादेश । विशेषेण दधाति । विश्वं सृजति । विधत्ते विधि । 'उपसर्गे घो कि '[6] (३.३.९२) । बाहुलकात् (३.१.११३) कर्तरि ॥१७॥[7]

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥१८॥
दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥१९॥
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥२०॥
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥२१॥
विश्वंभरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः ।

वेवेष्टि व्याप्नोति विश्व विष्णु । 'विषे किच्च' (३. ३९) इति नु । नराणा समूहो नार तदयनमस्य ।[8] 'पूर्वपदात्'—(८. ४. ३) इति ण ।

1. M. बृंहेर्नोऽच्च 2. M. स्वयंभूशब्देनैव 3. M. इति इनि 4. M. चत्वारि आननान्यस्य 5 M. विधाञोवेध च 6. M. उपसर्गे घो कि 7. M. Brahma [20] 8 M. तदयनमस्य: ।

कृष्णो वर्णेन । 'कृषेर्वर्णे' (उ० ३ ४) इति नक् । विकुण्ठाना जीवानामयं नियन्ता । 'तस्येदम्' (४. ३ १२०) इत्यण् । विष्टरो दर्भमुष्टिरिव श्रवसी कर्णावस्य । दाम—उदरे यस्य, बाल्ये चापल्येन मात्रा बद्धत्वात् । हृषीकाणामिन्द्रियाणामीश । प्रशस्ता केशा सन्त्यस्य ।[1] 'केशाद्वोऽन्यतरस्याम्' (५ २ १०९) माया लक्ष्म्या धव , मघोरपत्यमिति वा, तद्वंश्यत्वात् ॥ १८ ॥ दैत्यानामरि । पुण्डरीकमिवाक्षिणी यस्य । 'बहुव्रीहौ सक्थ्यक्ष्णो —'(५ ४ ७३) इति षच् । गा भुव विन्दति गोविन्द । वाराहरूपेणोद्धारात् । 'अनुपसर्गाल्लिम्पविन्द—' (३ १ १३८) इति श । गरुडो ध्वज चिह्नमस्य ।[2] नास्ति च्युतं स्खलन स्वस्थानादस्य । 'गत्यर्था—'(३ ४ ७२) इति क्त । शृङ्गस्य विकार शार्ङ्गं धनु । तदस्यास्ति शार्ङ्गी[3] । विषु नानास्थानेष्वञ्चति[4] विष्वक् । सर्वतो व्यापिनी सेनास्य । जनन जन , तमर्दयति हन्ति जनान्समुद्रस्य दैत्यभेदानिति वा ॥१९॥ इन्द्रमुपगतोऽनुजत्वात् ।[5] उपेन्द्र । इन्द्रस्यावर जात । चक्रं पाणौ यस्य । चत्वारो भुजा अस्य । पद्म नाभौ यस्य । 'अच् प्रत्यन्वव—'(५ ४ ७५) इति योगविभागादच् । मधो दैत्यविशेषस्य रिपु । वसुदेवस्यापत्यम् । 'ऋष्यन्धक—' (४.१ ११४) इत्यण् । सर्वत्र वसतीति वासु , वासुश्चासौ[6] देवश्चेति वा । त्रिषु लोकेषु विक्रम पादन्यासोऽस्य[7] ॥२०॥ देवक्या नन्दन । देवकी गौरादित्वात् देवकानाचष्टे, इति वा णिजन्तात् 'अच इ' (उ० ४ १३८) । 'ततो ङीष्' (वा० ४ १ ४५) । शूरस्यापत्यम्, तद्वंशजत्वात् । बाह्वादित्वात् (४ १ ९६) इञ् । श्रिय पति । पुरुषं पुरुषाणां वोत्तम ।[8] निर्धारणाभावान्न निषेध । आपादलम्बिनी माला वनमाला साऽस्यास्ति । व्रीह्यादित्वात् (५ २ ११६) इनि । बलि ध्वसते । कसस्याराति ।[9] अध कृतमक्षजमिन्द्रियजन्य ज्ञान येन ॥२१॥

विश्व बिभर्ति । 'सञ्ज्ञायां भृतृवृजि[10]—'(३ २ ४६) इति खच् । चैटर्म जितवान् । विशयमुरान् विधु । 'पृभिदिव्यधि—'(उ० १ २३) इति कु । श्रीवत्सो नाम श्वेतरोमावर्तविशेषो वक्षसि लाञ्छनमस्य ॥[11]

वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥ २२ ॥

---

1 M मन्त्यस्य. 2 M चिह्नमस्य 3 M. शार्ङ्गी 4 M नानास्थानेषु अञ्चति 5 M. इन्द्रमुपगतोऽनुजत्वात् 6 M वसुश्च सौ 7. M. पादन्यासोऽस्य 8. M वा उत्तम 9 M कसस्य अरातिः. 10 M. भृवृजि
11 Viṣṇu [39]

अस्य श्रीकृष्णस्य जनक , वसुषु दीव्यति वसुदेव. । पचाद्यच् (३.१.१३४) । आनकैर्दुन्दुभिश्चोपलक्षित. । वसुदेवजन्मनि देवैरानकदुन्दुभिवादनात्[1] ॥२२॥

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रज ।
रेवतीरमणो रामः कामपालो हलायुधः ॥ २३ ॥
नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली ।
सङ्कर्षण. सीरपाणि कालिन्दीभेदनो बलः ॥ २४ ॥

बलेनभद्र श्रेष्ठ । बलम्तु सीमवन् । प्रलम्बं नामासुरं हतवान् । मूलविभुजादिः (वा० ३ २.५) । बलेन दीव्यति । अच्युतस्याग्रजः । रेवत्या रमण. । नन्द्यादिः (३.१.१३४) । रमन्तेऽस्मिन् योगिनो रामः[2] । 'हलश्च' (३.३.१२१) इति घञ् । कामं पालयति । हलमायुधमस्य ॥ २३ ॥ नीलमम्बरं यस्य । रोहिण्या अपत्यम् । शुभ्रादित्वात् (४.१.१२३) ढक् । तालवृक्षोऽङ्को ध्वजोऽस्य[3] । मुसलमस्त्यस्य । सङ्कर्षति संहारमूर्तित्वात्सङ्कर्षण । नन्द्यादित्वात् (३.१.१३४) ल्युः । सीरो हलं पाणावस्य । कालिन्द्या यमुनाया भेदनः । हलेनाकर्षणात् ॥२४॥[4]

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः ।
कंदर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः ॥२५ ॥
संबरारिर्मनसिजः कुसुमेपुरनन्यजः ।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः ॥ २६ ॥

मदयति मदन. । मदी हर्षे (भ्वा० प० से०) । ल्युः (३.१.१३४) । मननं मन्=चेतना । सम्पदादि क्विप् (वा० ३ ३.१०८) 'गमादीना क्वौ' (वा० ६.४.४०) इति नलोपः । यतु[5]—'अनुदात्तोपदेश—' (६.४.३७) इति नलोप. इति । तन्न । क्विपो झलादित्वाभावात् । 'ह्रस्वस्य—' (६.१.७१) इति तुक् । मनो मथ.=मन्मथ । म्रियन्तेऽनेन[6] मारः । करणे घञ् (३.३.१९) । प्रकृष्टं द्युम्नं बलमस्य । मीनो मकरः केतनं ध्वजोऽस्य[7] । कुत्सित. दर्पोऽस्य[8]

1. Vasudeva, the father of Srı Krsna [2] 2. M. रमन्तेऽस्मिन्योगिनो 3. M. मन्त्रकोऽङ्कः ध्वजोस्य 4. Balabhadra [17]. 5. The commentators, like Ksırasvamin and Rāyamukuta. See Amarakośodghatana, p. 7, Poona, 1913. and Ramāśrami, p. 14, Chowkhamba, 1970. 6. M. म्रियन्तेनेन 7. M. ध्वजोस्य. 8. M. दर्पोस्य ।

कदप । 'कम्' इत्यव्यय कुत्सायाम् । दर्पयति दर्प । 'ण्वुल—' (३ १ १३३) । नास्त्यङ्गमस्य[1] । काम्यतेऽनेन[2] काम । 'पुसि सञ्ज्ञायाम्—' (३ ३ ११८) घ । पञ्च शरा अस्य । उन्मादनतापनशोषणस्तम्भनसमोहना शरा । स्मर्यतेऽनेन[3] स्मर । 'पुसि सज्ञायाम्—' (३ ३ ११८) घ ॥ २५ ॥ सवरस्य दैत्यस्यारि । शवरस्तालव्यादिरपि । शृङ्गाररूपेण मनसि जायत '—जनेर्ड' (३ २ ९७) । 'तत्पुरुष कृति— (६ ३ १४) इत्यलुक् । कुसुमानोपवो यस्य । न मनसोऽन्य-स्माज्जायत[4] । पुष्प धनुरस्य । 'वा सञ्ज्ञायाम्' (५ ४ १३३) इत्यनङ् ॥२६॥

ब्रह्मसूर्ऋष्यकेतु स्यादनिरुद्ध उषापतिः ।

ब्रह्मज्ञान सूते ब्रह्मसू । ऋष्यनामा मृग केतुरस्य । उषा बाणस्य पुत्री, तस्या पति । ब्रह्मसूर्ऋष्यकेतू कामस्यैव नामनी इत्यन्य ॥[5]

लक्ष्मी पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥ २७ ॥

लक्षयन लक्ष्मी । 'लक्षेर्मुट् च (उ० ३ १६०) इती प्रत्यय । पद्ममालया यस्या । पद्ममस्त्यस्या । अर्श आद्यच् (५ २ १२७) । एव कमला । श्रयति हरिं श्री । 'क्विब्वचि–' (वा० ३ २ १७८) इति क्विप् दीर्घौ ॥ २७ ॥[6]

शङ्खो लक्ष्मीपते पाञ्चजन्य

लक्ष्मीपते शङ्ख पाञ्चजन्य । पञ्चजन पाताले भव । 'पञ्चजनात् (वा० ४ ३ ५८) इति ञ्य । 'बहिर्देवपञ्चजनेभ्य ञ्य इत्युपसङ्ख्यान नास्ति इत्याहु ॥[7]

चक्र सुदर्शन ।

हरेश्चक्र सुदर्शन । शोभन दर्शनमस्य । 'भाषाया शासियुधि–' (वा० ३ ३ १३०) इति युच् ॥[8]

कौमोदकी गदा

को पृथिव्या मादक कुमादको विष्णु[9] । तस्यय कौमोदकी । गदति गदा ॥[10]

---

1 नास्ति अङ्गमस्य 2 M काम्यतेनेन 3 M स्मर्यतेनेन 4 M मनसोन्यस्माज्जायते 5 M Kama (cupid) [19] 6 Brahmasū, Rṣyaketu Aniruddha and Uṣāpati, all the four according to Kṛṣṇamitra, are the names of Aniruddha But Bhānuji Dīkṣita and some other Commentators include the first two among the names of Kāmadeva 7 Lakṣmī (the goddess of prosperity) [6] 8 Viṣṇu's conch [1] 9 Viṣṇu's discas [1] 10 Viṣṇu's mace [1]

खड्गो नन्दक

नन्दयति दवान्। 'ण्वुल्' (३ ३ १३३) ॥[1]

कौस्तुभो मणि ॥ २८ ॥

कु भुव स्तुम्नाति व्याप्नोति कुस्तुभोऽब्धि.[2], तत्र भव ॥ २८ ॥[3]

गरुत्मान् गरुडस्तार्क्ष्यो वैनतेय खगेश्वर ।
नागान्तको विष्णुरथ सुपर्ण पन्नगाशन ॥ २९ ॥

गरुत पक्षा सन्त्यस्य, गरुत्मान्। यवादित्वान् (८ २ ९) मय (८ २ १०) इति वत्व न। गरुद्भिर्डयंत गरुड । 'डीङ्' (भ्वा० आ स०) 'अन्यस्यापि–'[4] (वा० ३ २ १०१) इति ड । पृषोदरादित्वान् (६ ३ १०९) इति तलोप । तृक्षस्यापत्य तार्क्ष्य, गर्गादित्वान् (४ १ १०५) यञ् । विनताया अपत्यम् । खगानामीश्वर । नागानामन्तक । विष्णो रथ इव । शोभन पर्णं पक्षावस्य, हेमपक्षत्वात् । पन्नगानश्नाति । ल्यु (३ १ १३४) ॥ २९ ॥[5]

शम्भुरीश पशुपति शिव शूली महेश्वरः ।
ईश्वर. शर्व ईशान शङ्करश्चन्द्रशेखर ॥ ३० ॥
भूतेश खण्डपरशुर्गिरीशो गिरिशो मृड ।
मृत्युञ्जय कृत्तिवासा पिनाकी प्रमथाधिप ॥ ३१ ॥
उग्र कपर्दी श्रीकण्ठ शितिकण्ठ कपालभृत् ।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचन ॥ ३२ ॥
कृशानुरेता सर्वज्ञो धूर्जटिर्नीललोहित ।
हर स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तक ॥ ३३ ॥
गङ्गाधरोऽन्धकरिपु क्रतुध्वंसी वृषध्वज ।
व्योमकेशो भवो भीम स्थाणू रुद्र उमापति ॥ ३४ ॥

शमवत्यस्मात् शम्भु । बाहुलकात् वर्तरि मितद्र्वादि (वा ३ २ १८०) डु । ईष्टे ईश । इगुपध–' (३ १ १३५) इति क । पशूना पालकत्वात् पति । शिवमस्यास्ति शिव । 'अर्श आदि' (५ २ १२७)। [illegible] । [illegible] ।

1 Viṣṇu's sword [1] 2 M कुस्तुभस्य ; 3 Viṣṇu's gem (said to be obtained with) 13 other jewels at the churning of the ocean [1] 4 M [illegible] 5 Garuḍa

'स्थेशभास–' (३ २ १७१) इति वरच् । शृणाति शर्वः । 'शॄ हिंसायाम्' (क्र्या० प० से०) । 'कॄगॄशॄ–' (उ० १ १५६) । ईष्टे ईशान । 'ताच्छील्य–' (३ २ १२९) इति चानश् । शं करोति । 'शमि धातो. सञ्ज्ञायाम्' (३ २ १४) इत्यच् 'कृञो हेतु–' (३ २ २०) इति ट,[1] तु अनेनैव बाध्यते । चन्द्र शेख रोऽस्य[2] ॥ ३० ॥ भूतानामोश । खण्डयतीति खण्ड परशुरस्य । गिरीश । गिरिरस्याश्रयत्वेनेति गिरिश । लोमादित्वात् (५ २ १००) शः । मृडयति सुखयति । मृत्यु जयति । 'सञ्ज्ञायां भृतॄवृजि–' (३ २ ४६) इति खच् । कृत्तिश्चर्मवा सोऽस्य[3] । पिनाकोऽस्यास्ति[4] । प्रमथानामधिप ॥ ३१ ॥ उच्यति क्रुधा समवैति उग्रो रौद्रत्वान् । 'उच समवाये' (दि० प० से) । 'ऋज्र–' (उ० २ २८) इत्यादिना रन्, गत्वान्तादेश । कपर्दोऽस्यास्ति[5] । श्री शोभा कण्ठेऽस्य[6] । शितिः काल कण्ठोऽस्य[7] । कपाल बिभर्ति । वाम श्रेष्ठो लोकविपरीतो वामदेव । विरूपाण्यक्षीण्यस्य, त्रिनेत्रत्वात् । त्रीणि लोचनान्यस्य ॥ ३२ ॥ कृशानी रेतोऽस्य[8] । देव्या सोढुमशक्य रेतो वह्नौ क्षिप्तम् । सर्वं जानाति । धूर्जटा जटास्त्यस्य 'जटिर्जटा' [इति द्विरूप कोश] । 'जट सघाते' (भ्वा० प० से०) । 'सर्वधातुभ्य –' (उ० ४ ११७) इतीन् । नील कण्ठो लोहितश्च केशोऽस्ती नील लोहित । हरत्यघ हर । 'हरतेरनुद्यमनेऽच्'[9] (३ २ ९) । स्मर हरति । भृज्यन्ते कामादयोऽनेन[10] भर्गः । 'हलश्च' (३ ३ १२१) इति घञ् । त्रीण्यम्बकानि[11] नेत्राण्यस्य । त्रिपुरस्यान्तक । 'त्रिपुरी' इति भाष्य दर्शनेऽपि[12] लोकाश्रयत्वाल्लिङ्गस्य त्रिपुरमपि ॥ ३३ ॥ गङ्गाया धर । अन्धकनाम्नोऽसुरस्य[13] रिपु । क्रतु दक्षयज्ञ ध्वसते । 'सुपि–' (३ २ ७८) इति णिनि । गङ्गा धारयितु व्योमव्यापिन्य केशा अस्य । भवत्यस्मादिति भव । अप् । बिभेत्यस्मात् । भीम । 'भिय षुग्वा' (उ० १ १४८) इति मक् । तिष्ठति । स्थाणु । रोदयतीति रुद्र । 'रोदेर्णिलुक् च' (उ० २ २२) इति रक् । उमाया पति ॥ ३४ ॥[14]

कपर्दोऽस्य जटाजूट.

क शिर, पिपर्ति कपर्द । औणादिको द । अस्य शिवस्य जटाना जूटा बन्ध ॥[15]

---

1 Cf Amarakos'odghātana, p 8 2 M शेखरास्य 3 M -चर्मवासोस्य
4 M पिनाकास्यास्ति 5 M कपर्दोस्यास्ति 6 M कण्ठेस्य 7. M कण्ठोस्य
8 M रेतास्य 9 M हरतेरनुद्यमने च, 10 M कामादयानेन 11 M त्रीणि अम्बकानि 12 M -दर्शनेपि 13 M अन्धकनाम्नो सुरस्य 14 S'iva [48]
15 S'iva's hair [1]

पिनाकोऽजगवं धनु ।

अस्य धनु । पिनह्यत इति पिनाक । 'पिनाकादयश्च' (उ० ४ १५) इति निपातित । अज ब्रह्माण गच्छति, अजग । साऽस्यास्ति[1] स्वामित्वेनाजगवम् । 'गाण्डचजगात्सञ्ज्ञायाम्' (५ २ ११०) इति व । 'प्रज्ञा—' (५ ४ ३८) अणि, आजगवम् । 'आजवकम्' इति स्वामी ॥[2]

प्रमथा स्यु पारिषदाः

प्रमथ्नन्ति दुष्टान् । अच् । परिषदि भवा । 'परिषदोण्य' (४ ४ १०१) इत्यत्र योगविभागात् ण्येऽपि पार्षद[3] इति पाठान्तरम् ॥[4]

ब्राह्मीत्याद्यास्तु मातर ॥ ३५ ॥

ब्राह्म्यादय परिवारत्वेन वर्तते । मातरा लोकपूज्यत्वात् । "ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथन्द्राणी चामुण्डा सप्त मातर ॥" एता ब्रह्मादिशक्तिदेवता । क्वचिन्कालसङ्कर्षिणीत्यष्टौ मातर । ब्रह्माणीति पाठान्तरम् ॥ ३५ ॥[5]

भूतिर्विभूतिरैश्वर्यमणिमादिकमष्टधा ॥[6]

भवन भूति । ईश्वरस्य भाव ऐश्वर्यम् । 'अणिमा लघिमा चैव महिमा गरिमा तथा । प्राप्ति प्राकाम्यमीशित्व वशित्व चाष्टभूतय ।' अणार्भाव , अणिमा । लघार्भाव लघिमा । महतो भाव । यन ब्रह्माण्डमपि न भाति । गरिमा, गुरुत्वम् । प्राप्तिरङ्गुल्यग्रेण चन्द्रादे । प्रकामस्य भाव इच्छानभिघात । ईशिनो भाव ईशित्वम् । प्रभुत्वम् । येन स्थावरा अप्याज्ञाकारिण । वशिनो भावो वशित्वम् । यन भूमावप्युन्मज्जननिमज्जने ॥[7]

उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥ ३६ ॥
शिवा भवानी रुद्राणी सर्वाणी सर्वमङ्गला ।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ॥ ३७ ॥

---

1. M सास्याति 2 S'iva's low [2] 3 M ण्यपि पर्षद 4 S'iva's attendants –[2] 5 S'even worldly mothers [1 each] 6 Krisnaswami and Bhanuji Diksita read विभूतिभूतिरैश्वर्यमणिमादिकमष्टधा 7 Eight superhuman powers called bhūti SC [1 each]

ओमहेशस्य मा लक्ष्मी । उ मा इति माता तपसा निषिद्धेति ।[1] अजादित्वाट्टाप् । (४ १ ४) । कतस्यापत्यम् । 'सर्वत्र लोहितादि—' (४ १ १८) इति ष्फ । गौरो वर्णोऽस्त्यस्या[2] एव काली । वर्णाविवक्षाया गौराकाला । हिमवतोऽपत्यम्[3] । इष्टे ईश्वरी । स्थेशभास— (३ २ १७५) इति वरचि टाप् (४ १ ४) । पुयोगे तु इश्वरी ॥ ३६ ॥ शिवा स्वस्त श्रेयस्करी । पुयोगे तु शिवी । भवस्य स्त्री । सर्वाणि मङ्गलान्यस्या । अपर्णा तपसि पर्णानाम प्यभोजनात् । पर्वतोऽभिजनोऽस्या ।[4] पर्वतस्येयमितीदमर्थेऽण् (४ ३ १२०) इत्यण् । अपत्ये तु इञ् स्यात् । दु खेन[5] गन्तु शक्या दुर्गा । सुदुरोरधिकरण च' (वा० ३ २ ४८) इति ड । चण्डति कुप्यति चण्डिका । ण्वुल्[6] (३ १ १३३) पचाद्यचि (वा० ३ १ १३४ बह्वादि— [४ १ ४५] ङीपि चण्डी । अम्बे वाम्बिका जगन्मातृत्वात् ॥ ३७ ॥[7]

विनायको विघ्नराजद्वैमातुरगणाधिपा ।
अप्येकदन्त-हेरम्ब-लम्बोदर-गजानना ॥ ३८ ॥

विगतो नायको नियन्ताऽस्य[8] । विघ्नस्य राजा । द्वयोर्मात्रोरपत्यम् । गङ्गाया अप्यपत्यत्वाद्दुर्गाचामुण्डाभ्या पालितत्वाद्वा । गणाना प्रथमानामधिप । एको दन्तोऽस्य[9] । स्कन्दोत्पाटितदन्तत्वात् ।[10] ह् उपसि रम्बते शब्दायते रबि शब्दे [भ्वा० आ० से०] । डेरलुक्[11] । लम्बमुदरमस्य । गजस्येवाननमस्य ॥ ३८ ॥[12]

कार्तिकेयो महासेन शरजन्मा षडानन ।
पार्वतीनन्दन स्कन्द सेनानीरग्निभूर्गुह ॥ ३९ ॥
बाहुलेयस्तारकजिद्विशाख शिखिवाहन ।
षाण्मातुर शक्तिधर कुमार क्रौञ्चदारण ॥ ४० ॥

कृत्तिकानामपत्य कार्तिकेय । महती सेनाऽस्य[13] । शरेषु जन्मास्य । षड् आननान्यस्य । अग्निपत्नीना षण्णा कृत्तिकाना स्तनपानात् । पार्वत्या नन्दन । स्कन्द त्यरीत् । सेना नयति । अग्नेर्भवति । गूहति सेनाम् । इगुपध—' (३ १ १३५) इति क ॥ ३९ ॥ बहुलाना कृत्तिकानामपत्यम् । तारक जयति । विशाखाया जात

1 Cf Kumarasambhava, 1 26 2 M वर्णोऽस्त्यस्या 3 M हिमवतोऽपत्यम् 4 M पर्वतोऽभिजनोऽस्या 5 M दुखेन 6 M ण्वुल् 7 Uma [17] 8 M नियन्तास्य 9 M दन्तोस्य 10 'परशुरामेणोत्पाटितैकदन्तत्वात्' (Vacaspatyam, p 1469) 11 By applying the sūtra 'तत्पुरुषे कृति बहुलम्' (6 3 14) 12 Ganes a [8] 13 M सेनाऽस्य ।

विशाख । 'सधिवेलादि—' (४ ३ १६) अण 'श्रविष्ठाफल्गुनी—' (४ ३ ३४) इत्यादिना लुक् । शिखी मयूरा वाहनमस्य । षण्णा मातृणामपत्यम् । शक्तेर्धर । कुत्सितो मारोऽस्य[1] । कुमारयति क्रीडतीति वा । क्रौञ्च गिरिं दारयति । ण्यन्तात् (३ १ २६) ल्यु (३ १ १३४) । कैलासमस्त्रशिक्षार्थं गच्छन् स्कन्दस्य क्रौञ्चेन मार्गो रुद्धोऽभूत् ॥ ४० ॥[2]

इन्द्रो मरुत्वान्मघवा बिडौजा पाकशासन ।
वृद्धश्रवा सुनासीर पुरुहूत पुरन्दर ॥ ४१ ॥
जिष्णुर्लेखर्षभ शक्र शतमन्युर्दिवस्पति ।
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥ ४२ ॥
वास्तोष्पति सुरपतिर्बलाराति शचीपति ।
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥ ४३ ॥
सङ्क्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहन ।
आखण्डल सहस्राक्ष ऋभुक्षाः

इन्दति इन्द्र । 'इदि परमैश्वर्ये' (भ्वा० प० से०), 'ऋज्रेन्द्र—' (उ० २ २८) इत्यादिना रन् । मरुतो देवा सन्त्यस्य । 'तसौ मत्वर्थे' (१ ४ १९) इति मत्वाज्जश्त्वाभाव । महाते पूज्यते मघवा । 'श्वन्नुक्षन्—' (उ० १ १६०) इति निपातित । बिड भेदकमोजोऽस्य[3] बिडौजा । 'बिड भेदने' (तु० प० से०) 'इगुपध—' (३ १ १३५) इति क । विट्सु प्रजासु ओजोऽस्येति[4] वा । पृषोदरादि (६ ३ १०९) । पाकाना दितिगर्भाणा शासन । वृद्धे श्रवसी अस्य । शोभना नासीरा अग्रेसरा अस्य । शु पूजायाम् ।[5] पुरु प्रभूत हूत यज्ञेष्वाह्वान मस्य । पुराण्यरीणा दारयति । 'वाचयमपुरन्दरौ च' (६ ३ ६९) इति साधु ॥ ४१ ॥ जयनशीलो जिष्णु । 'ग्लाजिस्थश्च—' (३ २ १३९) इति ग्स्नु । लेखेषु देवेषु ऋषभ श्रेष्ठ । शक्नोति शक्र । 'स्फायितञ्चि—' (उ० २ १३) इत्यादिना रक् । शत मन्यवो यागा अस्य । 'षष्ठ्या पतिपुत्र—' (८ ३ ५३) इत्यलुकि कस्कादित्वात् (८ ४ ४८) सत्वे दिवस्पति । सुष्ठु त्राम बल यस्य । गोत्रान् गिरीन् पक्षच्छेदाद् भिन्नवान्[6] । वज्रमस्यास्ति । वसोरपत्य वासव । वृत्र हतवान् ।

---

1 M मारोऽस्य 2 Kartikeya [17] 3 M भेदकमोजोऽस्य 4 M ओजोऽस्येति
5 Therefore, the word derived with the help of indeclinable 'शु' will be 'शुनासीर' 6. M पक्षच्छेदात् भिन्नवान् ।

वर्षतीति वृषा। कनिन् (उ० १.१५७) ॥४२॥ वास्तोर्गृहक्षेत्रस्य[1] पतिरधिष्ठाता। '—वास्तोष्पतिगृहमेधाच्छ च' (४.२.३२) इति निपातनादलुकि षत्वम्। सुराणां पतिः। वलस्यारातिः[2]। शच्याः पतिः। जम्भमसुरं भिनत्ति। णिनि। हरयः पिङ्गा हया अस्य। स्वः स्वर्गे राजते, स्वाराट्। क्विपि 'ढ्रलोपे—' (६.३.१११) पूर्वस्य दीर्घः। नमुचेर्दैत्यस्य सूदनः ॥ ४३ ॥ सङ्क्रन्दयति रिपुस्त्रीः। 'क्रदि आह्वाने रोदने च' (भ्वा० प० से०) ल्युः (३.१.१३४)। दुष्टं रेतश्च्यवनं[3] परदारेषु दुश्च्यवनः। 'चलनशब्दार्थान्—' (३ २ १४८) इति युच्। दुःखेन[4] च्यवते रणाद्वा। तुरं त्वरितं साहयत्यभिभवत्यरीन् तुरं वेगं सहते वा। 'छन्दसि सहः' (३ २.६३) इति योगविभागात् ण्वि। मेघान् वाहयति वर्षयति। आखण्डयति भिनत्त्यरीन्। 'खडि भेदने' (चु० प० से०)। 'वृषादिभ्य' चलच्' (उ० १ १०६)। सहस्रमक्षीण्यस्य। 'बहुव्रीहौ सक्थ्यक्ष्णो[5] '—' (५ ४ ११३) इति षच्। 'ऋभुक्षः स्वर्गवज्रयोः' इति विश्वः। सोऽस्यास्ति[6] ऋभुक्षा। इनि (५ २ ११५)॥[7]

तस्य तु प्रिया ॥ ४४ ॥

पुलोमजा शचीन्द्राणी

तस्य इन्द्रस्य पत्नी ॥ ४४ ॥ पुलोम्नो मुनेर्जाता। 'पञ्चम्यामजातौ' (३.२.९८) इति डः। शचते शची[8]। शच (श्वच) गतौ (भ्वा० आ० से०)। इन् (उ० ४.११८)। 'कृदिकारात्—' (ग० सू० ४ १ ४५) इति ङीप्। इन्द्रस्य स्त्री ॥[9]

नगरी त्वमरावती।

इन्द्रस्य नगरी तु अमरावती। अमराः सन्त्यस्याम्। 'मतौ बह्वच—' [६.३.११९] इति दीर्घः ॥[10]

हय उच्चैःश्रवा

इन्द्रस्य हयः, अश्व उच्चैःश्रवा। उच्चैः श्रवसी अस्य ॥[11]

सूतो मातलिः

तस्य सूतः सारथिर्मातलिः। मतं स्याति मनलः। तस्यापत्यम्। इञ् (४.१.९५)[12]।

1. M. वास्तोः ग्रहक्षेत्रस्य 2. M. वलस्य अरातिः 3. M. रेतः च्यवते 4 M. दुःखेन 5. M. सक्थ्यक्ष्णोः 6 M. सोस्यास्ति 7. Indra [35] 8. M. शचति शची 9. Indrani (Indra's wife). [3] 10. Amaravati (abode of gods or Indra's residence) [1] 11. Indra's horse. [1] 12. Matali, the Charioteer of Indra [1].

नन्दन वनम् ॥४५॥

तस्य वन नन्दनम् । नन्दयतीति । ल्यु (३ १ १३४) ॥ ४५ ॥[1]

स्यात्प्रासादो वैजयन्त

तस्य प्रासादो वैजयन्त । वैजयन्ती पताकाऽस्त्यस्मिन् ।[2] अर्श आदि (५ २ १२७) ।[3]

जयन्त पाकशासनि ।

पाकशासनस्य इन्द्रस्यापत्यमिञ् (४ १ ९५) । जयतीति जयन्त । 'तृभूवहि—'(उ० ३ १२८) इत्यादिना झच् ॥[4]

ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभा ॥ ४६ ॥

इरा उदक तदस्त्यस्मिन्निरावानब्धिस्तत्र भव ऐरावत इन्द्रहस्ती । अभ्र मेधस्तद्रूपो मातङ्ग । अभ्रे आकाशे इति वा । इरया उदकेन वणति, इरावण । 'वण शब्द' (भ्वा० प० से०) । तत प्रज्ञाद्यण् (५ ४ ३८) । अभ्रे खे भाति न भ्राम्यति । बाहुलकादु । अभ्रमोर्वल्लभ ॥ ४६ ॥[5]

ह्लादिनी वज्रमस्त्री स्यात्कुलिशं भिदुरं पवि ।
शतकोटि स्वरु शवो दम्भोलिरशनिर्द्वयो ॥ ४७ ॥

ह्लाद स्फूर्जथुरस्त्यस्या[6] ह्लादिनी । वजति यात्येव न प्रतिहन्यते वज्रम् । 'ऋज्रेन्द्र—' (उ० २ २८) इत्यादिना रन् । कुलिन पर्वतान् श्यति पक्षच्छेदेन तनूकरोति । 'आतोऽनुपसर्गे—' (३ २ ३) क । भिनत्ति तच्छीलम् । 'विदिभिदिच्छिदे कुरच्' (३ २ १६२) । पुनाति पवि । 'अच इ' (उ० ४ १३८) । शत कोटयो धारा अस्य । स्वरति स्वरु । 'स्वृ शब्दोपतापयो' (भ्वा० प० अ०) । 'शृस्वृस्निहि—'(उ० १ १०) इत्यादिना उ । श विद्यतेऽस्य'[7] शव । कशाभ्याम्—'(५ २ १३८) इति व । दम्नोति खेदयति । 'दम्भु दम्भने' (स्वा० प० से०) । औणादिक ओलि । अश्नाति अशनि । 'अर्तिपृधृधम्—' (उ० २ १०२) इत्यनि ॥ ४७ ॥[8]

---

1 Nandana, the garden of Indra [1] 2 M पताका अस्ति अस्मिन् 3 Vaijayanta, the palace of Indra [1] 4 Jayanta, the son of Indra [2] 5 Airavata, the elephant of Indra [4] 6 M स्फूर्जथु रस्त्यस्या 7 M विद्यतेस्य 8 Thunderbolt or Indra's weapon [10]

व्योमयान विमानोऽस्त्री

व्योम्नि यान्त्यनेन। करणेल्युट् (३ ३ ११७)। विमान्ति वर्तन्तेऽस्मिन्[1] देवा विमानम्। अधिकरणे ल्युट् (६ ३ ११७)।[2]

नारदाद्याः सुरर्षयः।

नारं नरसमूहं द्यति भिनत्ति कलहे। सुराश्च ते ब्रह्मादिपुत्रत्वादृषयश्च। [आद्येन तुम्बुरुभरतपर्वतदेवलादयः]॥[3]

स्यात्सुधर्मा देवसभा

सुष्ठु धर्मोऽस्याः[4]। 'धर्मादनिच्—' (५ ४ १२४)। डाबुभाभ्याम्' (४ १ १३) इति डाप्। सहमान्त्यस्यां सभा। 'सभाराजा—'[5] (२ ४ २३) इति निपातनादङ्। देवानां सभा आस्थानगृहम्॥[6]

पीयूषममृतं सुधा॥ ४८॥

पीयते पीयूषम्। पीयरुपन् (उ० ४ ७६)। सौत्रो धातुः। नास्ति मृतमत्र। सुष्ठु धीयते पीयते सुधा। 'आतश्चोपसर्गे (३ ३ १०६) इत्यङ्[7]॥ ४८॥[8]

मन्दाकिनी वियद्गङ्गास्वर्णदी सुरदीर्घिका।

मन्दमकितुं शीलमस्याः। 'अक अग कुटिलायां गतौ' (भ्वा०प०से०) णिनिः। वियति आकाशे गङ्गा। स्वः स्वर्गस्य नदी। पूर्वपदादि (८ ४ ३) णः। सुराणां दीर्घिका॥[9]

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः॥ ४९॥

मिनोति क्षिपत्युच्चत्वाज्ज्योतींषि[10]। 'डुमिञ् [प्रक्षेपणे] (स्वा० उ० अ०) 'मिपीभ्यां रुः' (उ० ४ १०१)। हेम्नोऽद्रिः।[11] रत्नानि सानवोऽस्य[12]। सुराणा-मालयः॥ ४९॥[13]

---

1 M. वर्तन्तेऽस्मिन् 2 Heavenly car (such as puspaka SC) [2]
3 Divine sages, namely Narada, Tumbaru, Bharata SC
4 सुष्ठु धर्मोऽस्याः 5 सभाराजा—6 Council of gods [2] 7 M आतश्चोपसर्गे इति क 8 Nector [3] 9 Celestial river, Akasaganga [4] 10, M क्षिपति उच्चत्वाज्ज्योतींषि 11 M हेमाद्रिः। 12 M. सानवोऽस्य
13 The mountain, Sumeru

पञ्चैते देवतरवो मन्दारः पारिजातकः ।
सन्तान कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ ५० ॥

एते पञ्च देवाना तरवो वृक्षा । मन्दा आरा वाराऽस्य[1] सरलत्वात् । पारिण पारवता नामाव्धेर्जात पारिजात । सन्तन्यते । उपसर्गस्यानात् (३ १ १४०) ण । यस्य सङ्कल्पस्तस्य पूरको वृक्ष । हरेरिन्द्रस्य चन्दनम् ॥ ५० ॥[2]

सनत्कुमारो वैधात्रः

सनत् नित्य कुमार । विधातुरपत्यम् ॥[3]

स्वर्वैद्यावश्विनीसुतौ ।
नासत्यावश्विनौ दस्रा वाश्विनेयौ च तावुभौ ॥ ५१ ॥[4]

स्वर्गस्यवैद्यावश्विनी सुतौ, न असत्यौ । 'नभ्राण्नपाद—' (६ ३ ७४) इति नञ् प्रकृत्या । अश्व प्रशस्त अस्ति अनयो । दस्यत क्षिपतो रोगान् । 'दसु उप 'क्षये' (दि० प० से०) । 'स्फायितञ्चि—' (उ० २ १३) इति रक् । अश्विन्या अपत्यम् । ढक् (४ १ १२०) [तावुभाविति द्वित्वविशिष्टत्वादेकवचनाभाव] ॥५१॥[5]

स्त्रियां बहुष्वप्सरस स्वर्वेश्या उर्वशीमुखा ।

अद्भ्य सरन्ति अप्सरस । सरतेरसुन् (उ० ४ २३७) । बहुष्विति प्रायिकम् । 'अप्सरा ' इति भाष्यप्रयोगात् । स्व स्वर्गस्य वेश्या । उरून् महतोऽश्नुते[6] व्याप्नोति वशीकरोति, उर्वशी । मूलविभुजादित्वात् (वा० ३ २ ५) क । 'घृताची मेनका रम्भा उर्वशी च तिलोत्तमा । सुकेशी मञ्जुघोषाद्या कथ्यन्तेऽप्सरसो बुधै ॥[7]

हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम् ॥ ५२ ॥

हाहा हूहू इत्येतौ आलापानुकारेण वाचकौ त्रिदिवौकसा देवाना गायना । [आद्येन तुम्बुरुविश्वावसुचित्ररथादीना ग्रह] ॥ ५२ ॥[8]

अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात् ॥ ५३ ॥

---

1 M वारास्य 2 Five paradisaic trees [1 each] 3 'Sanat kumara, the son of Brahma [2] 4 उभौ द्वित्वविशिष्टौ 5 Asvinikumaras [6] 6 M महत अश्नुते 7 Celestial damsels [1 each] 8 Celestial musicians, Gandharvas

वर्हि शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुध ।
आश्रयाशो बृहद्भानु कृशानु पावकोऽनल ॥ ५४ ॥
रोहिताश्वो वायुसख शिखावानाशुशुक्षणि ।
हिरण्यरेता हुतभुग् दहनो हव्यवाहन ॥ ५५ ॥
सप्तार्चिर्दमुना शुक्रश्चित्रभानुर्विभावसु ।
शुचिरप्पित्तम्

अङ्गत्यूर्ध्वं यात्यग्नि[1] । औणादिको नि । विश्वानरस्यापत्यम् । ऋष्यण् (४ १ १३४) । वहति हव्य वह्नि [वहि] श्रिघृषु— (उ० ४ ५१) इति नि । वीतिर्भक्ष्यमश्नो वा हूयतेऽस्मिन्[2] । 'हुयामा–' (उ० ४ १६७) इति त्रन् । धन जयति । सञ्ज्ञायाम्—' (३ २ ४६) इति खच् । कृपीटस्य जलस्य योनि । धूमजत्वान्मेघानाम् । ज्वलति[3] ज्वलन । 'जुचङ्क्रम्य—' (३ २ १५०) इति युच् । जाता वेदा अस्मात् । असुन् (४ १८८) । तनू न पातयति, दाहधर्मत्वात् । 'नभ्राण्नपात्—' (६ ३ ७५) इति निपात ॥ ५३ ॥ बृहति वर्धते बर्हि । 'बृहेर्नलोपश्च (उ० २ १०९) इति इस् । पुल्लिङ्गोऽप्ययम्[4] । शुष्यन्त्यनेन शुष्मा । 'अन्येभ्योऽपि—'[5](३ २ ७५) इति मनिन् । सञ्ज्ञापूर्वकत्वान्न गुण । वर्हि कुश शुष्म बलमस्येति वा एव नाम वा । कृष्णो धूमो वर्त्मास्य । शोचीषि ज्वाला केशा इवास्य । 'नित्य समास— (८ ३ ४५) इति ष । उषसि रात्रौ बुध्यते प्रकाशते उषर्बुध । इगुपधनि (३ १ १३५) क । अहरादीनाम्—' (वा० ८ २ ७०) इति र । आश्रयमाधारमश्नाति । 'कर्मण्यण् (३ २ १) । बृहन्तो भानव किरणा अस्य । 'कृश तनू करण (दि० प० से०) । कृश्यति 'ऋतन्यञ्जि—' (उ० ४ २) इत्यानुक् । पुनाति पावक । अनितिअनेन लोकोऽनल[6] । वृषादित्वात् (उ० १ १०६) कन् ॥ ५४ ॥ लोहिता अश्वा अस्य । वायो सखा । शिखा सन्त्यस्य । आशोष्टुमिच्छति । आङ्पूर्वात् शुष (दि० प० अ०) सनन्तात् 'आङि शुष —' (उ० २ १०३) इत्यनि । छान्दसोऽपि भाषाया मत्रविन् । हिरण्य रेतोऽस्य[7] । 'अग्नेरपत्य प्रथम हिरण्यम् इति स्मृत । हुत भुङ्क्ते । दहति । ल्यु (३ १ १३४) । हव्य वाहयति दवान्प्रयति । ण्यन्तात् 'हव्यपुरीषपुरीष्येषु—ण्युट् (३ २ ६५) इत्यय ॥ ५५ ॥ सप्तार्चिष[8] काली करा-

1 M अगति ऊर्ध्वं याति अग्नि 2 M हूयतेऽस्मिन 3 M ज्वलिति 4 M पुल्लिङ्गोऽप्ययम् 5 M अन्येभ्योऽपि 6 M लोकोऽनल 7 M रेतोऽस्य 8 M सप्त अर्चिष ।

लीत्याद्या जिह्वा अस्य ।[1] दाम्यति दमुना । दमेरुनस (उ० ४ २३४) शुक्र तेजोऽस्त्यस्य[2] शुक्र । विभेव वसु धनमस्य । शुचि शोधकत्वात् । अपा पित्त दाहकत्वात् ॥[3]

और्वस्तु वाडवो वडवानल ॥ ५६ ॥

यस्तु उर्वस्य मुनेरपत्यमग्नि । ऋष्यण[4] (४ १ ११४) । वरुणभीताया अस्य मातुरुर्वेण गोपितत्वात् । वडवाया मयो भ्रमुखत्वात्[5] ॥ ५६ ॥[6]

वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेति शिखा स्त्रियाम् ।

वह्नेरिति प्रायोवाद । द्वयो स्त्रीपुसयो । ज्वलति ज्वाल । ज्वलितिक सतेभ्यो ण (३ १ १४०) । स्त्रिया टाप (४ १ ४) कील बन्ध (भ्वा० प० से०) । द्वे । अर्चि । अर्च पूजायाम् (भ्वा० प० से०, चु० उ० से०) 'अर्चि शुचि— (उ० २ १०८) इति इसि । हिनोति हेति । हि गतौ (स्वा० प० अ०) ऊतियूति— (३ ३ ९७) इति निपात । शेते शिखा । शीङ् 'किदग्रस्वश्च (उ० ५ २४) इति ख । त्रीणि ॥[7]

त्रिषु स्फुलिङ्गोऽग्निकणः

स्फुलति चलति तन इङ्गति स्फुलिङ्ग । अग्ने कण । द्वे ॥[8]

सताप सज्वर समौ[9] ॥ ५७ ॥

सतापयति सज्वरयति । ण्यन्तादच् (३ १ १३४) ॥ ५७ ॥[10]

धर्मराज पितृपति समवर्ती परेतराट् ।
कृतान्तो यमुनाभ्राता शमनो यमराड्यम ॥ ५८ ॥
कालो दण्डधर श्राद्धदेवो वैवस्वतोऽन्तक ।

धर्मस्य राजा । पितृणा पति । सम वर्तते रिपौ मित्रे च । परेतेषु मृतकेषु राजते । कृतोऽन्तो[11] विनाशो येन । शमयति शमन । ल्यु (३ १ १३४) । यमेन सयमन राजते । यमयति यम ॥ ५८ ॥ कलयत्यायु कालो वर्णेन वा । मित्त्वाभावात्

---

1 काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वा ।
(Mundaka upanishad 1 2 4) Cp Rgveda 3 6 2

2 M तनोऽस्त्यस्य 3 Agni (fire) [34] 4 M ऋष्यण 5 M भव भ्रवमुखत्वात 6 The submarine fire [3] 7 The flame of fire [5] 8 A spark of fire [2] 9 समानार्थौ समानलिङ्गौ 10 Fire's heat [2] 11 M कृत अन्तो

कालयतीति विग्रह ' इत्यन्ये ।[1] दण्डस्य धर. । श्राद्धस्य देव । विवस्वतोऽपत्यम्[2] । अन्त करोति अन्तक । 'तत्करोति—' (वा० ३ १.२६) इति ण्यन्ताद् ण्वुल् (३.१ १३३) ॥

राक्षस कौणप क्रव्यात् क्रव्यादोऽस्रप आशर ॥५९॥
रात्रिचरो रात्रिचरः कर्बुरो निकषात्मज ।
यातुधान पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६० ॥

रक्ष एव राक्षस । स्वार्थिका क्वचिल्लिङ्गमतिवर्तन्ते । कुणपं शव भोक्तु[3] शीलमस्य । 'शीलम्' (४ ४ ६१) इत्यण् । क्रव्यमाममांसमत्ति । 'क्रव्ये च' (३.२ ६९) इति विट् । पक्वमांसमत्तीति विग्रहे पृषोदरादित्वात् (६ ३ १०९) क्रव्याद । अस्र रक्त पिबति । आशृणोति हिनस्त्याशर[4] । रात्रौ चरति । 'रात्रेः कृति विभाषायाम्' (६ ३ ७२) मुम् । कुर्बुरो वर्णेन । निकषा रक्षसा माता । यातूनि यातना धीयन्तेऽस्मिन्[5] । पुण्यजनो विपरीत लक्षणया । निर्ऋतेरपत्यम् । यातयन्तीति यातु: । 'कमिमनि—' (उ० १ ७२) इति तु । रक्षन्त्यस्माद् । असुन् (उ० ४.१८८) ॥ ६० ॥[6]

प्रचेता वरुण पाशी यादसांपतिरप्पति ।

प्रकृष्ट चेतोऽस्य[7] । वृणोति वरुण । 'कृवृदारिभ्य उनन्'[8] (उ० ३.५३) । पाशोऽस्यास्ति[9] । यादसा जलजन्तूना । 'तत्पुरुषे कृति—'(६.३ १४) इति वालुक् ॥[10]

श्वसन· स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥ ६१ ॥
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।
समीर-मारुत-मरुज्-जगत्प्राण-समीरणा. ॥ ६२ ॥
नभस्वद्वात-पवन पवमान प्रभञ्जना· ।

श्वसन्त्यनेन । स्पृशति स्पर्शन । 'बहुलमन्यत्रापि' (उ० २.७८) इति युच् । वातीति वायु । 'कृवापाजि—'(उ० १.१) इत्युण्[11] मातरि आकाशे श्वयति वर्धते । 'श्वन्नुक्षन्—'(उ०१ १६०) इति निपात ॥६१॥ पृषन्मृगभेदो-

1. See Ramas'rami, p 30 2 M. विवस्वतोऽपत्यम् 3. Yamaraja, the god of death [14] 4 M. हिनस्ति आशर: 5. M. धीयन्तेऽस्मिन् 6. Demon. [14] 7. M. चेतोऽस्य 8. M. कृवृदारिभ्य उनन् 9 M. पाशोऽस्यास्ति 10. Varuna [5] 11. M. इति उण् ।

न्धो[1] वाहनमस्य । गन्धस्य वहः गन्धं वहति । अनन्त्यनेनानिलः ।[2] 'सलिकल्यनि-' (उ० १ ५४) इति इलच् । आशु गच्छत्याशुगः । 'अन्यत्रापि—'(वा० ३ २ ४८) इति ड । समन्यगीरयति प्रेरयति । 'ईर गतौ' (अ० आ० से०)। अच् (३ १ १३४) । युचि (३ २ १४८) तु समीरणः । म्रियन्तेऽनेन[3] मरुत् । 'मृग्रोरुति' (उ० १ ९४) । स एव मारुतः ॥६२॥ नमोऽस्यास्ति[4] श्रयत्वेन । वातीति वातः । 'हसिमृग्रिण्—' (उ० ३ ८६) इति तन् । पुनाति पवनः । 'बहुलमन्यत्रापि'[5] (उ० २ ७८) इति युच् । 'पूङ्यजोः शानन्' (३ २ १२८) । पवमानः । प्रभनक्ति प्रभञ्जनः ॥[6]

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥६३॥
शरीरस्था इमे

प्रसरणेन । अनिति (८ ४ १९) । अनेन प्राणः । 'पुंसि—' (३.३ ११८) इति घ । एवमपसरणेन, समन्तात्, ऊर्ध्वं, व्याप्त्या चेत्यर्थः ॥६३॥ एते वायवः शरीरस्थाः । 'हृदि प्राणो गुदेऽपानः[7] समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥ अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नविपाचनम् । भाषणादिनिमेषादि तद्व्यापारा क्रमादमी ॥'[8]

रंहस्तरसी तु रयः स्यदः ।
जवः

रंहत्यनेन । 'रहि गतौ' (भ्वा० प० से०) । असुन् (उ० ४ १८८) । तरत्यनेन । असुन् (उ० ४ १८८) । रयतेऽनेन ।[9] 'रय गतौ' (भ्वा०आ० से०) । 'पुंसि—' (३ ३ ११८) इति घ । स्यन्दतेऽनेन[10] । 'स्यदो जवे' (६ ४ २८) इति घञन्तो निपातः । जवनं जवः । 'जु' इति सौत्रो (३ २ १५०) धातुः ॥[11]

अथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥६४॥
सत्वरं चपलं तूर्णमविलम्बितमाशु च ।

शिङ्घति[12] व्याप्नोति शीघ्रम् । 'शिघि आघ्राणे' (भ्वा० प० से०) । 'शीघ्रादयश्च' इति निपातः । त्वरतेस्म त्वरितम् । ञित्वरा (भ्वा० प० से०) ।

1 M पृष०-नृषमेदाश्च 2 M अनन्त्यनेन अनिल 3 M म्रियन्तेनेन 4. M. नभःस्याग्नि 5 M बहुलमन्यत्रापि 6 Air or wind [20] 7. M. गुदेपान 8 Five vital airs - *prana, apana, samana, udana* and *vyana* [1 each] 9 M रयत्यनेन 10 M स्यन्दतेनेन 11. Speed [5] 12 M शिङ्घते ।

'विभाषा भावादिकर्मणो' (७ २ ७२) इतीड् भावे तूर्णम् । लङ्घते । 'लघि गतौ' (भ्वा० आ० से०)। 'लङ्घिबह्योर्नलोपश्च (उ० १ २९) इति कु । क्षिपति क्षिप्रम् । 'स्फायितञ्चि–'(उ० २ १३) इति रक् । ऋच्छतीति अरम् । 'ऋ गतौ' (भ्वा०, जु० प० अ०)। अच् (३ १ १३४)। अरमव्ययम् । द्रवति स्म[1] । 'द्रु गतौ' (भ्वा० प० अ०)। 'गत्यर्था–' (३ ४ ७२) इति क्त । त्वरया सह वर्तते सत्वरं चोपति । 'चुप मन्दायां गतौ' (भ्वा० प० से०)। 'चुपेरच्चा पधाया' (उ० १ १११) इति कलप्रत्यय । न विलम्बते स्म । अश्नुते आशु । 'अशू व्याप्तौ' (स्वा० आ० से०) । 'कृवापा–' (उ० १ १) इत्युण् । शीघ्रनाम ॥[2]

सततेऽनारताश्रान्तसन्ततविरतानिश. ॥६५॥
नित्यानवरताजस्रमपि

सतन्यन्ते स्म सततम् । तनोते क्त (३ ४ ७२)। 'समो वा हिततयो' (वा० ६ १ १४४) इति मलोपाभावे सन्ततम् । आङ्ग्रव विपूर्वो रमिर्विरामे ततो नञ्समास । नास्ति श्रान्त श्रमोऽत्र[4] । नास्ति निशात्र, सा हि विरतिस्थान मिति व्यापाराराहित्य लक्ष्यते ॥६५॥ नियत भव नित्यम् । 'त्यब् नेर्ध्रुवे' (वा० ४ २ १०४)। न जस्यति । 'जसु मोक्षणे (दि० प० स०)। नमिकम्पि–' (३ २ १६७) इति र ॥[5]

अथातिशयो भर ।
अतिवेल भृशात्यर्थातिमात्रोद्गाढ निर्भरम् ॥६६॥
तीव्रैकान्त नितान्तानि गाढ-बाढदृढानि च ॥

अतिशयनमतिशय । 'एरच्' (३ ३ ५६)। भरण भर । 'पुमि–' (३ ३ ११८) इति घ, अच् (३ १ १३४) वा । अतिक्रान्तो वेला मर्यादाम् । भृशते । क (३ १ १३५)। अतिक्रान्तोऽर्थ[6] मात्रा च । उद्गाह्ते स्म उग्गाढम् । निरशेषेण भरोऽत्र[7] ॥६६॥ तीवति । 'तीव स्थौल्ये' (भ्वा० प० से०)। बाहुल काद्रक् (उ० २ २८) एकोऽन्तो निश्चयोऽत्र[8] । नितान्यति स्म । 'तमु काङ्क्षा-याम्' (दि० प० से०) क्त । 'बाहृ प्रयत्ने' (भ्वा० आ० से०), 'दृह वृद्धौ' (भ्वा० प० से०)। 'क्षुब्धस्वान्त–' (७ २ १८) इति, 'दृढ स्थूल–' (७ २ २०) इति च निपातितो ॥[9]

क्लीबे शीघ्राद्यमत्त्वे स्यात् त्रिष्वेषा सत्त्वगामि यत् ।॥६७॥

1 M द्रवते स्म 2 quick [11] 3 B सततम् 4 M श्रमात्र 5 Continual [9] 6 M अतिक्रा तार्थं 7 M भरोत्र 8 M एक अन्तो निश्चयोत्र 9 Excess [12]

असत्त्वे अद्रव्यार्थकत्व सति शीघ्रादिद्वयं तं क्लीव स्यात् । यथा—शीघ्र भुङ्क्ते, भृश याति । एषा मध्य यत्सत्त्वगामि द्रव्यवृत्ति तत्तल्लिङ्गम् । यथा—शीघ्रा जरा, शीघ्रो मृत्यु, शीघ्र वय ॥६७॥[1]

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वर ।
मनुष्यधर्मा धनदो राजराजो धनाधिप ॥६८॥
किंनरेशो वैश्रवण पौलस्त्यो नरवाहन ।
यक्षैकपिङ्गैलविल श्रीद पुण्यजनेश्वरा ॥६९॥

कुत्सित बेर देहोऽस्य । कुष्ठित्वात् । त्र्यम्बकस्य सखा । यक्षेषु राजते । मनुष्यस्येव धर्मोऽस्य[3] । स्मश्रुलत्वादि । धन ददाति । देङ् पालने' (भ्वा० आ० अ०) । एव श्रीद । राज्ञा यक्षाणा राजा ॥६८॥ विश्रवसोऽपत्य[4] वैश्रवण । शिवादि (४ १ ११२) विश्रवणादेशा निपातित । पुलस्त्यगोत्रापत्यम् । गर्गादि (४ १ १०५) । नरो वाहनमस्य । क्षुम्नादि (८ ४ ३९) न णत्वम् । यज्यते यक्ष । यक्ष पूजायाम्' (चु० आ० से०) । एक पिङ्गमस्य । पिङ्गनेत्रवान् । इडविडा माताऽस्य । डलयोरेकत्वात् ॥६९॥[6]

अस्योद्यान चैत्ररथम्

अस्य कुबेरस्योद्यानमुपवन[7] चित्ररथेन निर्वृत्तम् ॥[8]

पुत्रस्तु नलकूबर ।

नड कूबर रथावयवो यस्य स पुत्र ॥[9]

कैलासः स्थानम्

अस्य स्थान केलनमस्य केलास स्फटिक । तस्यायम् ॥[10]

अलका पूः

अलका । अल भूषणे (भ्वा० प० से०) । वुन् शिल्पिसञ्ज्ञयो—' (उ० २ ३२) । क्षिपकादित्वात् (वा० ७ ३ ४५) नेत्वम् ॥[11]

---

1 M adds in the left hand margin शीघ्रादिद्वयस्य तु क्रियाविशेषणत्वात्द्रव्ये वर्तमान क्लीवे स्यात् लिङ्गमद्रव्यावस्थान्वित द्रव्य सर्व नेष विशेष्यम् । 2 M देहोस्य 3 M धर्मोस्य 4 M विश्रवसोपत्यं 5 M इलविड मातास्य 6 Kubera [17] 7 M कुबेरस्य उद्यानमुपवन 8 Caitraratha, the garden of Kubera [1] 9 Nalakubara, the son of Kubera [1] 10 Kailasa, the abode of Kubera [1] 11 Alakā, the capital of Kubera [1]

विमानं तु पुष्पकम् ॥७०॥

अस्य विमानं पुष्पकम् । पुष्पमिव । 'इवे प्रतिकृतौ' (५ ३ ९६) कः ॥७०॥[1]

स्यात्किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः ।

किञ्चिन्नरोऽश्वमुखत्वात्[2] कुत्सितो नरो वा । मिनोति मयुः । 'डुमिञ् प्रक्षेपे' (स्वा० उ० अ०), 'भृमृशी—'[3] (उ० १ ७) इत्युः । किंनरनाम ॥[4]

निधिर्ना शेवधिः

निधीयते निधिः । ना इति पूर्वोत्तराभ्यां सम्बध्यते । शेतऽनेन[5] शेवं सुखम् । 'इण्शीभ्यां वन्' (उ० १ १५३) । शेवं धीयतऽस्मिन्[6] । 'कर्मण्यधिकरणे च' (३ ३ ९३) इति किः । निधिनाम ॥[7]

भेदाः शङ्खपद्मादयो निधेः ॥७१॥[8]

इति स्वर्गवर्गः ॥१॥

शाम्यति शमनेन । 'शमेः खः' (उ० १ १०२) । पद्मा लक्ष्मीरस्यास्ति । 'महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव' ॥७१॥[9]

इति स्वर्गवर्गः ॥१॥

द्याद्दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।
नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ॥१॥
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ।
इति व्योमवर्गः ॥२॥

अभ्राति स्वयं गच्छति । अभ्र गतौ (भ्वा० प० से०) । अच् (३ १ १३४) । व्ययति व्योम । व्येञ् (भ्वा० प० स०) । 'नामसीमन्—' (उ० ४ १५०) इति मन्नन्तो निपातितः । पुष्कं वारि राति । अम्बं शब्दं राति । 'अबि शब्दे'

---

1 Puṣpaka, the car of Kubera [1] 2 M किंचिन्नराश्वमुखत्वात् 3 M भृमृशी 4 Kinnara, the mystical being, having the body of a man and the head of a horse [4] M शेतेनेन 5 M धीयतेऽस्मिन् 6 Treasure [2] 7 Kṣīrasvāmī and Bhānuji Dīkṣita read this quarter as भेदाः पद्मशङ्खादयो निधेः 8 Various treasures of Kubera 9 M अन्त अध्यायस्य ।

(भ्वा० आ० से०) । न वमस्ति नभ । मस दीप्तौ (जु० प० से०) । क्विप् (३ २ १७८) । अन्तर्भ्रक्षाण्यत्र[1] । पृषोदरादित्वात् (६ ३ १०९) इत्वम् । गच्छत्यनेन गगनम् । 'गमेर्गश्च' (उ० २ ७७) इति युच् । रवन्यते खम् । ड (वा० ३ २ १०१) ॥१॥ वियच्छति विरमति वियत् । क्विपि (३ २ ७५) मलापं (वा० ६ ४ ४०) तुक् (६ १ ७१) । विष्णो पद विक्रमाऽत्र[2] । आकाशान्ते देवा अत्र । विजहाति सर्वं विहाय । आजहातरसुन् ॥[3]

इति व्योमवर्गः ॥२॥

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।

दिशत्यवकाशं दिक् । 'ऋत्विग्—' (३ २ ५९) इत्यादिना क्विन् । कं वात स्कुभ्नाति विस्तारयति । 'स्कुभ' इति सौत्रो (३ १ ८२) धातु । पृषोदरादित्वात् (६ ३ १०९) सलोप । काशते काष्ठा । 'हनिकुषि[4]—' (उ० २ २) इति क्थन् । आसमन्तादश्नुते व्याप्नोति । हरन्ति नयन्त्यनया 'हृसृरुहि—' (उ० १ ९७) इति । दिशानाम् ॥१॥[5]

प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ।
उत्तरा दिगुदीची स्यात्

प्राञ्चति प्राप्नोति सूर्यं प्राची । 'ऋत्विग्—' (३ २ ५९) आदिना क्विन् । अवाञ्चति । 'अव' इत्यव्यय मध्यार्थे, अपदिशमिति यत् । 'अवो मध्यार्थे' इति स्वामी । प्रति पश्चाद्दिनान्तेऽञ्चति[6] सूर्यम् । पूर्वदक्षिणेति 'सर्वनाम्नो वृत्तिमात्रे पुम्वत्' (वा० ५ ३ २८) । उत्तरत्यतिशयेनोत्तरा । उत्तरमश्चयर्वोऽस्याम्[7] ॥

दिश्यं तु त्रिषु दिग्भवे ॥२॥

दिशि भवं दिश्यम् । 'दिगादिभ्यो यत्' (४ ३ ५४) ॥२॥[8]

इन्द्रो वह्निः पितृपतिर्नैरृतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥३॥
रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः ।
बुधो बृहस्पतिश्चेति दिशां चैव तथा ग्रहाः । [१]

इन्द्राद्यः पूर्वादिस्वामिन ॥३॥[9]

---

1 M विक्रमाथ 2 Sky [16] 3 M हनिकुषि—4 Direction [5] 5 ... पश्चिमाते ... 6 M उत्तरमश्चयर्वो स्यान् । 7 East, west, south and north [2 each] 8 The thing belonging to a direction [1] 9 The lords of eight directions [1 each]

ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ ४ ॥

पुण्डरीकादयः । तत्तुल्यवर्णत्वात् । वामनः खर्वत्वात् । पुष्पमिव दन्ता अस्य । सर्वस्यां भूमौ विदितः । शोभनानि प्रतीकान्यङ्गान्यस्य । एते दिशाधारका गजाः ॥ ४ ॥[1]

करिण्योऽभ्रमुः कपिला-पिङ्गलानुपमा क्रमात् ।
ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती ॥ ५ ॥

करिण्यः हस्तिन्यः । अभ्रं आकाशे[2] भाति । मितद्र्वादित्वात् (उ० १.३७) डु । कपिला वर्णेन । ताम्रौ कर्णौ यस्याः । अञ्जना वर्णेन । 'अङ्गना' इति पाठान्तरम् अञ्जनमस्त्यस्याः । 'मतौ बह्वचः —' (६.३.११९) इति दीर्घः । ऐरावतादिपत्नीनाम ॥ ५ ॥[3]

क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम् ।

दिशोर्मध्यमपदिशम् । 'अप' इति मध्यार्थे । इदं क्लीबमव्ययं च । शरदादित्वात् (५.४.१०७) टच् । दिग्भ्यां विनिर्गता विदिक् । कोणनाम ॥[4]

अभ्यन्तरं त्वन्तरालम्

अन्तरमभ्यन्तरम् । अन्तरमासमन्ताल्लाति अन्तरालम् । मध्यनाम ॥[5]

चक्रवालं तु मण्डलम् ॥ ६ ॥

चक्राकारेण वलते । 'वाड्‌ आप्लाव्ये' (भ्वा० आ० से०) । मण्डं भूषणं लाति । मण्डलनाम ॥ ६ ॥[6]

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ।
धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत् ॥ ७ ॥
घन-जीमूत मुदिर-जलमुग्धूमयोनयः ।

अभ्रति अभ्रम् । 'अभ्र गत्यर्थः' (भ्वा० प० से०) । मेहति सिञ्चति । न्यङ्क्वादित्वात् (७.३.५३) कः । वारि वहति । अण् (३.२.१) । स्तनयति ।

1. Elephants guarding eight directions [1 each] 2. M. अभ्रं मातङ्गी 3 Female elephants of eight directions [1 each] 4. An intermediate region (of the compass [2] 5 Intermediate [2] 6 Circle [2]

'स्तनगदी देवशब्दे' (चु० उ० से०) चौरादिकात् 'स्तनि—' (उ० ३. २९) इति इलु । णे रयू (६ ४. ५५) । वारिवाहको बलाहक । पृषोदरादि (६ ३ १०९) । धाराया धर । तडित सन्त्यस्य[1] । वारि ददाति । अम्बु बिभर्ति ॥ ७ ॥ हन्यते वायुना घन । 'मूर्तौ घन' (३.३ ७७) इति साधु । जीवन जल मूत बद्धमस्मिन् । 'मूङ् बन्धने' (भ्वा० आ० से०) । पृषोदरादि (६ ३ १०९) । मोदन्तेऽनेन[2] मुदिरम् । 'इषिमदिमुदि '(उ० १.५१) इति किरच् । जल मुञ्चति । धूमो योनिरस्य । मेघनाम ॥[3]

कादम्बिनी मेघमाला

कादम्बा कलहंसा सन्त्यस्याम् । ते हि मेघमनुधावन्ति मेघपङ्क्तिनाम ॥[4]

त्रिषु मेघभवेऽभ्रियम् ॥ ८ ॥

अभ्रे भवम् । 'समुद्राभ्राद्घ' (४.४.११८) । छान्दसत्वं प्रायिकम् । मेघभवनाम ॥ ८ ॥[5]

स्तनितं गर्जितं मेघनिर्घोषे रसितादि च ।

स्तनगर्जरसशब्दार्थाः । मेघशब्दनाम ॥[6]

शंपाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ॥ ९ ॥

तडित्सौदामनी विद्युच्चञ्चला चपला अपि ।

शं सुख पिबति । शत ह्रदा जलधारा अस्या । ह्रादोऽस्त्यस्याः ।[7] इरा जलमस्त्यस्य इरावान्मेघ । तस्येयम् । क्षणं प्रभाऽस्याः[8] ॥ ९ ॥ ताडयति । 'ताडेणिलुक्च' (उ० १ ९८) इतीव् । सुदाम्नाऽद्रिणैकदिक्[9] सौदामनी । 'तेनैकदिक्' (४.३.११२) इत्यण् । 'सौदामिनी' इति पाठश्चिन्त्य. । विद्योतते । 'चञ्चु गतौ' (भ्वा० प० से०) । घञ् (३.३.१८) । चञ्चं लाति । 'चुप मन्दायां गतौ' (भ्वा० प० से०) । कलच् (उ० १ १११) । विद्युन्नाम ॥[10]

स्फूर्जथुर्वज्रनिर्घोषे

टुओ स्फूर्जा [वज्रनिर्घोषे] । 'ट्वितोऽथुच् '[11] (३.३ ८९) । स्फूर्जन स्फूर्जथु.[12] । वज्रस्य निर्घोष शब्द । वज्रशब्दनाम ॥[13]

---

1. M. तडितः सन्त्यस्या 2. M मोदन्तेऽनेन 3 Cloud [15] 4 A line of clouds [2] 5. A thing produced from clouds [1] 6. The thunder of clouds [4] 7. M. ह्रादोऽस्त्यस्याः 8. M. प्रभाऽस्याः 9. M. सुदाम्ना अद्रिणा एकदिक् 10 Lightning [10] 11. M. ट्वितोऽथुच 12. M. स्फूर्जथुः 13 A peal of thunder [2]

मेघज्योतिरिरंमद् ॥ १० ॥

अन्योन्यसंघट्टनेन मघाति मृत्य वृक्षादौ ज्योति पतति स इरमद । इरया जलेन माद्यति दीप्यते । अविन्धनत्वात् । 'उग्रपश्येरमद—'(३ २ ३७) इति निपातित । वज्राग्निनाम ॥ १० ॥[1]

इन्द्रायुध शक्रधनुः

इन्द्रस्यायुधम् । शक्रस्यधनु । मेघप्रतिफलिता हि सूर्यरश्मयो धनुराकारेण दृश्यन्ते[2] । इन्द्रधनुर्नाम ॥[3]

तदेव ऋजुरोहितम् ।

तदेव इन्द्रस्य धनुरस्पातवक्राद[4] ऋजु अवक्र रोहितम् । रोहण रोह सञ्जातोऽस्य[5] । तारकादित्वात् (५ २ ३६) इतच् । सरलधनुर्नाम ॥[6]

वृष्टिर्वर्षम्

वर्षण वृष्टि । 'वृषु सेचने' (भ्वा० प० से०) । अन्विधौ भयादीनामुपसङ्ख्यानात (वा० ३ ३ ५६) वर्षम् । वृष्टिनाम ॥[7]

तद्विघातेऽवग्राहावग्रहौ समौ ॥ ११ ॥

तस्या वृष्टेर्निघाते निरोधे 'अवे ग्रहो वर्षप्रतिबन्धे' (३ ३ ५१) इति वा घञ् । वृष्टिविघातनाम ॥ ११ ॥[8]

धारासंपात आसार

धाराणा सपात सतत पतनम् । आसरणमासार । 'सृ स्थिरे' (३ ३ १७) 'भावे' (३ ३ १८) इति घञ् । महावृष्टिनाम ॥[9]

शीकरोऽम्बुकणा स्मृता ।

शीकते । 'शीकृ सेचने' (भ्वा० आ० से०) । 'शृस्नेरन्' (उ० ३ १३१) इति बाहुलकादरन् । जलकणनाम ॥[10]

वर्षोपलस्तु करका

---

1 A flash of lightning [2] 2 M दृश्यते 3 The rain bow [2] 4 M धनु उत्तरवक्रात् 5 M सञ्जातोऽस्य 6 The straight red bow of Indra [1] 7 Rain [2] 8 Drought [2] 9 A heavy down fall of rain [2] 10 A drop of water or rain [2]

वृणोति । 'वृञ् हिंसायाम्' (स्वा० उ० अ०) । 'वृञादिभ्य –' (उ० ५.३५) इति वुन् । क्षिपकादि. । वेनौरी [–नाम] ॥[1]

मेघच्छन्नेऽह्नि दुर्दिनम् ॥ १२ ॥

मेघेनच्छन्नमाच्छादितम् । वदरी [नाम] । १२ ॥[2]

अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ।
अपिधान-तिरोधान-पिधानाच्छादनानि च ॥ १३ ॥

धाञ (जु० उ० अ०) अङ् । अन्तर्धा कि अन्तर्धि. । 'वृञ् आच्छादने' (चु० उ० से०) चौरादिकाल्ल्युट् (३.३.११५) । गतिसमास (२.२ १८) । 'वष्टि भागुरि —' इति वाल्लोप पिधानम् । व्यवधाननाम ॥ १३ ॥[3]

हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ॥१४॥
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥१५॥

हिमा अंशवो यस्य । चन्द्र आह्लादको मस्यति परिणमते । 'चदि आह्लादने' (भ्वा० प० से०), स्फायितञ्चि—'(उ० २.१३) इति रक् । उनत्ति । 'उन्देरिच्चादे.' (उ० १.१२) इत्यु । विशेषेण धयन्ति पिबन्त्यनेन सुरा । बाहुलकात्कु. (उ० १.२२) । सुधायुक्ता अंशवोऽस्य ।[4] ओषधीनामीश., अप्यायनत्वात् ॥१४॥ अद्भ्यो जातोऽब्ज. ।[5] जीवयति । जीवेः 'आतृकन्वृद्धिश्च' (उ० १.८०) । सूतेऽमृतं[6] सोम. । अर्तिस्तुसु—'(उ० १.४०) इत्यादिना मन् । ग्लायति[7] क्षीयते ग्लौ: । 'ग्लानुदिभ्या डौ.' (उ० २.६४) । मृगोऽङ्कोऽस्य[8] । कला निधीयन्तेऽत्र[9] । द्विजाना राजा । शशस्य धरः । नक्षत्राणामीश. । क्षपा करोति, उद्योतयति । चन्द्रनाम ॥१५॥[10]

कला तु षोडशो भागो

कलयति सङ्ख्याति कला । अच् (३.१.१३४) । चन्द्रस्य षोडशो भाग. । कलानाम ॥[11]

---

1. Hail [2] 2. A cloudy day [2] 3. Concealment or covering [8] 4. M. अशवोऽस्य 5. M. जातः कमलः 6. M. सूते अमृतं 7. M. ग्लायते 8. M. मृगोऽङ्केऽस्य 9. M. निधीयन्तेऽस्य 10. Moon [20] 11. A digit of the Moon [1].

बिम्बोऽस्त्री मण्डलंत्रिषु ।

बिम्बति भाति । सौत्रो धातु. । मण्डलनाम ॥[1]

भित्तं शकलखण्डे वा पुंस्यर्धः

भिद्यते स्म भितम् । शक्यते भेत्तुं शकलम् । कलच् (उ० १.११२) । खण्ड्यते खण्ड. । 'खडि भेदने' (चु० प० से०) घञ् । ऋध्नोति अर्धं । 'ऋधु वृद्धौ' (स्वा० प० से०) घञ् । शकल शकलम् । खण्डः खण्डम् ॥[2]

अर्धं समेऽशंके ॥१६॥

'समप्रविभागेऽर्धं नपुंसक खण्डमात्रे पुमान्' इति स्वामी । 'वाच्यलिङ्ग.' इत्यन्ये । 'वा पुसीति पूर्वोत्तरान्वयि' इत्यपरे । खण्डनाम ॥१६[3]॥

चन्द्रिका कौमुदी ज्योत्स्ना

चन्द्रोऽस्त्यस्या । ठन् (५.२.११५) । कुमुदानामियम्, विकासहेतुत्वात् । ज्योतिरस्त्यस्याम् 'ज्योत्स्नातमिस्रा—'(५.२.११४) इति साधु' । ज्योतिर्नाम ॥[4]

प्रसादस्तु प्रसन्नता ।

पदनु (भ्वा० तु० प० अ०) । घञ् । प्रसाद । नैर्मल्यनाम ॥[5]

कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम् ॥१७॥

क ब्रह्माण लङ्कयति हीनता गमयति कलङ्क । 'लकि गतौ' । 'कर्मण्यण्' (३.२.१) । अङ्कयतेऽनेन ।[6] 'अकि लक्षणे' (भ्वा० प० से०) । घञ् । लच्छ लाञ्छि लक्षणे' ।[7] (भ्वा० प० से०) । लाञ्छ्यतेऽनेन[8] चहयति चिह्नम् । 'चह परिकल्पने' (भ्वा० प० से०) । बाहुलकान्नक् । इत्वं च । लक्षयति लक्ष्म । मनिन् (३.२.७५) । चिह्ननाम ॥ १७ ॥[9]

सुषमा परमा शोभा

शोभनं सम सर्वमनया । 'सुविनिर्दुर्भ्य[10] सुपिसूतिसमा.' (८.३.८८) । इति ष । उत्कृष्टशोभानाम[11] ॥

1. Arb or disc. [2] 2 Part [1] 3. A halt portion [1] 4. Moonlight [3] 5 Clearness [2] 6 M. मङ्क्यतेनेन 7. In the Dhatupatha, the root-forms are given as 'लक्ष्-लाछि' i e without 'न्' 8 M. लाञ्छ्यतेनेन 9. Mark [6] 10. M. सुविनिर्दुर्भ्यः 11. Exquisite beauty [1].

शोभाकान्तिर्द्युतिश्छविः ।

शोभयति । 'शुभ शोभायाम्' (तु० प० से०) । अच् । काम्यते । क्तिन् । द्योत्यतेऽनया[1] । 'इगुपधात्कि' (उ० ४.११९) । छ्यति[2] छिनत्त्यसारं छविः । शोभानाम् ॥[3]

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् ॥ १८ ॥
प्रालेयं मिहिका च

अवश्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'श्याद्व्यध—' (३.१ १३१) इति ण । निह्रियते नीहार । घञ् (३ ३.१९) । तोषयति । 'तुषारादयश्च' (उ० ३.१३९) इति आरन् किन् । तोहति । 'तुहिर[4] अर्दने' (भ्वा० प० से०) । 'वेपितुह्योर्ह्रस्वश्च' (उ० २ ५२) इतीनन् । हन्ति हिमम् । 'हन्तेर्हि च' (उ० १.१४७) इति मक् ॥ १८ ॥ प्रलयादागतं प्रालेयम् । 'केकयमित्रयु—' (७ ३.२०) इत्यादिना साधु ॥ हिमनाम ॥[5]

अथ हिमानी हिमसंहतिः ॥

महद्धिमं हिमानी । हिमसमूह [नाम] ॥[6]

शीतं गुणे

गुणे शीतत्वेऽर्थे[7] शीतत्वात् क्लीबम् ॥[8]

तद्वदर्थाः सुषीमः शिशिरो जडः ॥ १९ ॥
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः ।

तद्वन्त गुणवन्त वाचका ये तु अन्यलिङ्गा वाच्यलिङ्गा । 'श्यैङ् गतौ' (भ्वा० प० अ०) । भावेक्त. (३ १.१३४) । द्रवमूर्तिस्पर्शयो श्य' (६.१.२४) इति सम्प्रसारणम् । सुष्ठु सीमा मर्यादा अस्य । सुषामादित्वात् (८.३.९८) ष. । 'सुष्ठु स्यायते सुषीम ' इति स्वामी । 'शश प्लुतगतौ' (भ्वा० प० से०) । 'अजिरशिशिर—' (उ० १.५३) इत्यादिना किरच्, इत्वं च । जलति घनीभवति जडः । जलधान्ये ॥ १९ ॥ शीनं स्त्यानि । शीतलद्रव्यनाम ॥[9]

ध्रुव औत्तानपादिः स्याद्

ध्रुवति ध्रुव. । क (३.१.१३५) । उत्तानपादस्यापत्यम् । ऋष्यणि (४.१.११४) प्राप्ते बाह्वादित्वात् (४.१.९६) इञ् ध्रुवनाम ॥[10]

1. M द्योत्यतेनया 2. M. छ्यति 3. Beauty [4] 4. M. तुहिर 5. M. reads wrongly as : केकयुमित्रयु—6 Snow. [7] 7. A mass of snow [2] शीतत्वेऽर्थे 8 Coldness [1] 9. Cold or a cold thing [7] 10. Dhruva, the son of uttanapāda. [2].

अगस्त्य. कुम्भसम्भव ॥२०॥

मैत्रावरुणिः

अग स्थायति स्तम्भितवान्। मित्रावरुणयोरपत्यम्। ऋषिसमुदायस्यानृषित्वादिञ्। अगस्त्यनाम ॥[1]

अस्यैव लोपामुद्रा सधर्मिणी।

पतिशुश्रूषा लोपेऽमुद्रा। मुदं न राति ददाति। समानो धर्मोऽस्त्यस्या [2] सधर्मिणी, पत्नी। एकम् ॥[3]

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ॥२१॥

न क्षरति नक्षत्रम्। 'नभ्राण्नपात्—' (६ ३ ७५) इति निपातितः। ऋषति ऋक्षम्[4]। 'ऋषी गतौ' (तु० प० से०)। 'स्नुव्रश्चि—' (उ० ३ ६६) इति स कित्[5]। भातीति भम्। 'अन्येष्वपि—' (३ २ १०१) इति ड। तरत्यनया। निपातनाद्दीर्घं [6] तारा। स्वार्थे क तारका। अवतरडु। 'डीङ् गतौ' (भ्वा० दि०, आ० अ०)। डीङो मितद्रवादित्वात् (वा० ३ २ १८०) डु ॥२१॥[7]

दाक्षायण्योऽश्विनीत्यादितारा:

दक्षस्यापत्यानि। 'वा नामधेयस्य' (वा० १ १ ७३) इति वृद्धत्वे 'उदीचां वृद्धात्—' (४ १ १५७) इति फिञ्।
गौरादि (४ १ ४१) ङीप्। नक्षत्रनाम।[8]

अश्वयुगश्विनी।

अश्वं युनक्ति रूपेण। अश्वोऽस्ति[9] रूपणास्त्विना। द्वे ॥[10]

राधा विशाखा

राध्नोति साधयति कार्यं राधा। विशाखेति। 'शाखृ व्याप्तौ' (भ्वा० प० से०)। द्वे ॥[11]

पुष्ये तु सिध्यतिष्यौ

पुष्णात्यर्थान् पुष्यः। सिध्यन्त्यनेनार्थाः। त्विषति। 'त्विष दीप्तौ' (भ्वा० प० अ०)। त्रीणि ॥[12]

---

1 The sage, Agastya [3] 2 M धर्मोऽन्यस्या 3 Lopāmudrā, the wife of Agastya [1] 4 M ऋच्छन् 5 M इति स कित् 6 M निपातनाद्दीर्घं 7 Star [6] 8 Twenty seven lunar mansions known as aśvinī S.C. 9 M अश्वास्ति 10 Aśvinī [2] 11 Viśākhā [2] 12 Puṣya [2]

श्रविष्ठया ॥२२॥

समा धनिष्ठा

श्रव सोऽस्त्यस्या[1] 'श्रविष्ठा ॥२२॥ धनमस्या धनिष्ठा । इयं श्रविष्ठया समेत्यन्वय । द्वे ॥[2]

स्युः प्रोष्ठपदा भद्रपदा स्त्रियाम् ।

प्रोष्ठो गास्तस्येव पादा । मुप्रातसुश्च—' (५ ४ १२०) इति निपातिन । मद्र पद यासा ता । द्वे ॥[3]

मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी ॥२३॥

मृगस्यव शीर्षं शिरोऽस्य[4] । अग्रेहायनमस्या । 'पूर्वपदात्—'(८ ४ ३) इति ण । त्रीणि ॥२३॥[5]

इल्वलास्तच्छिरोदेशे तारका निवसन्ति या ।

'इल स्वप्ने क्षेपणे च (तु० प० से०)। 'सानसिवर्णसि—' (उ० ४ १०७) इति वलच् गुणाभावश्च । 'इन्व्यश्च ' इति पाठे, इन्वति प्रीणयति । 'इति प्रीणने' (म्वा० प० से०)। इदितो नुम् (७ १ ५८)। सञ्ज्ञायां क्वुन् (उ० २ ३२)। क्षिपकादि (वा० ७ ३ ४५) । मृगशीर्षशिरोदेशस्थाना पञ्चाना स्वल्पतारकाणा नाम ॥[6]

बृहस्पति सुराचार्यो गीष्पतिर्धिषणो गुरुः ॥२४॥
जीव आङ्गिरसो वाचस्पतिश्चित्र शिखण्डिज ।

बृहता पति । 'तद्बहतो — (वा० ६ १ १५७) इति निपातित । गिरा पति । 'अहरादीनाम्—' (वा० ८ २ ७०) इति रेफाभावे कस्कादि (८ ३ ४८) 'प । धिषणास्यास्ति । गृणाति, उपदिशति गुरु । 'गॄ शब्दे' (क्र्या० प० से)। 'कृग्राश्च' (उ० १ २४) इति कु ॥२४॥ जीवयति । मृतसञ्जीवनीविद्यावत्त्वात् । अङ्गिरसोऽपत्यम् ।[7] ऋष्यण (४ १ ११४)। 'षष्ठ्या पतिपुत्र—' (८ ३ ५३) इति सत्वविधानादलुगपिवाचस्पति । चित्रशिखण्डिन्न सप्तर्षय तदन्तर्गतोऽङ्गिरा ।[8] नव ॥[9]

---

1 M सोस्त्यस्या 2 धनिण [2] 3 Bhadrapada [2] 4 M शिरोस्य 5 मागशीष [3] 6 Five stars in the head of मृगशिरा or orion 7 M अङ्गिरसोऽपत्यम् 8 M तदन्तर्गतोङ्गिरा 9 Brhaspati (Jupiter) [9]

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः ॥२५॥

शुक्रः रन्ध्रशुक्रद्वारानिर्गमितत्वात् । कवरपत्यम् ।
'कुर्वादिभ्यो ण्यः' (४ १ १५१) । कविस्त्वभेदात् । वष्टि उशना ।[1] 'वशे कनसि' (उ० ४ २३८) । भृगोरपत्यम् । ऋष्यण् (४.१.११४) । कूयते स्यायते कविः 'अच इः' (उ० ४ १३८) ॥२५॥[2]

अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः ।

अङ्गार इव रक्तवर्णत्वात् अङ्गारकः । 'अगि गतौ' (भ्वा० प० से०) । आरत् (उ० ३ १३४) । संज्ञायाम् । को भूमौ जायते । भूमेरपत्यम् । लोहितान्यङ्गान्यस्य । पञ्च ॥[3]

रौहिणेयो बुधः सौम्यः

रोहिण्या अपत्यम् । बुध्यते बुधः । सोमो देवता पितास्य । 'सोमाट्ट्यण्' (४ २ ३२) । त्रीणि ॥[4]

समौ सौरिशनैश्चरौ ॥२६॥

सूरस्यार्कस्यापत्यम् । शनैश्चरः मन्दत्वात् ॥२६॥[5]

तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः ।

ताम्यति तमः । तमु ग्लानौ' (दि० प० से०) । असुन् (उ० ४ १८८) । रहति भुक्त्वा चन्द्रादीन् राहुः । 'रह त्यागे (भ्वा० प० से०) । बाहुलकादुण् । स्वः स्वर्गं भाति । 'दामास्या नुः (उ० ३ ३२) क्षुम्नादि' इत्यके ।[6] 'पूर्वपदात्—' (८ ४ ३) इति [न] पत्वमिति स्वामी । सिंहिकाया अपत्यम् । विधुं तुदति । विध्वरुषोस्तुदः (३ २ ३५) इति मुम् । पञ्च ॥[7]

सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः ॥२७॥

सप्त च ते ऋषयश्च । एषां सर्पपादिर्ययं समपि । चित्र शिखण्डानामस्त्यगाम्[8] ॥२७॥[9]

---

1 M वष्टि उशना 2 Sukracarya (Venus) [6] 3 Mangala (Mars) [5] 4 Budha (Mercury) [3] 5 Sani (Saturn) [2] 6 See Ramagrami, p 50 7 Rahu [5] 8 M शिखण्डानाम् 9 Seven sages Marici, Angiras, Atri, Pulastya Kratu and Vasistha

राशीनामुदयो लग्नं

अश्नुवते व्याप्नुवन्ति गगनं । 'अशू व्याप्तौ' (स्वा० आ० से०)। 'अशिपणाय्यो रुडायलुकौ—' (उ० ४ १३२), इणुप्रत्ययश्च । लगति लग्नम् । 'लगे सङ्गे' (भ्वा० प० से०)। 'क्षुब्धस्वान्त—' (७ २ १८) इति निपातितः । एकम् ॥[1]

ते तु मेषवृषादयः ।[2]

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ॥ २८ ॥
भास्कराहस्करब्रध्नप्रभाकरविभाकराः ।
भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः ॥२९॥
विकर्तनोर्कमार्तण्डमिहिरारुणपूषणः ।
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ॥३०॥
विभावसुर्ग्रहपतिस्त्विषांपतिरहर्पतिः ।
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ॥३१॥

सुवति प्रेरयति कर्मणि लोकं सूरः । 'षू प्रेरणे' (तु० प० से०)। 'सुसुधा-गृधिभ्यः क्रन्' (उ० २ २४)। 'राजसूय—' (३ १.११४) इति सूर्यो निपातितः । इयर्ति अर्यमा । 'श्वन्नुक्षन्—' (उ० १ १६०) इति निपातितः । अदितेरपत्यम् । द्वादश आत्मानो मूर्तयोऽस्य[3] । दिवादिनं करोति । 'दिवाविभा—' (३ २ २१) इति ट ॥२८॥ भास्वराहस्वरौ, कस्कादित्वात् (८ ३ ४८)। बध्नाति तिमिरं ब्रध्नः । 'बन्धेर्ब्रधिबुधी च' (उ० ३ ५) इति नक् । भासः सन्त्यस्य भास्वान् । विवः तजः तदस्यास्ति विवस्वान् । 'वस आच्छादने' (अ० आ० अ०)। क्विप् (३ २ ६६)। सप्त अश्वा यस्य । हरितो[4] नीला अश्वा यस्य ॥ २९ ॥ विकृन्तत्यात्मानं भ्रमणेन तेजः शातनात् । अर्च्यतेऽर्क[5] । 'अर्च पूजायाम्' (भ्वा० प० से०)। घञि (३ ३ १९) कुत्वम् (७ ३ ५२)।

1 A figure of the twelve Zodical signs [1] 2 Zodical signs Mesa (Aries), Vrsa (Yaurus), Mithuna (Gemini), Karka (cancer), Simha (Leo), Kanya (Virgo), Tula (Libra), Vrscika (Scoppio), Dhanu (Sogittorus), Makara (Capricorn), Kumbha (Aquarius) and Mina (Pisces), [1 each]
3 M मूर्तयोस्य 4 M हरित 5 M अर्च्यते अर्कं ।

प्रत्यूषति रुजति कामुकान् । उष रुजायाम् (भ्वा० प० से०) । अह्ना[1] मुखम् । कलयति चेष्टा कस्य । 'अघ्न्यादयश्च (उ० ४ १११) इति यक् । काले साधु 'काल्यम्' इति वा । 'कल्य प्रभात सज्जे च कल्या नीरोगदक्षया' इति शाश्वत । ओषति तम । 'उष दाहे (भ्वा० प० से०) । 'उष कित्' (उ० ४ २३३) इत्यसि ॥ २ ॥ भातु प्रवृत्तम् । प्रभातम् । आदिकर्मणि (३ ४ ७१) क्त । षट् ॥[2]

दिनान्ते तु सायं

दिनस्यान्त सायम् । अव्ययम् । स्यति दिन साय स्याद्व्यधा—' (३ १ १४१) इति ण । दिनान्तस्यैकम् ॥[3]

सन्ध्या पितृप्रसूः ।

सध्यायन्त्यस्याम् । 'ध्यै चिन्तायाम्' (भ्वा० प० अ०) । आतश्चोपसर्गे' (३ ३ १०६) इत्यङ् । पितॄन् प्रसूत । क्विप् (३ २ ७६) । सध्याया द्वे ॥[4]

प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यम् ।

प्रारम्भोऽपर० मध्य चाह्न । राजाह –' (५ ४ ९१) इति टचि अह्नाऽह्न[5] (५ ४ ८८) इत्यह्नादेश । तिस्र सन्ध्या समाहृतास्त्रिसन्ध्यम् । सन्ध्याना मेकैकम् ॥[7]

अथ शर्वरी ॥३॥

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥४॥

शृणाति चेष्टा[8] शर्वरी । शॄ हिंसायाम्' (क्र्या० प० से०) । शॄ–' (उ० २ १२२) इति ष्वरच् ॥३॥ नितरा श्यति तनूकरोति चेष्टा निशा । आतश्चोपसर्गे (३ १ १३६) क । निशीथोऽस्त्यस्या[9] । रात्रि मुखम् । 'रात्रादिभ्यो त्रिप् (उ० ४ ६७) । त्रिस्रो यामा यस्या सा त्रियामा । आद्यान्त यामार्धयोर्दिनव्यवहारात् । क्षणमुत्सव ददाति । क्षपयति चेष्टा क्षपा । अच् । विभाति । [क] वनिप् । 'वना र च' (४ १ ७) । तमोऽस्त्यस्याम्[10] रज्यन्ते

1 M अन्ह 2 Dawn [6] 3 Evening [1] 4 Twilight [2]
5 M प्रारम्भोपर 6 M च हाह्न 7 Three twilights morning, day and evening [1 each] 8 M चेष्टा 9 M निशिथोस्त्यस्या
10 M तमोस्त्यस्या ।

मृगतृष्णा मरीचिका ॥

इति दिग्वर्ग ॥३॥

मृगाणा तृष्णाम्यस्याम् । मरीचिरिव भवति ॥[1]

[इति] दिग्वर्ग ॥३॥

काले दिष्टोऽप्यनेहापि समयोऽपि

कालयति सर्व काल । कल संख्याने (भ्वा० आ० से०)। ण्यन्तादच् (३ १ १३४)। दिश्यतेस्म[2]। तिश्चक्तौ च सज्ञायाम् (३ ३ १७४) इति क्त । न ईहतेऽत्र[3] अनेहा। अमन् (उ० ४ २२३)। सम्येगेति। इण गतौ (अ० प० अ०)। पचाद्यच (३ १ १३४)। कालनाम ॥[4]

अथ पक्षतिः।

प्रतिपद् द्वे इमे स्त्रीत्वे

पक्षस्य मूलम्। पक्षाति[5] (५ २ २५)। प्रतिपद्यते उपक्रम्यते मासोऽनया[6]। द्व ॥[7]

तदाद्यास्तिथयो द्वयो ॥१॥

सा प्रतिपद् आद्या यासा ता। तन्यते तिथि। ऋतन्यञ्जि— (उ० ४ २) इति इथिन्। पृषोदरादि (६ ३ १०९)। एकम् ॥ १ ॥[8]

घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ।

अत्ति तम घस्र। स्फायि— (उ० २ १३) इति रक्। द्यति तमो दिनम्। द्यते[9] क्निन् (उ० २ ४९)। न जहाति कालमह। नञि जहाते (उ० १ १५०) इति कनिन्। दीव्यन्त्यत्र। दिवादिभ्य किन् (उ० ३ १२१) इत्यसच। वासयति। अर्तिसृधृधमि—[10] (उ० ३ १३२) इत्यरप्रत्यय ॥[11]

प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि ॥ २ ॥

प्रभात च

1 Mirage [2] 2 M दिश्यत स्म 3 M इहतत्र 4 Time [4] 5 M पक्षाति 6 M मासोनया 7 The first day of a paksa or forthnight [2] 8 A lunar day (tithi) [1] 9 M द्यन 10 M अर्निसृधृमि—11 Day [5]

प्रत्यूषति रजति कामुकान् । 'ऊष रुजायाम्' (भ्वा० प० से०) । अह्ना[1] मुखम् । कलयति चेष्टा कल्य । 'अघ्न्यादयश्च' (उ० ४ १११) इति यक् । काले साधु 'काल्यम्' इति वा । 'कल्य प्रभात सज्जे च कल्यो नीरोगदक्षया' इति शाश्वत । ओषति तम । 'उष दाहे (भ्वा० प० से०) । 'उष किन्' (उ० ४ २३३) इत्यसि ॥ २ ॥ भातु प्रवृत्तम् । प्रभातम् । आदिकर्मणि (३ ४ ७१) क्त । षट् ॥[2]

दिनान्ते तु सायः

दिनस्यान्त सायम् । अव्ययम् । स्यति दिन साय 'श्याद्व्यधा—' (३ १ १४१) इति ण । दिनान्तस्यैकम् ॥[3]

सन्ध्या पितृप्रसूः ।

सध्यायन्त्यस्याम् । 'ध्यै चिन्तायाम्' (भ्वा० प० अ०) । 'आतश्चोपसर्गे' (३ ३ १०६) इत्यङ् । पितृन् प्रसूते । क्विप् (३ २ ७६) । सध्याया द्वे ॥[4]

प्राह्णापराह्णमध्याह्नास्त्रिसध्यम् ।

प्रारम्भोऽपर० मध्य वाह्न । 'राजाह —' (५ ४ ९१) इति टचि 'अह्नोऽह्न' (५ ४ ८८) इत्यह्नादेश । तिस्र सन्ध्या समाहृतास्त्रिसन्ध्यम् । सन्ध्यानामेकैकम् ॥[7]

अथ शर्वरी ॥३॥

निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।
विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥४॥

शृणाति चेष्टा[8] शर्वरी । 'शृ हिंसायाम्' (क्र्या० प० से०) । 'कृगृ—' (उ० २ १२२) इति ष्वरच् ॥३॥ नितरा श्यति तनूकरोति चेष्टा निशा । 'आतश्चोपसर्गे' (३ १ १३६) क । निशीथोऽस्त्यस्या[9] । राति सुखम् । 'राशदिभ्या त्रिप्' (उ० ४ ६७) । तिस्रो यामा यस्या सा त्रियामा । आद्यान्त्ययामार्धयोर्दिनव्यवहारात् । क्षणमुत्सव ददाति । क्षपयति चेष्टा क्षपा । अच् । विभाति । [व] वनिप् । 'वनो र च' (४ १ ७) । तमोऽस्त्यस्याम्[10] रज्यन्ते

1 M अह्न　2 Dawn [6]　3 Evening [1]　4 Twilight [2]　5 M प्रारम्भोपर　6 M श होइ　7 Three twilights morning, day and evening [1 each]　8 M चेष्टा　9 M निशिथोऽस्त्यस्या　10 M तमोऽस्त्यस्या ।

यामुक्ता अनया। यामा निशिथा सन्त्यस्या । ताम्यन्त्यस्याम् । तमादिनि [1] (५ २ ११५) ॥४॥ रात्रेर्द्वाश्च ॥[2]

तमिस्रा तामसी रात्रि

तमोऽस्त्यस्याम्[3] । 'ज्योत्स्नातमिस्रा–' (५ २ ११४) इति साधु । ज्योत्स्नादिभ्य उपसंख्यानात् (वा० ५ २ १०३) अण् । तामसी अत्यन्धकारयुक्तारात्रि । द्वे ॥[4]

ज्यौत्स्नी चन्द्रिकयान्विता ।

ज्योत्स्नास्त्यस्याम् ज्यौत्स्नी । पूर्ववदण् (वा० ५ २ १०३ । चन्द्रिकया युक्ता प्रकाशवती रात्रि । द्वे ॥[5]

आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी ॥७॥

आगामिवर्तमाने ये अह्नी ताभ्यां युक्ता रात्रि । स–मासान्तविधेरनित्यत्वान्न टच् । आगामि वर्तमाने अहनी पक्षे यस्यामिति बहुव्रीहिर्वा । पूर्वापररात्रियुक्तं दिनमपि पक्षिणी । पूर्वापरदिवसौ पक्षाविव स्त ॥५॥[6]

गणरात्रं निशा बह्व्य

गणानां बह्वीनां रात्रीणां समाहार । 'अह सर्वैकदेश–' (५ ४ ८७) इत्यच् । संख्यापूर्वं रात्रं क्लीबम् । द्वे ॥[7]

प्रदोषो रजनीमुखम् ।

दुष्यति दोषा प्रारब्धा दोषा यस्मिन् । रजन्या मुखमिव । द्वे ॥[8]

अर्धरात्रनिशीथौ द्वौ

अर्धरात्रे । अह सर्वैक–' (५ ४ ८७) इत्यच् । नियतं शेरतेऽस्मिन्निशीथ । 'निशीथगोपीथ–' (उ० २ ९) इति थक् । द्वे ॥[9]

द्वौ यामप्रहरौ समौ ॥६॥

याति याम । 'अर्तिस्तुसु–' (उ० १ १४०) इति मन् । प्रह्रियते दक्षादि रस्मिन् प्रहर । 'पुंसि संज्ञायाम्–' (३ ३ ११८) घ ॥६॥ द्वे ॥[10]

---

1 M तमादिनि 2 Night [12] 3 M ज्योत्स्नायां 4 A dark night [2] 5 A moonlit night [2] 6 A night enclosed with two days [1] 7 A series of nights [2] 8 Nightfall [2] 9 Midnight, [2] 10 One-eigth part of a day [2]

मपर्वसंधिः प्रतिपत्पञ्चदश्योर्यदन्तरम् ।

प्रतिपत्पञ्चदश्योर्यदन्तरं स संधि । स एव पर्वेत्यन्वय । 'पर्वसंधि' इत्येकं नाम, इति प्राञ्च । द्वे ॥[1]

पक्षान्तौ पञ्चदश्यौ द्वे

द्वे पञ्चदश्यौ पूर्णिमामावस्ये पक्षस्यान्तौ । एकम् ॥[2]

पौर्णमासी तु पूर्णिमा ॥ ७ ॥

पूर्णो मासो वर्ततेऽस्याम्[3] । पूर्णमासादण् । पूर्णं चन्द्रस्य पूरणम् । तेन निर्वृत्ता पूर्णिमा । 'तेन निर्वृत्तम्' इत्यर्थे इमप् (वा० ४.४.२०) टाप् (४.१.४) । द्वे ॥७॥[4]

कलाहीने सानुमति

सा पूर्णिमा उदयकाले प्रतिपद्योगात्कलाहीने चन्द्रे, अनुमति । अनुमन्यते । क्तिच् (३.३.१७४) एकम् ॥[5]

पूर्णे राका निशाकरे ।

पूर्णे चन्द्रे तु । राति सुखम् । 'कृदाधारा—' (उ० ३.४०) इति क. । एकम् ॥[6]

अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंगमः ॥ ८ ॥

अमा सह वसतश्चन्द्रार्कावस्याम् ॥[7] । 'अमावस्यदन्यतरस्याम्' (३.१.१२२) इति ण्यति पक्षे वृद्ध्यभाव । दृश्येते द्रष्टुं चन्द्रार्कावत्र । 'पुंसि—' (३.३.११८) इति घ.[8] । चत्वारि ॥ ८ ॥[9]

सा दृष्टेन्दु सिनीवाली

चतुर्दशीयोगाद्दृष्टचन्द्रा या अमा सा सिनीवाली । सिनी सिता रेखा वलति धारयति । 'कर्मण्यण्' (३.२.१) । एकम् ॥[10]

सा नष्टेन्दुकला कुहूः ।

---

1 The junction of the first and fifteenth of a fortnight [1]
2. The last day of a fortnight. [2] 3 M वर्तन्त्याम् 4. Pūrnimā [2] 5. A pūrnima in which moon is one digit less than full 6 A pūrnima with full moon 7. M. वसत चन्द्रार्कावस्याम् 8 M. घ 9. Amavasya the day of the Conjunction of the sun and moon [4] 10 An amavasya in which moon is visible. [1]

नष्टचन्द्रकला अमा कुहूः । कुह्यति । कुह विस्मापने' (चु० उ० से०) । 'नृतिगृध्यो —' (उ० १९१) इति कू बाहुलकात् । एकम् ॥[1]

उपराग ग्रहः

उपरज्यतेऽनेन[2] । 'हलश्च' (३ ३ १२१) इति घञ् । ग्रहण ग्रह । 'ग्रह-वृद्—' (३ ३ ५८) इत्यप् । ग्रहणस्य द्वे ॥[3]

राहुग्रस्ते त्विन्दौ च पूष्णि च ॥ ९ ॥

सोपप्लवोपरक्तौ द्वौ

राहुणा ग्रस्त इन्दु सूर्यश्च ॥ ९ ॥ सोपप्लव उपरक्तश्च । द्वे ॥[4]

अग्न्युत्पात धूपाहितः ।

अग्निकृत उत्पात उपद्रव । उपासन्नमाहित फल यस्य ॥[5]

एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ ॥१०॥

पुष्प विकासोऽस्त्यनयो[6] । युगपच्चन्द्रार्कयोर्बोधने । पुष्पवन्तौ न तु पुष्पवानर्क इन्दुर्वा ॥ १० ॥[7]

अष्टादशनिमेषास्तु काष्ठाः

निमेषोऽक्षिस्पन्दकाल[8] ॥[9]

त्रिंशत्तु ताः कला ।

ता काष्ठास्त्रिंशत् ॥[10]

घास्तु त्रिंशत्क्षणः

ता कलास्त्रिंशत् । क्षणोति क्षण । 'क्षणु[11] हिंसायाम्' (त० उ० से०) ॥[12]

ते तु मुहूर्तो द्वादशास्त्रियाम् ॥११॥

---

1 An amavasya in which moon is not bisible [1] 2 M उपरज्यतेऽनेन 3 Eclipse [2] 4 Sun or moon in eclipse [2] 5 Destruction or danger from fire [1] 6 M विकासोऽस्त्यनयो 7 Sun and moon [1] 8 M निमेषोऽक्षिस्पन्दकाल 9 Kastha, a measure of time [1] 10 Kala, a division of time having thirty Kasthas [1] 11 M क्षणु 12 M Ksana, a measure of time Comprising thirty Kalas [1]

त क्षणा द्वादश, मुहूर्तानि मुहूर्त । 'लिट्चार्थमौहूर्तिके[1] (३ २ १६४) इति निपातित ॥११॥[2]

ते तु त्रिंशदहोरात्र

अहश्च रात्रिश्च तयो समाहार । 'अह सर्व— (५ ४ ८७) इत्यच् । 'रात्राह्नाहा —' (२ ४ २९) इति पुंस्त्वम् ॥[3]

पक्षस्ते दशपञ्च च ।

त अहोरात्रा पञ्चदश, पक्ष्यत पक्ष । 'पक्ष परिग्रहे (भ्वा० चु० प० से०)॥[4]

पक्षौ पूर्वापरौ शुक्लकृष्णौ

शुक्ला मासस्य पूर्व पक्ष । कृष्णस्त्वपर ॥[5]

मासस्तु तावुभौ ॥ १२ ॥

तावुभौ[6] पक्षा मास । मस्यत परिमीयतनेन । 'मसी परिमाणे' (दि० प० स०) ॥ १२ ॥[8]

द्वौ द्वौ माघादिमासौ[9] स्याद् ऋतु

इयर्तिऋतु । 'अर्तेश्च—'(उ० २ ७१) इति तु ॥[10]

तैरयन त्रिभिः ।

तै ऋतुभिस्त्रिभिरयनम् । अयन्त्यनेन[11] ॥[12]

अयने द्वे गतिरुदग्दक्षिणार्कस्य

अयन तु द्वे । अर्कस्योत्तरागतिर्दक्षिणा[13] च । माघाद्या षण्मासा उत्तरायण मिति यावत् ॥[14]

---

1 Muhurta, a time of twelve Ksaṇas [1] 2. A day and night or ahoratra, a period of time equal to thirty Muhūrtas 3 Fortnight, a period of time with fifteen days and nights [1] 4 Bright and dark fortnights [1 each] 5 M तौ उभौ 6 M परिमीयतनन 7 Month, a period of time having two fortnights [1] 8 Ramasram, reads मार्गादिमासौ [redacted] Season (rtu), a period of two months [10] 11 M अयनकॅनेन 12 Ayana, a period of half year Constituted by three seasons [1] 13 M अर्कस्य उत्तरागतिर्दक्षिण 14 Uttarayaṇa and dakṣiṇayana. [1 each]

वत्सरः ॥ ३ ॥

ते द्वे अयने वत्सरः । 'वसेश्च' (उ० ३.७१) इति सरप्रत्ययः । सं- सौतितः ॥ १३ ॥[1]

समरात्रिन्दिवे काले विषुवद्विषुवं च तत् ।

समौ रात्रिन्दिवौ यत्र मेषतुलासंक्रान्ति । विषु साम्येऽव्ययम् ।[2] तद्विद्यतेऽस्य[3] विषुवत् । 'वप्रकरणेऽन्यत्रापि' (भा० वा० ५.२.१०९) इत्युक्तेर्वः । विषुवः ॥[4]

मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ॥१४॥

मृगशीर्षेण युक्ता पौर्णमासी मार्गशीर्षी, सास्त्यस्मिन्[5] । सहते सहः । असुन् (उ० ४.१८८) । एकदेशप्रयोगान्मार्गः । आग्रहायणी पौर्णमासी अस्त्यस्मिन्[6] । 'अग्रहायण्यश्वत्थाट्ठक्' (४.२.२२) ॥१४॥[7]

पौषे तैषसहस्यौ द्वौ

पौष इति । 'पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा । नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ॥' इति क्वचित्पठ्यते । तिष्य. पुष्यवाची । सहोऽस्यास्ति[8] सहस्य । '—मासतन्वो.' (४.४.१२८) यत् । त्रीणि ॥[9]

तपा माघे

तपो स्यास्ति[10] तपाः । तपेरसुन् (उ० ४.१८८) । मघया युक्ता पौर्णमासी अस्त्यत्र । द्वे ॥[11]

अथ फाल्गुने ।

---

1. Year or duration of time having two ayanas or twelve months 2. M. साम्येऽव्ययम् 3 M. तद्विद्यतेऽस्य 4. The period of time when a day and night are of equal hours [2] 5 M. सा अस्ति अस्मिन् 6 M. अस्ति अस्मिन् 7. The month, margas'irsa (corresponding to November and December) [4] 8 M. सहोऽस्यास्ति 9. Pausa, the month corresponding to December and January [3] 10. M. तपोऽस्यास्ति 11. Magha, the month corresponding of january and February [2]

स्यात्तपस्य फाल्गुनिक

फलति निष्पादयति । 'फल्गुंक्त' (उ० ३ ५६) इत्युनन् । तपसि साधु । 'तत्र साधु' (४.४ ९८) । 'विभाषाफाल्गुनीश्रवणा—'(४ २ २३) इत्यण्ठकौ । त्रीणि ॥[1]

स्याच्चैत्रे चैत्रिको मधु ॥१५॥

चित्रया युक्ता पौर्णमासी अस्त्यत्र । 'विभाषा फाल्गुनी-' (४.२.२३) इत्यण्ठकौ । मन्यते मधु । फलिपाटि-' (उ० १.१८) इत्युर्धश्च ॥१५॥[2]

वैशाखे माधवो राधः

राधा विशाखा । त्रीणि ॥[3]

ज्येष्ठे[4] शुक्र

सज्ञापूर्वकत्वाद्वृध्यभावे ज्यष्ठोऽपि[5] ॥ द्वे ।[6]

शुचिस्त्वयम् ।

आषाढे

शोचन्ति विरहिणोऽस्मिन्[7] । इगुपधात्कित्' (उ० ४ ११९) इतीन् । द्वे ॥[8]

श्रावणे तु स्यान्नभा श्रावणिकश्च स ॥१६॥

नभत नभा । 'नभ हिंसायाम्' (क्रया० आ० से०) । असुन् (उ० ४ १८९) । "विभाषा-' (४ २ २३) इति ठकि श्रावणिक । त्रीणि ॥१६॥[9]

स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदा समा ।

नभसि, अभ्रे साधुर्नभस्य । प्रोष्ठपदाभिर्युक्ता प्रोष्ठपदी । भद्रपदाभिर्युक्ता भाद्रपदी । सा पौर्णमास्यत्र । चत्वारि ॥[10]

---

1 Falguna, the month corresponding to February and march [3] 2 Caitra, the month corresponding to march and April [3] 3 Vaisakha, the month corresponding to April and May [2] 4 E and K ज्येष्ठे 5 M ज्यष्ठोपि 6 Jyestha, *the month Corresponding to May and June* [2] 7 M शाचति विरहिणास्मिन् 8 Āsadha, the month Corresponding to June & July [2] 9 Sravaṇa, the month Correspond ing to July and August [2] 10 Bhadrapada, the month Corresponding to Augast and September [4]

स्यादाश्विन इषोऽप्याश्वयुजोऽपि

अश्विन्या युक्ता, आश्विनी। इष्यते पात्रार्थिभिरिष । अश्वयुजा युक्ता पौर्णमासी आश्वयुजी। त्रीणि ॥[1]

स्यात्तु कार्तिके ॥१७॥

बाहुलोर्जौ कार्तिकिक

[कार्तिके] ॥१७॥ बहुला कृत्तिका । ऊर्जयति उत्साहयति । चत्वारि ॥[2]

हेमन्त

हिमेऽन्तोऽस्य[3] हेमन्त । पृषोदरादि (६ ३ १०९) ॥[4]

शिशिरोऽस्त्रियाम् ।

[स्पष्टार्थम्] ॥[5]

वसन्ते पुष्पसमय सुरभि

वसन्ति सुखमस्मिन्। 'तृभृवहिवसि–' (उ० ३ १२८) इति झच्। सुष्ठु रमन्तेऽत्र[6]। 'रमरामस्ये' (म्वा० आ० अ०)। इन् (उ० ४ ११७) त्रीणि ॥[7]

ग्रीष्म ऊष्मक ॥१८॥

निदाघ उष्णोपगम उष्ण ऊष्मागमस्तप ।

ग्रसत रसान्। 'ग्रीष्म (उ० १ १५०) इत्युणादिसूत्रेण निपातित । ऊषति[8]। ऊष रुजायाम्[9] (भ्वा० प० स०)। अयस्मयेऽपि— (३ २ ७५) इति मनिन्। यावादित्वात् (५ ४ २९) क ॥१८॥ नितरा दह्यतेऽत्र[10]। घञ् (३ ३ १२१)। न्यङ्क्वादित्वात् (७ ३ ५३) कु । आपति उष्ण । 'इण सिञ्जि—' (उ० ३ २) इति नक्। तपरच्। सप्त ॥[11]

---

1 Asvina, the month corresponding to September and October [3] 2 Kartika, the month corresponding to October and November [4] 3 M हिम अन्तास्य 4 Hemanta, the winter season comprising margasirṣa and pausa months [1] 5 Sisira, the cold season comprising magha and falguna months [1] 6 M सुष्ठु रमन्तत्र 7 Vasanta, the spring season comprising the two months, caitra and Vaisakha [3] 8 M उषति 9 M 'उष रुजायाम् 10 M दह्यतत्र 11 Grisama, the summer season Comprising jyeṣṭha and asadha months [7]

स्त्रिया प्रावृट् स्त्रिया भूम्नि वर्षा

प्रवर्षति प्रावृट्। भूम्नि बहुत्वे वर्षन्ति वर्षा । टाप् (४ १ ४) ॥[1]

अथ शरत् स्त्रियाम् ॥१६॥

शीर्यन्तेऽस्या[2] पाकेनौषधय । 'शृ हिंसायाम्' (क्र्या० प० स०)। 'शृदृ-मसादि' (उ० १ १३०) ॥१९॥[3]

षडमी ऋतव पुंसि मार्गादीना युगै क्रमात्।

[स्पष्टम्] ॥[4]

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा ॥२०॥

संवसन्ति ऋतवोऽत्र[5] । वसेश्च' (उ० ३ ७१)। सपूर्वाच्च—' (उ० ३ ७२) इति सरप्रत्यय । आप्यते व्याप्यन। 'अब्दादयश्च' (उ० ४ ९८) इति दन्हस्वौ। जहाति भावान्। 'हश्च व्रीहिका—कालयो' (३ १ १४८) इति ण्युट्। सह मान्ति वर्तन्ते ऋतवो यासु। बहुत्व प्रायिकम्। समाया समाया विजायते' इति भाष्यप्रयोगात् ॥२०॥[6]

मासेन स्यादहोरात्र पैत्र

नृणा मासेन पितृणामय पैत्रोऽहोरात्र[7]। तत्र कृष्ण पक्षोऽह[8]। शुक्ला रात्रि ॥[9]

वर्षेण दैवत ।

नृणा वर्षेण दैवोऽहोरात्र[10]। तत्रोत्तरायण दिनम्। दक्षिणायन रात्रि[11] ॥

दैवे युगसहस्रे द्व ब्राह्म

देवाना युगसहस्रद्वयेन ब्राह्मणोऽय[12] ब्राह्मोऽहोरात्र[13]। दिव्यैर्द्वादशभिर्वर्षं सहस्रैर्देवानामक युगम्। तत्सहस्र ब्रह्मणो दिन भूताना स्थितिकाल । तावत्येव रात्रिर्भूताना प्रलयकाल ॥[14]

---

1 Varsa, the rainy season Comprising S'ravana and Bhadrapada months [2] 2 M शीर्यन्तेस्या 3 Sarat, the autumn season Comprising As'vina and kartika months [1] 4 Ct आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतु स्मृत । 5 M ऋतवोत्र। 6 Year [6] 7 M पैत्राहोरात्र 8 M पक्षोह 9 Measure of a day and night of manes (pitrs) 10 M दैवोहोरात्र 11 Measure of a dey and night of gods 12 M ब्रह्मणोय 13. M ब्राह्मोहोरात्र 14 Measure of a day and night of Brahma

कल्पौ तु तौ नृणाम् ॥२१॥

ये दैवे युगसहस्रे तौ नृणां कल्पौ। कल्पयतः स्थितिं प्रलयं चेति कल्पौ ॥२१॥[1]

मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः ।

मनूनां स्वायम्भुवादीनामन्तरमवकाशोऽवधिर्वा ।[2] तैर्हि चतुर्दशभिर्ब्रह्मणो दिनम् ॥[3]

संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ॥२२॥

संवर्त्यते प्रलीयते कल्प्यते वा यत्र । कल्पस्यान्तोऽवधिः[4] ॥ २२ ॥[5]

अस्त्री पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम् ।
कलुषं वृजिनैनोघमंहो दुरितदुष्कृतम् ॥२३॥

पच्यते दुःखमनेन[6]। 'पचिव्यक्तीकरणे' (भ्वा० आ० से०)। घञ् (३ ३. १९)। पान्त्यात्मानमस्मात्। 'नामन्सीमन्–' (उ० ४ १५०) इति निपातितः। 'पानीविषिभ्यः प'[7] (उ० ३.२३), पापम्। किलयति क्रीडयति। 'किल श्वैत्यक्रीडनयो' (तु० प० से०)। 'किलेर्बुक् च' (उ० १ ५०) इति टिषच्[8]। कर्मस्यति समापयति कल्मषम्। पृषोदरादित्वात्[9] (६ ३. १०९) लत्वादि। वृज्यते वृजिनम्। 'वृजे किच्च' (उ० २ ४७) इतीनच्[10] एति एनः। 'इण[11] आगसि' (उ० ४.१९७) इत्यसुन् नुट् च। अंहते गच्छति, अघम्। आगमानित्यस्वाअसुन्। अंहति। 'अहि गतौ' (भ्वा० प० से०)। असुन् (उ० ४.१८८)। दुरेति दुरितम्। दुष्टं[12] क्रियते दुष्कृतम् ॥२३॥[13]

स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ।

ध्रियते धर्मः। 'अर्तिस्तुसु–' (उ० १.१४०) इत्यादिना मन्। यागाङ्गे नपुंसकम्–'तानि धर्माण्यासन्' (ऋ० १० ९० १६)। 'लोकधर्मी' इत्यादौ

1. Measure of the duration of the world 2 M स्वायम्भुवादीनामन्तरमवकाशोवधिर्वा 3 Measure of the period or age of a Manu 4 M. कल्पस्यांतोवधि 5 Dissolution [5] 6. M. दुष्खमनेन 7. M. प० 8 M. किषच् 9 M पृषोदरादित्वात् 10. M. इति इनच् 11. M इण् 12. M दुष्ट 13 Sin [12]

धर्मीशब्दोऽप्यस्ति[1] । पुणति । 'पुण कर्मणि शुभे' (तु० प० से०) । तत्र साधु अतिशयेन प्रशस्य[2] श्रेय । सुष्ठु क्रियते स्म । वर्षति[3] वृष[4] । क । पञ्च ॥[5]

मुत्प्रीति प्रमदो हर्ष प्रमोदामोदसमदा ॥२४॥
स्यादानन्दथुरानन्दशर्मशातसुखानि च ।

मोदन मुत् । क्विप्[6] (वा० ३ ३ ९४) । प्रीन क्तिन् (३ ३,९४) । 'प्रमदसमदौ हर्षे' (३ ३ ६८) इत्यप् । प्रमादामोदौ घजन्तौ ॥२४॥ आनन्दनमानन्दथु । 'ट्वितोऽथुच्'[7] (३ ३ ८९) । शृणाति क्लेश शर्म । 'सर्वधातुभ्यो मनिन्' (उ० ४ १४४) । स्यति दु ख[8] शानम् 'शो तनूकरणे' (दि० प० अ०) । बाहुलकात्तन् (उ० ३ ८६) । शोभनानि खान्यत्र । द्वादश ॥[9]

श्व श्रेयस शिवं भद्रं कल्याण मङ्गलं शुभम् ॥२५॥
भावुक भविकं भव्य कुशलं क्षेममक्षयाम् ।
शस्तं च

श्व आगामि श्रेयोऽत्र[10] । 'श्वसोवसीय श्रेयस ' (५ ४ ८०) इत्यसुन् । शेतेऽनेन[11] शिवम् ।

'सर्वनीघृष्व–'(उ० १ १५४) इति वन्हस्वौ । भन्दते भद्रम् । 'भदि कल्याणे' (भ्वा० आ० से०) । 'ऋज्रेन्द्र–'(उ० २ २८) इति रन्[12] । कल्य नीरुजत्वमाणयति । मङ्ग्यते[13] । 'मगि सर्पणे' (भ्वा० प० से०) । 'मङ्गेरलच्' (उ० ५ ६०) । शोभते । 'शुभ शोभायाम्' (भ्वा० आ० से०) । क (३ १ १३५) ॥२५॥ भवनशील भावुकम् । 'लषपत–' (३ २ १५४) इत्युकञ् । भवोऽस्त्यस्ति[14] । 'अत इनिठनौ' (५ २ ११५) । भवनार्हं भव्यम् । भव्यगेय–' (३ ४ ६८) इति यत् । कुशान् लाति । क्षपत्यशुभम् । 'क्षि क्षय' (भ्वा० प० अ०) । मन् (उ० १,१४०) । शस्यते शस्तम् । क्त[15] ॥ द्वादश ॥[16]

अथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥२६॥

---

1 M धर्मीशब्दोप्यस्ति 2 प्रशस्य is the reading of the manuscript But as the adjective of श्रेयस् it should be प्रशस्यम् 3 M विर्षति 4 M वृष 5 Puṇya (merit) [5] 6 M क्विप् 7 M ट्वितायुच् 8 M दुष्प 9 Pleasure [12] 10 M श्रेयोत्र 11 M शेतेनेन 12 M रक् 13 M मग्यते 14 M भवोत्रास्ति 15 M क्त 16 Auspiciousness [12]

पापपुण्यशब्दौ सुखादयः शस्तपर्यन्ताश्च द्रव्यं वर्तमानास्त्रिषु लिङ्गेषु-वाच्याः ॥२६॥

मतल्लिका मचर्चिका प्रकाण्डमुद्घतल्लजौ ।
प्रशस्तवाचकान्यमूनि

मतल्लिकादयोऽव्युत्पन्नाः *प्रशंसावाचिनः । प्रशस्तोगौर्गोमतल्लिका । पञ्च[1] ॥

अथ शुभावहो विधिः ॥२७॥

एति सुखमनेन अयः । 'पुंसि– (३ ३ ११८) इति घः ॥२७॥[2]

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ।

देवादागतं दैवम् । दिश्यते उपदिश्यते स्म दिष्टम् । क्तः (३ २ १०२) । भगस्यैश्वर्यादेरिदं भागम् । तदेव भागधेयम् । 'नामरूपभागेभ्यो धेयः'(वा०५ ४ ३५) । 'भागाद्यच्च' (५ १ ४९) । भाग्यम् । नियम्यतेऽनया[3] । क्तिन् (३ ३.९४) । विधीयतेऽनेन[4] । उपसर्गे घोः किः (३ ३ ९२) ॥

हेतुर्ना कारणं बीजम्

हिनोति व्याप्नोति कार्यम् । हि गतौ (स्वा० प० अ०) । 'कमिमनि[6]—' (उ० १ ७२) इति तुन् । कार्यं तनेन[7] कारणम् । ल्युट् (३ ३ ११७) । विशेषेण जायतेऽनेन[8] बीजम् । उपसर्गे च संज्ञायाम् (३.२ ९९) इति डः । 'अन्येषामपि— (६ ३ १३७) इति दीर्घः । त्रीणि ॥[9]

निदानं त्वादिकारणम् ॥ २८ ॥

निदीयतेऽनेन[10] । आदिर्मूलं कारणमुपादानमिति यावत् ॥ २८ ॥[11]

---

*'प्रशंसावचनैश्च' (२ १ ६६) । एतैस्सह जातिः प्राग्वत् । कोऽर्थः ? जातिशब्दस्समस्यते तस्य च पूर्वनिपातः । [Added as note in page nineteen] 1 Five words which used at the end of nouns denote excellence or best of its kind 2 Good luck [1] 3 M नियम्यतनया 4 M विधीयतेनेन 5 Destiny or fate [6] 6 M कमिमनि 7 M कार्यतेनेन 8 M जायतेनेन 9 Cause [3] 10 M निदीयतेनेन 11 Primary Cause [1]

क्षेत्रज्ञ आत्मा पुरुषः

क्षेत्रं शरीरं जानाति । अतनीत्यात्मा । अति, 'सातिभ्या—' (उ० ४ १५२) मनिण् । पुरति पुरुषः । 'पुर अग्रगमने' (तु० प० से०) पुरः । पुरि शेते इति वा । त्रीणि ॥[1]

प्रधानं प्रकृतिस्त्रियाम् ॥

प्रधान्तेऽत्र सर्वम् । प्रकृष्टाः कृतिः कार्यं यस्याः । सत्त्वरजस्तमसां साम्यावस्था—अव्यक्ताख्या । द्वे ॥[2]

विशेषः कालिकोऽवस्थाः ✓

कालकृतो देहादेर्भेदो यौवनादिरवस्था । कालेन निर्वृत्तः । 'निर्वृत्तेऽक्षद्यूतादिभ्यः' (४.४.१९) इति ठक् । 'अवपूर्वात्तिष्ठतेरङ्' (३.३.१०६) ॥[4]

गुणाः सत्त्वरजस्तमः ॥ २९ ॥

गुणाः प्रकृतेर्धर्माः । सत्त्वम्, साधुत्वम्, तच्च प्रकाशक ज्ञानसुखहेतुः । रञ्जयति । रागात्मा दुःखहेतुः[5] । 'भूरञ्जिभ्यां कित्' (उ० ४.२१६) इत्यसुन् । ताम्यत्यनेन तमः । असुन् ॥ २९ ॥[6]

जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ।

जननं जनुः । जनेरुसि (उ० २.११५), ल्युटि (३ ३.११५) जननम् । मनिनि (उ० ४.१४४) जन्म । जनिः । इक् । षट् ॥[7]

प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः ॥ ३० ॥

प्राणाः सन्त्यस्य । अत इनि (५ २.११५) । चेतयते । नन्द्यादिः (३.१ १३४) । जन्मी । व्रीह्यादित्वात् (५ २.११६) । जायते । 'कमिगमिजनि—' (उ० १ ७२) इति तुन् । 'यजिमनि—' (उ० ३ २०) इति युच् । जन्यु ॥ ३० ॥[8]

जातिर्जातं च सामान्यम्

जायते जातिः । क्तिन् । क्ते (३ ३ १३४) जातम् । समानानां भावः । त्रीणि ॥[9]

व्यक्तिस्तु पृथगात्मता ।

---

1. Purusa [3] 2 M. प्रवृत्तत्र 3. Prakṛti, the Material Cause of the universe [2] 4 The stage such as youth etc [1] 5. M. दुष्खहेतु 6. Sattva, rajas and tamas qualities [1 each] 7. Origin or birth [8] 8. Living Creature [6] 9 Universal [3].

व्यज्यतेऽनया[1] । व्यञ्ज् क्तिन् (३ ३ ९४) पृथगात्मा यस्य तस्य भाव । द्वे ॥*

चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥ ३१ ॥

इति कालवर्ग ॥ ४ ॥

चेतति चित्तम् । क्त (३ ३ ११४) । असुन् (उ० ४ १८८) । चेतः । ह्रियते विषय । हृञ कयन् दुगौ । स्वनति । 'क्षुब्धस्वान्त—' (७ २ १८) इति साधु । ह्रियते हृत् । क्विपि (३ २ १७८) तुक् (६ १ ७१) । दान्तमपीदम् । मन्यतेऽनेन[3] । असुन् (उ० ४ १८८) । प्रज्ञादणि (५ ४ ३८) मानसम् ॥ ३१ ॥[4]

इति कालवर्ग ॥ ४ ॥

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना ॥ १ ॥

बुद्ध्यतेऽनया[5] । क्तिन् (३ ३ ९४) । मनस ईषा । धेषति धिषणा । 'धिष शब्दे' (भ्वा० प० से०) । युच् । ध्यायत्यनया धी । ध्यायते सम्प्रसारण च' (वा० ३ २ १७८) इति क्विप् । 'आतश्चोपसर्गे (३ ३ १०६) इत्यङि प्रज्ञा । शेते । शे विच् (३ २ ७५) । मोह । त मुष्णाति । मूलविभुजादित्वात् (वा० ३ २ ५) के गौरादित्वात् (४ १ ४१) ङीष् । मन्यतेऽनया[6] । क्तिन् (३ ३ ९४) । 'गुरोश्च हल' (३ ३ १०३) इत्यङ्[7] । षित्वात् (३ ३ १०४) अङि प्राप्ते बाहुलकात् क्तिन् । उपलब्धि । क्विपि (वा० ३ ३ ९) चित्, संवित् । पद्यत । प्रतिपत् । ज्ञपत्चुरादि[8] (चु० प० से०) । णिजभावे क्तिन् । ज्ञप्ति । 'चित सचेतने' (चु० आ० स०) चुरादि[9] । णिचोऽनित्यत्वादभावे ण्यासश्रन्थ —' (३ ३ १०७) इति युच् ॥ १ ॥[10]

धीर्धारणावती मेधा

धारणाशक्तियुक्ता धी । मधत[11] सर्वमस्याम् । 'मधृ सगमे' भ्वा० उ० से०) एकम् ॥[12]

सङ्कल्प कर्म मानसम् ॥

इदमह कुर्यामिति मनसाव्यापार सङ्कल्प । घञ् (३ ३ १८) । एकम् ॥[13]

---

1 M व्यज्यतेनया 2. Individual [2] 3 M मन्यतेनन 4 Mind [7]
5 M बुद्धधनेनया । 6 M मन्यतनया 7 M इति अङ् 8 M ज्ञपेश्चुरादि 9 M चुरादि 10 Intellect [14] 11 M मधन्ते
12 Retentive faculty, mental vigour [1] 13 Volition [1]

चित्ताभोगो मनस्कारः

चित्तस्य मनस आभोग सुखादौ तत्परतया स्थिरीकरणम्, पुन पुनर्मनसि करणम्। 'अन कृकमि—' (८ ३ ४६) इति स । द्वे ॥[1]

चर्चा सङ्ख्या विचारणा ॥२॥

'चर्च अध्ययन' (चु० उ० से०)। 'चिन्तिपूजि—' (३ ३ ०५) इत्यङ्। सङ्ख्यानम्। 'चक्षिङ ख्याञ्' (२ ४ ५४)। 'ण्यास—' (३ ३ १०७) इति युच्। विचारणा ॥२॥ त्रीणि ॥[2]

अध्याहारस्तर्क ऊहः

अध्याहरणमपूर्वोत्प्रेक्षणम् हृञो घञ् (३ ३ १८)। तर्कणम्। 'तर्क भाषार्थ' [चु० प० से०]। त्रीणि ॥[3]

विचिकित्सा तु संशय ।

सन्देहद्वापरौ च

'किन संशय' (भ्वा प० से०)। सन् (३ १ ५)। 'अ प्रत्ययात्' (३ ३ १०२)। शीङ (अ० आ० से०) 'एरच् (३ ३ ५६)। घञ्। सन्देह। द्वौ पक्षौ यत्र द्वापर। पृषोदरादित्वात् (६ ३ १०९) आत्वम्। चत्वारि ॥[4]

अथ समौ निर्णयनिश्चयौ ॥३॥

निर्णय। निश्चयनम्। 'ग्रहवृदृनिश्चि—' (३ ३ ५८) इत्यप् ॥३॥ द्वे ॥[5]

मिथ्यादृष्टिर्नास्तिकता

मिथ्या परलोका नास्तीत्येवंविधा दृष्टिर्बुद्धिरस्य। नास्ति परलोक इति मतिर्यस्य तद्भाव। 'अस्ति नास्ति दिष्टं मति' (४ ४ ६०)। इति ठक्। द्वे ॥[6]

व्यापादो द्रोहचिन्तनम्।

व्यापादन व्यापाद। 'पद गतौ' (दि० आ० अ०)। व्याङ्पूर्वात् घ्यन्तात् (३ १ २६) घञ् (३ १ २६)। द्वे ॥[7]

---

1 Mental attention to pleasure &c [2] 2 Discussion [3] 3 Reasoning [3] 4 Doubt [4] 5 Decision [2] 6 Atheism [2] 7 Malice [2]

मर्मो सिद्धान्तराद्धान्तौ

राद्ध , सिद्ध अन्तो निश्चयोऽस्य[1] । द्वे ॥[2]

भ्रान्तिर्मिथ्यामतिर्भ्रम ॥४॥

'भ्रमु चलने' । भ्वा० प० से०) । क्तिन् (३ ३ ९४) । 'अनुनासिकस्य—' (६ ४ १५) इति दीर्घ । भ्रान्ति । मिथ्यामतिरतस्मिंस्तदिति ज्ञानम् । भ्रम । घञ् (३ ३ १८) । 'नोदात्तोपदेश—'(७ ३ ३४) इति न वृद्धि ॥४॥[3]

संविदागू प्रतिज्ञानं नियमाश्रव-संश्रवा ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥ ५ ॥

सवेदनम् । सविन् । क्विप् (वा० ३ ३ ९४) । आगमनमागू । 'गमे' इति प्रकृते 'अमेरच डू (उ० २ ६८) । 'यम समुपनिविषु च' (३ ३ ६८) इत्यप् । नियम । 'श्रु श्रवणे' (भ्वा० प० अ०) । 'ऋदोरप्' (३ ३ ५७) । आश्रव । अङ्गीकार । घञ् । ग्रहवृद्ृ—' (३ ३ ५८) इत्यप् । अभ्युपगमः ॥ ५ ॥ दश ॥[4]

मोक्षे धीर्ज्ञानम्

मोक्षफलिका धी ज्ञानम् ॥[5]

अन्यत्र विज्ञान शिल्पशास्त्रयो ।

अन्यत्र शास्त्रे शिल्पादौ च या धी सा विज्ञानम् ॥[6]

मुक्ति कैवल्यनिर्वाणश्रेयो नि श्रेसामृतम् ॥६॥
मोक्षोऽपवर्ग

मोचन मुक्ति । केवलस्य भाव कैवल्यम् । 'गुणवचन–' (५ १ १२४) इति ष्यञ् । निर्वान्त्यस्मिन्निर्वाणम् । 'निर्वाणो-वाते'[7] (८ २ ५०) इति साधु । अतिशयेन प्रशस्य श्रेय । निश्चित श्रेयो नि श्रेयसम्[8] । 'अचतुरविचतुर—' (५ ४ ७७) इत्यच् । नास्मि मृतमत्र ॥ ६ ॥ 'मोक्ष अवसाने' (चु० उ० से०) चुरादि । 'एरच्' (३ ३ ५६) । अपवर्जन सार्वस्यापवर्ग[9] । घञ् ॥ अष्टौ ॥[10]

---

1 M निश्चयोस्य 2 Doctrine [2] 3 Error [3] 4 Acceptance [10] 5 Knowledge relating to the mokṣa or liberation [1] 6 Knowledge of an art [1] 7 M निर्वाणोवाते 8 M निश्रेयसम् 9 M सावन्यापवर्ग 10 Mokṣa [8]

अथाज्ञानमविद्याहमतिः स्त्रियाम् ।

विरुद्धवेदनमविद्या । 'सज्ञाया समज—' (३ ३ ९९) इति क्यप् । अह-मित्यस्य मननमहमति । अनात्मन्यात्मबुद्धि । त्रीणि ॥[1]

रूप शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥७॥

गोचरा इन्द्रियार्थाश्च

रूपयति । '[रूप] रूपक्रियायाम्' (चु० उ० म०) चुरादि । शप्यते आक्रुश्यते शब्द । 'शाशपिभ्या—' (उ० ४ ९७) दन् । गन्धयति । 'गन्ध अर्दने' (चु० आ० से०) । रस्यते, आस्वाद्यते रस । स्पृश्यते स्पर्श । घञ् । विपरीण सिन्वन्ति निबध्नन्तीन्द्रियाणि[2], विषया । पचाद्यच् (३ ३ १३४) 'परिनिवि—' (८ ३ ७०) इति ष ॥७॥ गाव इन्द्रियाणि चरन्त्येषु । 'गोचर—' (३ ३ ११९) इति साधु । इन्द्रियैरर्थ्यन्ते इन्द्रियार्था । 'अर्थ याञ्चायाम्' (चु० आ० से०) । त्रीणि ॥[3]

हृषीकं विषयीन्द्रियम् ।

हृष्यन्त्यनेन । 'अलिहृषिभ्या कित्' (उ० ४ १७) इति ईकन् । विषयोऽस्यास्ति[4] । इन्द्रस्यात्मनो लिङ्गम्, इन्द्रियम् । इन्द्रियमिन्द्रलिङ्गम्—' (५ २ ९३) इत्यादिना निपातित ॥[5]

कर्मेन्द्रिय तु पाय्वादि

पिबति शोषयति तैलम् । पायु । 'कृवापाजि—' (उ० १ १) इत्युण् । वाक्पाणिपादपायूपस्थाख्य कर्मसाधनमिन्द्रियम् ॥[6]

मनो नेत्रादि धीन्द्रियम् ॥ ८ ॥

चक्षु श्रोत्रत्वग्घ्राणरसनामनासीति बुद्धिसाधनानीन्द्रियाणि ॥ ८ ॥[7]

तुवरस्तु कषायोऽस्त्री

तौति हिनस्ति रोगान् । 'तु' इति सौत्राद्धोणादिको ष्वरच् (उ० ३ १) । कषति कण्ठम्[8] । 'कष हिंसायाम्' (भ्वा० प० से०) । बाहुलकादाय ॥[9]

---

1 Nescience or ignorance [3] 2 M निबध्नन्ति इन्द्रियाणि 3 Sense-objects, namely form, taste, smell, sound and touch [1 each] 4 M विषयोऽस्यास्ति 5 Sense-organ [3] 6 Karmendriya (organ of action) as the anus &c 7 Jñanendriya (organ of perception) as the mind &c 8 M कण्ठम् 9 Astringent flavour [2]

मधुरो

मधु माधुर्यमस्यास्ति। 'ऊषसुषि—' (५ २ १०७) इति र. ॥[1]

लवणः

लुनाति जाड्य लवण । नन्द्यादिः (३ १ १३४) ॥[2]

कटु.।

कटत्यावृणोति। 'कटे वर्षावरणयो' (भ्वा० प० से०)। 'कटि वटिभ्या च' (उ० १ ८) इत्यु ॥[3]

तिक्तः

तेजयति स्म तिक्त ॥[4]

अम्लश्च[5]

अमति रजत्यरुचिमम्ल । बाहुलकाल्ल ॥[6]

रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥९॥

अमी षट् रसवति वाच्ये त्रिषु लिङ्गेषु बोध्या ॥ ९ ॥

विमर्दोत्थे परिमलो गन्धे जनमनोहरे।

सुरतादिविमर्दोत्थे माल्यादिगन्ध घर्षणसमुद्भवे चन्दनादिगन्धे च, जनाना मनोहरे, परिमल । परिमल्यत। 'मल धारणे' (भ्वा० आ० से०) ॥[7]

आमोद सोऽतिनिर्हारी

सः गन्ध । अतिनिर्हारी, अत्यन्तमनोहरश्चेदामोद. । आसमन्तान्मोदयति । अच् (३ १ १३४) ॥[8]

वाच्यलिङ्गत्वमागुणात् ॥१०॥

आगुणात् 'गुणे शुक्लादय पुंसि' [अ० १ ५ १७] इत्यत प्राक्। इत ऊर्ध्व 'वाच्यलिङ्गता' इत्यधिक्रियते ॥१०॥

समाकर्षी तु निर्हारी

समाकर्षति मन । णिनि । दूरगामिगन्धस्य द्वे ॥[9]

1 Sweet taste [1] 2 Saline taste [1] 3 Acrid flavour [1] 4 Bitter taste [1] 5 K and B read it as अम्लश्च 6 Sour taste [1] 7 Fragrance arising from rubbing [1] 8 Perfume [1] 9 Diffused odour [2]

सुरभिर्घ्राणतर्पण ।

इष्टगन्धः सुगन्धि स्यात्

सुष्ठु रमन्तेऽत्र[1] । इन् (उ० ४ ११७) घ्राण तर्पयति । ल्यु (३ १ १३४) । इष्टो गन्धोऽस्य[2] । चत्वारि ॥[3]

आमोदी मुखवासन ॥११॥

आमोदयति । मुख वासयति । मुखवासनवटिकादेर्द्वे ॥११॥[4]

पूतिगन्धिस्तु दुर्गन्ध

पूयते पूति । पूयी विशरणे' (भ्वा० आ० स०)। क्तिन् (३ ३ ९४)। पूतिर्दुष्टो गन्धोऽस्य[5] द्वे ॥[6]

विस्र स्यादामगन्धि यत् ।

विस्यति । 'विस प्रेरणे' (दि० प० से०) । बाहुलकाद्रक् (उ० २ १३) । आमोऽपक्वमल । तस्येव च गन्धोऽस्य[7] । अपक्वमासादिग धस्य द्वे ॥[8]

शुक्ल शुभ्र शुचि-श्वेत-विशद श्येत-पाण्डरा ॥१२॥
अवदात सितो गौरो वलक्षो धवलोऽर्जुन ।

शोकति मनोऽस्मिन्[9] शुक्ल । 'शुक गतौ (भ्वा० प० स०)। 'ऋज्रेन्द्र–' (उ० २ २८) इति निपातित । शोभते शुभ्र । 'स्फायि—' (उ० २ १३) इति रक् । 'शुच् दीप्तौ' (?)। इक् (वा० ३ ३ १०८)। श्वेतते श्वेत । '[श्वि] श्विता वर्णे' (भ्वा० आ० से०)। विशीयते विशद । शदलृ (भ्वा०, तु० प० अ०)। अच् (३ १ १३४)। श्यायते श्यत[10] । 'श्यैङ् गतौ' (भ्वा० आ० अ०)। 'हृश्याभ्यामितन्' (उ० ३ ९३)। पण्डन्त मनोऽस्मिन्[11] पाण्डर । 'पडि गतौ' (भ्वा० आ० से०) बाहुलकादरदीर्घौ ॥ १२ ॥ अवदायते स्म । दैप क्त । सिञ क्त (उ० ३ ८९)। गुरन्ते उद्युञ्जते मनोऽस्मिन्[12] । 'गुरी उद्यमने' (तु० आ० से०)। गार एव गौर । अवलक्ष्यते वलक्ष । धवन धव ।

---

1 M रमतेत्र 2 M गन्धोस्य 3 Sweet smell [4] 4 A. perfume for the mouth made up in the form of Campnor pill Sc [2] 5 M गन्धोस्य 6 Fetid odour [2] 7 M गन्धोस्य 8 Smell like that of raw meat [2] 9 M मनोस्मिन् 10 M श्यत 11 M मनास्मिन् 12 M मनोस्मिन् ।

अव्यक्तो रागो लौहित्यमस्य । ऋच्छति । 'अर्तेरलन्' (उ० ३ ६०) ॥ द्वे ॥[1]

श्वेतरक्तस्तु पाटलः ॥१५॥

पाटयति । 'पट गतौ' (भ्वा० प० से०)। ण्यन्तात्कलच् (उ० १ १०६) ॥ १५ ॥ द्वे ॥[2]

श्यावः स्यात्कपिशः ।

श्यायते श्यावः बाहुलकात् वः (उ० १ १५६) कपिमंकंटो वर्णोऽस्त्यस्य[3] । लोमादित्वात् (५ २ १००) शः । कृष्णपीतस्य द्वे ॥[4]

धूम्रधूमलौ कृष्णलोहिते ।

धूमं राति । पृषोदरादि (६ ३ १०९)। कृष्णमिश्रो लोहितः । त्रीणि ॥[5]

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ १६ ॥

काडति कडः । तमाराति कडारः । कपिवर्णं लाति । पिञ्जति पिङ्गः । 'पिजि वर्णे' (अ० आ० से०)। पशति पिशङ्गः । 'पिश अवयवे' (तु०उ०से०)। 'पिडादिभ्यः कित्' (उ० १ १२१) इत्यङ्गच् । कन्दते कद्रुः । 'कदि आह्वाने रोदने च' (भ्वा० आ० से०)। मृगय्वादित्वात् (उ० १ ३७) साधु । पिङ्गं लाति ॥ १६ ॥ षट् ॥[6]

चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।

चीयते चित्रम् । 'अमिचिमि— (उ० ४ १६३) इति चिञः क्त्रः । कीर्यते किर्मीरम् । 'गम्भीरादयश्च' इति निपातः । कलयति कल् । माषयति माषः । 'मष हिंसायाम्' (भ्वा० प० से०)। कल् चासौ माषश्च । शवति याति वर्णान्, शबलः एति वर्णान् एतः । कर्बति कर्बुरः । 'कर्ब हिंसायाम्' । 'मद्गुरादयश्च' (उ०१ ४१) इति निपातः ॥[7]

गुणे शुक्लादयः पुंसि

गुणमात्रे वर्तमाना शुक्लादयः शब्दाः पुंसि वाच्याः । पटस्य शुक्ल इति ॥

---

1 The colour of the dawn [1] 2 Pale red [2] 3 AI वर्णोऽस्त्यस्य
4 Brown [2] 5 Brownish red [3] 6 Tawny [6]
7 Variegated Colour [6]

गुणिलिङ्गास्तु तद्वति ॥ १७ ॥

शुक्ल रूपमित्यादौ तु विशेष्यनिघ्नता इष्यत एव। तद्वति गुणवति गुणिलिङ्गा। शुक्ल पट, शुक्ला शाटी, शुल वस्त्रम् ॥ १७ ॥

इति धीवर्ग ॥ ५ ॥

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती।

ब्रह्मण इय ब्राह्मी। 'ब्राह्मोऽजातौ' (६ ४ ७१) इति निपात। भरतस्येयम्। भाष्यते भाषा। 'गुरोश्च हल' (३ ३ १०३)। गृणाति गी। क्विप् (वा० ३ ३ ९४)। उच्यते वाक्। 'क्विब्वचि—' (वा० ३ २ १७८) इति दीर्घ। वाण्यते शब्द्यते। 'वण शब्दे' (भ्वा० प० से०)। सर प्रसरणमस्त्यस्या। अधिष्ठातृदेवताया सस ॥[1]

व्याहार उक्तिर्लपितं भाषितं वचनं वच ॥ १ ॥

व्याहरणम्। घञ् (३ ३ १८)। उच्यते। क्तिन् (३ ३ ९४)। वच। असुन् ॥ १ ॥[3]

अपभ्रंशोऽपशब्द स्यात्

अपभ्रश्यते सस्कृतात्। अपभ्रश। अपभ्रष्ट शब्दोऽपशब्द [4]। द्वे ॥[5]

शास्त्रे शब्दस्तु वाचकः।

शास्त्रे व्याकरणादौ यो वाचक साधु स शब्द इति व्यवह्रियते ॥[6]

तिङ् सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ २ ॥

तिङन्तचय —पचति भवति पाकोभवतीत्यर्थ। सुबन्तचय —त्वया कर्तव्यम्। कारकान्विता क्रिया—घटमानय। वक्तव्य वाक्यम्। 'वचोऽशब्द सज्ञायाम्'[7] (७ ३ ६७) इत्यर्थान्तरे निषेधादत्र कु ॥ २ ॥[8]

श्रुतिः स्त्री वेद आम्नायस्त्रयी

श्रूयते श्रुति। विदन्त्यनेन धर्म वेद। घञ्। आम्नायते। 'म्ना अभ्यासे' (भ्वा० प० अ०)। घञ्। त्रीणित्रयोऽवयवा यस्या सा त्रयी। त्रय्या धर्मस्त्रयीधर्म ॥[9]

---

1 M ब्राह्मोजातौ 2 Sarasvati, the goddess of knowledge [6]
3 Speech or Words [6] 4 M शब्दोपशब्द 5 Corrupt word [2] 6 Word [1] 7 M वचोशब्दसज्ञायाम् 8 Sentence [1]
9 Veda [4]

धर्मस्तु तद्विधिः ।

तया त्रय्या विधिर्विधीयमानो यज्ञादिस्तद्विधिस्तद्विधानम् ॥[1]

स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी ॥ ३ ॥

ऋच्यते स्तूयतेऽनया[2] ऋक् । स्यति पापं साम । मनिन् (उ० ४ १५२)। इज्यतेऽनेन[3] । 'अर्तिपृवपि–' (उ० २ ११७) इत्युस् ॥३॥[4]

शिक्षेत्यादि श्रुतेरङ्गम्

अङ्गयते ज्ञायतेऽनेनाङ्गम्[5], उपकारकम् । शिक्षा कल्पो व्याकरणं ज्योतिषं छन्दो निरुक्तञ्च ॥[6]

ओङ्कारप्रणवौ समौ ।

अवति ओम् । 'अवतष्टिलोपश्च' (उ० १ १४२) इति मनिनष्टिलोपे 'ज्वरत्वर–' (६ ४ २०) इत्यूठ् । गुणः (७ ३ ८४) । प्रणूयते स्तूयतेऽनेन[7] प्रणवः ॥[8]

इतिहासः पुरावृत्तम्

'इति ह आसीत्' यत्रेति इतिहासः । पारम्पर्योपदेशः 'इति ह' इत्यव्ययम् । पुरावृत्तं पूर्वचरितम् । तत्प्रतिपादको ग्रन्थ इति यावत् । द्वे ॥[9]

उदात्तादयस्त्रयः स्वराः ॥ ४ ॥

स्वर्यन्तेऽर्थाः[10] एभिः स्वराः ॥४॥[11]

आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।

प्रत्यक्षागमाभ्यामीक्षितस्य पश्चादीक्षणमन्वीक्षा । सा प्रयोजनमस्याः सा तर्कविद्या । दम्यतेऽनेन[12] दण्डः । 'ञमन्ताड्डः' (उ० १ ११४) । दण्डो नीयते बोध्यतेऽनया[13] सा दण्डनीतिः । अर्थस्य भूम्यादेः शास्त्रम् ॥[14]

---

1 Dharma [1] 2 M स्तूयतेनया 3 M इज्यतेनेन 4 Trayı (Rgveda, yajurveda and Samaveda) [1] 5 M ज्ञायतेननाङ्गम् 6 Six Vedangas called Śiksa etc 7 M स्तूयतेनेन 8 The sacred syllable, Om [2] 9 Itihasa (History) [2] 10 M स्वर्यते अर्थाः 11 Three Vedic accents udatta, anudatta and suarita 12 M दम्यतेनेन 13 M बोध्यतेनया 14 Tarkaśastras (Logic) and Arthaśastra (Economics) [1each]

आख्यायिकोपलब्धार्था

आचष्टे आख्यायिका । 'चक्षिङ ख्याञ्' (२४५४)। ण्वुल् (३ १ १३३)। उपलब्धो ज्ञातोऽर्थोऽस्या [1]। ज्ञातसत्यभूतार्थकथा ॥[2]

पुराणं पञ्चलक्षणम् ॥ ५ ॥

पुरापि नवम्। 'पुराणप्रोक्तेषु—' (४ ३ १०५) इति निपातित । 'सर्गश्च प्रतिसर्गश्च वशो मन्वन्तराणि च। वश्यानुचरित चैव पुराण पञ्चलक्षणम्' ॥ ५ ॥[3]

प्रबन्धकल्पना कथा

प्रबन्धस्य कल्पना रचना कथ्यते। कथा कादम्बर्यादि । 'चिन्तिपूजि–' (३ ३ १०५) इत्यङ् ॥ द्वे ॥[4]

प्रवल्हिका प्रहेलिका

प्रवल्हते आच्छादयति । वल्ह आच्छादने (भ्वा० आ० से०)। प्रहेलयति अभिप्राय सूचयति । 'हिल भावकरणे (तु० प० से०)। "व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् । यत्र बाह्यार्थसम्बन्ध [5] कथ्यते सा प्रहेलिका ॥" यथा— 'पानीय पातुमिच्छामि[6] त्वत्त कमललोचन । यदि दास्यसि नेच्छामि नो चेद्दास्यसि देहि मे ॥' दुर्विज्ञातार्थप्रश्नस्य द्वे ।

स्मृतिस्तु धर्मसहिता

वेदार्थस्मरणपूर्वक मन्वाद्यै रचितत्वात्स्मृति । धर्मं सधीयतेऽस्याम्[8] ॥द्वे॥[9]

समाहृतिस्तु सग्रह ॥ ६ ॥

समाहरणम् । सग्रहणम् । द्वे ॥६॥[10]

समस्या तु समासार्था

समसन समस्या । 'असु क्षेपणे' (दि० प० से०)। क्यप् (३ १ १२४)। सज्ञापूर्वकत्वाद्वृद्ध्यभाव । समसन समास । पूरणसाकाङ्क्ष सोऽर्थो[11] यस्या ।

1 M ज्ञातोर्थोस्या 2 Ākhyāyika (Narrative) [2]
3 Purana [1] 4 Katha, a variety of prose composition distinguished from the Ākhyāyika 5 B reads सबन्ध 6 M पातुमिछामि 7 Riddle [2] 8 M सधीयतेस्या 9 Smrtis'astra [2]
10 Compilation [2] 11 M सोर्थो ।

कविशक्तिपरीक्षार्थमपूर्णतयैव पठ्यमाना । यथा 'शतचन्द्र नमस्तलम्' इत्युक्ते 'दामोदरकराघातविकलीकृतचेतसा । दृष्ट चाणूरमल्लेन —' इत्यनेन सा पूर्यते ।[1]

किंवदन्ती जनश्रुति ।

किंवदन्तीति । किंवदन्ती लोकप्रवाद । जनेभ्य श्रूयते । द्वे ।[2]

वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्

वृत्तिर्लोकवृत्तमस्त्यस्याम् । 'वृत्तेश्च' (वा० ५ २ १०१) इति ण । प्रवर्तते व्याप्नोति । वृते (भ्वा० आ० से०) क्तिन् (३ ३ १७४) । वृत्तस्य चरितस्यान्त । उद्गतोऽन्तो[3] यस्य । चत्वारि ॥[4]

अथाह्वय ॥७॥

आख्याह्वभिधान च नामधेयं च नाम च ।

आख्यतऽनेनाह्वय[5] । बाहुलकाद् घ ॥७॥ आख्यानमाख्या । 'आतश्च—' (३ १ १३६) इत्यङ् । एवमाह्वा । नम्यतेऽभिधीयतेऽनेन[6] । 'णम प्रह्वत्वे शब्दे च (भ्वा० प० अ०)। 'नामन्सीमन्—' (उ० ४ १५०) इति निपातित । 'भागरूपनामभ्योधेय ' (वा० ५ ४ ३६) स्वार्थे । षट् ॥[7]

हूतिराकारणाह्वानम्

ह्वेञ (भ्वा० उ० अ०) क्तिन् (३ ३ ९४) । कृञो ण्यन्ताद् (३ १ २६) युच् (३ ३ १०७) । आकारणा । ल्युटि (३ ३ ११५) आह्वानम् । त्रीणि ॥[8]

संहूतिर्बहुभि कृता ॥ ८ ॥

सभूय हूति या बहुभिर्मिलित्वै कृता ॥ ८ ॥[9]

विवादो व्यवहार स्यात्

विविधो वाद । ऋणदानादिर्व्यवहारे न्याय । द्वे ॥[10]

उपन्यासस्तु वाङ्मुखम् ।

वाचो[11] मुखमारम्भ । द्वे ॥[12]

---

1. Samasyā, proposing part of a stanza to another to be completed [2] 2 Rumour [2] 3 M उद्गत अन्तो 4 Talk [4] 5 M आहूयतेनेनाह्वय 6 M नम्यतेमिधीयतेनेन 7 Name [6] 8 Calling [3] 9 Collective calling [1] 10 Dispute [2] 11 M वाचो 12 Preface [2]

उपोद्घात उदाहार

उप समीपे उद्घनन ज्ञापनमुपोद्घात । यदाहु—"चिता प्रकृतसिद्धयर्थामुपोद्घात विदुर्बुधा" इति । उदाहरणमुदाहार । वक्ष्यमाणोपयोग्यर्थवर्णनम् । द्वे ॥[1]

शपन शपथः पुमान् ॥ ९ ॥

'शप आक्रोशे' (दि० उ० अ०) । ल्युट् (३ ३ ११५) । शपनम् । 'शीङ्-शप—' (उ० ३ ११३) इत्यथ ॥ ९ ॥द्वे ॥[2]

प्रश्नोऽनुयोग पृच्छा च

प्रच्छन प्रश्न । 'यजयाच—' (३ ३ ९०) इति नङि 'च्छ्वो —' (६ ४ १९) इति श । अनुयोजनमनुयोग । घञ् (३ ३ १८) । 'गुरोश्च हल (३ ३ १०३) इत्यङ् । पृच्छा । त्रीणि ॥[3]

प्रतिवाक्योत्तरे समे ।

उत्तरत्यनेनोत्तरम् । 'ऋदोरप् (३ ३ ५७) । द्वे ॥[4]

मिथ्याभियोगोऽभ्याख्यानम्

मिथ्याभियोग । 'त्व मे शत धारयसि इति मिथ्याक्षेप ॥ द्वे ॥[5]

अथ मिथ्याभिशसनम् ॥ १० ॥

अभिशाप

मिथ्याभिशसन सुरापानादिविषयो मिथ्यारोप ॥ १० ॥[6]

यशादस्तु शब्द स्यादनुरागज ।

अनुरागात्प्रीतिविशेषाज्जातो यो मुखवण्ठादिशब्द ॥[7]

यश कीति समाज्ञा च

अश्नुते व्याप्नोति दिश यश । 'अशेर्देवने युट् च' (उ० ४ १९०) इत्यसुन् । कीर्त्यते कीर्ति । 'कृत सशब्दने (चु० प० से०) । 'ऊतियूति—' (३ ३ ९७) इति निपातित । समाज्ञायतेऽनया[8] । आतश्च–' (३ ३ १०६) इत्यङ् । त्रीणि ॥[9]

---

1 Introduction [2] 2 Oath [2] 3 Question [3] 4 Reply [2] 5 False charge [2] 6 False accusation [2] 7 A burst of applause, huzza [1] 8 M समाज्ञायतेनया 9 Fame [3]

स्तवः स्तोत्रं नुतिः स्तुतिः ॥ ११ ॥

स्तूयतेऽनेन[1]। ऋदोरप् (३ ३ ५७)। दाम्नी–' (३ २ १८२)। इति ष्ट्रनि स्तोत्रम् ॥ ११ ॥[2]

आम्रेडितं द्विस्त्रिरुक्तम्

आम्रेड्यते आधिक्येनोच्यते स्म। म्रेडृ उन्मादे (भ्वा० प० से०)। द्वौ वारौ द्विः। त्रीन् वारान् त्रिः ॥[3]

उच्चैर्घुष्टं तु घोषणा।

उच्चैर्घुष्यते। घुषिरविशब्दने (७ २ २३) इति नेट्। 'ण्यास– (३ ३ १०७) इति युच्। घोषणा। उच्चैर्नादस्य। द्वे ॥[4]

काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥ १२ ॥

ककते काकुः। कक लौल्योपतापयोः' (भ्वा० आ० से०)। बाहुलकादुण् (३ ३ १)। शोकक्रोधादिजनितविकृतनादस्य ॥ १२ ॥[5]

अवर्णाक्षेपनिर्वादपरीवादापवादवत्।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १३ ॥

अवर्णो विपरीतवर्णनम्। अवर्णने घञ् (३ ३ १८)। क्षिप् प्रेरणे' (तु०उ०से०)। घञ् (३ ३ १८) निष्क्रान्तो वादात्। यथा अवणादयो निन्दार्थाः, तयोपक्रोशादयोऽपीत्यर्थः[6]। क्रुशघञ् (३ ३ १८) गुपेर्निन्दायां सन् (३ १ ५)। कुत्स अवक्षेपणे (चु० आ० से०) ॥ दश ॥ १३ ॥[7]

पारुष्यमतिवादः स्यात्

परुषो निष्ठुरम्। तस्य भावः।[8] अतिक्रम्योक्तिरतिवादः। अप्रियवचनस्य द्वे ॥[9]

भर्त्सनं त्वपकारगीः।

भर्त्स सतर्जने (चु० आ० से०)। अपकाराय गीः। 'चौरोऽसि[10] घातयिष्यामि त्वाम्' इत्याद्या। द्वे ॥[11]

---

1 M स्तूयतेनेन 2 Praise [4] 3 Repeated saying [1]
4 Proclamation or speaking aloud [2] 5 The changed voice due to anger and fear [1] 6 M तथा उपक्रोशाद्या पीत्यर्थ
7 Blame [10] 8 M अतिक्रम्य उक्तिरतिवाद 9 Unkind words [2] 10 M चौरासि 11 Reproach [2]

य सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम् ॥ १४ ॥

उपालम्भो द्विधा—स्तुतिपूर्वो निन्दापूर्वश्च । 'महापुरुषस्य तवेद किमुचितम्' इत्याद्यम् । 'हास्तिकस्य तवेदमुचितमेव' इति द्वितीयम् । तत्र द्वितीयो य स परिभाषणम् ॥ १४ ॥[1]

तत्र त्वाक्षारणा य स्यादाक्रोशो मैथुन प्रति ।

'क्षर सचलने' (भ्वा० प० स०) । ण्यन्ताद्युच् (३ ३ १०७) । परस्त्रीनिमित्त पुंस , परपुरुषनिमित्त स्त्रियाश्चाक्रोशा मैथुन प्रति । मैथुनमुद्दिश्य 'गाली' इत्यर्थ ॥[2]

स्यादाभाषणमालाप

आलाप सभाषणम् । 'लप व्यक्तायां वाचि' (भ्वा० प० से०) । घञ् (३ ३ १८) ॥[3]

प्रलापोऽनर्थक वच ॥ १५ ॥

अनर्थक प्रयोजनशून्यम् ॥ १५ ॥[4]

अनुलापोमुहुर्भाषा

मुहु पुन पुन ॥[5]

विलाप परिदेवनम् ।

परिदेवनं शोक ॥[6]

विप्रलापो विरोधोक्ति

विरुद्ध प्रलाप । विरुद्धस्योक्ति ॥[7]

सलापो भाषण मिथ ॥ १६ ॥

मिथोऽन्योन्य[8] प्रति युक्तिप्रत्युक्ती[9] सलाप ॥ १६ ॥[10]

सुप्रलाप सुवचनम्

सुष्ठु प्रलपनम् ॥[11]

---

1 Reproof with abuse [1] 2 Calumny or adultery [1]
3 Conversation [2] 4 Absurd words [1] 5 Repetition [1]
6 Lamentation [2] 7 A contradictory statement [2]
8 M मिथोन्योन्य 9 M प्रति उक्तिप्रत्युक्ती 10 A mutual talk [1]
11 Eloquence, good speech [2]

अपलापस्तु निह्नवः ।

निह्नवो गोपनम् । धार्यमाणेऽपि[1] न धारयामि' इत्याद्यम् । ह्नुङ् अपनयने' (अ० आ० अ०) । 'ऋदोरप्' (३ ३ ५७) ॥[2]

सदेशवाग्वाचिकं स्याद्

सदिश्यते सदेशः । तस्य वचनम् । सदिष्टस्यार्थस्याक्ति[3] । 'वाचो व्याहृतार्था- याम्' (५ ४ ३५) इति ठक्[4] । वाचिकम् ॥[5]

वाग्भेदास्तु त्रिषूत्तरे ॥ १७ ॥

उत्तरे वक्ष्यमाणा वाग्भेदास्त्रिषु ॥ १७ ॥

रुशती वागकल्याणी

'रुष हिंसायाम्' (भ्वा० प० अ०) । शत्रन्तात् ङीप् । रुशती । रुषत् शब्द । रुषद्वच ॥[6]

स्यात्कल्या तु शुभात्मिका ।

कलासु साधु कल्या । 'तत्र साधु' (४ ४ ९८) इति यत् । 'काल्या' अपि इति काल्य । द्वे ।[7]

अत्यर्थमधुरं सान्त्वम्

सान्त्वयति । सान्त्व[8] सामप्रयोगे' (चु० प० से०) ॥ द्वे ॥[9]

सगतं हृदयंगमम् ॥१८॥

हृदय गच्छति हृदयगमम् । यत्तिमिलित वच । 'गमश्च'[10] (३ २ ४७) इति खच् ॥१८॥[11]

निष्ठुरं परुषम्

नितिष्ठति निष्ठुरम् । 'मद्गुरादयश्च' (उ० १ ४१) इति निपात । पूरयति परुषम् । 'पॄ पालने' (जु० प० म०) । 'पृनहि—'[12] (उ० ४ ७५) इत्युपच् । द्वे ॥[13]

---

1 M धार्यमाणेपि 2 Denial [8] 3 M सदिष्टाथस्योक्ति 4 M ठक 5 Message [2] 6 An inauspicious word [1] 7 An auspicious word [1] 8 M सात्व 9 Very sweet Words [1] 10 M गमश्च 11 A Consistent Word [2] 12 M पृनहि 13 A harsh Word [2]

य. सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम् ॥ १४ ॥

उपालम्भो द्विधा—स्तुतिपूर्वो निन्दापूर्वश्च। 'महापुरुषस्य तवेदं किमुचितम्' इत्याद्यम्। 'हालिकस्य तवेदमुचितमेव' इति द्वितीयम्। तत्र द्वितीयो यः स परिभाषणम् ॥ १४ ॥[1]

तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति।

'क्षर संचलने' (भ्वा० प० स०)। ण्यन्तादुच् (३ ३ १०७)। परस्त्रीनिमित्तं पुंस, परपुरुषनिमित्तं स्त्रियाश्चाक्रोशो मैथुनं प्रति। मैथुनमुद्दिश्य 'गाली' इत्यर्थः ॥[2]

स्यादाभाषणमालापः

आलापः सभाषणम्। 'लप व्यक्तायां वाचि' (भ्वा० प० से०)। घञ् (३.३.१८) ॥[3]

प्रलापोऽनर्थकं वचः ॥ १५ ॥

अनर्थकं प्रयोजनशून्यम् ॥ १५ ॥[4]

अनुलापो मुहुर्भाषा

मुहुः पुन पुन ॥[5]

विलाप परिदेवनम्।

परिदेवनं शोक ॥[6]

विप्रलापो विरोधोक्तिः

विरुद्धं प्रलाप। विरुद्धस्योक्ति ॥[7]

संलापो भाषणं मिथः ॥ १६ ॥

मिथोऽन्योन्य[8] प्रति युक्तिप्रयुक्ती[9] संलाप ॥ १६ ॥[10]

सुप्रलाप सुवचनम्

सुष्ठु प्रलपनम् ॥[11]

---

1. Reproof with abuse [1] 2. Calumny or adultery [1]
3. Conversation [2] 4 Absurd words [1] 5. Repetition [1]
6 Lamentation [2] 7 A contradictory statement. [2]
8 M. मियोन्योन्यं 9 M प्रति उक्तिप्रत्युक्ती 10. A mutual talk [1]
11. Eloquence, good speech [2]

अपलापस्तु निह्नवः ।

निह्नवो गोपनम् । धार्यमाणेऽपि[1] न धारयामि' इत्याद्यम् । ह्नुङ् अपनयने' (अ० आ० अ०) । 'ऋदोरप्' (३ ३ ५७) ॥[2]

सन्देशवाग्वाचिकं स्यात्

संदिश्यते संदेशः । तस्य वचनम् । संदिष्टस्यार्थस्योक्तिः[3] । 'वाचो व्याहृतार्थायाम्' (५ ४ ३५) इति ठक्[4] । वाचिकम् ॥[5]

वाग्भेदास्तु त्रिषूत्तरे ॥ १७ ॥

उत्तरे वक्ष्यमाणा वाग्भेदास्त्रिषु ॥ १७ ॥

रुशती वागकल्याणी

'रुश हिंसायाम् (भ्वा० प० अ०) । शत्रन्तात् ङीप् । रुशती । रुशन् शब्दः । रुशद्वचः ॥[6]

स्यात्कल्या तु शुभात्मिका ।

कलासु साधु कल्या । 'तत्र साधुः' (४ ४ ९८) इति यत् । 'काल्या' अपि इति कात्यः । द्वे ।[7]

अत्यर्थमधुरं सान्त्वम्

सान्त्वयति । सान्त्व[8] सामप्रयोगे (चु० प० से०) ॥ द्वे ॥[9]

संगतं हृदयंगमम् ॥१८॥

हृदयं गच्छति हृदयंगमम् । यत्किमिलितं वचः । 'गमश्च'[10] (३ २ ४७) इति खच् ॥१८॥[11]

निष्ठुरं परुषम्

नितिष्ठति निष्ठुरम् । 'मद्गुरादयश्च' (उ० १ ४१) इति निपातः । पूरयति परुषम् । पॄ पालने' (जु० प० से०) । 'पृनहि—'[12] (उ० ४ ७५) इत्युषच् । द्वे ॥[13]

---

1 M धार्यमाणेपि 2 Denial [8] 3 M संदिष्टायस्योक्ति 4 M ठञ् 5 Message [2] 6 An inauspicious word [1] 7 An auspicious word [1] 8 M सान्त्व 9 Very sweet Words [1] 10 M गमेश्च 11 A Consistent Word [2] 12 M पृहनि 13 A harsh Word [2]

ग्राम्यमश्लीलम्.

ग्रामे भवम्। 'ग्रामाद्यखञौ (४ २ ९४)। श्रियं लाति श्रीलम्। तद्भिन्नम् मग्नादिवचनम्। रस्य लः। द्वे ॥[1]

सूनृतं प्रिये।

सत्ये

प्रियं सत्यं वचनं सूनृतम्। सुष्ठु ऊयते सूनृ सूनृश्च तहत च। सुष्ठु नृत्यन्त्यनेन वा ॥[3]

अथ सङ्कुलमक्लिष्टं परस्परपराहतं ॥१९॥

परस्परविरुद्ध[4] यथा— अधो[5] मणिमयाविध्यत्तमनङ्गुलिरावयत् ॥१०॥[6]

लुप्तवर्णपदं ग्रस्तम्

लुप्ता वर्णाः पदं वा यत्र। अगस्त्याग्निना असम्पूर्णमुच्चारितमिति यावत्। ग्रस्यते स्म। 'ग्रसु अदने (भ्वा० आ० से०)॥ द्वे ॥

निरस्तं त्वरितोदितम्।

त्वरितं शीघ्रमुक्तम्। निरस्यते स्म। असु क्षेपणे (दि० प० से०)। [illegible] ॥[8]

अम्बूकृतं सनिष्ठेवम्

अनम्बुनाम्बुना[9] करणमम्बूकृतम्। च्वौ—' (७ ४ २६) इति दीर्घः।[10] निष्ठेवं स्यूतकारः। ष्ठिवु निरसने (भ्वा० प० से०)। 'निष्ठीवम्' इति पाठः पृषोदरादित्वात् (६ ३ १०९) [ण्कार]। लाव्यनिगममहितवचनस्यैवम् ॥[11]

अबद्धं स्यादनर्थकम् ॥२०॥

न बद्धयते स्म। 'बध बन्धने (भ्वा० प० अ०)। क्तः (३ २ १०२)। असम्बद्धं दशदाडिमादिवाक्यम् ॥२०॥[12]

अनक्षरमवाच्यं स्यात्

अनक्षरम्। निरक्षरम्। न वक्तुमर्हम्। निन्द्यवचनस्य द्वे ॥[13]

---

1 A Vulgar Word [2] 2 M ग्राम्य 3 3 A Pleasant and true Word 2 4 M परस्परविरुद्ध 5 M अधो 6 A Complicated statement [3] 7 A half uttered Word [2 8 A rapidly uttered Word 2 9 M अनम्बु- अम्बु 10 M च्वौ, 11 A word accompanied with emission of saliva 1 12 A meaningless statement 2 13 An unutterable Word [2

आहतं तु मृषार्थकम् ।

आहन्यते स्म[1] । मृषाऽर्थो यस्य । 'एष वन्ध्यासुतो याति खपुष्पकृतशेखर । मृगतृष्णाम्भसि स्नात शशशृङ्गधनुर्धर ॥' द्वे ॥[3]

सोल्लुण्ठनं तु सोत्प्रास मणित रतिकूजितम् ॥२१॥

'सोल्लुण्ठनं तु सोत्प्रासं मणीत रतिकूजितम्' इति

क्वचित् पठ्यते । 'लुठि आलस्ये प्रतिघाते च' (भ्वा० प० से०) । ल्युट् (३ १ ११५) उल्लुण्ठनेन सहितम् । उत्प्रासनम् । 'असु क्षेपणे' (दि०प०से०) । उत्प्रास उपहास । तत्सहितम् । द्वे ॥[4]

'मण कूजने (भ्वा० प० स०) । क्त (३ ३ ११४) । रतौ कूजितम् । द्वे ॥[5]

अथ म्लिष्टमविस्पष्टम्

म्लेच्छेर्म्लिष्टम् । 'क्षुब्धस्वान्त—' (७ २ १८) इति साधु । अविस्पष्टमप्रकट (म्) । द्वे ॥[6]

वितथ त्वनृत वच ।

विगत तथा सत्य यत्र तद्वितथम् । न ऋतमनृतम् । मिथ्योक्ते ॥[7]

सत्य तथ्यमृत सम्यग्

सति साधु सत्यम् । तथा साधु तथ्यम् । समञ्चति सम्यक् ॥[8]

अमूनि त्रिषु तद्वति ॥२२॥

तद्वति त्रिषु । सत्या आगी , सत्य शब्द , सत्य वच ॥२२॥

शब्दे निनादनिनदध्वनिध्वानरवस्वना ।

स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वना ॥२३॥

आरवारावसंरावविरावा

शब्द शब्दन । घञ् (३ ३ १८) । 'णद अव्यक्ते शब्दे' (भ्वा० प० से) । 'नौ[9] गद—'(३ ३ ६४) इत्यप् । घजि नाद [10] । 'ध्वन शब्दे' (भ्वा० प० से०)

1 M स्मा 2 M मृषा अर्था 3 An impossible statement [2] 4 A sarcastic statement [2] 5 The sound at the time of coition [2] 6 An indistinct word [2] 7 A false word [2] 8 A true word [2] 9 M र्नौ 10 M नाद।

'ह शब्दे' (अ० प० से०)। 'ऋदोरप्' (३ ३ ५७)। 'स्वनहसोर्वा' (३ ३ ६२) इति घञपौ ॥ २३ ॥[1]

अथ मर्मर।

स्वनिते वस्त्रपर्णानाम्

मर्मरानि मर्मर ॥

भूषणानां तु शिञ्जितम् ॥२४॥

निक्वाणो निक्वण क्वाण क्वण क्वणनमित्यपि।

भूषणानां ध्वनौ। शिजि अव्यक्ते शब्दे' (अ० आ० स०)। भूषणध्वने षट् ॥२४॥[3]

वीणायाः क्वणिते प्रादे प्रक्वाणप्रक्वणादयः ॥२५॥

उत्तरे उपसर्गात्पर क्वणधातुस्वेदित्यर्थ क्वणो वीणायामिति सोपसर्गाद् घञपोर्विधानात् ॥२५॥[4]

कोलाहल कलकल

कालनम्। काल एकोभाव। 'कुल सस्त्याने' (भ्वा० प० से०)। कोलमाहलति। 'हल विलेखने' (भ्वा० प० से०)। 'कल शब्द' (भ्वा० आ० से०)। कलादपि कल। द्वे ॥[5]

तिरश्चां वाशित रुतम्।

तिरोऽञ्चन्ति[6] तिर्यञ्च। तेषां शब्द तद्वाशितम् ॥[7]

स्त्री प्रतिश्रुत्प्रतिध्वाने

प्रतीप श्रूयते प्रतिश्रुत्। प्रतिध्वनि ॥[8]

गीतं गानमिमे समे ॥ २६ ॥

इति शब्दादिवर्ग ॥ ६ ॥

[स्पष्टम्] ॥ २६ ॥[9]

इति शब्दादिवर्ग ॥ ६ ॥

---

1 Sound (in general) [17] 2 The rustling sound of leaves and garments [1] 3 Tinkling of ornaments [6] 4 The sound of a lute 2 5 uproar [2] 6 M [illegible] 7 Cry of birds [1] 8 Echo [2] 9 Song [2]

निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिता स्वराः ॥१॥

निषीदति मनो-स्मिन्निति[1] निषादः । षद्लृ (भ्वा० तु० प० अ०) । घञ् (३ ३ २१) । ऋषभो गवाच्छब्दानुकारित्वात् । तदाहु —'षड्ज मयूरा ब्रुवन गावस्त्वृषभमाषिण । अजाविक तु गान्धार क्रौञ्चो नदति मध्यमम् । पुष्पसाधारणे काले पिक कूजति पञ्चमम् । अश्वस्तु धैवत घंति निषाद रौति कुञ्जर ॥' गन्धारदेशे भव गान्धार । 'नासाकण्ठशिरस्तालुजिह्वादन्तांश्च संस्पृशन् । षड्भ्य सजायते यस्मात्तस्मात् षड्ज इति स्मृत ॥' मध्ये भव मध्यम । 'तद्वदवाप्यितो वायुरर कण्ठसमाहत । नाभिप्रायो महानादो मध्यस्थस्तेन मध्यम ॥ धीमता मय धैवत । पृषोदरादि (६ ३ १०९) । 'वायु समुद्गता नाभेरुरोहृत्कण्ठ-मूर्धसु । विचरन्पञ्चमस्थानप्राप्त्या पञ्चम उच्यते ॥ अमी सप्तस्वरास्तन्त्रीन कण्ठाच्च उच्चरन्ति । 'दारवी गात्रवीणे च द्वे वीणे स्वरयारिव' इति वचनात् ॥ १ ॥[2]

काकली तु कले सूक्ष्मे ध्वनौ

कले मधुरे । सूक्ष्मे अल्प च । ध्वनौ शब्दे । काकली । ईषत्कलाऽस्याम् ।[3] एवम् ॥[4]

तु मधुरास्फुटे ।

कल

मधुर श्रुतिसुख । अस्फुटोऽव्यक्ताक्षर । ईदृशे ध्वनौ कल । कल सख्याने' (भ्वा० आ० से०) । घ (३ ३ १२५) । एवम् ॥[5]

मन्द्रस्तु गम्भीरे

गम्भीर मेघादिध्वनौ । मन्दन । 'मदि स्तुत्यादौ' (भ्वा० अ० से०) । 'स्फायि—' (उ० २ १३) इति रक्[6] । एवम् ॥[7]

---

1 M मनोस्मिन्निति 2 The seven notes being, niṣāda ṛṣabha, gandhāra, ṣadja, dhaivata, Madhyam & pañcama [1 each] 3 M ईषत्कलाऽस्याम् 4 A low and sweet tone [1] 5 A sweet and indistinct tone [1] 6 M रन् 7 Deep or rumbling sound [1]

कांस्यतालादिकं घनम् ॥ ४ ॥

कांस्यमयस्तालः । घनं निबिडत्वात् । 'मूर्तौ घनः' (३ ३ ७७) इति हन्तेरप्
घनादेशश्च ॥ ४ ॥[1]

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।

इदं ततादि चतुर्विधं वाद्यते ध्वन्यते । वदेर्ण्यन्तात् (३ १ २६) 'अचो यत्'
(३ १ ९७) । 'भृवादिगृभ्यो णित्रन्' (उ० ४ १७०) आसमन्तात्तुद्यते ताड्यते ।
तुदेर्ण्यत् (३ १ १२४) । त्रीणि ॥[3]

मृदङ्गा मुरजा

मृत् अङ्गमेषाम् । मुरात्संवेष्टनाज्जाता मुरजाः । 'मुर संवेष्टने' (तु०प०से०)
तुदादि । द्वे ॥[4]

भेदास्त्वङ्क्यालिङ्ग्यूर्ध्वकास्त्रयः ॥ ५ ॥

तथा भेदा विशेषास्त्रयः । अङ्कोऽस्यास्त्यङ्की[5], उत्सङ्गस्थत्वात् । आलिङ्गोऽ-
स्यास्त्यालिङ्ग्यवादनात्[6] । ऊर्ध्वं कायति, ऊर्ध्वकः । ऊर्ध्वीकृत्यैकेन मुखेन वादनात् ।
केचित्तु अङ्क्यलिङ्ग्य इति पठन्ति । 'हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्त-
थोर्ध्वकः । आलिङ्ग्यश्चैव गोपुच्छो मध्यदक्षिणवामगः ॥' नाट्ये चैतत् ॥ ५ ॥[7]

स्याद्यशःपटहो ढक्का

यशोऽर्थं[8] पटहो यशःपटहः । यत्रादौ यशाऽर्थं[9] पटहो हन्यते सः । अयं
सार्धहस्तद्वयदीर्घः षडङ्गुलपरिधिविस्तारः । सगीतशास्त्रे 'देशीपटह' इत्युच्यते ।
ढगित्यव्यक्तं कायति ढक्का । 'कै शब्दे' (भ्वा० प० से०) । 'आतोऽनुपसर्गे[10] कः'
(३ २ ३) । 'ढोल' इति लोके । 'ढिंढोरा' इत्यस्यैत्येके । द्वे ॥[11]

भेरी स्त्री दुन्दुभिः पुमान् ।[12]

बिभेत्यस्या भेरी । 'ऋज्रेन्द्र—' (उ० २ २८) इति रन् । 'दुन्दु' शब्देन
भाति दुन्दुभिः । बाहुलकात्किः । 'नगारा' इति लोके । 'भेरीनफीरी' इत्यन्ये ।

---

1 M घनादेशश्च 2 Bell and a like musical instruments [1]
3 Four kinds of musical instruments [3] 4 Tabors [2]
5 M अङ्कोस्यास्त्यङ्की 6 M आलिङ्गोस्यास्त्यालिङ्ग्यवादनात्
7 Three kinds of tabors [1 each] 8 M यशोर्थं 9 M यशोर्थं
10 M कानेनुपसर्गे 11 Double-drum [2] 12 B reads this quarter as भेर्यामानकदुन्दुभी ।

भेरी ढक्काभेद.[1] । 'दुन्दुभिस्तुभित्र एव' इत्यन्ये । संगीतशास्त्रे दुन्दुभिन पृथगेव 'भेरी, नफीरी' इति दृश्यते । तत्र हि त्रिवितस्तिदीर्घा ताम्रनिर्मिता । चर्तुविंशत्यङ्गुले वक्त्रयुते मुखं क्रियते । कोणाख्येन काष्ठेन वामहस्तेन च तस्या वादनम्[3] । द्वे ॥[4]

आनकः पटहोऽस्त्री स्यात्

आनयति प्रोत्साहयति, आनक । ण्वुल् (३.१.१३३)। पटेन हन्यते पटह' । हन्तेर्ड (वा० ३ २.१०१)। अयं मार्गपटहो लोके 'पखाउज' इत्युच्यते । द्वे ॥[5]

कोणो वीणादिवादनम् ॥ ६ ॥

कुणत्यनेन । कुण शब्दे (तु० प० से०) । वीणादिकं येन काष्ठेन वाद्यते । तच्च क्वचिद्धनुराकृति, ढक्कादौ सरल एव काष्ठमय, वीणादौ लोहादिमयः ॥ ६ ॥ द्वे ॥[6]

वीणादण्ड प्रवाल स्यात्

वीणाया दण्ड । प्रकर्षेण वल्यते प्रवाल । 'वल संवरणे' भ्वा० प० से०)। घञ् (३ ३ १९)। अयं हस्तक्याद्दिदीर्घ ॥[7]

ककुभस्तु प्रसेवकः ॥

क वातं स्कुभ्नाति । स्कुभि सौत्र । पृषोदरादि (६ ३ १०९)। वीणादण्डाग्र स्थित[8] शब्दगाम्भीर्यार्थमलाबुशर्वादिमयं भाण्डम् । 'वीणाप्रान्तस्थवक्रवाद्यविशेषस्य' इति रामाश्रमी[9] । प्रसेव्यते । क्वुन् (उ० २.३२) ॥ द्वे ॥[10]

कोलम्बकस्तु कायोऽस्याः

अस्या वीणायाः काय. अलाबुदण्डादिसमुदायस्तन्त्रीहीन. । 'कुल सम्त्याने' (भ्वा० प० से०) । बाहुलकादम्बच् । एकम् ॥[11]

1. M. ढक्काभेद 2 M. त्रिके 3. M. वादन 4. Kettle-drum [2] 5 War-drum [2] 6 The quill of a lute [1] 7. The neck of a lute [2] 8. M. वीणादण्डाधस्थितं 9. M. रामाश्रम 10. A small instrument of wood placed under the neck of a lute to make the sound deeper [2] 11. The body of a' lute [1].

उपनाहो निबन्धनम् ॥७॥

उपनह्यतेऽनेनास्मिन्[1] वा । 'णह् बन्धने' (दि० उ० अ०) । यत्र तन्त्र्यो निबध्यन्ते तस्याध्वंभागस्य द्वे ॥७॥[2]

वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः ।
मर्दलः पणवोऽन्ये च

'डम्' इत्यव्यक्तं शब्दमियर्ति डमरुः । अर्तेः (जु० प० स०) मृगय्वादित्वात् (उ० १ ३७) कुः । मज्जतीति[3] मज्जकम् । 'भृमृशी—'[4] (उ० १ ७) इत्यादिना च । पृषोदरादित्वात् (६ ३ १०९) जस्य डः । जलवाद्यमेतत् । डिण्डिमझर्झरौ शब्दानुकारात् । मर्द्यते मर्दलः[5] । मृदङ्गभेदः । पणायत्यन्तर्गतस्तन्त्रीकः । अन्ये हुडुक्कागोमुखादयः ॥[6]

नर्तकीलासिके समे ॥८॥

नृत्यति नर्तकी । 'शिल्पिनि ष्वुन्' (३ १ १४५) । लसति लासकी । 'लस श्लेषणक्रीडनयोः' (भ्वा० प० स०) ण्वुल् (३ १ १३३) ॥८॥[7]

विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ।

विलम्बन्ते करणादयोऽत्र[8] । 'लबि अवस्रंसने' (भ्वा० आ० स०) द्रवति शीघ्रं गच्छत्यत्र । विलम्बितद्रुतमध्यानां नृत्य–गीत–वाद्यानां तत्त्वादीनि क्रमेण नामानि । तदुक्तं सङ्गीतरत्नाकरे—"क्रियानन्तरविश्रान्तिर्लयः स त्रिविधो मतः । द्रुतो मध्यो विलम्बश्च द्रुतः शीघ्रतमो मतः ॥" इति । 'तत्त्वमोघो घनम्' इत्यन्ये पठन्ति 'उच समवाये' (दि० प० से०) । पृषोदरादित्वात् (६ ३ १०९) घः ॥[9]

तालः कालक्रियामानम्

तालः । तल प्रतिष्ठायाम् (चु० प० से०) । करणे घञ् । 'मयाया गानक्रियायाः कालनियमहेतुः' इत्यर्थः[10] ॥[11]

---

1 M उपनह्यतेनेनास्मिन् वा 2 The tie of a lute (the lower part of the tail piece where the wires are filed [2] 3 M मज्जनोति 4 M भृमिशी 5 M मदल 6 Different kinds of drums [1 each] 7 A Female dancer [2] 8 M करणादयात्र 9 Slow fast and mean times (in music) [1 each] *10 See also,* अमरकोशोद्घाटन p 19 11 Musical time or measure [1]

लयः साम्यम्

गीतवाद्यपादादिन्यासानां क्रियाकालयोः साम्यं लयः । अत्र लघ्वादिना क्रिया परिमीयते तया तालः । तद्यथा—'लघुद्वयं गुरु' इति प्रतिमण्ठतालः । 'आवापस्तत्र हस्तस्योत्तानस्याङ्गुलिकुञ्चनम् । निष्क्रामोऽधस्तलस्य[1] स्यादङ्गुलीनां प्रसारणम्' इति ॥[2]

अथास्त्रियाम् ॥ ९ ॥

ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तने ।

तण्डुना प्रोक्तं ताण्डवम् । 'नट अवस्यन्दने' (भ्वा० प० से०) । ल्युट् (३ ३ ११५) । ण्यति (३ १ १२४) नाट्यम् । 'ऋदुपधाच्च—' (३ १ ११०) इति नृत्ते क्यप् । नाट्यशास्त्रे त्वेषां भेदोऽस्ति[3] । तथा हि—साक्षादिवार्थाकारादिप्रदर्शिका हस्तादिचेष्टा अभिनयः । स चतुर्धा । अङ्गैः प्रदर्शित आङ्गिकः । वाचा विरचितो वाचिकः । हारकेयूराद्यैः प्रदर्शित आहार्यः । सात्त्विकैर्भावैर्विरचितः सात्त्विकः । काव्याद्यर्थविभावादिव्यञ्जको नटे स्थितोऽभिनयः[4] चतुर्भिरभिनयैरुपेतः वाक्यार्थाभिनयो नटकर्म नाट्यं नर्तनं च । नाटकादावेव आङ्गिकाभिनयैः पदार्थोऽभिनयो[5] नृत्यम् । गात्रविक्षेपमात्रं विवाहाभ्युदयादौ सर्वाभिनयवर्जितं नृत्तम् । 'वर्धमानासारिताद्यैर्गीतैस्तत्र ध्रुवायुतैः करणैरङ्गहारैश्च प्राधान्येन प्रवर्तितः । तच्चोत्तमुद्धतप्रायं प्रयोगं ताण्डवं मतम् ॥' ललिताङ्गहाराभिनयं वासकसज्जादि नायकावरितिरित्यादिवत्लास्यम् । तदुक्तम्—'लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धनम् ।' इति । करणं हस्तादिक्रिया । तदुक्तम्—'स्यात्क्रिया करपादादेर्विलासेनानुदृष्टसाकरणं नृत्यकरणमीमवद्भ्रीमसेनवत् । अङ्गानामुचिते देशे प्रापणं सविलासकम् । मातृकोक्तसम्प्रदायमङ्गहारोऽभिधीयते[6] ॥' रौद्रादिरसप्रधानाङ्गा भटीवृत्तिस्ताण्डवे शृङ्गारे करणैर्शिकीवृत्तिर्लास्य ॥[7]

तौर्यत्रिकं नृत्यगीतं वाद्यं नाट्यमिदं त्रयम् ॥१०॥

नृत्तगीतवाद्यं तौर्यत्रिकम् । तूरी त्वरायाम् (दि० प० से०) । ण्यत् (३ १ १२४) तूर्यं[8] मुरजादि । तत्र भवं त्रिप्रमाणं तौर्यत्रिकम् । रसप्रसङ्गमिच्छन्ति

1 M निष्क्रामोऽधस्तलस्य 2 The union of song, dance and musical instrument [1] 3 M भेदोऽस्ति 4 M स्थितोऽभिनय 5 M पदार्थाभिनयो 6 M मातृकोक्तसम्प्रदायमङ्गहारोऽभिधीयते 7 Dance [6] 8 M तूर्यं ।

तूर्यत्रयमिदं विदुः । नृत्तादित्रयमेव नाट्यम् । 'चतुर्धाभिनयोपेतो नटो भाषादि-भेदवित्'॥१०॥[1]

भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ।
स्त्रीवेषधारी पुरुषः

यः पुरुषः स्त्रीवेषधारी नृत्यति तस्मिन् भ्रकुंसादित्रयम् । 'पटपुट—' इति दण्डोक्त 'कुसि' धातोस्चुरादिण्यन्तात् (३ १ २५) 'एरच्' (३ ३ ५६) । भ्रुवा कुंसो भाषणं शोभा वा अस्य । 'इको ह्रस्वोऽङ्य[2]—' (६ ३ ६१) इति ह्रस्वम् । 'अभ्रुकुंसादीनाम्' इति पक्षे अत्वम् । 'नर्तकः सूरिभिः प्रोक्तो नाट्यनृत्ते कृतश्रमः ।'[3]

नाट्योक्तौ

'नाट्योक्तौ' इत्यधिकारः प्रागङ्गहारात् [अ० १ ७ १६] ।

गणिकाऽज्जुका ॥ ११ ॥

गणिका अज्जुका ज्ञेया । 'अर्ज अर्जने' (भ्वा० प० से०) । 'समि कसे —' (उ० २ २९) इति बाहुलकादुकन् रस्य जः ॥११॥[4]

भगिनीपतिरावुत्तः

आ समन्तात्, अपनम् । क्विप् (वा० ३ ३ ९४) । तमुत्तनोति, आवुत्तः । तनोतेर्डः । एकम् ॥[5]

भावो विद्वान्

भावयति भावः । नाट्यादन्यत्राप्येते दृश्यन्ते । तदुक्तम्—'मान्यो भावेऽपि[6] वक्तव्यः किञ्चिदूनेऽपि[7] मारिषः ।' इति ॥[8]

अथावुकः ।
जनकः

अवति । बाहुलकादुकण् । जनकः पिता । एकम् ॥[9]

1 The union of song, dance and musical instrument [2] 2 M ह्रस्वोऽङ्य 3 A male dance in female attire [3] 4 Courtesan [1] 5 A sister's husband [1] 6 M भावेऽपि 7 M किंचिदूनेऽपि 8 A learned man [1] 9 Father [1]

युवराजस्तु कुमारो भर्तृदारकः ॥ १२ ॥

युवा चासौ राजा च । कुमारयति । 'कुमार क्रीडायाम्' (चु० उ० से०) । अच् (३.१.१३४) । भर्तुः राज्ञो दारकः सुतः । 'दृङ् आदरे' (तु० आ० अ०) । ण्वुल् (३.१.१३३) । द्वे ॥ १२ ॥[1]

राजा भट्टारको देवः

भर्तृ स्वामित्वमृच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । दीव्यति देवः । द्वे ॥[2]

तत्सुता भर्तृदारिका ।

भर्तुः राज्ञः ॥[3]

देवी कृताभिषेकायाम्

राज्ञः पट्टबन्धनीया राज्ञी सा देवी ॥[4]

इतरासु तु भट्टिनी ॥ १३ ॥

अन्या राजपत्नी भटे (भ्वा०प०से०) तनि भट्टः सोऽस्त्यस्याः[5] भट्टिनी ॥१३॥[6]

अब्रह्मण्यमवध्योक्तौ

अवध्योक्तौ वध नार्हतीत्युक्तौ । ब्रह्मणि साधु ब्रह्मण्यम् । क्लिबलिङ्गम् ॥[7]

राजश्यालस्तु राष्ट्रियः ।

राष्ट्रेऽधिकृत[8] । 'राष्ट्रावारपार—' (४.२.९३) इति घ. । एकम् ॥[9]

अम्बा माता

अम्ब्यते अम्बा । 'अबि शब्दे' (भ्वा० आ० से०) । 'गुरोश्च हलः' (३.३.१०३) । 'नाट्योक्तौ' [अ० १ ७ ११] इत्यस्य प्रामिकत्वादम्बादीना- मन्यत्रापि प्रयोगः ॥[10]

अथ बाला स्याद्वासू

बाला कुमारी । वास्यते स्वगृहे वासू. । बाहुलकात् । एकम् ॥[11]

---

1. Crown-prince [2] 2. King [2] 3. Pincess [1] 4. A *Crowned* queen [1] 5. M. सोऽस्त्यस्या 6 An uncrowned queen [1] 7 Not favourable to Brahmans; an unbrahmanical or sacrilegious act [1] 8. M. राष्ट्रे अधिकृत. 9. Brother in-law of a King (queen's brother) [1] 10. Mother [1] 11. Virgin [1].

आर्यस्तु मारिषः ॥ १४ ॥

अर्तुं योग्य । आर्य । 'ऋ गतौ' (भ्वा॰ प॰ अ॰) । ण्यत् (३ १ १२४) । मर्षणान्मारिष । मान्य । पृषोदरादि (६ ३ १०९) ॥ १४ ॥[1]

अत्तिका भगिनी ज्येष्ठा

अत्ता[2] मानवाग्निका । एकम् ॥[3]

निष्ठा निर्वहण समे ।

नियत स्थान निष्ठा । निरशेषेण वहन समाप्तिर्निर्वहणम् । मुखप्रति-मुखगर्भावमर्शनिर्वहणाख्या नाटके पञ्चसंधय । 'प्रस्तुतकथासमापनस्य' इत्यन्य ॥[4]

हण्डे हञ्जे हलाह्वान नीचा चेटीं सखीं प्रति ॥ १५॥

नीचा प्रति आह्वान हण्डे, चेटी प्रति हञ्जे, सखी प्रति हला । त्रीण्यव्ययानि ॥१५॥[5]

अङ्गहारोऽङ्गविक्षेप

अङ्गस्य हार । स्थानात्स्थानान्तरे नयनम् । द्वे ॥[6]

व्यञ्जकाभिनयौ समौ ।

व्यनक्ति व्यञ्जक । आभिमुख्य नीयतेऽर्थोऽनेनाभिनय ।[7] मनोगत भावसूचक । वाचिकाङ्गिकाहार्यसात्त्विकभेदाच्चतुर्धा ॥[8]

निर्वृत्ते त्वङ्गसत्त्वाभ्या द्वे त्रिष्वाङ्गिकसात्त्विके ॥१६॥

[स्पष्टम्] ॥१६॥[9]

शृङ्गारवीरकरुणाद्भुतहास्यभयानका ।
बीभत्सरौद्रौ च रसा

---

1 A venerable man addressed by the सूत्रधार in dramas [1]
2 M अत्ता 3 Elder sister [1] 4 Catastrophe or end of a drama [2] 5 The vocative particles used in addressing a female of inferior caste, female attendant, and female friend [1 each] 6 Gesticulation [2] 7 M नीयतेऽर्थोनेनाभिनय
8 A theatrical action expressive of some sentiments [[illegible]]
9 Bodily actions and others derived from the *sattva* quality [1 each]

शृङ्गारादयोऽष्टौ[1] रसा.। चशब्दाच्छान्तोऽपि[2] नवमो रस.। रस्यन्ते रसा.। 'रस आस्वादने'। तदाहु —'विभावैरनुभावैश्च युक्तोऽथ[3] व्यभिचारिभिः। आस्वाद्यत्वात्प्रधानत्वात्स्थाय्येव तु रसो भवेत् ॥' इति ॥[4]

शृङ्गारः शुचिरुज्ज्वलः ॥१७॥

शृङ्गमुन्नतिमियर्ति शृङ्गार.। उत्तमयुवप्रकृतित्वेन जुगुप्सारहितत्वाच्छुचिः। उच्चैर्ज्वलति प्रकाशते। अच् (३ १ १३४)। त्रीणि ॥१७॥[5]

उत्साहवर्धनो वीर.

उत्साह वर्धयति। ल्यु. (३ १ १३३)। वीरयति वीर। 'वीर विक्रान्तौ' पचाद्यच् (३.१ १३४)। द्वे ॥[6]

कारुण्यं करुणा घृणा।
कृपा दयानुकम्पा स्यादनुक्रोशोऽपि

करुण करुणावान्। तस्य भाव। ब्राह्मणादित्वात् (५ १ १२४) ष्यञ्। घृण्यतेऽनया[7] घृणा। 'क्रप कृपायाम्' (भ्वा० आ० से०)। 'क्रपेः सम्प्रसारण च' (ग० ३ ३ १०४) इत्यङ्। दयते रक्षत्यनया। भिदादि.। कपि चलने (भ्वा० आ० से०)। 'गुरोश्चहल' (३ ३ १०३)। अनुकम्पा। अनुक्रोशत्यनेन। क्रुशेर्घञ्। करुणरसस्य सप्त ॥[8]

अथो हस ॥१८॥
हासो हास्यं

'हसे हसने' (भ्वा० प० से०)। 'स्वनहसोर्वा'[9] (३ ३ ६२) अप् ॥१८॥ हास ॥ घञ् (३ ३.१८)। ष्यति (३ १.१२४) हास्यम्। त्रीणि ॥[10]

बीभत्सं विकृतं त्रिष्विदं द्वयम्।

बधेर्निन्दाया सन् (३ १.६)। भावे घञ् (३ ३ १८)। जुगुप्साप्रभवत्वाद्विकृत, विष्ठारुधिरादिदर्शनजनित.। रसे पुमान् तद्वति त्रिलिङ्ग.। द्वयोरित्यनेन पर्यायता सूचिता ॥[11]

---

1. M शृङ्गारादयष्टौ 2. M. च शब्दाच्छान्तोपि 3. M. युक्तोथ 4. Nine rasas (sentiments) 5. शृङ्गार-रस (erotic sentiment) [3] 6 वीर-रस (the sentiment of heroism) [2] 7. M. घृण्यतेनया 8 करुणा-रस (the pathetic sentiment) [7] 9. M. स्वनहसोर्वा 10. हास्य-रस or the sentiment of mirth or humovr [3] 11. बीभत्स रस (disgusting sentiment) [2].

विस्मयोऽद्भुतमाश्चर्यं चित्रमपि

विपूर्वात् स्मिङ (भ्वा० आ० अ०) 'एरच्' (३.३ ५६)। 'अद्[1]' आश्चर्यार्थेऽव्ययम्[2]। तस्यभवनमद्भुतम्। 'अदि[3] भुवो डुतच्' (उ० ५ १)। आचरणीयम्। 'आश्चर्यमनित्ये (६ १ १४७) इति साधु। 'चित्र चित्रकरणे' (चु उ०से०) ण्यन्तात् पचाद्यच् (३ १ १३४) चत्वारि ॥[4]

अथ भैरवम् ॥ १९ ॥

दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्।
भयंकरं प्रतिभयम्

भीरोरिदं त्रासकत्वाद्भैरवम् ॥१९॥ दारयति। 'कृवृदारिभ्य उनन् (उ०३ ५३)। भीषयते। ल्यु (३ १ १३४)। बिभेत्यस्मात्। 'भिष पुक्च' (उ० १ १४८) इति मक्। 'भीमादयोऽपादाने[5]' (३ ४ ७४) घुर भीमार्थे (तु० प० से०)। बिभेत्यस्मात्। 'आनक शीङ् भियः' (उ० ३ ८२। भयं करोति। 'मर्षति-भयेषु कृञ' (३ २ ४३)। खच्। प्रतिगतं भयेन। नव ॥[6]

रौद्रं तूग्रम्

रुद्रस्यायम्। रौद्रः क्रोधात्मा। 'उच समवाये' (दि० प० से०)। 'ऋज्रेन्द्र—' (उ० २ २८) इति रन् ॥[7]

अमी त्रिषु ॥ २० ॥

चतुर्दश

अमी अद्भुताद्याश्चतुर्दश तद्वति त्रिषु ॥ २० ॥

दरत्रासौ भीतिर्भीः साध्वसमयम्।

दीर्यत्यस्मात्। दर। 'दॄ भये'। अप् (३ ३ ५७)। 'त्रसी उद्वेगे' (दि० प० से०)। घञ् (३ ३ १८)। 'ञिभी भये' (जु० प० से०)। क्तिन् (३.३ ९४)। भीति। क्विपि (वा० ३ ३ ९४) भी। साधून् स्यति। मृगविमुजादित्वात्क। षट् ॥[8]

1 M अति 2 M आश्चर्यार्थेऽव्ययम् 3 M अति 4 Adbhuta rasa (marvellous sentiment) [4] 5 M भीमादयोपादाने 6 Bhayānaka rasa, the sentiment of terror [9] 7 Raudra rasa, the sentiment of wrath or furiousness [2] 8 Fear [6]

विकारो मानसो भाव

मानसो विकारो रत्यादिर्भाव । भावयति करोति रसान् । 'व्यक्त स तैर्विभावाद्यै स्थायीभावो रस स्मृत ।' इति वचनाद्भावरससमितिविभावा । ते चालम्बनविभावा उद्दीपनविभावाश्च । यमालम्ब्य रस उत्पद्यते स आलम्बन विभाव । यथा—शृङ्गारादौ नायिकादि । यो रसमुद्दीपयति स उद्दीपनविभाव । यथा—गान्धर्वोपवनगमनादि ॥[1]

अनुभावो भावबोधक ॥२१॥

अनुभावयन्ति अनुभवगोचरता नयन्ति रसानित्यनुभावा कटाक्षादय । अनेकरसनिष्ठत्व व्यभिचारित्वम् । यथा रति शृङ्गारशान्तकरुणाहास्येषु । निर्वेदादयस्तु व्यभिचारिणस्त्रयस्त्रिंशत् । विभावैर्ललनोद्यानादिभिर्जनित स्थायी-रत्यादिको भाव । अनुभाव कटाक्षादिभि कार्यैरनुभित । व्यभिचारिभिर्निर्वे—दादिभि सहकारिभिरुपचितो रस इति भट्टलोल्लटप्रभृतय ॥२१॥[2]

गर्वोऽभिमानोऽहङ्कारो

'गर्व माने' (चु० आ० स०) । घञ् (३ ३ १८) । अभिसर्वतो मननमभिमान । 'अहम्' इति करणमहङ्कारः ॥[3]

मानश्चित्तसमुन्नति ।

'मनु अवबोधने (त० आ० से०) घञ् । मान । चित्तस्य समुन्नति ॥[4]

अनादरः परिभव परीभावस्तिरस्क्रिया ॥२२॥
रीढावमाननावज्ञावहेलनमसूर्क्षणम् ।

न आदर । 'परौ भुवोऽवज्ञाने'[5] (३ ३ ५५) इति घञ् । भाव । पक्षे 'ऋदोरप्' (३ ३ ५७) । तिरस्करणम् । कृञ श (३ ३ १००) । 'तिरसोऽन्यतरस्याम्'[6] (८ ३ ४२) इति स ॥२२॥ रेहण रीढा । 'रिह कत्थनादौ' (तु० प० से०) । क्त । ढ़ाढे[7] (८ २ ३१) लोप मनेर्ण्यन्ताद्युच् (३ ३ १०७) 'आतश्च—'(३ ३ १०६) इत्यङ् । अवज्ञा । 'हेड्[8] अनादरे' (भ्वा० आ०से०) । घञ् (३ ३ १८) । अवहेलनम् । 'मृक्षं आदरे' (भ्वा० प० से०) । नञ ॥[9]

1. Bhava as rati etc [1] 2 Anubhava (an eternol manifestation or indication of a feeling) [1] 3 Pride or egoism [3] 4 Self respect [2] 5 M भुवावज्ञाने 6 M तिरसोऽन्यतरस्याम् 7 M ढाढे 8 M हेड्- 9 Disregard [9]

मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा

मन्दमक्षि यत्र तन्मन्दाक्षम् । 'ह्री लज्जायाम्' (जु० प० अ०) । सम्पदादि [वा० ३ ३ ९४] क्विप् । 'त्रपूष् लज्जायाम्' (भ्वा० आ० से०) । षित्वात् (३ ३ १०४) अङ् । 'व्रीड लज्जायाम्' (दि० प० से०) । 'ओलस्जी व्रीडे' (तु० प० से०) । अ प्रत्यय (३ ३ १०३) ॥ पञ्च ॥[1]

सापत्रपान्यत ॥२३॥

सा लज्जा अन्यतस्त्वेन् परस्माल्लज्जावहे जाते अपत्रपा । एकम् ॥२३॥[2]

क्षान्तिस्तितिक्षा

'क्षम् सहने' (दि० आ० अ०) क्तिन् । तिजे (भ्वा० आ० से०) क्षमाया सन् (३ १ ५) । द्वे ॥[3]

अभिध्या तु परस्य विषये स्पृहा ।

अभिध्यानमभिध्या । 'आतश्च—' (३ ३ १०६) इत्यङ् । परस्य विषयिणीच्छा ॥[4]

अक्षान्तिरीर्ष्या

न क्षान्ति । ईर्ष्यणमीर्ष्या । 'ईर्ष्य ईर्ष्यायाम्' (भ्वा० प० से०) । 'गुरोश्च—' (३ ३ १०३) इत्य । 'परोत्कर्षासहिष्णुत्वस्य' द्वे ॥[5]

असूया तु दोषारोपो गुणेष्वपि ॥२४॥

'असूञ् असूयायाम्' । कण्ड्वादित्वाद्यकि (३ १ २७) 'अ प्रत्ययात्' (३ ३ २०२) । गुणेषु दानादिषु दम्भादिरूपदोषारोप ॥२४॥[6]

वैरं विरोधो विद्वेष

वीरस्य कर्म । '—वैरमैथुनिक्या' (४ ३ १२५) इति निर्देशादण् । 'रुधिर आवरण' (रु० उ० अ०) । 'द्विष अप्रीतौ' (अ० उ० से०) । त्रीणि ॥[7]

मन्युशोकौ तु शुक् स्त्रियाम्

'मन ज्ञाने' (दि० आ० अ०) । मनिजनिभ्यां यु (उ० ३ २०) । 'शुच शोके' (भ्वा० प० से०) । घञ् (३ ३ १८) । क्विपि (वा० ३ ३ ९४) शुक् । त्रीणि ॥[8]

1 Shame [5] 2 Shame from others [1] 3 Patience [8] 4 Coveting another's property [1] 5 Jealousy [2] 6 Detraction [1] 7 Enmity [3] 8 M मनस्त—9 Grief [3]

पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ॥२५॥

पश्चात्तपनम् । घञ् (३ ३ १८) । विप्रतिसरणम् । 'सृ गतौ' (भ्वा० प० अ०) । घञ् (३ ३ १८) । उपसर्गस्य घञि—' (६ ३ १२२) इति दीर्घः । त्रीणि ॥२५॥[1]

कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ ।

कोपक्रोधौ घञि । 'मृष तितिक्षायाम्' (दि० उ० से०) । घञि (३.३ १८) नञ्समास (२ २ ६) । 'रुष हिंसायाम्' (भ्वा० प० से०) । घञ् (३.· १८) प्रतिहन्यतेऽनेन[2] प्रतिघ । 'करणे हन ' (३ ४ ३७) । 'परौ घ.' (३.३ ८४) इति बाहुलकादघत्वञ्च । सप्त ॥[3]

शुचौ तु चरित्रे शीलम्

शुचौ शुद्धे । 'शील समाधौ (भ्वा० प० से०) । घञ् (३ ३ १८) । एकम् ॥[4]

उन्मादश्चित्तविभ्रम ॥२६॥

'मदी हर्षे' (दि० प० से०) । घञ् (३ ३ १८) । उन्माद । चित्तस्य विभ्रमोऽनवस्थान[5] भूताद्यावेशात् ॥२६। [6]

प्रेमा ना प्रियता हार्दं प्रेम स्नेह·

प्रीणाति प्रिय । 'इगुपध—' (३ १ १३५) इति क । तस्य भाव । 'पृथ्वादिभ्य' इमनिच्—' (५ १ १२२) । 'प्रियस्थिर—' (६ ४ १५६) इति प्रादेश । हृदयस्य कर्म हार्दम् । युवादित्वात् (५ १ १३०) अण् । 'हृदयस्य हृल्लेख— (६ ३ ५०) इति हृद् । 'प्रीञ् तर्पणे' (क्र्या० उ० से०) । मनिन् (३ ३ ७५) । प्रेम । 'ष्णिह[8] प्रीतौ' (दि० प० से०) । घञ् (३ ३ १८) स्नेह । पञ्च ॥[9]

अथ दोहदम् ।

इच्छा काङ्क्षा स्पृहा ईहा तृड् वाञ्छा लिप्सा मनोरथ ॥२७॥
कामोऽभिलाषस्तर्षश्च

---

1. Repentance [3] 2 M प्रतिहन्यतेऽनेन 3 Anger [7] 4 good conduct [1] 5 M विभ्रम नवस्थान 6 Madness [2] 7 M पृथ्वादिभ्य 8 in the Dhat pātha, it is read as ष्णि 9 Love [5]

दोहमाकर्षं ददाति । यद्यप्यय सामान्येनेच्छावाची तथापि गर्भिणीच्छाया प्रायण प्रयुज्यते'[1] । 'इच्छा[2]' (३ ३ १०१) इति सूत्रेण इषे शप्रत्ययो निपातित । 'काक्षि इच्छायाम्' (भ्वा० प० से०) । 'गुरोश्च—' (३ ३ १०३) इत्य [3] । 'स्पृह ईप्सायाम्' (चु०उ०से०) । भिदादि । 'ईह चेष्टायाम्' (भ्वा० आ० से०) । 'ञितृष् पिपासायाम्' (दि० प० से०) । वित्रपि (वा० ३ ३ ९४) तृट् । लब्धुमिच्छा लिप्सा । मन एव रथा दूरगामि यत्र स मनोरथ ॥२७॥ 'कमु कान्तौ' (भ्वा० आ० से०) । घञ् (३ ३ १८) । काम । 'लष कान्तौ' (भ्वा० उ० से०) । घञ् (३ ३ १८) । द्वादश ॥[4]

स महान् लालसा द्वयो ।[5]

स तर्षो महाश्चेल्लालसा । मृषा लसनम् । यङन्तात् (३ ३ १०२) । एकम् ॥[6]

उपाधिर्ना धर्मचिन्ता

उप समीप[7] आधे । धर्मस्य चिन्ता विचार । द्वे ॥[8]

पुंस्याधिर्मानसी व्यथा ॥२८॥

आधीयते दु खमनेन[9] । धाञ 'उपसर्गे घो कि' (३ ३ ९२) । मानसी व्यथा पीडा ॥२८॥[10]

स्याच्चिन्ता स्मृतिराध्यानम्

'चिति स्मृत्याम्' (चु० प० से० । 'चिन्तिपूजि—' (३ ३ १०५) इत्यङ् । चिन्ता । त्रीणि ॥[11]

उत्कण्ठोत्कलिके समे ।

'कठि शोके' (भ्वा० आ० से०) । उत्कण्ठा । उत्पूर्वात्कलेर्वुन् (उ० ५ ३५) । कामादिजस्मृतेर्द्वे ॥[12]

उत्साहोऽध्यवसाय स्यात्

'षह मर्षणे' (भ्वा० आ० से०) । घञ् (३ ३ १८) । उत्साह । स्यन्तेर्ति (३ ३ १८) आतो युक्' (७ ३ ३३) । अध्यवसाय । द्वे ॥[13]

---

1 M प्रयुज्येते 2 M इच्छा 3 M इत्व 4 Desire [12] 5 K and B read it as follows सोऽत्यर्थं लालसा द्वय 6 Longing [1] 7 M मर्पे 8 Religious discussion [2] 9 M दुखमनेन 10 Mental pain or anguish [1] 11 Recollection [3] 12 Anxiety [2] 13 Enthusiasm or determination [2]

स वीर्यमतिशक्तिभाक ॥२९॥

स उत्साह । सातिशयो[1] वीर्यं । वीरस्य कर्म । वीरे साधु ॥२९॥[2]

कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ।
कुसृतिर्निकृतिः शाठ्यम्

के मूर्ध्नि पटः इवाच्छादकः कपटः । व्यजन्त्यनेन व्याजः । घञ् । दम्यतेऽनेन[3] । घञ् (३ ३ १८) । उपधीयन आरोप्यतेऽनेन[4] । 'उपसर्गे घोः किः (३ ३ ९२) । छाद्यतेऽनेन । छद अपवारणे (चु० उ० से०) । मनिन् (३ २ ७५) । कितवस्य कर्म । युवादित्वात् (५ १ १३०) अण् । कुत्सिता सृति । 'सृ गतौ (भ्वा० प० अ०) । निकृष्टा कृति । क्वापि[6] शठ कैतवे (भ्वा० प० से०) । पचाद्यच् (३ १ १३४) । नव ॥[7]

प्रमादोऽनवधानता ॥३०॥

मदी हर्षे (दि० प० से०) । घञ् (३ ३ १८) प्रमाद । अनवधानमविचारितकरणम् ॥३०॥[8]

कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ।

कुतू इत स्नेहपात्र हलति । हल विलेखने (भ्वा० प० से०) प्रज्ञाद्यणि (५ ४ ३८) कौतूहलम् । कुतू कायति । 'के ह्रस्वोऽङ्ग्य — (६ ३ ६१) इति ह्रस्व । प्रज्ञाद्यणि (५ ४ ३८) कौतुकम् ॥[10]

स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा ॥३१॥
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ।

शृङ्गारो रत्यादि । भावा मनोविकारास्तेभ्यो जाता क्रियाश्चेष्टा विलासादयो हावाद्वयाच्या । जुहोतेर्घञि हाव । लस श्लेषणे (भ्वा० प० से०) । घञ् (३ ३ १८) विलास । विलानम् । विवृतनिविशेष । वा गतौ (अ प० अ०) । मृगय्वादयश्च' (उ० १ ३७) इति कु । उच समवाये (दि० प० से०) । घञ् (३ ३ २१) ओक । 'भ्रमु अनवस्थाने (दि० प० से०) । घञ् (३ ३ १८) विभ्रम । नोदात्त— (७ ३ ३४) इति न वृद्धि ।

1 M सातिशयो 2 Firm determination [2] 3 M दम्भ तेनेन 4 M आरोप्यतेनेन 5 M छाद्यतेनेन 6 M क्व । 7 Fraud [9] 8 Carelessness [2] 9 M कुतौ 10 Curiosity [4

'लड ईप्सायाम्' (चु० आ० स०)। ललितम् ॥ १॥ 'हिल भावकरणे' (तु० प० से०) घञि (३ ३ १८) हेला। 'ली [ङ्] श्लेषणे' (दि० आ० अ०)। क्विप् (वा० ३ ३ ९४)। लियं लाति लीला[1]। 'विलासोऽङ्गे[2] विशेषो यः प्रियाप्राप्तावासनादिषु।' 'विब्बोकोऽभिमान[3]—प्राप्तावपि गवादनादरः। चित्तवृत्त्यन-वस्थानं शृङ्गाराद्विभ्रमो मतः॥ अनाचार्योपदिष्टं स्याल्ललितं रतिचेष्टितम्। प्रौढेच्छा सुरते हेला हावः स्याद्भावसूचकः॥ हावः शृङ्गारभावाप्तौ रम्यात्तस्मित-वीक्षितम्। शृङ्गारप्रौढिमा हेला' इति। [किं] च प्रियस्यानुकृतिलीला श्लिष्टावाग्वेषचेष्टितैः॥'[4]

द्रवकेलिपरीहासाः क्रीडा लीला च नर्म[5] च ॥ ३२ ॥

द्रवति हृदयमनेन द्रवः। 'द्रु गतौ' (भ्वा० प० अ०)। अप् (३ ३ ५७)। किलन्त्यनेन केलिः। 'किल क्रीडायाम्' (तु० प० से०)। इन् (उ० ४ ११७)। हसेर्घञि (३ ३ १८) हासः। 'क्रीड् विहारे' (भ्वा० प० से०), 'खे [के] लृ चलने' (भ्वा० प० से०)। अः (३ ३ १०३)। 'नृ नये' (भ्वा० प० से०)। मनिन् (३ २ ७५)। नर्म। क्रीडायाः षट् ॥ ३२ ॥[6]

व्याजोऽपदेशो लक्ष्यं च

व्यज्यत इति व्याजः, स्वरूपाच्छादनम्। अतद्रूपस्य ताद्रूप्यमपदेशः, क्रीडार्थं वञ्चनम्। 'लक्ष आलोचने' (चु० आ० से०)। ण्यत् (३ ३ १२४)। लक्ष्यम्। त्रीणि ॥[7]

क्रीडा खेला च कूर्दनम्।

क्रीडया खेलनम्। 'कुर्द क्रीडायाम्' (भ्वा० प० से०)। ल्युट् (३ ३ ११५)। 'र्वो—' (८ २ ७६) इति दीर्घः। 'कन्दुकादिक्रीडनस्य त्रीणि' इत्यन्ये ॥[8]

घर्मो निदाघः स्वेदः स्यात्

निघर्षणनात् घर्मः। 'घृ क्षरणदीप्त्योः' (जु० प० अ०)। 'घर्म—' (उ० १ १४९) इति निपातः। निदह्यतेऽनेन[9]। न्यङ्क्वादि। स्विद्यतेऽनेन। प्रस्वेदहेतोरूष्मणस्य त्रीणि ॥[10]

---

1 M लीना 2 M विलासाङ्गे 3 M विब्बोकोऽभि 4 Hava i e any feminine coquettish gesture exciting amorous sensations [1] 5 B reads नर्म 6 Play [6] 7 Excuse, pretence, evasion [3] 8 Boys' sport [3] 9 M निदह्यतेनेन 10 Heat and sweat [3]

प्रलयो नष्टचेष्टता ॥ ३३ ॥

प्रलीयते क्रियाऽत्र[1]। 'एरच्' (३.३.५३)। नष्टा चेष्टा यस्य। तस्य भावः। अपसारितकभावो मूर्च्छापरपर्याय[2]। हर्षशोकादिभिः सकलचेष्टा नाश इति यावत् ॥ ३३ ॥[3]

अवहित्थाकारगुप्तिः

अवहि. स्थानमवहित्था। पृषोदरादि (६.३.१०९)। शोकहर्षादिजनितस्य मुखग्लानिरोमाञ्चादेर्गोपनम्। द्वे ॥[4]

समौ संवेगसंभ्रमौ ॥

ओविजी (तु० आ० से०) घञि (३.३.१८) संवेग। हर्षादिना कर्मसु त्वराया द्वे ॥[5]

स्यादाच्छुरितकं हासः सोत्प्रासः

आच्छुरण परच्छेदनम्। भावेक्त (३.३.११४)। स्वार्थे क (५.३.७७)। उत्प्रास्यते सामर्थ्ययुक्त क्रियतेऽनेन[6]। अस्यतेर्घञ् (३.३.१८)। सोपहास इत्यर्थ.। एकम् ॥[7]

स मनाक् स्मितम् ॥ ३४ ॥

स[8] हास मनाक्, ईषत् स्मितम्। वहद्दन्तमित्यर्थ ॥ ३४ ॥[9]

मध्यम स्याद्विहसितम्

स हासो मध्यम, महत्त्वाल्पत्वसहित। एकम् ॥[10]

रोमाञ्चो रोमहर्षणम्।

रोम्णामञ्चन रोमाञ्च. रोमाणि हृष्यन्त्यनेन ॥ द्वे ॥[11]

क्रन्दितं रुदितं क्रुष्टम्

'क्रदि रोदने' (भ्वा० प० से०)। क्त (३.३.११४)। 'क्रुश रोदने' (भ्वा० प० से०)। क्त (३.३.११४)। त्रीणि ॥[12]

जृम्भस्तु त्रिषु जृम्भणम् ॥ ३५ ॥

'जृभि गात्रविनामे' (भ्वा० आ० से०) जृम्भो मुखादिविकार ॥ द्वे ॥३५॥[13]

---

1. M. क्रियात्र 2. M मूर्च्छापरपर्याय 3. Swoon [2] 4. Dissimulation or concealment of an internal feeling [2] 5. Haste [2]
6. M. क्रियतेनेन 7. A horse laugh [1] 8 M. =: 9. Smile [1]
1. A gentle laugh [1] 11. Thrill [2] 12 Weeping [3]
13. Yawning [2].

विप्रलम्भो विसंवादः

विशेषेण प्रलम्भनं विप्रलम्भ । विरुद्धं सम्यग्वदनम्‌ नृतासम्यक्संपादन-मित्यर्थ. ॥[1]

रिङ्खणं स्खलनं समे ।

'रिगि गतौ' (भ्वा० प० से०) । 'स्खल सचलने' (भ्वा० प० से०) । 'धर्मादिच्चलनस्य' द्वे इति स्वामी । 'बालाना हस्तपादगमनस्य' इत्यन्ये । 'पिच्छिलादौपतनस्य' इत्यपरे ॥[2]

स्यान्निद्रा शयनं स्वापः स्वप्न. संवेश इत्यपि ॥ ३६ ॥

निद्राण निद्रा । 'द्रा कुत्सायाम्' (आ० प० से०) । 'आतश्च—' (३.६.१०६) इत्यङ् । 'ञिष्वप् शये' (अ० प० अ०) । घञि (३.३.१८) स्वाप । 'स्वपो नन्' (३.३ ९१) । स्वप्न । 'विश प्रवेशने' (तु० प० अ०) घञि (३.३.१८) सवेश । पञ्च ॥ ३६ ॥[3]

तन्द्री प्रमीला

तत्पूर्वाद्द्राते. 'स्पृहि गृहि—' (३.२.१५८) इति सूत्रे 'तन्द्रा' इति निपातित । गौरादेराकृतिगणत्वान्ङीषपि । प्रमीलयन्तीन्द्रियाण्यस्या प्रमीला । 'मील निमेषणे' (भ्वा० प० से०) । अत्यन्तश्रमादिना सर्वेन्द्रियासामर्थ्यस्य द्वे ॥[4]

भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रिय. ।

'कुट कौटिल्ये' (तु० प० से०) । 'इगुपधात्कित्' (उ० ४.११९) इतीन् । 'भ्रुव. कुटि ' भ्रुंसवत्त्रैरूप्यम् । क्रोधादिना ललाटसंकोचस्य त्रीणि ॥[5]

अदृष्टिः स्यादसौम्येऽक्ष्णि

असौम्ये असुन्दरे, क्रूरदृष्टावित्यर्थ । विरुद्धा दृष्टिरदृष्टि । एकम् ॥[6]

संसिद्धिप्रकृती त्विमे ॥३७॥

स्वरूपं च स्वभावश्च निसर्गश्च

'षिध सराद्धौ' (दि० प० अ०) । क्तिन् (३ ३ ९४) । संसिद्धि । डुकृञ क्तिन् (३.३ ९४) । प्रकृति । 'इमे' इति द्वयो. स्त्रीत्वबोधनाय ॥३७॥ 'सृज विसर्गे' (तु० प० अ०) । घञि (३ ३ १८) निसर्ग । पञ्च ॥[7]

---

1 Deceiving by false statements [2] 2. Falling down or deviating from the right path [2] 3 Sleeping [5] 4 Drowsiness [2] 5 Bending of the eye-brows [3] 6 An evil or unkind look [1] 7. Nature [6]

अथ वेपथुः ।

कम्पः

'टुवेपृ कम्पने' (भ्वा० आ० से०)। 'ट्वितोऽथुच्'[1] (३ ३ ८९)। वेपथु । 'कपि चलने' (भ्वा० आ० से०)। घञ् (३ ३ १८)। कम्प ॥[2]

अथ क्षण उद्धर्षो मह उत्सव उद्धवः ॥३८॥[3]

इति नाट्यवर्गः ॥७॥

क्षणोति दुःखम्।[4] 'क्षणु हिंसायाम्' (त० उ० से०)। पचाद्यच् (३ १ १३४)। क्षण । उद्धर्षयति। 'हृषु अलीके' (भ्वा० प० से०)। 'मह पूजायाम्' (भ्वा० प० से०)। अच् (३ १ १३४)। मह । सान्तस्तु तेजोवाची। उद्धुनाति दुःखमुद्धव.।[5] 'धूञ् कम्पने' (स्वा० उ० अ०)। अच् (३ १ १३४)। उत्सूते सुखमुत्सव ॥३८॥[6]

इति नाट्यवर्ग ॥७॥

अधोभुवनपातालबलिसद्मरसातलम् ।

नागलोकः

अधश्च तद्भुवनं च। पतन्त्यत्र पातालम्। 'पति चण्डिभ्यामालञ्' (उ० १.११७)। बले सद्म। रसायाम्तलमधः ॥[7]

अथ कुहरं शुषिरं विवरं बिलम् ॥१॥

छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।

कुं हरति। 'हरतेरनुद्यमनेऽच्'[8] (३ २ ९)। 'शुष शोषणे' (दि० प० अ०)। 'इगुपधात्—' (उ० ४.११९) कि। शुषिरस्यास्ति। 'ऊष शुषि—' (५ २ १०७) इति र.। विव्रियते विवरम्। 'वृञ् वरणे' (स्वा० उ० से०)। पचाद्यच् (३.१.१३४)। 'बिल भेदने' (तु० प० से०। 'इगुपध—' (३.१.१३५) इति क.॥१॥ छिद्यते छिद्रम्। 'स्फायितञ्च—' (उ० २.१३) इति रक्। निर्व्यथतेऽनेन[9]। रोचतेऽत्र[10] रोकम्[11]। 'रुच दीप्तौ' (भ्वा० आ० से०) 'हलश्च' (३.३ १२१) इति घञ्। न्यङ्क्वादित्वात् (७.३.५३) कुः।

1. M. ट्वितोऽथुच् 2. Tremor [2] 3 'अथ क्षण उद्धर्षो मह उद्धव उत्सवः।' is the reading adopted by K and B 4 M. दुःख 5. M. दुःखमुद्धवः 6 Festival [5] 7. पाताल लोक the world under earth said to be inhabited by Nagas. [5] 8. M. हरतेरनुद्यमने ऽच् [9] M निर्व्यथतेऽनेन 10. M. रोचतेऽत्र 11. M. रोकः।

'रध हिंसासराद्ध्योः' (दि० प० से०)। बाहुलकाद्रक्। 'श्वभ्र गतौ' (चु० प० से०)। ण्यन्तादच्। 'डुवप्' (भ्वा० उ० अ०)। भिदादित्वात् (३ ३ १०४) वपा। एकादश ॥[1]

गर्तावटौ भुवि श्वभ्रे

गिरति गर्तः। 'गॄ निगरणे' (तु० प० से०)। 'हसिमृग्—' (उ० ३ ८६) इति तन्। अवत्यस्मादवटः। 'शकादिभ्योऽटन्[2]' (उ० ४ ८१)। भूरन्ध्रस्य द्वे ॥[3]

सरन्ध्रे शुषिरं त्रिषु ॥२॥

सरन्ध्रे शुषिरम्। एकम् ॥२॥[4]

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः।

'अन्ध दृष्ट्युपघाते' (चु० उ० से०) चुरादि। घञ् (३ ३ १८)। अन्धं करोत्यन्धकारः। 'क्षुब्धस्वान्त—' (७ २ १८) इति ध्वान्तो निपातितः। तमांस्यास्ति[5] तमिस्रम्। 'ज्योत्स्नातमिस्रा—' (५ २ ११४) इति साधु। 'तिम आर्द्रीभावे' (दि० प० से०)। किरच्। तिमिरम्। ताम्यत्यनेन तमः। असुन् (उ० ४ १८८) ॥[6]

ध्वान्ते गाढेऽन्धतमसम्

ध्वान्ते गाढे दृढान्धकारे। अन्धयतीत्यन्धम्। तच्च तमश्च ॥[7]

क्षीणेऽवतमसं

क्षीणे ध्वान्तेऽवहीन[8] तमः ॥[9]

तमः ॥३॥

विष्वक्सन्तमसम्

विष्वक् सर्वतस्तमः ॥३॥[10]

नागाः काद्रवेयाः

नगे भवा नागाः। कद्रोरपत्यानि ॥द्वे॥[11]

---

1. Hole (in general) [1] 2 M. शकादिभ्योऽन् 3. Hole (in ground) [2] 4 A hollow thing [1] 5 M. तमांस्यास्मि 6 Darkness [5] 7. Deep darkness [1] 8. M. ध्वान्ते ऽवहीन 9 Slight or dim darkness [1] 10 All-pervading darkness [1] 11 नाग, a semi-divine being having the face of a man and tail of the serpant [2].

तदीश्वर ।

शेषोऽनन्त

तेषामीश्वर । 'शिष्लृ विशेषणे (रु० प० अ०)। घञ् (३ ३ १८)। शेष । नास्त्य तोऽस्यानन्त [1] ॥द्वे॥[2]

वासुकिस्तु सर्पराज

वसु[3] कायति वसुकः । तदपत्य वासुकि ॥[4]

अथ गोनसे ॥४॥

तिलित्स स्यात्

गोरिव नासिकास्य गोनस ॥ ४ ॥ 'तिल गतौ (भ्वा० प० से०) इगुपधात्कि (३ १ १३५)। तिलित्सरति। 'अन्येभ्योऽपि[5]—' (वा० ३ २ १०२) इति ड । द्वे ॥[6]

अजगरे शयुर्वाहस इत्युभौ ।

अजो निरयो गरोऽस्य[7] । शेतेऽत्यर्थं[8] शयु । 'भृमृशी—' (उ० १ ७) इत्यु । वाह स्यति वाहस । श्रीणि ॥[9]

अलगर्दो जलव्याल

अल गतौ' (भ्वा० प० से०)। 'गर्द शब्दे (भ्वा० प० से०)। अलश्चासौ गदश्च। जलस्य व्याल सर्प ॥[10]

समौ रजिलडुण्डुभौ ॥ ५ ॥

वेराजि रेखाऽस्यास्ति[11] राजिल । सिध्मादित्वात् (५ २ ९७) लच् । 'डुण्डु' इत्यनुकरणे शब्द । तेन भणति भाति वा डुण्डुभ । द्विमुखोऽय[12] निर्विष । द्वे ॥५॥[13]

मालुधानो मातुलाहि-

---

1 M the नास्ति न शेस्यान त 2 शेष, the king of nagas [2] 3 M वसु 4 Vasuki, the king of snakes [2] 5 M च येभ्योऽपि 6 A kind of snake [2] 7 M गरास्य 8 M शनैस्यथ 9 Boa-constrictor, the largest species of serpents [3] 10 Water serpent [2] 11 M रेखास्यास्ति 12 M द्विमुखोय 13 A kind of non poisonous serpent said to be having two faces [2]

मालुर्धत्तूरस्तत्र धानमस्य मालुधान । मा तुलयति मातुल । क । स चासावहिश्च मातुलाहि । चित्रसर्पस्य द्वे ॥[1]

निर्मुक्तो मुक्तकञ्चुकः ।

निर्मुक्तस्त्यक्त कञ्चुकस्त्वग्येन । द्वे ॥[2]

सर्प पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गम ।६॥
आशीविषो विषधरश्चक्री व्याल सरीसृप ।
कुण्डलीगूढपाच्चक्षुः श्रवा काकोदरः फणी ॥७॥
दर्वीकरो दीर्घपृष्ठो दन्दशूको विलेशयः ।
उरग पन्नगो भोगी जिह्मग पवनाशनः ॥८॥

'सृप्लृगतौ' (भ्वा० प० से०)। अच् (३ १ १३४)। सर्प । प्रियते व्यायच्छति पृदाकु । प्रियतेर्दाकुर्ह्रस्वश्च । भुजेन कौटिल्यन गच्छति भुजग । 'गमश्च[3]' (३ २ ४७) इति ड । गमे[4] सुपि खश्च डिद्वा (वा० ३ २ ३८)। भुजङ्ग । भुजङ्गम । अहत्यहि । औणादिक कि ॥६॥ आस्या विषमस्य । 'आशीस्ता [लुगता] दष्ट्वा तयाविद्धो न जीवति ।' चक्र मण्डलाकारताऽस्यास्ति[5] चक्री । व्याडन[6] हन्तुमुद्यमोऽस्यास्ति[7] व्याल । अड उद्यमे' (भ्वा० प० से०)। कुटिल सर्पति सरीसृप । 'नित्य कौटिल्य–' (३ १ २३) इति यङ् । कुण्डल तदाकारताऽस्यास्ति[8] कुण्डली । गूढा पादा अस्य । चक्षुषी श्रवसी अस्य । काकस्येवोदरमस्य । फणोऽस्यास्ति[9] ॥७॥ दर्व्याकारफण एव प्रहारसाधनत्वात्करोऽस्य[10] । दीर्घ पृष्ठमस्य । कुत्सित दशति दन्दशूक । यङन्तात् 'यजजपदशा यङ' (३ २ १६६) इत्यूक[11] विले शेते । उरसा गच्छति, उरग । 'उरसो लोपश्च' (वा० ३ २ ४८) इति ड । पन्न पतित यथा तथा गच्छति । सर्वत्रपन्नयो' (वा० ३ २ ४८) इति ड । भोग फणोऽस्यास्ति[12] । जिह्म वक्र गच्छति पवनोऽशन[13] यस्य । पञ्चविंशति ॥८॥[14]

त्रिष्वाहेय विषास्थ्यादि

---

1 A snake with the spotted skin [2] 2 A snake that has cast off its slough [2] 3 M गमेश्च 4 M गमे 5 M मण्डलाकारतास्यास्ति 6 M व्यडन 7 M हन्तुमुद्यमोस्यास्ति 8 M तदाकारतास्यास्ति 9 M फणोस्यास्ति 10 M प्रहारसाधनत्वात्करोस्य 11 M इत्यूकः 12 M फणास्यास्ति 13 M पवनोशन 14 Snake in general [25]

अहो भवमाहेयम् । 'दतिकुक्षि-' (४ ३.५६) इति ढञ् ॥[1]

स्फुटायां[2] तु फणा द्वयोः ।

स्फटति विशीर्यतेऽनया[3] स्फटा[4] । 'स्फट विकसने' (चु०प०से०) । 'फटा' इत्यपि क्वचित्पाठ । 'फण गतौ' (भ्वा० प० से०) । अच् (३ १ १३४) । [illegible] ॥[5]

समौ कञ्चुकनिर्मोकौ

कञ्चते कञ्चुक । 'कचि दीप्तिबन्धनयोः' (भ्वा०आ०से०) । बाहुलकादुकन् । निर्मुच्यतेनिर्मोक । घञ् ॥[6]

क्ष्वेडस्तु गरलं विषम् ॥९॥

क्ष्वेडते मोहयति क्ष्वेड । 'ञिक्ष्विदा स्नेहमोचनयोः' (भ्वा० प० से०, दि० प० से०) । पृषोदरादि (६ ३ १०९) । गिरति जीव गर 'गॄ निगरणे' (तु० प० से०) । अच् (३ १ १३४) । गर लाति गरल । वेवेष्टि[7] व्याप्य विषम् । 'विष्लृ व्याप्तौ' (जु० उ० अ०) । इगुपध- (३ १ १३५) इति क ॥९॥[8]

पुंसि क्लीबे च काकोलकालकूटहलाहला ।
सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपन ॥१०॥
दारदो वत्सनाभश्च विषभेदा अमी नव ।

[illegible] काकोल । 'कुल संस्याने' (भ्वा० प० से०) । 'ईषदर्थे' (६ ३ १०५) [illegible] । [illegible] कूटो [illegible] । हलति [illegible] । 'हल विलेखने' (भ्वा० प० से०) । [illegible] आह्लादयति वा । [illegible] । [illegible] देशे भव सौराष्ट्रिक । अध्यात्मादि । [illegible] देशे भव । 'दतिकुक्षि-' (४ ३ ५६) [illegible] । ब्रह्मण पुत्र । प्रदीपयति । नन्द्यादित्वात् (३ १ १३४) ॥ १० ॥ दरदि देशे भव दारद । [illegible] नाभिरस्य । 'अच् प्रत्यन्व-' (५.४ ७५) इति [illegible] । [illegible] विषभेदा ॥[9]

---

1 Poison or any other thing pertaining to a serpant. [1]
2 Others read it as [illegible] 3 M [illegible] 4 M [illegible]
5 The hood of a serpant [2 6 Slough [2] 7 M [illegible]
8 Poison [3] 1 Cf [illegible] (Bhā. [illegible] 2 110) 9 Nine kinds of poison [1 each]

विषवैद्यो जाङ्गलिक

विद्यामधीते वेद वा वैद्य । विषस्य वैद्य । जाङ्गली विषविद्या तामधीते जाङ्गुलिक । वसन्तादित्वात् (४ २ ६३) ठक् । द्वे ॥[1]

व्यालग्राह्याहितुण्डिक ॥११॥

इति पाताल भोगिवर्गः ॥८॥

व्याल गृह्णाति व्यालग्राही । 'नन्दिग्रहि–' (३ १ १३४) इति णिनि । अहेस्तुण्ड मुखम् । तेन दीव्यति, आहितुण्डिक । ठक् (४ ४.२) । सञ्ज्ञापूर्वकत्वा-द्वृद्ध्यभावे 'अहितुण्डिक' अपि ॥११॥[2]

इति पातालभोगिवर्ग ॥८॥

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।

नरा कायन्त्यत्र नरक । बाहुलकादधिकरणे क । प्रज्ञादित्वाण् (५ ४ ३८) नारक । निर्गतोऽस्मान्निरय । अय शुभावहो विधि । चत्वारि ॥[3]

तद्भेदास्तपनोऽवीचिमहारौरवरौरवा ॥१॥

सहार कालसूत्रं चेत्याद्या

तस्य नरकस्य भेदा । तपन्त्यनेन वा तपन । विच्छिन्ना वीचयोऽत्रावीचि[4] । रुरुर्हिंस्र कन्दस्च तत्र भवो रौरव ॥१॥ सहारस्थाने केचित् 'संघात' पठन्ति । कालान्यमोमयानि सूत्राण्यत्र । आद्यशब्देन तामिस्रादय ॥[5]

सत्त्वास्तु नारका ।

प्रेता

सत्त्वा जन्तव. । नरके भवा । प्रकर्षेण इता गता प्रेता ॥ द्वे ॥[6]

वैतरणी सिन्धु

विगत तरणि सूर्योऽत्र[7] तत्र पाताले भवा वैतरणी नदी । एकम् ॥[8]

स्यादलक्ष्मीस्तु निर्ऋति ॥२॥

निष्क्रान्ता ऋते सत्यमार्गान्निर्ऋति ॥ द्वे ॥२॥[9]

---

1. A dealer in antidotes [2] 2 A charmer of snakes [2] 3 hell [4] 4 M कोचयोऽत्रावीचि • 5 Three kinds of hell [1 each] 6 Creatures inhabiting hell [2 7 M सूर्योऽत्र 8 वैतरणी the river of hell [1] 9 calamity, evil [2

विष्टिराजू

विशति क्लेश विष्टि । आजवते आजू । 'क्विब्वचि—' (वा० ३ २ १७८) इति क्विब्दीर्घौ । 'नरके हठात्क्षेपस्य' द्वे इति स्वामी । निर्मूल्यकर्मकरणस्य इत्यन्ये[1] ॥[2]

कारणा तु यातना तीव्रवेदना ।

'कृञ् हिंसायाम्' (क्र्या० उ० से०) । 'यत्त निकारोपस्कारयो ' (चु० उ० से०) । ण्यान्तास्याभाभ्या युच् (३ ३ १०७) । त्रीणि ॥[3]

पीडा बाधा व्यथा दु खमामनस्य प्रसूतिजम ॥३॥
स्यात्कष्ट कृच्छ्रमाभालम्

'पीड अवगाहने' (चु० प० से०) । बाधृ लोडने' (भ्वा० आ० से०) । 'व्यथ भये' (भ्वा० आ० से०) दुष्टानि खान्यत्र । अमनसो भाव आमनस्यम् ॥३॥ 'चत्वारि पीडाया वैमनस्यस्य द्वे' इति स्वामी । 'षडपि मन पीडार्था —' इति सभ्या ।

कषति स्म कष्टम् । 'कृच्छ्रागहनयो —' (७ २ २२) इति नेट् । कृन्तति कृच्छ्रम् । कृतेश्छ क्रू च' (उ० २ २१) इति रक्छौ । आ समन्तादमिय लातीत्याभीलम् । शरीरपीडाया त्रीणि । नवापि दु खस्य [4] इत्यन्ये ॥[5]

त्रिष्वेषा भेद्यगामि यत् ।

इति नरकवर्ग ॥९॥

एषा[6] दु खादीना[7] मध्ये यद्भेद्यगामि द्रव्यविशेषण तत्त्रिषु । यथा—मेय दु खा[8] च दुरपपादा च दु ख [9] सुतो निर्गुण ' इत्यादि ॥

इति नरकवर्ग ॥ ९ ॥

समुद्रोऽब्धिरकूपार पारावर सरित्पतिः ।
उदन्वानुदधि सिन्धुः सरस्वान्सागरोऽर्णव ॥१॥
रत्नाकरो जलनिधिर्यादं पतिरपांपति

समुनत्ति समुद्र । 'उन्दी क्लदन' (रु० प० से०) । 'स्फायि—' (उ० २ १३) इति रक् । आप —उदकानि धीयन्तेऽस्मिन्नब्धि [10] । कु पृथ्वी पिपर्ति

1 B ascribes this explanation to the Commentator, Rāyamukuṭa (see रामाश्रमी, p 118) 2 Residence in hell to which one is condemned [2] 3 Torment [3] 4 M दुःखस्य 5 Pain [9] 6 M एषा 7 M दुःखादीना 8 M दुःखा 9 M दुःख 10 M धीयन्तेऽस्मिन्नब्धि ।

मर्यादापालनादकूपार । पृ पालनादौ (जु० प० से०)। अण् (३ २ १)। 'अन्येपामपि—' (६ ३ १३७) इति दीर्घं । पारावारौ स्तोऽस्य[1]। अर्श आद्यच् (५ २ १२७)। सरिता पति । उदकानि सन्त्यत्र। 'उदन्वानुदधौ च' (८ २ १३) इति निपातित । उदकानि धीयते ऽत्रोदधि[2]। 'कर्मण्यधिकरणे च' (३ २ ९३) इति कि । स्यन्दते सिन्धु । स्यन्दे सप्रसारण घश्च' (उ० १ ११) इत्यु । सरासि सन्त्यस्य सरस्वान् । सगरै खात सागर । अर्णोऽस्यास्त्यर्णव[3]। 'अर्णस सलोपश्च' (वा० ५ २ १०९) इति व ॥१॥ रत्नानामाकर । जलाना निधि । यादसा जलजन्तूना पति । अपा पति । पञ्चदश ॥[4]

तस्य प्रभेदा क्षीरोदो लवणोदस्तथापरे ॥२॥

क्षीरमुदक यस्य। उदकस्योद (वा० ६ ३ ५७)। अपरे सुरोदघृतोदादय ॥२॥[5]

आप स्त्री भूम्नि वार्वारि सलिल कमल जलम् ।
पय कीलालममृतं जीवनं भुवन वनम् ॥३॥
कबन्धमुदक पाथ पुष्कर सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशवरम् ॥४॥
मेघपुष्प घनरस

आप्नुवन्ति, आप । 'आप्नोतेर्ह्रस्वश्च (उ० २ ५८) इति क्विब्ह्रस्वौ । भूम्नि बहुत्वे । वारयति वा वृञोण्यन्तात् (३ १ २६) क्विप् (३ २ १७८)। 'वसिवपि—' (उ० ४ १२४) इतीञ्ञ वारि । सलति सलिलम् । 'सल गतौ' (भ्वा० प० से०)। 'सलिकलि —' (उ० १ ५४) इतीलच् । 'कमु कान्तौ' (भ्वा० आ० से०) वृषादित्वात् (उ० १ १०६) कलच् । कमलम् । 'जल अपवारणे' (चु० प० से०) अच् । (३ १ १३४)। जलम् । 'पीङ् पाने' । असुन् (उ० ४ १८८)। पय कीला ज्वालामलति धारयति कीलालम् । जीव्यते ऽनेन[6]। भवन्त्युत्पद्यन्ते ऽनेन[7] भुवनम् । सज्ञापूर्वकत्वादवृद्धयभाव । वनु याचने (तु० आ० से०)। घञ् (३ ३ १९)। वनम् ॥२॥ क सुख बध्नाति कबन्धम् । 'उन्दी क्लेदने' (रु० प० से०)। 'उदकम्—' (उ० २ ३९) इत्युणादिसूत्रेण साधु । पाति पाथ । 'उदके थुट् च (उ० ४ २०३) इत्यसुन् ।

1 M स्तोस्य 2 M धीयन्तेत्रोदधि 3 M अर्णोस्यास्ति अर्णव 4 Ocean [1] 5 Different kinds of oceans [1 each] 6 M जीव्यतेनेन 7 M भवन्त्युत्पद्यन्तेनेन ।

'पुप कित्' (उ० ४४) इति करन् । पुष्करम् । सर्वतो मुखान्यस्या 'अभि शब्दे' (भ्वा० आ० से०) । अमुन् (उ० ४१८८) । अम्भ । 'ऋ गतौ' (भ्वा० प० अ०) । 'उदके नुट् च' (उ० ४१९६) इत्यसुन् । अर्ण । तु सौत्र आवरणार्थं । ततो थ । तोयम् । पिबतेरनीयर (३ १ ९६) । पानीयम् । 'स्फायि—' (उ० २ १३) इति रक् । नीरम् । क्षिय (तु० प० अ०) ईरन् । क्षीरम् । 'अवि शब्दे' (भ्वा० आ० से०) । बाहुलकादु । अम्बु । शवृणोति शवरम् । वृञोऽच्[1] (३ ३ १३४) ॥४॥ मेघस्य पुष्पमिव । घनस्य रस । सर्वाधिराति ॥[2]

त्रिपु द्वे आप्यमम्मयम् ।

अप्सु भवमाप्यम् । बाहुलकात्ष्यञ् । 'एकाच—' (वा० ४ ३ १४४) इति मयट् । अम्मयम् । इद द्वय त्रिपु । जलविकारस्य द्वे ॥[3]

भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचि

भज्यते भङ्ग । 'भञ्जो आमर्दने' (रु० प० अ०) । घञ् (३ ३ १९) । तरति तरङ्ग । तरतेरङ्ग च् । (उ० १ १२०) । 'ऋ गतौ' (भ्वा० प० अ०) । 'अर्तेरुच्च' (उ० ४४) इति मि । ऊर्मि । 'वा स्त्रियाम्' इति पूर्वोत्तराभ्या सम्बध्यते । 'वेञो डिच्च' (उ० ४७२) इतीचि । वीचि । चत्वारि ॥५॥[4]

अथोर्मिषु ॥५॥

महत्सूल्लोलकल्लोलौ

उल्लोडयति 'लोड् उन्मादे' (भ्वा०प० से०) । ण्यन्ताद् (३ १ २६) अच् (३ १ १३४) । क जल तस्य लोल उन्माद । 'वा पदान्तस्य' (८ ४.५९) इत्यनुस्वारस्य म । महातरङ्गस्य द्वे ॥[5]

स्यादावर्तोऽम्भसां भ्रम ।

वृतेर्घञ् (३ ३ १८) । आवर्त । जलभ्रमणस्यैकम् ॥[6]

प्रपन्ति विन्दुपृपता पुमांसो विप्रुप स्त्रियाम् ॥६॥

पर्षन्ति पृषत् । 'पृषु सेचने' (भ्वा० प० से०) । 'पृषद्‌वृहत्—' (उ०२ ८४) इति साधु । बहुत्वमतन्त्रम् । विन्दति विन्दु । विदि अवयवे' (भ्वा० प० से०) ।

---

1. M वृञोच 2 Water [27 3 Products of water [2] 4 A Wave of water [4 5 A large wave [2] 6 Whirlpool, gulf [6]

बाहुलकाद् । 'पृषिरञ्जिभ्यां कित्' (उ० ३ १११) इत्यतच् । पृषत । प्रोषां दाहो विप्रुट् । जलकणस्य चत्वारि ॥ ६ ॥[1]

चक्राणि पुटभेदाः स्युः

चक्राकारेण यान्त्यत्र चक्राणि । 'वक्राणि' इत्यत्र पठन्ति । 'वक्रं शनैश्चरे पुंसि पुटभेदे नपुंसकम्' इति हैमः । पुटं घटादिकं भिन्दन्ति । कर्मण्यण्' (३ २ १) । चक्राकारेण जलानामधोगमनस्य द्वे ॥[2]

भ्रमाश्च जलनिर्गमाः ।

भ्रमन्ति जलान्यनेन भ्रमः । घञ् (३ ३ २१) । 'ग्रहवृदृनिश्चिगमश्च' (३ ३ ५८) इत्यप् । जलानां निर्गमः । जलनिस्तरणपथः । प्रणाल्याद्यां द्वे ॥[3]

कूलं रोधश्च तीरञ्च प्रतीरं च तटं त्रिषु ॥७॥

कूलयति कूलम् । अच् (३ ३ १३४) । रुणद्धि रोधः । असुन् (उ० ४ १८८) । 'पार तीर कर्मसमाप्तौ' (चु० उ० स०) । अच् (३ १ १३४) । प्रकृष्टं तीरं प्रतीरम् । 'तट उच्छ्राये' (भ्वा० प० से०) । अच् (३ १ १३४) ॥ ७ ॥[4]

पारावारे परार्वाची तीरे

परतीरे पारम् । अर्वाक्तीरेऽवारम्[5] । 'ऋ गतौ' (भ्वा० प० अ०) । अवपूर्वाद्धञ् (३ ३ ११९) ॥[6]

पात्रं तदन्तरम् ।

कूलयोर्मध्यं पात्रम् । पिबन्ते ['पा पाने' (भ्वा०प०अ०)] ष्ट्रन् (४ १५८) ॥[7]

द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥८॥

द्विर्गता आपोऽस्मिन्[8] द्वीपम् । अन्तर्गता आपोऽस्मिन् ।[9] जलमध्यस्थस्थानस्य द्वे ॥[10]

तोयात्थितं तत्पुलिनम्

तत्तु तोयादचिरमुत्थितं पुलिनम् । 'पुल महत्त्वे' (भ्वा० प० से०) । 'तल्पुलिभ्यां च' (उ० २ ५३) इतीनन् । एकम् ॥[11]

---

1 A drop of water [4] 2 Flowing down of water in form of a whirl [2] 3 Watercourse [2] 4 Bank (of a river) [5] 5 M °र्वाक्तीरे॰ऽवारम् 6 Two banks of a river [1 each] 7 The channel or bed of a river [1] 8 M °स्मिन् 9 M °स्मिन् 10 Island [2] 11 A sandy bank of a river [1]

सैकतं सिकतामयम् ।

सिकता: सन्त्यस्मिन्सैकतम् । सिकताना विकार: सिकतामयम् । बालुकामयतटस्य द्वे ॥[1]

निषद्वरस्तु जम्बाल: पङ्कोऽस्त्री शादकर्दमौ ॥९॥

निषीदन्त्यत्र निषद्वर । 'नौ सदे' (उ० २.१२३) इति ष्वरच् । 'जमु अदने' (भ्वा० प० से०) । बाहुलकाद्बलन् । 'पचि विस्तारे' (चु० प० से०) । घञि पङ्क । 'षद्लृ शातने' (भ्वा०, तु० प० अ०) घञ् (३.३.१२१) । शाद । 'कर्द कुत्सिते शब्दे' (भ्वा० प० से०) । 'कलिकर्दोरम.' (उ० ४.८४) ॥ ९ ॥[2]

जलोच्छ्वासा: परीवाहा:

जलान्युच्छ्वसन्ति परिवहन्त्येभि । प्रवृद्धजलाना निर्गममार्गस्य द्वे ॥[3]

कूपकास्तु विदारका: ।

कुत्सिता कूपा कूपका । विदार्यन्ते विदारका । शुष्कनद्यादौ कृतस्य गर्तस्य द्वे ॥[4]

नाव्यं त्रिलिङ्गं नौतार्ये

नावा तार्यम्, नाव्यम् । एकम् ॥[5]

स्त्रियां नौस्तरणिस्तरि: ॥१०॥

'णुद प्रेरणे' (तु० उ० अ०) । 'ग्लानुदिभ्या डौ' (उ० २.६४) । नौ: । तीर्यतेऽनया[6] तरणि[7] । 'अर्तिसृधृ—' (उ० २.१०२) इत्यनि । 'अच इ:' (उ० ४.१३८) । तरि । त्रीणि ॥ १० ॥[8]

उडुपं तु प्लव: कोल:

उडूनो जलात्पाति, उडुपम् । प्लवते प्लव । 'प्लुङ् गतौ' (भ्वा० आ० अ०) । अच् (३.१.१३४) । 'कुल संस्त्याने' (भ्वा० प० से०) । 'ज्वलिति—' (३.१.१४०) इति ण । कोल । तृणादिनिर्मितप्लवस्य त्रीणि ॥[9]

1. A sandy bank. [1] 2. Mud [5] 3. Channel (to carry of excess of water) [2] 4 Hole (sunk for water in a dry river), [2] 5. Accessible by boat as a river. [2] 6 M. नीर्यते नया 7. M. तरणि 8 Boat. [3] 9 Raft [3]

स्रोतोऽम्बुसरणं स्वतः ।

स्वतो जलप्रस्रवणं स्रोतः । 'स्रु गतौ' (भ्वा० प० अ०)। 'स्रुरीभ्या[1] तुट् च' (उ० ४ २०१) इत्यसुन् ॥[2]

आतरस्तरपण्यं स्यात्

आतरन्त्यनेनातरः । 'पुंसि संज्ञायाम्' (३ ३ ११८)। घः । तरणं तरः । 'ऋदोरप्' (३.३ ५७) तरस्य पण्यं मूल्यम् । द्वे ॥[3]

द्रोणी काष्ठाम्बुवाहिनी ॥११॥

द्रवति द्रोणी । 'द्रु गतौ' (भ्वा० प० अ०)। 'वहिश्रि—' (उ० ४ ५१) इति निः । 'कृदिकारात्—' (ग० ४ १ ४५) इति ङीष् । पुनः पुनरम्बु वहति । 'बहुलमाभीक्ष्ण्ये' (३.२ ८१) इति णिनिः । 'काष्ठ' इत्युपलक्षणम् । काष्ठ-पाषाणादिकृतनौकाकारजलधारण्या द्वे ॥ ११ ॥[4]

सांयात्रिकः पोतवणिक्

समुदितानां गमनं द्वीपान्तरगमनं वा संयात्रा । सा प्रयोजनमस्य । प्लवते वातेन पोतो वहित्रम् । तेनोपलक्षितो वणिक् । वहित्रगामिनो वणिजो द्वे ॥[5]

कर्णधारस्तु नाविकः ।

कर्णोऽरित्रं[6] तं धरति । 'धृञ् धारणे' (भ्वा० उ० अ०)। नावा तरति । 'नौद्व्यचष्ठन्' (४.४ ७)॥ द्वे ॥[7]

नियामकाः पोतवाहाः

नियच्छन्ति पोतं नियामकाः । ण्वुल् (३ १.१३३)। पोतं वहन्ति । अण् (३ २.१)। वहित्रवाहकस्य द्वे ॥[8]

कूपको गुणवृक्षकः ॥१२॥

कूपे कायति । 'आत —' (३ १ १३६)। कः । गुणेना रज्ज्वा वृक्षः । नौर्यत्र काष्ठे रज्ज्वा बध्यते । द्वे ॥ १२ ॥[9]

---

1. M स्रुरीभ्यां 2 A natural course of water [1] 3 Fare for being ferried over a river [2] 4 A vessel of wood or stone for holding water [2] 5. A seafaring merchant [2] 6 M. कर्णः रित्र 7. Sailor [2] 8 Rower [2] 9 The stake to which a boat is moored [2]

नौकादण्डः क्षेपणी स्यात्

येन काष्ठेन नौर्वाह्यते स नौकादण्डः । नौकापार्श्वद्वयबद्धं चालनकाष्ठम् । क्षिप्यतेऽनया[1] क्षेपणी ॥ द्वे ॥[2]

अरित्रं केनिपातकः ।

ऋच्छत्यनेनारित्रम् । 'ऋ गतौ' (भ्वा० प० अ०) । 'अर्तिलूधू—' (३.२.१८४) इतीत्र । के जले निपात्यतेऽस्य[3] । नौपुच्छस्यदीर्घविस्तृतचालनकाष्ठस्य द्वे ॥[4]

अभ्रिः स्त्री काष्ठकुद्दालः

अभ्रत्यभ्रि[5] । 'अभ्रगतौ' (भ्वा० प० से०) इन् (उ० ४.११७) । कुमुद्दालयति[6] कुदालः । 'दल विशरणे' (भ्वा० प० से०) । अण् (३ २ १) । शकन्ध्वादि (वा० ६ १ ९४) । पोतादेर्मलापनयनार्थं काष्ठादिरचितकुद्दालस्य द्वे ॥[7]

सेकपात्रं तु सेचनम् ॥१३॥

सिच्यतेऽनेन[8] । नौस्थजलनिस्सारण पात्रस्य द्वे ॥ १३ ॥[9]

क्लीबेऽर्धनावं नावोऽर्धे

अर्धं नावोऽर्धनावम्[10] । 'नावो द्विगोः' (५ ४ ९९), 'अर्धाच्च' (५ ४ १००) इति टच् ॥[11]

अतीतनौकेऽतिनु त्रिषु ।

नावमतिक्रान्तमतिनु । पुंसि, अतिनौ ॥[12]

त्रिष्वगाधात्

अगाधम् [वा० १ १० १४] अभिव्याप्य त्रिषु ।

प्रसन्नोऽच्छः

'षद्लृ विशरणादौ' (भ्वा०, तु० प० अ०) । क्तः । प्रसन्नः । न छ्यति दृष्टिमच्छः । द्वे ॥[13]

---

1. M. क्षिप्यतेन 2 Oar [2] 3 M निपात्यास्य 4. Rudder [2] 5. M. अभ्रति अभ्रि 6 M. कुमुदनयति 7. A woden scraper [2] 8 M. सिच्यतेनेन 9 The pot used for pouring out water from a boat [2] 10 M न . र्धन व 11 The half a boat [1] 12 Disembarked [1] 13 Clear [2]

कलुषोऽनच्छ आविलः ॥१४॥

कस्य जलस्य लुषो घातकः । 'लुष हिंसायाम्' । आविलति, आविलः । 'विल भेदने' (तु० प० से०) । 'इगुपध—' (३ १ १३५) इति कः । त्रीणि ॥१४॥[1]

निम्नं गभीरं गम्भीरम्

निमनति । 'म्ना अभ्यासे' (भ्वा० प० अ०) । 'आत —' (३ १ १३६) । कः । गम्भीरादयश्च' इति गच्छतेर्निपातितौ ['गभीरगम्भीरौ' (उ० ४ ३५)] । त्रीणि ॥[2]

उत्तानं तद्विपर्यये ।

तस्य गम्भीरस्य विपर्यये । उत्तानमुद्गतस्तानो विस्ताराऽस्मात्[3] ॥[4]

अगाधमतलस्पर्शे

नास्ति गाधः प्रतिष्ठाऽस्य ।[5] नास्ति तलेऽस्य[6] स्पर्शोऽस्य[7] सन् । अतिनिम्नम् । द्वे ॥[8]

कैवर्ते दाशधीवरौ ॥१५॥

के जले वर्तन्ते । केवना मत्स्यास्तेषामयं घातकः । दाशयन्ति मून्यनस्मै । 'दाशृ दाने' (भ्वा० उ० से०) । दधाति मत्स्यान् धीवरः । 'छ्वर—' (उ० ३ १) इति निपातितः । त्रीणि ॥१५॥[9]

आनायः पुंसि जालं स्यात्

आनयन्ति मत्स्याननेनेत्यानायः । 'जालमानायः' (३ ३ १२४) इति साधु । जले क्षिप्यते जालम् । द्वे ॥[10]

शणसूत्रं पवित्रकम् ।

'शण गतौ' (भ्वा० प० से०) । शणस्य सूत्रम् । पवित्रमुपवीतमिव पवित्रकम् । शणसूत्रजालस्य द्वे ॥[11]

---

1 Dirty [3] 2 Deep [3] 3 M. विस्तारोऽस्मात् 4 Shallow [1]
5 M प्रतिष्ठाऽस्य 6 M तलेऽस्य 7 M स्पर्शोऽस्य 8 Unfathomable [2]
9 Fisherman [3] 10 Net (for fish) [2] 11 A hempen net [2]

मत्स्याधानी कुवेणी स्यात्

मत्स्या आधीयन्तेऽत्र[1]। धाञ (जु० उ० अ०) ल्युट् (३.३.११७)। कुत्सितं वेणन्तेऽस्याम्[2] मत्स्या। 'वेणृ गतौ' (भ्वा० उ० से०)। मत्स्यस्थापनपात्रस्य द्वे ॥[3]

बडिशं मत्स्यवेधनम् ॥१६॥

वलिनो मत्स्यान् स्यति। मत्स्या विध्यन्तेऽनेन[4]। द्वे ॥१६॥[5]

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः।
विसारः शकली च

पृथूनि रोमाण्यस्य। 'झष हिंसार्थः' (भ्वा० प० से०)। माद्यति मत्स्यः। 'मदी हर्षे' (दि० प० से०)। 'ऋतन्यञ्जि—' (उ० ४ २) इति स्य। मीयते मीनः। 'फेनमीनौ' (उ० ३ ३) इति निपातितः। 'सृ गतौ' (भ्वा० प० अ०)। ग्रहादित्वाण्णिनि। विसारी। ततः स्वार्थेऽण्। वैसारिणः। अण्डाज्जातोऽण्डजः[6]। 'व्याधिमत्स्यबलेषु' (वा० ३ ३ ७) इति घञ्। विसारः शकलमस्यास्ति। अष्टौ ॥[7]

अथ गडकः शकुलार्भकः ॥१७॥

'गड सेचने' (भ्वा० प० से०)। संज्ञायां क्वुन् (उ० २ ३२)। शकुलो मत्स्यस्तस्यार्भकः। द्वे ॥१७॥[8]

सहस्रदंष्ट्रः पाठीनः

सहस्रं दंष्ट्रा यस्य। पाठी द्विजस्तस्येव इवापेक्षितः ॥[9]

उलूपी शिशुकः समौ।

उः विस्मयजनकं रूपमस्य उलूपी। शिशुः शिशुमार इव। 'सूइसु' इति ख्यातमत्स्यस्य द्वे ॥[10]

नलमीनश्चिलिचिमः

नडाख्यतृणान्तरचारी नडामो वा मीनो नलमीनः। 'चिल विलसने' (तु० प० से०)। 'इगुपधात्—' (उ० ४ ११९) कि चिलि विलास चिनोति मिमीते च चिलिचिमः। द्वे ॥[11]

---

1 M मत्स्यानेत्र 2 M वेणन्त्यस्या 3 A fish basket [2] 4 M विध्यन्तेऽनेन 5 A fish-hook [2] 6 M अण्डाज्जातोण्डज 7. Fish [8] 8 kinds of fish [2] 9 A kind of fish [2] 10 A kind of fish [2] 11 Prawn [2]

प्रोष्ठी तु शफरी द्वयो ॥१८॥

प्रकृष्ट ओष्ठोऽस्या[1] । शफा राति शीघ्रगत्वात् । शफरी । द्वे ॥१८॥[2]

क्षुद्राण्डमत्स्यसंघात पोताधानम्

क्षुद्रा ये अण्डाजि मृता मत्स्यास्तेषा[3] सधान । पोता अर्भका आधीयन्तेऽत्र[4] । द्वे ॥[5]

अथो झषाः ।

रोहितो मद्गुर शालो राजीव शकुलस्तिमि. ॥१९॥
तिमिङ्गिलादयश्च

अथो झषा मत्स्यविशेषा उच्यन्ते । रोहितो रक्तत्वात् । मज्जति मद्गुर । 'मद्गुरादयश्च' (उ० १४१) इति निपातित । शाड्यते शाल । 'शाडृ श्लाघायाम्' (भ्वा० आ० से०) । राजी रेखाऽस्ति[6] राजीव । शक्नोति गन्तु शकुल । बाहुलकादुलच । तिम्यति तिमि ॥ १९ ॥ तिमिं गीलति तिमिङ्गिल ॥[7]

अथ यादांसि जलजन्तव. ।

याति याद । असुन् (उ० ४८८) । बाहुल्काद्दुक । जलाना जन्तव द्वे ॥[8]

तद्भेदा शिशुमारोद्रशङ्कवो मकरादय ॥२०॥

तेषा जलजन्तूना भेदा । शिशून मारयति । उनत्ति उद्र । 'उन्दी क्लेदने' (रु० प० से०) । 'स्फायि—' (उ० २१३) इति रक् । शङ्कतेऽस्मात्[9] । 'खरशङ्कुपीयु—' (उ० १३६) इति निपातित । मा कुर्यात्किञ्चिदिति शस्यत्यस्मान्मकर ॥२०॥[10]

स्यात्कुलीर कर्कटक

कुलिनमीरयति कुलीर । 'कर्क' इति सौत्रो धातु । 'शकादिभ्योऽटन्'[11] (उ० ४८१) । द्वे ॥[12]

---

1 M ओष्ठस्या 2 A kind of small glittering fish [2] 3 M मत्स्यास्तेषां 4 M आधीयन्तेऽत्र 5 The shoal of small fish [1] 6 M रेखास्ति 7. Seven kinds of fish [1 each] 8 An aquatic animal [2] 9 M शङ्कतेऽस्मात् 10 Four kinds of aquatic animals [1 each] 11. M शकादिभ्योऽटन् 12 Crab [2]

कूर्मे कमठकच्छपौ ।

कुत्सित ऊर्मिर्वेगोऽस्य[1] कूर्मः । 'अच्प्रत्यन्वव–' (५ ४ ७५) इति योगविभागादच् । ये जले मठन्ति । 'मठमदनिवासयो' (भ्वा० प० से०) । कच्छेन पिबति । त्रीणि ॥[2]

ग्राहोऽवहार

गृह्णाति ग्राह । 'विभाषा ग्रह' (३ १ १४३) इति ण । अवपूर्वात् 'हृञ्' (भ्वा० प० अ०) 'श्याद्व्यधा–' (३ १ १४१) इति ण । अवहार[3] द्वे ॥[4]

नक्रस्तु कुम्भीर

न क्रामति दूरस्थत्र नक्र । 'अन्यत्रापि–' (वा० ३ २ ४८) इति ड । कुम्भिन हस्तिनमीरयति । द्वे ॥[5]

अथ महीलता ॥२१॥

गण्डूपदः किंचुलुक

मह्या लतेव कृशत्वाद्दीर्घत्वाच्च ॥२१॥ गण्डवो ग्रन्थय पदान्यस्य । किञ्चित्तु चुलुम्पति । 'चुलुम्प' धाना 'अन्यभ्याऽपि' (वा० ३ २ १ १) इति ड 'केंचुआ' इति लोके ॥ त्रीणि ॥[7]

निहाका गोधिका समे ।

नियत जहाति भुव निहाका । नौहृस्व' (उ० ३ ४४) इति हाक[8] ['ओहाक् त्यागे' जु० प० अ०] कन् । 'गुध परिवेष्टने' (दि० प० से०) ण्वुल् (३ १ १३३) । गोधिका । 'गोह' इति लोके द्वे ॥[9]

रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकस ॥२२॥

रक्त पिबति । 'आत –'(३ २ ३) क[10] । जलमोकोऽस्या[11] । अदन्ताऽप्याब-न्त[12] । त्रीणि ॥२२॥[13]

मुक्तास्फोट स्त्रियां शुक्ति

मुक्ता स्फुटन्त्यस्मात् । शोचति शुक्ति । द्वे ॥[14]

---

1 M ऊर्मीर 2 Tortoise [3] 3 M अवहार 4 Crocodile [2] 5 A kind of crocodile [2] 6 M क्वचित् 7 A kind of worm, earth worm [2] 8 M हाक 9 A kind of lizard [2] 10 M क 11 M जलमोकोऽस्या 12 M अदन्ताऽप्याबन्त 13 Leech [3] 14 Oyster shell [2]

शङ्खः स्यात्कम्बुरस्त्रियाम् ।

शाम्यति शङ्ख[1]। शमे ख । काम्यते कम्बु । 'जम्ब्वादयश्च' (उ० ४१०२) इति निपातितं । द्वे ॥"

क्षुद्रशङ्खाः शङ्खनखाः

क्षुद्राश्च ते शङ्खाश्च । शङ्खस्य नख इव । द्वे ॥[3]

शम्बूका जलशुक्तयः ॥२३॥

शाम्यन्ति शम्बूका । 'उलूकादयश्च' (उ० ४४१) इति निपातितं । जलजा शुक्तयः । द्वे ॥२३॥[4]

भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।

बिभेति भेक । 'इणभीका—' (उ० ३४३) इति कन् । मण्डते मण्डूक । 'शल्मण्डिभ्यामूकण्' (उ० ४४२) । वर्षासु भवति । शाड़ गतौ (भ्वा० आ० से०) । 'खर्जिपिञ्जादिभ्य' (उ० ४९०) ऊर । 'प्लुङ् गतौ (भ्वा आ०अ०) । अच् (३ १ १३४) । प्लव दृणाति शब्दं कर्णौ । मुकुरदर्दुरौ[5] (उ० १ ४०) इति निपातितं । षट् ॥[6]

शिलीगण्डुपदी

'शिल उञ्छे (तु० प० से०) । इगुपध—' (३ १ १३५) इति क । 'जान —' (४ १ ६३) इति ङाप् । क्षुद्रकिंचुलकस्य द्वे ॥[7]

भेकी वर्षाभ्वी

गौरादित्वात् (४ १ ४१) ङीषाम्वो । मण्डूक्या द्वे ॥[8]

कमठी दुलिः ॥२४॥

'दुल उत्क्षेपे (चु० प० से०) । 'इगुपधात्—' (उ० ४ ११९) कि । कच्छप्या द्वे ॥ २४ ॥[9]

मद्गुरस्य प्रिया शृङ्गी

मद्गुरस्य प्रिया सादृश्यात् । 'शृ हिंसायाम्' (क्र्या० प० से०) 'शृणाते र्ह्रस्व —' (उ० १ १२६) इति गन्नुटौ । एकम् ॥[10]

1 M M शङ्ख 2 Conch shell [2] 3 small conch-shell [2] 4 A bivalve shell [2] 5 M मकरदर्दुरौ 6 Frog [6 7 A kind of small worm [2] 8 A female frog [2 9 A female tortoise 2 10 A female sheat fish 1

दुर्नामा दीर्घकोशिका ।

दुष्टं निन्दितं नामास्या । दीर्घं कोशोऽस्या[1]। 'झिनायी' इति लोके ॥[2]

जलाशयो जलाधारः[3]

जलमाशयो हृदयमस्य ॥ द्वे ॥[4]

तत्रागाधजलो ह्रदः ॥२५॥

तत्र जलाशयानां मध्ये । अगाधं जलं यस्य । ह्रादते ह्रादः । पृषोदरादित्वात् (६ ३ १०९) ह्रस्वः । एकम् ॥ २५ ॥[5]

आहावस्तु निपानं स्यादुपकूपजलाशये ।

आह्वयन्तेऽत्राहावः[6] । 'ह्वेञ् स्पर्धायाम्' (भ्वा० उ० अ०) । नियतं पिबन्त्यस्मिन् । कूपसमीपरचितजलाधारस्य द्वे ॥[7]

पुंस्येवान्धुः प्रहिः कूपः उदपानं तु पुंसि वा ॥२६॥

अन्धयत्यन्धुः । 'अन्ध दृष्ट्युपघाते' (चु० उ० से०) । मृगय्वादित्वात् (उ० १ ३७) कुः । प्रह्रियते[8] प्रहिः । 'प्रे हरते[9] कूपे' (उ० ४ १३४) इति इः डिच्च । कौति कूपः । कुयुभ्यां च' (उ० ३ २७) इति पः, दीर्घश्च । उदकं पिबन्त्यस्मिन् । चत्वारि ॥ २६ ॥[10]

नेमिस्त्रिकास्य

अस्य कूपस्य । नीयतेऽनया[11] नेमिः । नीञो मिः (उ० ४ ४४) । तिस्रोऽस्यांऽस्या[12] । त्रिका । सङ्ख्यायाः [संज्ञा] सङ्घ—' (५ १ ५८) इति कन् । कूपस्यान्ते रज्ज्वादिधारणार्थयन्त्रस्य द्वे ॥[13]

वीनाहोमुखबन्धनमस्य यत् ।

विनह्यतेऽनेन ।[14] कूपमुखे इष्टकादिभिर्बद्धस्यैकम् ॥[15]

---

1 M कोशोस्या 2 Cockle [2] 3 K and B read it as जलाशया जलाधारा 4 A pond, lake or reservoir [2] 5 A deep lake [1] 6 M आह्वायन्तेत्राहाव 7 Trough (near a wall for watering cattle) [2] 8 M प्रह्रीयते 9 M हरत 10 Well [4] 11 M नीयनेनया 12 M त्रियोस्ययोस्या 13 contrivance for raising water over which passes the rope of the bucket [1] 14 M विनह्यनेनेन 15 The top or Cover of a well [1]

पुष्करिण्यां तु खातं स्यात्

पुष्कराणि सन्त्यस्याम्। 'पुष्करादिभ्यो देशे' (५ २ १३५) इनीनि। 'खनु अवदारणे' (भ्वा॰ उ॰ से॰)। क्त (३ २ १०२)। 'जनसन-' (६ ४ ४२) इत्यात्व खातम्। समचतुरस्रखातस्य द्वे ॥[1]

अखातं देवखातकम् ॥२७॥

खाताद्भिन्नं देवेनखातम्। अकृत्रिमजलाशयस्य द्वे ॥२७॥[2]

पद्माकरस्तडागोऽस्त्री

पद्मानामाकर। तड्यते तडाग। 'तड आघाते' (चु॰ प॰ से॰)। 'तडागादयश्च' इति निपात 'तडाक' इत्यन्ये। 'तटाक' इत्यपरे। पद्मसहिता-गाधजलाशयस्य द्वे ॥[3]

कासार॰ सरसी सरः।

'कासृ शब्दे' (भ्वा॰ आ॰ से॰)। 'तुषारादयश्च' (उ॰ ३ १३९) इत्यारन्। सरति सर। सृ गतौ' (भ्वा॰ प॰ अ॰)। असुन् (उ॰ ४ १८८)। तत एव महत्वे गौरादित्वात् (४ १ ४१) ङीप्। कृत्रिमपद्माकरस्य त्रीणि ॥[4]

वेशन्त पल्वल चाल्पसरः

विशन्त्यत्र भेकादय। 'जृविशिभ्यां झच्' (उ॰ ३ १२६)। पलति पल्वलम्। 'पल गतौ' (भ्वा॰ प॰ से॰)। 'सानसिवर्णसि-' उ॰ ४ १०७) इति वलच्। अल्प च तत्सरश्च। त्रीणि ॥[5]

वापी तु दीर्घिका ॥२८॥

उप्यन्ते पद्मान्यस्याम्। 'वसिवपि॰-' (उ॰ ४ १२४) इति इञ्। दीर्घैव दीर्घिका। 'संज्ञायां कन्' (५ ३ ७५) द्वे ॥२८॥[6]

खेयं तु परिखा

खन्यते खेयम्। 'ई च खन' (३.१.१११) इति यत्। परित खन्यते परिखा। दुर्गादि परित खातस्य द्वे ॥[8]

---

1. A lotus-pool [2] 2 A natural lake [2] 3 A large tank. alounding in lotous [2] 4 A natural tank [3] 5 A small tank [3] 6 M वसित्रमि 7. M दीर्घैव 8 A long lake [2] 9 A trench round a fort [2]

आधारस्त्वम्भसां यत्र धारणम् ।

आध्रियते जलमस्मिन्नाधारः 'बाध' इति लोके ॥[1]

स्यादालवालमावालमावापः

आसमन्ताज्जलस्य लवमालाति । आलवालं । आवलते आवालं । 'वल संवरणे' (भ्वा० प० स०) । घञ् (३ ३ १२१) । आवपन्ति जलमत्र । वृक्षमूलकृतजलाधारस्य त्रीणि ॥[2]

अथ नदी सरित् ॥२९॥

तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी ।

स्रोतस्वती द्वीपवती स्रवन्ती निम्नगाऽऽपगा ॥३०॥

नदति नदी । पचादिषु (३ १ १३४) 'नदट्' इति टित् । सरति [स] रित् । सरतिरिति[3] (उ० १ ९७) ॥ २९ ॥ तरङ्गा सन्त्यस्याम् । शैवलमस्त्यस्याम् । तटमस्त्यस्या । ह्रदा सन्त्यस्याम् । धुनोति वेतसादीन् । स्रोतांसि सन्त्यस्याम् । द्वीपमस्त्यस्याम् । स्रवति स्रवन्ती शत्रन्त । निम्नं गच्छति निम्नगा । अपां समूह आपं तेन गच्छति ॥ ३० ॥[4]

गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।

भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥३१॥

गच्छति गङ्गा । 'गम् गम्यर्थे' (उ० १ १२३) । विष्णुपदोद्भूता । जह्नुना पीता श्रोत्रेण त्यक्ता जाह्नवी[5] । भगीरथेनावतारिता[6] । त्रयः पन्थानस्त्रिपथम् । तेन गच्छति । त्रीणि स्रोतांस्यस्या । भीष्मं सूते । अष्टौ ॥ ३१ ॥[7]

कालिन्दी सूर्यतनया यमुना शमनस्वसा ।

कलिन्ददेशजा । यच्छति यमुना । 'अजियमि[8]—' (उ० ३ ६१) इत्युनन् । चत्वारि ॥[9]

रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ॥३२॥

'रेवृ प्लव गतौ (भ्वा० आ० से०) । अच् (३ १ १३४) नर्मं ददाति । सोमात् सोमवद्राजात्पुरूरवस उद्भूता तनावनारितत्वात् । मेकलश्चपिरद्रिर्वा । चत्वारि ॥३२॥[10]

---

1 Dam [1] 2 A basin for water (round the root of a tree) [3] 3 M सरतिरि 4 River [12] 5 M जान्हवो 6 M भगिरथेनावतारिता 7 The river, ganges [8] 8 M अतियमि 9 The river यमुना [4] 10 The river, नर्मदा [4]

कर्तोया सदानीरा

करस्य तोयमत्रास्ति। गौरीविवाहे हस्तोदकाज्जाता। सदा नीरमस्याम्। स्मृतिषु तस्या रजोदोषाभावोक्तेः। 'अटक' नदी लोके॥[1]

बाहुदा सैतवाहिनी।

बाहू छिन्नौ ददत्यनी लिखितस्य। सितानि वाहनानि यस्यार्जुनस्य तस्येयम्। द्वे॥[2]

शतद्रुस्तु शुतुद्रिः स्यात्

शतधा द्रवति। शतद्रुः। शु पूजितं तुदति। 'इगुपधात्—' (उ० ४।११९) इतीन्। बाहुलकादुक्। 'शतल्ज' लोके। द्वे॥[3]

विपाशा तु विपाट् स्त्रियाम्॥३३॥

पाशं विमोचयति। ण्यन्तात् च् (३।१।१३४)॥३३॥[4]

शोणो हिरण्यवाहः[5] स्यात्

शोणति शोणः। 'शोणृ वर्णगत्योः' (भ्वा० प० से०)। अच् (३।१।१३४)। हिरण्यं वहति। अण् (३।२।१)। द्वे॥[6]

कुल्याल्पा कृत्रिमा सरित्।

कुले साधु कुल्या। कृत्रिमा स्वल्पा नदी॥[7]

शरावती वेत्रवती चन्द्रभागा[8] सरस्वती॥३४॥
कावेरी

शरा सन्त्यस्याम्। वेत्रमस्याम्। चन्द्रभागयोः पर्वतयोरियं तत्र प्रभवत्वात्॥ ३४॥ कस्य जलस्य वेरं शरीरं तस्येयम्॥[9]

---

1 The river, Aṭaka [2] 2 The river, Bahudā [2] 3 The river, S'atadru (Satalaja) [2] 4 The river, Vipāśā [2] 5 B reads हिरण्यबाहु 6 शोण, the male river rising in Gondavan and falling into the गङ्गा, near पाटलिपुत्र, [2] 7 Canal [1] 8 reads चन्द्रभागी 9 Five rivers being Saravati, Vetravati, Candrabhāgā, Sarasvati and Kāveri [1 each]

सरितोऽन्याश्च

अन्या गण्डकीगोदावर्यादय. ॥[1]

संभेदः सिन्धुसंगम ।

समियन्ते मिलन्त्यत्र । सिन्ध्वो [2] सगम ॥ द्वे ॥[3]

द्वयो प्रणाली पयस पदव्याम्

नल्यते प्रणाली । 'णल बन्धने' (भ्वा० प० से०) । कृत्रिमजलनिस्सरणमार्गम् ॥[4]

त्रिषु तूत्तरौ ॥३५॥

देविकायां सरय्वा च भवेद्दाविकसारवौ।

देविकाया नद्या भव दाविकम् । देविकाशिंशपा–' (७ ३ १) इत्यात्वम् । 'सर्तेरयू [5]' (उ० ३ २२) । सरय्वा भव सारवम् । 'डाण्डिनायन–' (६ ४ १७४) इति टिलोप ॥[6]

सौगन्धिक तु कल्हारम्

सुगन्ध्येव सौगन्धिकम् । विनयादिभ्यष्ठक् (५ ४ ३४) । के ह्लादते कल्हारम् । पृषोदरादि (६ ३ १०९) । शुक्लकल्हारस्य द्वे ॥[7]

हल्लकं रक्तसन्ध्यकम् ॥२६॥

'हल्ल विकसन' । ण्वुल् (३ १ १३३) । रक्तसन्ध्येव रक्तसन्ध्यकम् । रक्तकल्हारस्य द्वे ॥[8]

स्यादुत्पलं कुवलयम्

उत्पलति । 'पल गतौ' (भ्वा० प० से०) । कोर्वलयमिव, शोभाकरत्वात् । कमलकुमुदादीना सामान्येन द्वे ॥[9]

अथ नीलाम्बुजन्म च ।

इन्दीवरं च नीलेऽस्मिन्

'इदि परमैश्वर्ये' (भ्वा० प० से०) । इनो (उ० ४ ११७) ङीप् । इन्दी लक्ष्मी । तस्या वरमिष्टम् । नीलोत्पलस्य द्वे ॥[10]

---

1 Gaṇḍakī and Godāvarī [1 each] 2. M सिन्ध्वो 3 Confluence (of two or more rivers) [2] 4 Drain [1] 5 M. सर्तेरयू 6 The products of the Devikā and सरयू rivers [1 each] 7. The white lotus blossoming in the evening [2] 8 The red lotus or a kind of red flower [2] 9 A lotus or white water-lily in general [2] 10. The blue lotus [2]

सिते कुमुदकैरवे ॥३७॥

कौ मोदते। के जले रौति। कैरवो हंस तस्येदप्रियम्। शुक्लोत्पलस्य द्वे ॥३७॥[1]

शालूकमेषां कन्दः स्याद्

एषां सौगन्धिकादीनां कन्दमूलं। 'शल चलने' (भ्वा० आ० से०)। 'शलिमण्डिभ्यामूकण्' (उ० ४ ४२)। 'भसीड' लोके ॥[2]

वारिपर्णी तु कुम्भिका।

वारिणि पर्णान्यस्याः। कुम्भोऽस्त्यस्याः[3]। यागानामशाकम्। द्वे ॥[4]

जलनीली तु शैवालं शैवलः

जलं नीलयति। शेते जले शैवलं। शीङो वालन्[5] वलञ् वा (उ० ४ ३८)। त्रीणि। 'शेवार' लोके ॥[6]

अथ कुमुद्वती ॥३८॥

कुमुदिन्याम्

कुमुदानि सन्त्यस्याम् ॥३८॥ कुमुदयुक्तस्य देशस्य द्वे ॥[7]

नलिन्यां तु बिसिनीपद्मिनीमुखाः।

नडाः सन्त्यत्र। डलयोरैक्यता। बिसमस्त्यस्याः ॥[8]

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ॥३९॥
सहस्रपत्रं कमलं शतपत्रं कुशेशयम्।
पङ्केरुहं तामरसं सारसं सरसीरुहम् ॥४०॥
बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च।

पद्यते पद्मम्। 'अर्तिस्तुसु—' (उ० १ १४०) इति मन्। 'णल गन्धे' (भ्वा० प० से०)। इनन् (उ० २ ४९)। नलिनम्। अरं शीघ्रं विन्दति। 'गवादिषु विन्देः—' (वा० ३ १ ३८) इति श ॥३९॥ सहस्रं पत्राण्यस्य। क जलमलति। कुशे जले शेते। 'अधिकरणे शेते—' (३ २ १५) इत्यच्। पङ्के रोहति। 'तमु काङ्क्षायाम्' (दि० प० से०)। घञ् (३ ३ १९)।

1 The white lotus and water lily [2] 2 The root of a lotus [1] 3 M. कुम्भोऽस्त्यस्या 4 PistiaStratiotes [2] 5 M. वलन् 6 Moss 7 A place abounding in lotus [2] 8 A lotus-plant, or the bunch of lotus [3]

'रस आस्वादने'। तास प्रकर्षो रसोऽस्य।[1] सरसि भवम् ॥४०॥ बिसस्य प्रसूनम्। राज्य सन्त्यस्य राजीवम्। पुष्णाति पुष्करम्। 'पुष किन्' (उ० ४ ४) इति करन्। अम्भसि रोहन्ति। षोडश।[2]

पुण्डरीकं सिताम्भोजम्

पुण्डयति पुण्डरीकम्। 'मडि भूषायाम्', 'पुडि च' (भ्वा० प० से०)। 'कर्क (कर्क) (फर्फ) रीकादयश्च' (उ० ४ २०) इत्यरीकन्। श्वेत [कमलस्य] द्वे ॥[3]

अथ रक्तसरोरुहे ॥४१॥

रक्तोत्पलं कोकनदम्

कोकाश्चक्रान्नदति। त्रीणि ॥[4]

नाला नालम्

'णल गन्धे (भ्वा० प० से०) ज्वलिति—' (३ १ १४०) इति ण। नालाद्विलिङ्ग। उत्पलादिदण्डस्य द्वे ॥[5]

अथास्त्रियाम्।

मृणालं बिसम्

मृण्यते मृणालम्। मृण हिंसायाम्' (तु० प० से०)। 'तमिविशि—' (उ० १ ११८) इति कालन्। विस प्रेरणे (दि० प० से०)। क (३ १ १३६)। बिस। अब्जादीना मूलस्य द्वे ॥[6]

अब्जादिकदम्बे षण्डमस्त्रियाम् ॥४२॥

सनोति। 'षणु अवदारणे। 'जमन्ताड्ड' (उ० १ ११४)। अब्जादीना समूहस्यैकम् ॥४२॥[7]

करहाटः शिफाकन्दः

करं हाटयति। 'हट दीप्तौ (भ्वा० प० से०)। शिफा मलप्ररोहस्तत्सहित कन्द। पद्मकन्दस्य द्वे ॥[8]

---

1 M रसोस्य 2 A lotus in general [16] 3 The white lotus [2] 4 The red lotus [3] 5 The stalk of the lotus [2] 6 The fiber of the lotus [2] 7 The assemblage of all parts of a lotus [1] 8 The stem of a lotus [2]

किंजल्कः केसरोऽस्त्रियाम् ।

किञ्चिज्जलति । 'जल अपवारणे' (चु० प० से०) बाहुलकात्कः । के जले सरति । द्वे ॥[1]

संवर्तिका नवदलम्

सवर्तते संवर्ती । 'हृपिषिरुहि—' (उ० ४ ११८) इतीन् । स्वार्थे कन् (५ ३ ७५) । नवं च तद्दलं च । पद्मादीनां नवपत्रस्य द्वे ॥[2]

बीजकोशो वराटकः ॥४३॥

इति वारिवर्गः ॥१०॥

बीजस्य कोशः, आधारः । वरमटति । ततः स्वार्थेकन् (५ ३ ७५) ॥[3]

उक्तं स्वर्व्योमदिक्कालधीशब्दादिसनाट्यकम् ।
पातालभोगिनरकं वारि चैषां च सगतम् ॥४४॥
इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
स्वरादिं काण्डं प्रथमं साङ्गं एव समर्थितं ॥४५॥

एषां स्वर्गादीनां संगतं देवासुरमनुष्यादिकं चोक्तम् ॥४४-४५॥

इति वारिवर्गः ॥१०॥

इति श्रीमदाचार्यकृष्णमित्रकृतायाममरकोश—

टीकायां प्रथमं काण्डं

समाप्तं ॥१॥

---

1 The filament of a lotus [2] 2 The new leaf of a lotus [2] 3 The seed vessel of a lotus [2]

अमरकोशः

कृष्णमित्रटीकोपेत

द्वितीयः काण्डः

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभि ।
नृब्रह्मक्षत्रविट्शूद्र साङ्गोपाङ्गैरिहोदिताः ॥ १ ॥

इह अस्मिन्काण्डे पृथ्व्यादिभिर्वर्गा उदिता वक्तुमारब्धा । 'आदिकर्मणि क्त' (३ ४ ७१) । कथंभूतै ? साङ्गोपाङ्गै । अङ्गानि मृदादीनि । उपाङ्गानि शिलादीनि । 'आरण्या पशवो मृगा' ॥१॥

भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा ।
धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षिति ॥२॥
सर्वंसहा वसुमती वसुधोर्वी वसुंधरा ।
गोत्रा कु पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥३॥

भवतीति भू । क्विप् । 'भुव कित्' (उ० ४४५) इति मि । 'कृदिकारात्—' (ग० ४ १४५) इति ङीपि भूमीत्यपि । न चलति । नास्त्यन्तोऽस्या ।[1] रसोऽस्त्यस्याम् ।[2] अच् (५ २ १२७) । विश्वं बिभर्ति । 'सञ्ज्ञाया भृतॄ—' (३ २ ४६) इति खच् । तिष्ठति । अजिरादित्वात् (उ० १ ५३) किरच् । ध्रियते । पचाद्यच् (३ १ १३४) । 'अशित्रादिभ्य —' (उ० ४ १७२) इतीत्र । 'अर्तिसृधृ[3]—' (उ० २ १०२) इत्यनि । ङीप् । क्षौति । 'टुक्षु शब्दे' (अ० प० अ०) । बाहुलकान्नि । जिनाति । 'ज्या वयोहानौ' (क्र्या० प० अ०) । अघ्न्यादि (उ० ४ १११) । ज्या । 'मौर्वी ज्या वसुधरा । कश्यपस्येयं तस्मै रामेण दत्तत्वात् । क्षियन्ति ताम् । 'क्षि निवासे' (तु० प० अ०) ॥२॥ सर्वं सहते । वसु धनमस्त्यस्याम् । वसु दधाति । 'आत —' (३ २ ३) इति क । उर्वी विस्तीर्णत्वात् । 'वोत —' (४ १ ४४) इति ङीप् । वसु धारयति । गा जलं त्रायते । कायति । मितद्र्वादि

---

1 M नास्त्यन्तो स्या 2 M रसोस्त्यस्याम् 3 M अनिसधृ ।

(वा० ३ २ १८०)। प्रथते। 'प्रथे[1] षिवन् सम्प्रसारणं च' (उ० १ १५१)। पृथ्वीति। 'वोत —' (४ १ ४४) इति ङीष्। 'क्षमेरुपधाया लोपश्च[2] (उ० ५ ६५) इत्यच्। क्ष्मा। अवति। 'अतिसृ—' (उ० २ १०२) इत्यनि। मेदमस्त्यस्याम्। 'मह पूजायाम्'। ण्यन्तात् 'अच इः' (उ० ४ १३८)। क्षमा इला च ॥३॥[3]

मृन्मृत्तिका

मृद्यते मृद्। 'मृदस्तिकन्' (५ ४ ३९) ॥[4]

प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका।

'सस्नौ प्रशंसायाम्' (५ ४ ४०)। प्रशस्ता मृत्। मृत्सा ॥[5]

उर्वरा सर्वसस्याढ्या

'उर्वी हिंसायाम्' (भ्वा० प० से०)। बाहुलकाद्दीर्घो न। उर्वं राति। सर्वसस्ययुक्तस्यैकम्।[6]

स्यादूषः क्षारमृत्तिका ॥४॥

ऊषति। 'ऊष रुजायाम्' (भ्वा० प० से०)। क (३ १ १३५)। क्षारयति। 'क्षर-सञ्चलने'। क्षारा चासौ मृत्तिका च ॥ द्वे ॥४॥[7]

ऊषवानूषरो द्वावप्यन्यलिङ्गौ

ऊषोऽस्त्यस्य[8]। 'ऊषसुषि—' (५ २ १०७) इति रः। अन्यलिङ्गौ वाच्यलिङ्गौ ॥ द्वे ॥[9]

स्थलं स्थली।

स्थलति। 'ष्ठल स्थाने' (भ्वा० प० से०)। अकृत्रिमभूमेर्द्वे ॥[10]

समानौ मरुधन्वानौ

म्रियन्ते तृषास्मिन्। 'भृमृशी—' (उ० १ ७) इत्युः। धनति धन्वा। निर्जलदेशस्य द्वे ॥[11]

---

1 M. प्रथ· 2 The पाणिनीय form of the सूत्र is : क्षमेरुपधालोपश्च
3 Earth [27] 4 Soil [2] 5 Good earth or soil [2] 6 The fertile soil [2] 7 The saline ground [2] 8 M. ऊषोऽस्त्यस्य
9 A barren spot with saline soil [2] 10 Ground [2]
11 Dry soil [2]

द्वे खिलाप्रहते समे ॥५॥

त्रिषु

खिलति । 'खिल उञ्छे' (तु० प० से०) । न प्रहन्यते स्म ॥५॥ हलादि-भिरकृष्टे एतौ त्रिषु ॥द्वे॥[1]

अथो जगती लोको विष्टपं भुवनं जगत् ।

गच्छति ।[2] 'वर्तमाने पृषद्—' (उ० २ ८४) इति साधु । शतृवद्भावा-न्ङीप् । लोक्यते । घञ् (३ ३ १४) । विष्टपति । ष्टप प्रतिघाते' । भवन्त्य-स्मिन् । 'भूसू—' (उ० २ ८०) इति क्युन् । पञ्च ॥[3]

लोकोऽयं भारतं वर्षम्

'उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणे । वर्षं तद्भारतं नाम—' । अय जम्बूद्वीपनवमांश ॥[4]

शरावत्यास्तु योऽवधेः ॥६॥

देशः प्राग्दक्षिणः प्राच्य

शरावत्या नद्या सकाशात्प्राक् सहितो दक्षिणो देशः प्राच्य ॥[5]

उदीच्यः पश्चिमोत्तरः ।

पश्चिमसहित उत्तरस्तु उदीच्य ॥[6]

प्रत्यन्तो म्लेच्छदेशः स्यात्

प्रतिगतोऽन्तम्[7] । म्लेच्छाना देश । द्वे ॥[8]

मध्यदेशस्तु मध्यमः ॥७॥

मध्यस्थासौ देशश्च । मध्ये भव । मनु — हिमवद्विन्ध्ययोर्मध्यं यत्प्राग् विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तित ॥' (२ २१) विनशन कुरुक्षेत्रम् ॥७॥[9]

1 Waste soil or land 2 M गच्छति 3 World [5] 4 भारतवर्ष (India) [1] 5 The Country south east of the शरावती river [1] 6 The Country north west of the शरावती river [1] 7 M प्रतिगत अन्त 8 The Country occoupied by mlecchas [1] 9 The midland Country lying between the Himalaya and Vindhya mountains [1]

आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः ।

आर्या वर्तन्तेऽस्मिन्[1] । 'आ समुद्रात्तु वै पूर्वादासमुद्राच्च पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ॥' (म० २ २२) । हिमप्रधानोऽग[2] । 'हिमालयो' इति पाठे हिमेनाल्यते । 'अल भूषणादौ' (भ्वा० प० से०) ॥[3]

नीवृज्जनपदः

नियतं वर्तन्तेऽस्मिन् । 'नहिवृति—' (६ ३ ११६) इति दीर्घः । जना पद्यन्तेऽत्र[4] । जननिवासस्थानम् ॥[5]

देशविषयौ तूपवर्तनम् ॥८॥

दिशति । विसिनोति । उपवर्तन्तेऽस्मिन्[6] । स्थानमात्राणि ॥८॥[7]

त्रिष्वागोष्ठात्

गोष्ठान्दाशब्दात् 'त्रिषु' इत्यधिकारः ॥

नडप्राये नड्वान्नड्वल इत्यपि ।

नडः प्रायो यत्र । 'कुमुदनडवेतसेभ्यो ड्मतुप्' (४ २ ८७) । 'नडशादाड् ड्वलच्' (४ २ ८८) ॥[8]

कुमुद्वान्कुमुदप्राये[9] वेतस्वान् बहुवेतसे[10] ॥९॥

शाद्वलः शादहरिते

शादैः शष्पैर्हरितः ॥[11]

सजम्बाले तु पङ्किलः ।

जम्बालेन पङ्केन सहितः । पङ्कोऽस्त्यस्मिन्[12] । पिच्छादित्वात् (५ २ १००) इलच् ॥[13]

---

1 M [illegible] 2 M [illegible] 3 [illegible]—the tract extending from the eastern to the western ocean and bounded on the north and south by the Himalaya and Vindhya respectively [2] 4 M [illegible] 5 An inhabited country [2] 6 M [illegible] 7 Place [3] 8 A place abounding in reeds [2] 9 A place abounding in lotus [1] 10 A place covered with Canes [1] 11 A place green with young grass [1] 12 M [illegible] 13 A muddy place [1]

जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध ॥१०॥

अनुगता आपोऽत्र[1]। 'ऊदनोर्देशे' (६ ३ ९८)। तथाविधो जलप्राय। क जल छ्यति। 'छोच्छेदने' (दि० प० अ०)। 'आत —' (३ २ ३) इति क[2] ॥१०॥[3]

स्त्री शर्करा शर्करिल शार्कर शर्करावति।

शर्करावति। 'देशे लुबिलचौ च' (५ २.१०५)। 'सिकताशर्कराभ्या च' (५ २ १०४) इत्यण् ॥[4]

देश एवादिमौ

आदिमौ शर्कराशर्करिलौ देशे एव प्रयोक्तव्यौ। शार्कर शर्करावानिति तु देशादेशयो। पाषाणप्राया मृत् शर्करा। 'काकर' लोके।

एवमुन्नेयाः सिकतावति ॥११॥

एव सिकतासिकतिलौ देशे। सैकत सिकतावानिति तु देशादेशयो ॥११॥[5]

देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालित ॥

स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥१२॥

नद्यम्बुजातसस्यवर्धितो देशो नदीमातृक। वर्षजव्रीहिवर्धितो देशो देवमातृक। देवोऽत्र[6] माताऽस्य[7] ॥१२॥[8]

सुराज्ञि देशे राजन्वान् स्यात्

'सुराज्ञि' इत्यत्र 'न पूजनात्' (५ ४ ६९) इति समासान्ताभाव। 'राजन्वान्सौराज्ये' (८ २ १४) इति साधु। धार्मिकराजयुक्तदेशस्यैकम् ॥[9]

ततोऽन्यत्रराजवान्।

राजमात्रयुक्तदेशस्यैकम् ॥[10]

गोष्ठं गोस्थानकम्

गावस्तिष्ठन्ति यत्र। 'घञर्थे—' (वा० ३ ३ ५८) इति क। 'अम्बाम्ब—' (८ ३ ९७) इति ष। गवा स्थानम्। स्वार्थे क (५ ३ ७५) ॥[11]

---

1 M आपोत्र 2 M क 3 A place abounding in water [3] 4 A place abounding in stony fragments [4] 5 A sandy place [4] 6 M देवोत्र 7 M मातास्य 8 Countries depending on irrigation and rain water respectively [1 each] 9 A country governed by the just or good king [1] 10 A country having the ruler [1] 11 Cow house or cow pen [2]

तत्तु गौष्ठीनं भूतपूर्वकम् ॥१३॥

गावो यत्र पूर्वमासन् । 'गोष्ठात् खञ् भूतपूर्वे' (५ २ १८) ॥१३॥[1] [स्यात्सा-केतमयोध्याया विदेहा मिथिलापुरी । महोदया कान्यकुब्जा कान्यकुब्ज महोदयम् ॥ काशी वाराणसी चैव विशाला चोज्जयिन्यपि । प्राग्ज्योतिष कामरूप द्वारका द्वारवत्यपि ॥]

पर्यन्तभूः परिसर

पर्यन्ते भू । परित सरन्त्यत्र । घ (३ ३ १८) । नद्यादिसमीपभूमेर्द्वे ॥[2]

सेतुराली स्त्रिया पुमान् ।

स्त्रिया वर्तमानायामाली सेतु । पुमानित्यन्वय । सिनोति । 'सिनिनि-' (उ० १ ६९) इति तुन् । अल्यतेऽनया[3] । 'इणजादिभ्य ' (ईम्वा० ३ ३ १०८) । इ । 'पुल' लोके ॥[4]

वामलूरश्च नाकुश्च वल्मीकं पुंनपुसकम ॥ १४ ॥

वाम लूयते । वाहुलकात्क्रक् । न अकति । वाहुल्कादु । वलन्ते प्राणिनोऽत्र[5] । 'अलीकादयश्च' (उ० ४ २५) इति निपात । पिपीलिकादिनिष्कासितमृत्पुञ्जस्य त्रीणि । 'वेमउट' लोके ॥१४॥[6]

अयन वर्त्म मार्गाध्वपन्थान पदवी सृति ।
सरणिः पद्धति पद्या वर्तन्येकपदीति च ॥१५॥

अयतेऽनेन[7] । ल्युट् (३ ३ ११३) । वर्तन्तेऽनेन[8] । मनिन् (उ० ४ १४४) । मार्ग्यते । 'मार्ग अन्वेषण' (चु० उ० से०) । अत्ति । 'अदेर्धच' (उ० ४ ११५) इति क्वनिप् । पथन्तेऽनेन[9] । 'पथेगतौ' (भ्वा० प० से०) । पथिमथिभ्यामिनि । 'पद्याटभ्यामवि ' । ङीप् (ग० ४ १ ४५) । सरन्त्यनया[10] । क्तिच् (३ ३ १७४) । 'अर्ति—' (उ० २ १०२) इत्यनि । वाल्यादिरपि । पादाभ्या हन्यते । तिन् (३ ३ ९४) । पादाय हिता । 'पद्यति—'(६ ३ ५३) इति पद्भाव । वर्तते ऽनया[11] ।

---

1 The place which was formenly a cow-pen [1] 2 Environs of a river mountain sc [2] 3 M अल्यतनया 4 Bridge [2]
5 M प्राणिनात्र 6 An hill [3] 7 M अयननेन 8 M वर्तन्नेनन
9 M पथन्नेनन 10 M सरन्त्यनेन 11 M वर्ततेनया ।

'वृनेश्च' (उ० २ १०६) इत्यनि । एक पादोऽस्याम्[1] । 'कुम्भप दीषु च' (५ ४ १३९) । इति साधु ॥१५॥[2]

अतिपन्था सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।

स्वतिभ्या 'न पूजनात्' (५ ४ ६९) इति समासान्तनिषध । सत्चासौ पन्थाश्च । अर्चिते श्रेष्ठे त्रीणि ॥[3]

व्यध्वो दुरध्वो विपथः कदध्वा कापथ समा ॥१६॥

विरुद्धाऽध्वा[4] । दुष्टोऽध्वा[5] । 'उपसर्गादध्वन' (५ ४ ८५) इत्यच् । विरुद्ध पथ । पथिन्शब्दे क्लीवता स्यात् । 'का कद्—' (६ ३ १०१) । 'ईपदर्थे च (६ ३ १०५) इति का ॥१६॥[6]

अपन्थास्त्वपथ तुल्ये

पथोऽभाव । 'पथो विभाषा' (५ ४ ७२) इत्यच् । अपथ नपुसके (२ ४ ३०) ॥[7]

शृङ्गाटकचतुष्पथे ।

शृङ्ग प्राधान्यमटति । चतुर्णा पथा समाहार । 'पथ सख्याव्ययादे' (वा० २ ४ ३०) इति क्लीवता ॥ द्वे ॥[8]

प्रान्तर दूरशून्योऽध्वा

प्रकृष्टमन्तरमत्र । दूर शून्यो मार्ग ॥ द्वे ॥[9]

कान्तार वर्त्म दुर्गमम् ॥१७॥

कस्याम्भसोऽन्तमृच्छति[10] । एकम् ॥१७॥[11]

गव्यूति स्त्री क्रोशयुगम

'गोर्यूतौ' (६ १ ७९) इत्यव् ॥[12]

---

1 M पादोस्या 2 Way, road or path [12] 3 A good way [3] 4 M विरुद्धोध्वा 5 M दुष्टोध्वा 6 A bad way [5] 7 A wrong way [2] 8 A place where four ways meet [2] 9 A dreary way [2] 10 M कस्याम्भसोन्तमृच्छति 11 A difficult way [2] 12 A measure of distance equal to two krosas (four miles) [2]

तत्तु गौष्ठीन भूतपूर्वकम् ॥१३॥

गावो यत्र पूर्वमासन् । 'गोष्ठात् खञ् भूतपूर्वे' (५ २ १८) ॥१३॥[1] [स्यात्सा वेतमयेप्याया विदेहा मिथिलापुरी । महोदया कान्यकुब्जा कान्यकुब्ज महोदयम् ॥ काशी वाराणसी चैव विशाला चोज्जयिन्यपि । प्राग्ज्योतिष कामरूप द्वारका द्वारवत्यपि ॥]

पर्यन्तभू परिसर

पर्यन्ते भू । परित सरन्त्यत्र । घ (३ ३ १८) । नद्यादिसमीपभूमेर्द्वे ॥[2]

सेतुराली स्त्रियां पुमान् ।

स्त्रिया वर्तमानायामाली सेतु । पुमानित्यव्यय । सिनोति । सितनि–' (उ० १ ६९) इति तुन् । अल्यतेऽनया[3] । इणजादिभ्य ' (इँभ्वा० ३ ३ १०८) । द्वे । 'पुल' लोके ॥[4]

वामलूरश्च नाकुश्च वल्मीक पुनपुसकम ॥ १४ ॥

वाम लूयते । वाहुलकाड्रक् । न अकति । बाहुलकादु । वलन्ते प्राणिनोऽत्र[5] । वल्मीकादयश्च' (उ० ४ २१) इति निपात । पिपीलिकादिभिष्कासितमृत्पुञ्जस्य त्रीणि । वेमउट लोके ॥१४॥[6]

अयन वर्त्म मार्गाध्वपन्थान पदवी सृति ।
सरणि पद्धति पद्मा वर्तन्येकपदीति च ॥१५॥

अयनेऽनेन[7] । ल्युट (३ ३ ११३) । वर्तन्तेऽनेन[8] । मनिन् (उ० ४ १४४) । मार्ग्यते । मार्ग अन्वेषण (चु० उ० से०) । अति । 'अदेर्धंच' (उ० ४ ११५) इति क्वनिप् । पथन्तेऽनेन[9] । पथेगतौ (भ्वा० प० स०) । पथिमथिभ्यामिनि । 'पद्याटम्यामवि ' । ङीप् (ग० ४ १ ४५) । सरन्त्यनया[10] । क्तिच् (३ ३ १७४) । सर्ति— (उ० २ १०२) इत्यनि । तालव्यादिरपि । पादाभ्या हन्यते । निन् (३ ३ ९४) । पादाय हिता । पद्यति— (६ ३ ५३) इति पद्भाव । वर्ततेऽनया[11] ।

1 The place which was formenly a cow pen [1] 2 Environs of a river mountain sc [2] 3 M अल्यतेनया 4 Bridge [2]
5 M प्राणिनात्र 6 An hill [3] 7 M अयननेन 8 M वर्तन्तनन
9 M पथन्तनन 10 M सरन्त्यनन 11 M वर्ततेनया ।

'वृतेरच' (उ० २ १०६) इत्यनि । एक पादोऽस्याम्[1] । 'कुम्भप- दीषु च' (५ ४ १३९) । इति साधु ॥१५॥[2]

अतिपन्था सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।

स्वतिम्या 'न पूजनात्' (५ ४ ६९) इति समासान्तनिषेध । सश्चासौ पन्थाश्च । अर्चिते श्रेष्ठे त्रीणि ॥[3]

व्यध्वो दुरध्वो विपथः कदध्वा कापथ समा ॥१६॥

विरुद्धोऽध्वा[4] । दुष्टोऽध्वा[5] । 'उपसर्गादध्वन' (५ ४ ८५) इत्यच् । विरुद्ध पथ । पथिन्शब्दे क्लीबता स्यात् । 'का कत्—' (६ ३ १०१) । 'ईषदर्थे च' (६ ३ १०५) इति का ॥१६॥[6]

अपन्थास्त्वपथं तुल्ये

पथोऽभाव । 'पथो विभाषा' (५ ४ ७२) इत्यच् । अपथ नपुसके (२ ४ ३०) ॥[7]

शृङ्गाटकचतुष्पथे ।

शृङ्ग प्राधान्यमटनि । चतुर्णां पथा समाहार । 'पथ सख्याव्ययादे' (वा० २ ४ ३०) इनि क्लीबता ॥ द्वे ॥[8]

प्रान्तर दूरशून्योऽध्वा

प्रकृष्टमन्तरमत्र । दूर शून्यो मार्ग ॥ द्वे ॥[9]

कान्तारं वर्त्म दुर्गमम् ॥१७॥

कस्याम्मसोऽन्तमृच्छति[10] । एरम् ॥१७॥[11]

गव्यूति स्त्री क्रोशयुगम्

'गार्यूतौ' (६ १ ७९) इत्यव् ॥[12]

---

1 M पादाम्या 2 Way, road or path [12] 3 A good way [3] 4 M विरुद्धाध्वा 5 M दुष्टोध्वा 6 A bad way [5] 7 A wrong way [2] 8 A place where four ways meet [2] 9 A dreary way [2] 10 M कस्याम्ममान्तमृच्छति 11 A difficult way [2] 12 A measure of distance equal to two krosas (four miles) [2]

नल्व त्रिष्कुचतु शतम् ।

'नल गन्धे' । उल्वादित्वात् (उ० ४ ९५) व । किष्कुर्हस्त, तेषा चतु शती[1] ॥[2]

घण्टापथ संसरणम

घण्टोपलक्षितानां पन्था । 'दशधन्वन्तरो राजमार्गो घण्टापथ स्मृत' । संसरत्यनेन । ॥ द्वे ॥[3]

तत्पुरस्योपनिष्करम् ॥ १८ ॥

इतिभूमिवर्ग ॥ १ ॥

तत्संसरणम् । पुरस्य चेद्भवति तदा । उपनिष्कीर्यतेऽत्र[4] सैन्यमिति ॥ १८ ॥[5]

इति भूमिवर्ग ॥ १ ॥

पू स्त्री पुरीनगर्यौ वा पत्तन पुटभेदनम् ।
स्थानीय निगम

पिपर्ति । 'पॄ पालने' (जु०प०से०) । 'भ्राजभास-' (३ ३ १७७) इति क्विप् । 'उदोष्ठ्यपूर्वस्य' (७ १ १०२) । पुरति काल्ताग्डीष् । नगा सन्त्यत्र । 'नगपामु[6]' (वा० ५ २ १०७) इति र । वाशब्दात्क्लीबत्व पत्तनसाहचर्यात् । पतन्त्यत्र । 'वीपतिम्या[7] तनन्' (उ० ३ १५०) । पुटानि पात्राणि भिद्यन्तेऽत्र[8] । स्थानाय हितम् । 'तस्मै हितम' (५ १ ५) इति [redacted] । नितरा गच्छन्त्यत्र । 'गोचर-' (३ ३ ११९) इति निपात । सप्त ॥[9]

अन्यत्तु यन्मूलनगरात्पुरम् ॥ १ ॥
तच्छाखानगरम्

मूलनगरं राजधानी ततो भिन्न यत्पुरम् ॥ १ ॥ शाखेव नगरम् । 'सराय' लोके । एकम् ॥[10]

वेशो वेश्याजनसमाश्रयः ।

विशन्त्यत्र कामुका । घञ् (३ ३ १२१) ॥[11]

---

1 M चतुशती 2 A measure of distance equal to 400 hastas or cubits [1] 3 A highway [2] 4 M उपनिष्कीर्यतेत्र 5 The mainway of a town 6 M नगपांसु 7 M विपतिम्या 8 M भिद्यन्तेत्र 9 City [7] 10 Suburb [1] 11 A residence of prostitutes [2]

आपणस्तु निषद्यायाम्

आपणन्तेऽस्मिन्[1]। 'गोचरसंचर–' (३. ३. ११९) इति साधु । निषीदन्त्यस्याम् । 'संज्ञायां समजनिषद–' (३.३.९९) इति क्यप् । द्वे हट्टस्य ॥[2]

विपणिः पण्यवीथिका ॥ २ ॥

विपण्यतेऽस्याम्[3] । 'इक् कृष्यादिभ्यः' (वा० ३.३.१०८) । पण्यस्य वीथी । विक्रयस्थानस्य द्वे ॥ २ ॥[4]

रथ्या प्रतोली विशिखा

रथं वहन्ति । 'तद्वहति–' (४.४.७६) इति यत् । प्रतोलयति । [तुल] चुरादेरच् (३.१.१३४) । गौरादिः (४.१.४१) । विगतशिखा मुण्डितेव समत्वात् । ग्राममध्यमार्गस्य त्रीणि । 'गली' लोके ॥[5]

स्याच्चयो वप्रमस्त्रियाम् ।

चीयते । उप्यते । 'वपिवृधिभ्यां[6] रन्' (उ० २. २७) । प्राकाराधारस्य द्वे ॥[7]

प्राकारो वरणः सालः

प्रक्रियते । उपसर्गस्य दीर्घः (६.३.१२३) । वृणोति । कर्तरि ल्युः । सल्यते । 'षल गतौ' (भ्वा०प०से०) । ग्रामादेरन्तः कण्टकादिवेष्टनस्य त्रीणि । 'रक्षा' लोके ॥[8]

प्राचीरं प्रान्ततो वृतिः ॥ ३ ॥

प्रागेव प्राचीनम् । '–अञ्चेरदिक् स्त्रियाम्' (५.४.८) इति ख । 'प्राचीरम्' इति इतिपाठे प्राङ्पूर्वाच्चिनोतेः क्तः । प्रान्तत प्रान्ते वरणम् ॥३॥[9]

भित्तिः स्त्री कुड्यम्

भिद्यते । क्तिन् (३.३.९४) कुड्या साधु कुड्यम् । पृषोदरादित्वात् (६.३.१०९) डः द्वे ॥[10]

---

1. M. आपणन्तेस्मिन् 2. Market [2] 3. M. विपण्यतेस्याम् 4. A market-place [2] 5. Street [3] 6. M. वपियधिभ्यां 7. A mound of earth raised from the ditch of a fort [2] 8. Rampart [3] 9. Fence [2] 10. Wall [2].

एडूकं यदन्तर्न्यस्तकीकसम् ।

अन्तर्न्यस्तास्थि यत् कुड्यं तद् ईडयति । 'उलूकादयश्च' (उ० ४.४१) इति साधु । अस्थिमयकुड्यस्यैकम् ॥[1]

गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥ ४ ॥
निशान्तवस्त्यसदनं भवनागारमन्दिरम् ।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥ ५ ॥
वासः कुटी द्वयोः शाला सभा

गृह्णाति धान्यादिकम् । 'गेहे कः' (३ १.१४४) । गं 'गणेशमोहते । उदवसीयते स्म । स्यते पिञो वा क्त' (३ २.१०२) । विशत्यत्र । मनिन् (उ० ४.१४४) । सीदन्त्यत्र । सदेर्मनिन् (उ० ४.१४४) निकेतन्त्यत्र । 'कित निवासे' (भ्वा०प०से०) ॥४॥ निशाया अन्तोऽत्र[2] । अपस्त्यायति सघीभवति यस्याम् । स्त्यै (भ्वा० प० अ०) 'आत —' (३ १.१३६) क । सीदन्त्यत्र । भवन्त्यत्र । अग्यतेऽस्मिन्[3] । मन्यते सुप्यतेऽत्र[4] । 'इषिमदि—' उ० १ ५१) इति किरच् । भूम्नि बहुत्वे एव गृहा पुंसि । निचीयन्ते धान्यादिकमत्र । 'पाय्यसानाय्य—' (३ १ १२९) इति साधु । निलीयतेऽत्र[5] । 'पुंसि' (३ ३ ११९) इति घ । आलीयतेऽत्र[6] ॥५॥ वसन्त्यत्र । घञ् (३ ३. १२१) । कुट्यतेऽस्मिन्[7] । शालते शाला । सह भान्त्यस्याम् । विशति ॥[8]

संजवनं त्विदम् ।

चतुः शालम्

संजवन्त्यत्र । 'जु गतौ' सौत्र । चतस्रः शाला. समाहृता । अन्योन्याभिमुख चतुश्शालागृहमित्यर्थः ॥[9]

मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥६॥

पर्णनिर्मिताया मुनीनां शाला । उटैः तृणपर्णादिभिर्जायते ।[10] एकम् ॥६॥[11]

चैत्यमायतनं तुल्ये

चित्याया इदम् । चैत्यम् । पिशाचादिस्थानम् आयतन्तेऽत्र[12] । 'यती प्रयत्ने' (भ्वा० आ० से०) । द्वे ॥[13]

---

1 A wall containing bones within [1] 2. M. अन्तोत्र 3. M. अग्यतेस्मिन् 4. M. सुप्यतेत्र 5. M. निलीयतेत्र 6. M. आलीयतेत्र 7. M. कुट्यतेस्मिन् 8 House [20] 9. A quadrangle of four buildings facing each other [2] 10 M. तृणपर्णादिभि जायते 11. Hermitage [2] 12. M आयतन्तेत्र 13. A sacrificial shed [2]

वाजिशाला तु मन्दुरा ।

वाजिनां शाला । मन्दतेऽत्र[1] । 'मन्दिवाशि—' (उ० १ ३८) । त्वरच् । द्वे ॥[3]

आवेशन शिल्पिशाला

आविशन्त्यत्र । शिल्पिना शिल्पस्य वा शाला ॥[4]

प्रपा पानीयशालिका ॥७॥

प्रपिबन्त्यत्र । 'आतश्च—' (३ ३ १०६) इत्यङ् । पानीयस्य शाला ॥ द्वे ॥७॥[5]

मठश्छात्रादिनिलय

मठ्यतेऽत्र ।[6] 'मठ निवासे' (भ्वा० प० स०) । छात्रादीनां परिव्राजकादीनां स्थानस्यैकम् ॥[7]

गञ्जा तु मदिरागृहम् ।

गञ्जन्त्यस्याम् । 'गजि मदने' (भ्वा० प० स०) । 'गुरोश्च—' (३ ३ १०३) इत्य । द्वे ॥[8]

गर्भागारं वासगृहम्

'कुट्टिमोऽस्त्री निबद्धा भूश्चन्द्रशालाशिरोगृहम् ।' गर्भं इवागारम् । वासस्य गृहम् । मध्यगृहस्य द्वे ॥[9]

अरिष्टं सूतिकागृहम् ॥८॥

न रिष्टमत्र । सूतिकाया गृहम् । द्वे ॥८॥[10]

वातायन गवाक्ष

वातस्यायनम् । गवामक्षीव । द्वे । 'ताप' लोके ॥[11]

अथ मण्डपोऽस्त्री जनाश्रय ।

मण्डयते मण्ड । तं पाति । जनानामाश्रय ॥ द्वे ॥[12]

---

1 M मन्दन्त्र 2 M मन्दिवाशि 3 A stable for horses [2]
4 Manufactory [2] 5 A place where water is distributed to travellers [2] 6 M मठ्यतेऽत्र 7 Monastery or seminary [1]
8 A dram house [2] 9 The inner apartments of a house [2] 10 The lying in Chamber [2] 11 Window [2]
12 Pavilion [2]

हर्म्यादि धनिनां वासः

हरति मन । अघ्न्यादित्वात् (उ० ४.११२) यत् मुट् च । आदिना स्वस्तिकादि । एकम् ॥[1]

प्रासादो देवभूभुजाम् ॥९॥

देवानां भूभुजां च गृहम् । प्रसीदन्त्यत्र । घञ् (३.३.१२१) उपसर्गस्य दीर्घः (६.३.१२२) ॥९॥[2]

सौधोऽस्त्री राजसदनम्

सुधा शुक्तिका चूर्णलेपोऽस्त्यस्य[3] । राज्ञः सदनं योग्यत्वात् । द्वे ॥[4]

उपकार्योपकारिका ।

उपक्रियते । ण्यत् (३.१.१२४) । उपकरोति । ण्वुल् (३.३.१३३) । राजगृहस्य द्वे ॥[5]

स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च ॥१०॥
विच्छन्दकप्रभेदा हि भवन्तीश्वरसद्मनाम् ।

स्वस्ति क्षेमं कायति । सर्वतो भद्रमस्य । नन्दयति नन्दी । आवर्तोऽस्य[6] ॥१०॥ विशिष्टान् छन्दयति साभिलाषान् करोति । राज्ञां गृहस्यैकैकम् ॥[7]

स्त्र्यगारं भूभुजामन्तः पुरं स्यादवरोधनम् ॥११॥
शुद्धान्तश्चावरोधश्च

स्त्रीणामगारम् । अन्तरभ्यन्तरे पुरं गृहम् । अवरुध्यन्तेऽत्र[8] ॥११॥ शुद्धा रक्षका अन्तोऽस्य[9] । तास्त्वाम्महिष्यापत्यते । चत्वारि ॥[10]

स्यादट्टः क्षौममस्त्रियाम् ।

अट्यते । 'अट्ट अतिक्रमणे' (भ्वा० आ० से०) । घञ् (३.३.१४)

---

1. The building belonging to a rich [1] 2. A temple or royal mansion [1] 3 M. चूर्णलेपः अस्त्यस्य 4. A white washed mansion or a palace [2] 5. A royal tent [2] 6 M आवर्तोऽस्य 7. Different kinds of royal palaces [1 each] 8. M. अवरुध्यन्तेऽत्र 9 M. अन्तेऽस्य 10. The Female apartment of a royal palace [4].

क्षुवन्त्यन । 'टुक्षु शब्दे' (अ० प० से०) । 'अनिम्नु—' (उ० १ १४०) इति म । हर्म्याद्युपरिगृहस्य द्वे ॥[1]

प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ॥१२॥

प्रहण्यते । 'अगारैकदेशे प्रघण प्रघाणश्च' (३ ३ ७९) इति साधु । अल्यन्ते भूष्यते । बाहुलकात्किन्दच् । द्वारप्रकोष्ठाद्बहिर्द्वाराग्रवर्तिचतुष्कस्य त्रीणि ॥[१२]॥[2]

गृहावग्रहणी देहली

गृहमवगृह्यतेऽनया[3] । ल्युट् (३ ३ ११७) । देह गोमयाद्युपलेपन लाति । द्वाराग्रे उदुम्बराख्यस्य द्वे । 'देहरवट' लोके ॥[4]

अङ्गनं चत्वराजिरे ।

'अगि गतौ' (भ्वा० प० से०) । करणे ल्युट् (३ ३ ११७) । मूर्धन्यान्तत्वम् । पृषोदरादि (६ ३ १०९) । चते याचने' (भ्वा० उ० से) । कृगृ—' (उ० २ १२२) इति ष्वरच् । अजन्त्यत्र । 'अजिरशिशिर—' (उ० १ ५३) इति साधु । त्रीणि ॥[5]

अधस्ताद्दारुणि शिला

शिलति । 'शिल उञ्छे' (तु० प० से०) । स्तम्भादीनामाधारभूत दारु शिला ॥[6]

नासा दारूपरि स्थितम् ॥१३॥

स्तम्भादेरुपरि दारु नासा । 'द्वारशाखाया ऊर्ध्वधारिणी शिला नासा' इति माला । नास्यते । 'नासृ शब्दे' (भ्वा० आ० से०) ॥१३॥[7]

प्रच्छन्नमन्तर्द्वारं स्यात्

अन्त[8] स्थितं द्वारम् । 'खिरकी' लोके ॥[9]

पक्षद्वारं तु पक्षकः ।

पक्षे पार्श्वे द्वारम् । 'पक्ष' इव । पार्श्वद्वारस्य द्वे ॥[10]

---

1 An upper story [2] 2 A porch before the door of a house [4] 3 M गृहमवगृह्यतेनया 4 The threshold (of a door [2] 5 Courtyard [3] 6 The lower timber of a door [1] 7 The upper timber of a door [1] 8 M स्त 9 The private or secret door within a house [2] 10 The side-door of a house [2]

वलीकनीध्रे पटलप्रान्ते

वलति । 'अलीकादयश्च' (उ० ४.२५) इति साधु । नितरां ध्रियते । पटलस्य छदिषः प्रान्ते । कुड्यादवहिर्वीथी येनाच्छाद्यते ॥[1]

अथ पटलं छदि॰ ॥ ४ ॥

पटं लाति । छाद्यतेऽनेन[2] । 'अर्चि शुचि'—' (उ० २ १०८) इतीसि ॥१४॥[4]

गोपानसी तु वलभी छादने वक्रदारुणि ।

गोभि किरणैः पानं शोषणम् । तत्स्यति वलेनाभाति । गौरादिः (४.१.४१)। वक्राणि दारुणि यस्मिन् । पटलाधारवंशपञ्जरस्य द्वे । 'बंगला' (?) लोके ॥[5]

कपोतपालिकायां तु विटङ्कं पुंनपुंसकम् ॥ १५ ॥

कपोताना पालिका । विशेषेण टङ्क्यतेऽत्र[6] । 'टकि बन्धने' (चु०प०से०) । गृहप्रान्ते रचित पक्षिस्थानस्य द्वे ॥ १५ ॥[7]

स्त्री द्वार्द्वारं प्रतीहार

द्वार्यते । 'दृ वरणे' । क्विप् (वा० ३ ३ ९४) । पचाद्यचि (३.१.१३४) द्वारम् प्रतिह्रियते । घञ् (३.३ १४) । त्रीणि ॥[8]

स्याद्वितर्दिस्तु वेदिका ।

विगता तर्दिर्हिंसाऽत्र[9] । विदन्त्यस्याम् । इन्नन्तान्ङीप् । अङ्गणादौ कृतस्य चतुरस्रस्थानस्य द्वे । 'वेदी' [लोके] ॥10

तोरणोऽस्त्री बहिर्द्वारम्

तुरन्त्यत्र । द्वाराग्रे स्तम्भोपरिरचितं सिंहद्वाराख्यम् ॥11

पुरद्वारं तु गोपुरम् ॥ १६ ॥

पुरस्य द्वारम् । गा पुरति । 'पुर अग्रगमने' (तु० प० से०) ॥१६॥12

---

1. The edge of the roof [3] 2 M. छाद्यतेनेन 3. M. अर्चिशुचि 4 Roof [2] 5. The curved beam which supports a thatch [2] 6 M. टङ्क्यतेत्र 7 Aviary [2] 8 Door [3] 9 M तर्दिर्हिंसात्र 10 A quadrangular spot in the courtyard of a temple or palace [2] 11. An outer door [2] 12. The gate of a town [2]

कूट पूर्द्वारि यद्धस्तिनखस्तस्मिन्

पुरद्वारे कृत क्रमनिम्नमवतरणार्थं मृत्कूटम् । हस्तिनो नख इव ॥[1]

अथ त्रिषु ।

कपाटमररं तुल्ये

क शिर पाटयति प्रविशताम् । 'कवाटम्' इत्यन्ये । इयर्ति । 'अर्तिकमि—' (उ० ३ १३२) इत्यरन् । द्वे ॥[2]

तद्विष्कम्भोऽर्गलं न ना ॥ १७ ॥

विष्कम्नाति । 'स्कम्भु सौत्रो रोधनार्थ । अर्ग्यतेऽर्ग ।[3] न्यङ्क्वादि (७ ३ ५३) । त लाति । कपाटरोधनकाष्ठस्य द्वे । 'बेवडा' [लोके] ॥१७॥[4]

आरोहणं स्यात्सोपानम्

सह विद्यमानमुपरि आनो गमनमनेन । पाषाणादिकृतस्य सौधारोहणमार्गस्य द्वे । 'सीढो' [लोके] ॥[5]

नि श्रेणिस्त्वधिरोहणी ।

नियता श्रेणी पङ्क्तिरत्र। सोपसर्गपाठे निश्चिता श्रेणि । काष्ठादिकृता-रोहणमार्गस्य द्वे ॥[6]

संमार्जनी शोधनी स्यात्

समृज्यते शोध्यतेऽनया[7] । द्वे । 'बढनी' [लोके] ॥[8]

सकरोऽवकरस्तथा ॥ १८ ॥

क्षिप्ते

सकीर्यते, 'ऋदोरप्' (३ ३ ५७) ॥ १८ ॥ क्षिप्ते 'धून्यादौ' इति दीप । द्वे । 'कतवार', 'करकट' लोके ॥१८॥[9]

मुख नि सरणम्

गृहादेर्नि सियते प्रविश्यते येन त मुखम् । निर्गमनप्रवेशमार्गस्य द्वे ॥[10]

---

1 A sort of turret projecting the approach to the gate of a city [2] 2 The leaf of a door [2] 3 M अर्ग्यन वर्ग 4 The bolt of a door [2] 5 Steps or stairs [2] 6 Staircase [2] 7 M शोध्यतेनया 8 Broom [2] 9 Sweepings [2] 10 The main door of a house for entry and exit [2]

संनिवेशो निकर्षणः ।

सन्निविशन्तेऽत्र[1] । कर्षणान्निर्गतम् । पुरादेर्बहिर्विहारभूमेर्द्वे ॥[2]

समौ संवसथग्रामौ

सवसन्त्यत्र । 'उपसर्गे वस' (उ० ३ ११६) इत्यथच् । ग्रसते । 'ग्रसेरा च' (उ० १ १४३) इति मन् । द्वे ॥[4]

वेश्मभूर्वास्तुरस्त्रियाम् ॥ १९ ॥

वेश्मनो भूः । वसन्त्यत्र । 'वसेस्तुणगारे णिच्च' (उ० १ ७५) । गृहरचनावच्छिन्नभूमेर्द्वे ॥ १९ ॥[5]

ग्रामान्तमुपशल्यं स्यात्

ग्रामस्यान्त समीपम् । शल्यमुपगतम् ।[6]

सीमसीमे स्त्रियामुभे ।

सीयते । षिञ् (स्वा० उ० अ०) । नामन्सीमन्— (उ० ४ १५०) इति साधु । 'डाबुभाभ्यामन्यतरस्याम्'— (४ १ १३) ॥[7]

घोष आभीरपल्ली स्यात्

घोषन्ति गावोऽत्र[8] । आभीराणा पल्ली कुटी ॥[9]

पक्कणः शबरालयः ॥२०॥

इति पुरवर्गः ॥२॥

पचति च स क्वणति च । शबराणामालय । भिल्लग्रामस्य द्वे ॥२०॥[10]

इति पुरवर्ग ॥२॥

महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वता ।
अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चया ॥१॥

महीं धरति । मूलविभुजादि (वा० ३ २ ५) । शिखरमस्यास्ति । क्ष्मा बिभर्ति । हर्तुं न शक्योऽहार्य ।[11] 'ऋहलोर्ण्यत्' (३ १ १२४) । धरति धर । अच् (३ १ १३४) । पर्वाणि सन्त्यत्र । '—पर्वमरुद्भ्याम्' (वा० ५ २ १२२)

---

1 M सन्निविशन्तेत्र 2 An open space for recreation [2] 3 M वस 4 Village [2] 5 A building-ground [2] 6 An open space near the vicinity of a village [2] 7 Boundary [2] 8 M गवात्र 9 An abode of herdsmen [2] 10 An abode of barbarians [2] 11 M रक्षणाय ।

त । अयते अद्रि । 'अदिशदिभूमिभ्य. क्रिन्' (उ० ४६५)। गा नायते। 'जात —' (२ २ ३) क । गिरति गिरि । बाहुलकादिक् । 'ग्रसु अदन' (भ्वा० आ० स०)। पृषोदरादि (६ ३ १०९)। वनिप् (३ २ ७५)। न चलत्यचल । शिला सन्त्यत्र। ज्योत्स्नादित्वादण (वा० ५ २ १ ३)। शिलाभिरुन्धायते। एरच् (३ ३ ५६)। नयोदश॥ १ ॥[1]

लोकालोकश्चक्रवालः

अन्तल क्यते सूर्यकिरणाना स्वदान्। वह्निर्न लोक्यते। लोकालोक । चक्राकारेण वाडते चक्रवाल । 'वाडृ आप्लाव्य' (भ्वा० आ० स०)। द्वे ॥[2]

त्रिकूटस्त्रिककुत्समौ।

त्रीणि कूटान्यस्य। त्रीणि ककुदमदृशानि शृङ्गाण्यस्य ।[3]

अस्तस्तु चरमक्ष्माभृत्

अस्यत्यर्कादीनस्त । चरत्यत्र चरम । 'चरेरम' (उ० ५६९)॥ द्वे ॥[4]

उदय पूर्वपर्वत ॥ २ ॥

उद्यन्ति ग्रहा यस्मात्। इण (अ० प० अ०) एरच्' (३ ३ ५६))। द्वे ॥[5]

हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रक ।
गन्धमादनमन्ये च हेमकूटादयो नगा ॥ ३ ॥

हिममस्त्यस्मिन्। निषीदति निषध । पृषोदरादि (६ ३ १०९)। विशेषण इध्यते विन्ध्यम्। शि इधी—' (रु० आ० स०) ण्यत् (३ १ १२४)। शकन्ध्वादि (६ १ ९४)। माल्य माल्याकारतास्यास्ति[6]। परिता यात्रया इध्यते पारियात्रक । 'यावे (४ २ ९२) अण्। स्वार्थे कन् (५ ३ ७५)। गन्धेन मादयति। हेम्न कूटा राशि ॥ ३ ॥

पाषाणप्रस्तरग्रावोपलाश्मान शिला दृषत्।

पिनष्टि पाषाण । बाहुल्कादान च्। प्रस्तृणाति प्रस्तर । 'स्तृञ् आच्छादन' (क्र्या० उ० ०)। गिरति ग्राव । वनिप् (३ २ ७५)। पृषोदरादि

---

1 Mountain [13] 2 A mythical mountain [2] 3 The mountain, त्रिकूट [2] 4 The setting or western mountain [2] 5 The eastern mountain (behind which the sun is supposed to rise) [2] 6 M माल्याकारतास्यास्ति 7 Seven mountains being Himvan, Nisadha, Vindhya, Malyavan, Parivatraka, Gandhamadan, Hemkūta

(६ ३ १०९)। उप लाति। 'ला आदाने' (अ० प० अ०)। क (३ १ १३६)। अश्नुते अश्म। अशू व्याप्तौ (स्वा० आ० से०)। मनिन् (३ २ ७५)। 'शिल उञ्छे' (तु० प० से०)। शिला। दृणाति दृषत्। 'दृणातेः पुग्घ्रस्वश्च' (उ० १ १३१) इत्यादि। सप्त ॥[1]

कूटोऽस्त्री शिखरं शृङ्गम्

कूटयति। 'कूट दाहे' (चु० उ० से०)। अच् (३ १ १३४)। शिखाऽस्यास्ति।[2] 'शिखाया ह्रस्वश्च' (वा० ५ २) इति र। 'शृणातेर्ह्रस्वश्च' (उ० १ १२६) इति गन्नुड्ह्रस्वा। त्रीणि ॥[3]

प्रपातस्त्वतटो भृगुः ॥४॥

प्रपतन्त्यस्मात्। न तटमत्र। भर्जति भृगु। 'भ्रस्ज पाके' (तु० उ० अ०) पृषोदरादि (६ ३ १०९)। त्रीणि ॥४॥[4]

कटकोऽस्त्री नितम्बोऽद्रेः

कटस्यावृणोति कटक। कटे वर्षादौ (भ्वा० प० से०)। सज्ञायं क्वुन् (उ० २ ३२)। पर्वतमध्यभागो मेखलाख्योऽयम् ॥[5]

स्नुः प्रस्थः सानुरस्त्रियौ।

स्नौति जलं स्नु। ष्णु प्रस्रवणे (अ० प० अ०)। मितद्र्वादित्वात् (वा० ३ २ १८०) डु। प्रतिष्ठन्तेऽस्मिन्समभूभागत्वात्[6]। घञर्थे क (वा० ३ ३ १०८)। सनोति ददाति सुखं सानु। 'षणु दाने' (त० उ० से०)। 'दृसनिज न—' (उ० १ ३) इति ञुण्। पर्वतसमभूभागस्य त्रीणि ॥[7]

उत्सः प्रस्रवणम्

उनत्त्यम्भसा उत्स। 'उन्दी—' (रु० प० से०)। 'उन्दिगुधिकुषिभ्यश्च' (उ० ३ ६८) इति स। किन्। प्रस्रवन्त्यापोऽस्मात्[8]। जलस्रवणावधिस्थानस्य द्वे ॥[9]

वारिप्रवाहो निर्झरो झरः ॥५॥

वारिणः प्रवाह। निर्झरणं निर्झरं। 'झॄष् वयोहानौ' (दि० प० से०)।

---

1 Stone [7] 2 M शिखास्याग्नि 3 Summit [3] 4 Steep [3] 5 The slope of a mountain [2] 6 M प्रतिष्ठन्तेऽस्मिन्समभूभागत्वात् 7 Mountain ridge, table-land [3] 8 M ऽस्रवन्त्यापोस्मात् 9 A watery place [2]

उत्साद्विर्गतस्य जलप्रवाहस्य द्वे । पञ्चापि पर्यायाः[1] इत्येते ... सरना[1] लोके ॥५॥[2]

दरी तु कन्दरो वा स्त्री

दृणाति दरी । 'दॄ विदारणे' (क्र्या० प० से०) । पचादौ (३ १ १३४) 'टित्—' (४ १.१५) । कं जलं तेन दीर्यते । 'ऋदोरप्' (३ ३ ५७) । कृत्रिमस्य गुहाकारस्य गिरिविवरस्य द्वे ॥[3]

देवखातबिले गुहा

गह्वरम्

बिल भेदने' (तु० प० से०) । क (३ १ १३५) । गाह्यते गह्वरम् । 'छित्वरछत्वर—' (उ० ३ १) इति गाहतेर्वरच् । अकृत्रिम गिरिविवरस्य त्रीणि ॥[4]

गण्डशैलास्तु च्युता स्थूलोपला गिरेः ॥६॥

शैलाना गण्डा इव गण्डशैला भूकम्पादिना गलिता ॥६॥[5]

खनिः स्त्रियामाकरः स्यात्

खन्यते खनि । 'खनिकषि—' (उ० ४ १३९) इति इन् । आकीर्यन्ते धातवोऽस्मिन्नाकर[6] । 'कॄ विक्षेपे' (तु० प० से०) । द्वे ॥[7]

पादा प्रत्यन्तपर्वता ।

पद्यते एभि पादा । 'पद गतौ' (दि० आ० अ०) घञ् (३ ३ १२१) । प्रत्यन्ते महाशैला समीपे ये क्षुद्रा पर्वता । द्वे ॥[8]

उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥७॥

उप आसन्ना । अध्यारूढा । 'उपाधिभ्या त्यकन्—' (५ २ ३४) ॥७॥[9]

धातुर्मनः शिलाद्यद्रेः

दधाति शोभा धातु । 'सितनि[10]—' (उ० १ ६९) इति तुन् ॥[11]

---

1 M सरन 2 Fountain [3] 3 Cave [2] 4 A natural Cave [2]
5 A huge rock thrown down by an earthquake or storm [1]
6 M धातवोऽस्मिन्नाकर 7 Mine [2] 8 The hill near a mountain [2] 9 The low land and high land near a mountain [1 each] 10 M सितनि 11 Mineral, like arsenic etc. [1]

गैरिकं तु विशेषतः ।

गिरौ भव गैरिकम् । गिरिशब्दादण् (४ २ ५३) । गैरिक विशेषेण धातु ॥[1]

निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ॥८॥

इति शैलवर्ग ॥३॥

कुं जनयति कुञ्ज । '—जनेर्ड' (३ २ ९७) । लतादिना पिहितस्य स्थानस्य द्वे ॥८॥[2]

इति शैलवर्ग ॥३॥

अटव्यरण्य विपिनं गहन काननं वनम् ।

अटन्त्यस्यामटवी । 'पद्यटिम्यामवि' (?) 'कृदिकारात्—' (ग० ४ १ ४५) ङीप् । अर्यतेऽरण्यम् । 'ऋ गतौ' (भ्वा० प० से०) । 'अर्तेर्निच्' (उ० ३ १ २) वैपन्तेऽत्र[3] । 'वेपितुह्योर्ह्रस्वश्च' (उ० २ ५२) इति इनन् । गाह्यते गहनम् । 'कृच्छ्रगहनयो —' (७ २ २२) इति निर्देशाद्धस्वयुचौ । काननति दीपयति । कनी दीप्त्यादौ (भ्वा० प० से०) । ल्युट् (३ १ १३४) । वनति । 'वन समक्तौ' (भ्वा० प० से०) । पद् ॥[4]

महारण्यमरण्यानी

महच्च तदरण्य च ॥[5]

गृहारामास्तु निष्कुटाः ॥१॥

गृहस्यारामा । निष्क्रान्ता कुटाद् गृहात् ॥१॥[6]

आराम स्यादुपवनं कृत्रिमं वनमेव यत् ।

आरमन्त्यत्राराम 'हलश्च' (३ ३ १२१) । उप समीप वनस्य तुल्यत्वादुपवनम् । कृत्रिमवृक्षसमूहस्य द्वे ॥[7]

अमात्यगणिकागेहोपवने वृक्षवाटिका ॥२॥

अमात्यस्य मन्त्रिणो वेश्यायास्त्व गृहस्य यदुपवन तद् वृक्षस्य वाटिका । 'वट वेष्टने' (भ्वा० प० से०) । 'सज्ञायाम्—' (३ ३ १०९) । अमात्येत्युपलक्षणम् ॥२॥[8]

---

1 The red chalk [1] 2 A place overgrown with creepers [2] 3 वेपन्तेऽत्र 4 Forest [6] 5 A large forest [2] 6 A garden attached to a house [2] 7 Garden [2] 8 A garden in the house of a minister or prostitute [1]

पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।

आक्रीडोऽन्यत्र । उद्यानमन्यत्र । राज्ञः सर्वोपभोग्यं वनस्य द्वे ॥[1]

स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥३॥

प्रमदानां वनम् । 'ङ्यापो —' (६ ३ ६३) इति ह्रस्वः । सस्त्रीकाणां राज्ञां क्रीडायोग्यम् ॥३॥

वीथ्यालिरावलिः पङ्क्तिः श्रेणी

विप्यते वीथिः । 'विपृ याचने' (भ्वा॰ आ॰ से॰) । 'इगुपधात्कित्—' (उ॰ ४ ११९) इतीन् । बाहुलकाद्दीर्घः । आलतिः । 'अल भूषणादौ' (भ्वा॰ प॰ से॰) । आलीन् (उ॰ ४ ११७) । आवलतिः । 'वल संवरणे' (भ्वा॰ प॰ से॰) । पच्यते पङ्क्तिः । 'पचि विस्तारे' (भ्वा॰ प॰ से॰) । 'श्रिञ् सेवायाम्' (भ्वा॰ उ॰ से॰) । 'वहिश्रि—' (उ॰ ४ ५१) इतीणि । सान्तरपङ्क्तेः पञ्च ॥[3]

लेखास्तु राजयः ।

लिख्यते लेखा । 'राजृ दीप्तौ' (भ्वा॰ उ॰ से॰) । इन् (उ॰ ४ ११७) । निरन्तरपङ्क्तिपङ्क्तिसाधारणायाः द्वे ॥[4]

वन्या वनसमूहे स्यात्

वनानां समूहः । 'पाशादिभ्यो यः' (४ २ ४९) । द्वे ॥[5]

अङ्कुरोऽभिनवोद्भिदि ॥४॥

अङ्कयतेऽङ्कुरः[6] । 'मन्दिवाशि—'[7] (उ॰ १ ३८) इत्युरच् । उद्भिनत्ति भुवमुद्भित् द्वे ॥४॥[8]

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।

अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ॥५॥

वृश्च्यते वृक्षति वा वृक्षः । 'वृक्ष वरणे' (?) । मह्यां रोहति । 'शाखास्यास्ति' । व्रीह्यादित्वात् (५ २ ११६) इनिः । विटपः शाखाविस्तारोऽस्यास्ति ।[10]

---

1 A royal pleasure garden [2] 2 A pleasure-garden attached to the royal harem [1] 3 Row [5] 4 Streak [2] 5 A multitude of groves, a large forest [1] 6 M अङ्कयते अङ्कुर 7 M मन्दिवाशि 8 Sprout [2] 9 M शाखास्यास्ति 10 शाखाविस्तारोऽस्यास्ति ।

पादैर्मूलं पिबति । तरन्त्यनेन तरु । 'भृमृशी—' (उ १ ७) इत्यु । अनस शकटस्याक र्गति हन्ति । 'कुट कौटिल्ये' (तु० प० से०) । सल्यते साल । 'पल गतौ' (भ्वा० प० से०) । पलाशानि सन्त्यस्य । द्रवत्यूर्ध्वम् । 'द्रु गतौ (भ्वा० प० अ०) । मितद्रवादि (वा० ३ २ १८०) । द्रु । द्रु शाखाऽस्यास्ति[1] । 'शद्रुभ्या म ' (५ २ १८०) । न गच्छत्यगम । त्रयोदश ॥५॥[2]

वानस्पत्य फलैः पुष्पात्

वनस्य पति । तत्र भव । पारस्करादित्वात् (६ १ १५७) सुट् । 'दित्य—' (४ १ ८५) इति ण्य[3] । पुष्पाज्जातै फलैर्हेतुभि ॥[4]

तैरपुष्पाद्वनस्पति ।

तै पुष्पैर्विना फलं ॥[5]

ओपध्य फलपाकान्ता[6]

ओप रुज दधाति । धाञ (जु० उ० आ०) कि (३ ३ ९३) । फलपाक एवान्तो यासाम् ॥[7]

स्यादवन्ध्य फले ग्रहि ॥६॥

फलानि गृह्णाति समये । फलेग्रहिरात्मभरिश्च (३ २ २६) इति साधु । द्वे ॥[8]

वन्ध्योऽफलोऽवकेशी च

वधे साधु । अवके शूये—द्वेऽवकेशी[9] । त्रीणि ॥[10]

फलवान्फलिन फली ।

फलबर्हिभ्यामिनच्[11]' (वा० ५ २ १२१) । फलिन । त्रीणि ॥[12]

---

1 M शाखास्यास्ति 2 Tree (in general) [13] 3 M ण्य 4 A tree the fruit of which is produced from blossom e g mango [1] 5 A tree that bears fruit without blossom [1] 6 B and K read as ओषधि फलपाकान्ता 7 A plant or herb which dies after becoming ripe [2] 8 A tree that bears fruit in time [2] 9 M द्वेऽवकेशी 10 A barren tree [3] 11 M फलबर्हिभ्यामिनच् 12 A tree bearing fruit [2]

प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः ॥ ७ ॥
फुल्लश्चैते विकसिते

'फुल्ल विकसने' (भ्वा० प० से०)। अच् (३.१.१३४)। व्यावृत्तः कोशः संकोचोऽस्मात् ।[1] 'कच बन्धने' (भ्वा० प० से०)। विगतः कचोऽस्मात् ।[2] 'स्फुट विकसने' (तु० प० से०)। कः (३.१.१३५) ॥ ७ ॥ 'कस गतौ' (भ्वा० प० से०)। क्तः (३.४.७२) विकसितः। अष्टौ ॥[3]

स्युरवन्ध्यादयस्त्रिषु ।

एते अवन्ध्यादयः ।

स्थाणुर्वा ना ध्रुवः शङ्कुः

तिष्ठति स्थाणुः। 'स्थो णुः' (उ० ३. ३७)। ध्रुवति। ध्रुव स्थैर्ये (तु० प० से०)। शङ्कन्तेऽस्मात्[4]। 'खरशङ्कु—' (उ० १.३६) इति साधुः। शाखापत्ररहिततरोः त्रीणि ॥[5]

ह्रस्वशाखाशिफः क्षुपः ॥ ८ ॥

ह्रस्वाः शाखा शिफा मूलानि वा यस्य ॥ शाखोटकादिः। क्षुप्यते क्षुपः ॥ ८ ॥[6]

अप्रकाण्डे स्तम्बगुल्मौ

प्रकाण्डो गण्डस्तद्रहितः। स्तम्भते स्तम्बः। 'स्तम्ब कर्णयोः—' (३.२.१३) इति निपातः। गुडति गुल्मः। 'गुड रक्षायाम्' (तु० प० से०)। स्कन्धरहितस्य द्वे ॥[7]

वल्ली तु व्रततिर्लता ।

'वल वल्ल संवरणे' (भ्वा० आ० से०)। 'सर्वधातुभ्य इन्' (उ० ४. ११७)। प्रकृष्टा ततिरस्या व्रततिः। पृषोदरादिः (६.३.१०९)। लतति। 'लतिः' सौत्रः। त्रीणि ॥[8]

---

1 M. संकोचोऽस्मात् 2. M. कचोऽस्मात् 3 A blossomed or full-blown tree [8] 4. M. शङ्कन्तेऽस्मात् 5. Having no branches, leaves and flowers (a tree) [3] 6. A tree with small branches [1] 7. A trunkless tree [2] 8. Creeper [2].

लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यपि ॥ ९ ॥

शाखापत्रप्रचय प्रतान । सोऽस्त्यस्या [1] । विरुणद्धि वीरुत् । गुल्म' प्रतानोऽस्त्यस्या' । 'उलः' सौत्र । तस्मात्कप (उ० ३.१४४) । त्रीणि ॥ ९ ॥[3]

नगाद्यारोह उच्छ्राय उत्सेधश्चोच्छ्रयश्च सः ।

नगस्य तरो । आरोह, औन्नत्यम् । 'श्रिञ् सेवायाम्' (भ्वा० उ० से०) । 'उदि श्रयति' (३ ३ ४९) इति घञ् । 'षिधु गत्याम्' (भ्वा० प० से०) । घञ् (३ ३ १८) । उत्सेध । एरच्' (३ ३ ५६) । उच्छ्रय । वृक्षादिदैर्घ्यस्य त्रीणि ॥[4]

अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः ॥१०॥

प्रकाम्यते प्रकाण्ड । 'वरण्डादयश्च' (?) इति ड । स्कन्द्यते, आरुह्यते स्कन्ध । स्कन्दिर् (भ्वा० प० अ०) दस्य ध । द्वे ॥ १० ॥[5]

समे शाखालते

शाखति । 'शाखृ व्याप्तौ' (भ्वा० प० से०) । द्वे ॥[6]

स्कन्धशाखाशाले

स्कन्धस्य शाखा । स्कन्धात्प्रथमोत्पन्ना । शलति शाला । 'शल चलने' (भ्वा० प० से०) । 'ज्वलिति—' (३ १ १४०) इति ण । 'समे' इत्यनुषङ्गः ॥ द्वे ॥[7]

शिफाजटे ।

शेत शिफा । बाहुलकाद्रस्वफौ । जटति । 'जट सघाते' (भ्वा० प०से०) । जटारूपमूलस्य द्वे ॥[8]

शाखा शिफावरोहः स्यात्

शाखावलम्बिनी शिफा अवरोह ।[9]

---

1. M सोस्त्यस्या 2 M प्रतानोस्त्यस्या 3 A branching Creeper[5]
4 The height of a tree [3] 5 The trunk of a tree from the root to the branches [2] 6 The branch of a tree [2]
7 The first branch of a tree [2] 8 The roof of a tree spreading in the ground [2] 9 The root of a branch [1]

मूलाच्चाग्रं गता लता ॥ ११ ॥

मूलादूर्ध्वं गता या शिफा सा लता ॥ ११ ॥[1]

शिरोऽग्रं शिखरं वा ना

श्रीयते शिरः । 'श्रयते स्वाङ्गे शिरः किच्च' (उ० ४ १९३) इत्यसुन् । अगति । 'अग कुटिलायां गतौ' (भ्वा० प० से०) 'ऋज्रेन्द्र—' (उ० २ २८) इति साधु ॥ शिखा राति शिखरं । वा ना वा पुल्लिङ्गः । वृक्षोर्ध्वभागस्य त्रीणि ॥[2]

मूलं बुध्नोऽङ्घ्रिनामकः ।

मूलति । 'मूल प्रतिष्ठायाम्' (भ्वा० प० से०) । बध्यते बुध्नः । 'बन्धेर्ब्रधि बुधी च' (उ० ३ ५) इति नक् । अङ्घ्रेर्नाम यस्य । मूलभागस्य त्रीणि ॥[3]

सारो मज्जा समौ

सरति सारः । 'सृ स्थिरे' (३.३ १७) घञ् । मज्जति मज्जा । 'श्वन्नुक्षन्—' (उ० १ १६०) इति नान्तो निपातितः । टावन्तोऽपि[4] । द्वे ॥[5]

त्वक् स्त्री वल्कं वल्कलमस्त्रियाम् ॥१२॥

त्वचति त्वक् । 'त्वच संवरणे' (तु० प० से०) । वल्कयति । 'वल्क परिभाषणे' (चु० प० से०) । त्रीणि ॥१२॥[6]

काष्ठं दारु

काशते काष्ठम् । दीर्यते दारु । 'दृसनिजनि—' (उ० १ ३) इति ञुण् । पुस्यप्ययम् । काष्ठस्य द्वे ॥[7]

इन्धनं त्वेध इध्ममेधः समित् स्त्रियाम् ।

इन्ध्यतेऽनेनाग्निरिन्धनम्[8] । एधतेऽनेन[9] । असुन् (उ० ४ १८८) । 'इषियुधि—' (उ० १ १४५) इति इन्धेर्मक् । इध्मम् । इन्धे एधः । 'अवोदैधोद्म—' (६ ४ २९) इति अदन्तो निपातितः । समिध्यतेऽनया[10] । पञ्च ॥[11]

---

1 A creeping plant winding itself round a tree from the bottom to the top [1] 2 The top of a tree [3] 3 Root (in general) [3] 4 M टावन्तोऽपि 5 The pith of a tree [2] 6 The bark of a tree [3] 7 Wood [2] 8 M इन्ध्यतेऽनेनाग्निरिन्धनम् 9 M एधतेऽनेन 10 M समिध्यतेऽनया 11 Fuel [5]

निष्कुहः कोटरं वा ना

निश्चयेन कुह्यते। 'कुह विस्मापने' (चु० आ० से०)। कुटति कोटर। 'कुट कौटिल्ये' (तु० प० से०)। वृक्षादिरन्ध्रस्य द्वे ॥[1]

वल्लरिर्मञ्जरिः[2] स्त्रियौ ॥१३॥

'वल्ल संवरणे' (भ्वा० आ० से०)। वल्लमृच्छति वल्लरि। 'अच इ' (उ० ४ १३८)। मञ्जुलमृच्छति मञ्जरि। 'अच इः' (उ० ४ १३८)। शाकन्ध्वादि। द्वे ॥१३॥[3]

पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्।

पतति पत्रम्। पते ष्ट्रन् (उ० ४ १५८)। पल मासमश्नाति। छद्यतऽनेन।[4] 'छद अपवारणे' (चु० उ० से०)। 'आधृषाद्वा' (ग० ३ १ २५) इति णिजभावः। दलति। 'दल विदारणे (चु० उ० से०)। पर्णयति पर्णम्। 'पर्ण हरितभावे' (चु० उ० से०)। छद्यतऽनेन[5]। णिजभावे 'पुंसि—' (३ ३ ११९) घ। षट् ॥[6]

पल्लवोऽस्त्री किसलयम्

पद्भ्या लूयते पल्लवः। किञ्चित्सलति किसलयम्। 'षल गतौ' (भ्वा० प० से०)। बाहुलकात् कयन्। नवपत्रस्य द्वे ॥[7]

विस्तारो विटपोऽस्त्रियाम् ॥१४॥

स्तृञ् आच्छादन' (स्वा० उ० अ०)। भावे घञ्। विस्तार। विटात् पाति। शाखादिविस्तारस्य द्वे ॥१४॥[8]

वृक्षादीनां फलं सस्यम्

सस्ति सस्यम्। 'षस सस्ति स्वप्ने' (अ० प० स०)। माछासिसि—' (उ० ४ १०९) इति य। शमे (भ्वा० प० से०) यनि (वा० ३ १ ९७) शस्योऽपि[9] ॥ द्वे ॥[10]

---

1 The hollow of a tree [2] 2 Some commentators re·d as follows वल्लरी मञ्जरी 3 Shoot [2] 4 M छद्यतेनेन 5 M छद्यतेनेन 6 Leaf [6] 7 A new or tender beaf [2] 8 The extension of a branch or a tree [2] 9 M शस्योपि 10 The fruit of a tree or creeper [2]

वृन्तं प्रसवबन्धनम् ।

वृणाति वृन्तम् । 'वृञ् वरणे (स्वा० उ० स०) । बाहुलकाद् वज्जि धृपि—' (उ० ३ ८९) इति क्त, नुम् च । प्रसवः बध्यतेऽनेन[1] । लोके । द्वे ॥[2]

आमे फले शलाटुः स्यात्

आमे अपक्वे फले । 'शल चलनादौ' (भ्वा० प० स०) । शलमटति । मृगय्वादित्वात् (उ० १ ३७) कु[3] ॥[4]

शुष्के वानमुभे त्रिषु ॥१५॥

शुष्के फले वानम् । 'वनु याचने (त० आ० स०) घञ् (३ ३ १८) ॥१५॥[5]

क्षारको जालकं क्लीबे

क्षरति क्षारकः । 'क्षर सञ्चलने (भ्वा० प० स०) । ण्वुल् (३ १ १३३) । जालमिव जालकम् । नवकलिकावृन्दस्य द्वे ॥[6]

कलिका कोरकः पुमान् ।

कल्यति कलिका । 'अच इः' (उ० ४ १३८) । स्वार्थे कन् (५ ३ ७५) । कुर शब्दे (तु० प० स०) । '—सञ्ज्ञायां वुन्' (उ० ५ ३५) । अविकसित कलिकायाः द्वे ॥[7]

स्याद् गुच्छकस्तु[8] स्तबकः

गूयते गुच्छः । 'गुङ् शब्दे' (भ्वा० आ० स०) । गम्यादिभ्यः छ । स्तूयते स्तबकः । 'विकासोन्मुखकलिकायां' इष्यते । 'कलिकादिवृन्दस्य' इष्यते ॥[9]

कुड्मलो[10] मुकुलोऽस्त्रियाम् ॥१६॥

'कुट छेदने (तु० प० स०) । 'कुल्कुपिभ्यां कमलच्' (उ० १ १०९) । मुञ्चेर्बाहुलकादुलच् । विकासोन्मुखकलिकायाः द्वे ॥ १६ ॥

---

1 ॰ बध्यतेऽनेन 2 The footstalk of a leaf or fruit [2] 3 ॰ 4 An unripe fruit [1] 5 A dry fruit [1] 6 A bunch of buds [2] 7 Bud [2] 8 B reads गुत्सकस्तु 9 A cluster of blossoms B reads गुत्सकः 10 An opening bud [2

स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ॥[1]

सुष्ठु मन्यन्ते । 'पुष्प विकसने' (दि० प० से०) । 'षूङ् प्राणिप्रसवे' (दि० आ० से०) । निष्ठान —प्रसूनम् । कुस्यति कुसुमं । 'कुस संश्लेषणे' (दि० प० से०) । 'कुसे —' (उ० ४ १०६) इत्युम् । पञ्च ॥[2]

मकरन्दः पुष्परसः

मकरं द्यति कामजनकत्वान्मकरन्दः । पुष्पस्य रसः । द्वे ॥[3]

परागः सुमनोरजः ॥१७॥

परा गच्छति । 'अ मेष्वपि—' (वा० ३ २ ४८) इति डः । सुमनसां रजः । द्वे ॥१७॥[4]

द्विहीनं प्रसवे सर्वम्

वक्ष्यमाणमश्वत्थादिवृक्षलतादि प्रसूयमाने पुष्पे फले मूले च वर्तमानं द्वाभ्यां स्त्रीपुंसाभ्यां हीनं ज्ञेयम् ।

हरीतक्यादयः स्त्रियाम् ।

हरीतक्याः फलं तु हरीतकीत्येव । 'लुपि युक्तवद्व्यक्तिवचने (१ २ ५१) इत्यत्र 'हरीतक्यादिषु व्यक्तिः' (वा० १ २ ५१) इति वचनात् लिङ्गं प्रकृतिवत् ।

आश्वत्थं वैणवं प्लाक्षं नैयग्रोधैङ्गुदं फले ॥१८॥
बार्हतं च

अश्वत्थस्य फलम् । वेणूनाम् । प्लक्षस्य । न्यग्रोधस्य । इङ्गुद्या । 'न्यग्रोधस्य च केवलस्य' (७ ३ ५) इत्यैच् ॥१८॥ बृहत्या फलम् ॥[5]

फले जम्ब्वा जम्बूः स्त्री जम्बु जाम्बवम् ।

जम्ब्वा फले जाम्बवं जम्बु च । 'जम्ब्वा वा' (४ ३ १६५) इत्यण् । लुकि (४ ३ १६३) नपुंसकह्रस्वे (१ २ ४८) जम्बु ॥[6]

पुष्पे जातिप्रभृतयः स्वलिङ्गाः

जात्याः पुष्पम् जातिः । 'पुष्पमूलेषु बहुलम्' (वा० ४ ३ १६६) इत्यणादेर्लुक् । स्वलिङ्गाः ।

---

1 B reads समम् 2 Flower [5] 3 Flower juice [2] 4 The pollen of a flower [2] 5 The fruit of the six trees [1 each] 6 The fruit of the jambu tree [3]

व्रीह्य फले ॥१९॥

यथा—यवाना फलानि यवा । 'फलपाकशुषाम्—' (वा० ४ ३ १६६) इति लुप् ॥१९॥

विदार्यायास्तु मूलेऽपि

विदार्या मूल पुष्पञ्च विदारी ।

पुष्पे क्लीबेऽपि पाटला ।

पाटलाया पुष्पम् । पाटला । लुकि (वा० ४ २ १६६) तु पाटलम् ॥

बोधिद्रुमश्चलदल पिप्पल कुञ्जराशन ॥२०॥

अश्वत्थे

बुध्यते बोधि । इन् (उ० ४ ११७) स चासौ द्रुमश्च । चल दलमस्य । पिप्पल फलमस्यास्ति । कुञ्जरेणाश्यते ॥२०॥ अश्वेषु तिष्ठत्याश्रयत्वादश्वत्थ । 'पीपर' लोके ॥[1]

अथ कपित्थे स्युर्दधित्थग्राहिमन्मथा ।

तस्मिन्दधिफल पुष्पफलदन्तशठावपि ॥२१॥

कपयस्तिष्ठन्त्यत्र[2] । दधिवर्णो द्रवस्तिष्ठत्यत्र । गृह्णाति ग्राही । मतोमय मन्मथ[3] । दधिफलेऽस्य[4] । पुष्पयुक्त फलमस्य । दन्ताना शठ इवापकारित्वात् । सप्त । 'कयथ' लोके ॥२१॥[5]

उदुम्बरे जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।

उल्लङ्घितमम्बरमनेन । पृषोदरादि (६ ३ १०९) । जन्तव फलेऽस्य[6] । यज्ञमङ्गति गच्छति । हेमवर्णं दुग्धमस्य । चत्वारि । 'गूलरि' लोके ॥[7]

कोविदारे चमरिकः कुद्दालो युगपत्रक ॥२२॥

कु भूमि विदृणाति । चमरोऽस्यास्ति[8] चमरिक । कुमुद्दाल्यति । युग युग्मं पत्रमस्य । चत्वारि । 'कचनार' लोके ॥२२॥[9]

---

1 The pippala or fig tree [5] 2 M. कपय तिष्ठन्त्यत्र 3 M मन्मथ 4 M दधिफलेस्य 5 The kapitha or wood apple tree [7] 6 M फलेस्य 7 The udumbara or gūlari tree [4] 8 M चमरास्यास्ति 9 The Kacanāra tree [4]

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।

सप्त पर्णमस्य । विशाला त्वगस्य । शरदि पुष्प्यति । विषमाश्छदा यस्य । चत्वारि । 'छतिवन' लोके ॥[1]

आरग्वधे राजवृक्षशम्पाकचतुरङ्गुलाः ॥२३॥
आरेवतव्याधिघातकृतमालसुवर्णकाः ।

'रञ्ज रागे' (भ्वा०, दि० उ० अ०) आरज्य रोग हन्त्यारग्वधः । सम्यक्पाकोऽस्य[2] । शं कल्याणं पाकोऽस्येति[3] वा । चतस्रोऽङ्गुलयो[4] यस्य । पर्वणां प्रमाणम् ॥२३॥ रेवती रोगदेवता । अरेवत्या भवः । कृता मालाऽस्य । अष्टौ । 'किरवार' इति 'धननवहेर' इति 'मृगालदण्ड' इति च लोके ॥[5]

स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः ॥२४॥

जम्यते जम्बीरम् । 'जमु अदने' (भ्वा० प० से०) । 'गम्भीरादयश्च' (उ० ४ ३५) इति साधु । दन्ताना शठ इव । 'जभी गात्रविनामे' (भ्वा० आ० से०) । 'रधिजभो —' (७ १ ६१) इति नुम् । पञ्च । 'नेबू जभीरी' (लोके) ॥२४॥[6]

वरणो वरुणः सेतुस्तिक्तशाकः कुमारकः ।

व्रियतेऽनेन[7] वरणः । वृञ् (स्वा० उ० से०) ल्युट् (३ १ ११३) । 'कृवृदारिभ्य उनन्' (उ० ३ ५३) । 'षिञ् बन्धने' (स्वा० उ० अ०) । 'सितनि—' (उ० १ ६९) इति तुन् । सेतुः । कुमार इव कुमारकः । पञ्च । 'वरण' लोके ।[8]

पुंनागे पुरुषस्तुङ्गः केशरो देववल्लभः ॥ २५ ॥

पुमान्नाग इव । 'पुर अग्रगमने' (तु० प० से०) । 'पुरः कुषन्' (उ० ४ ७४) । तुङ्ग उच्चत्वात् । प्रशस्ता केशरा अस्य । सौहृण्डपत्र इव इषच्छ्वेतपुष्पः ॥ २५ ॥[9]

1 The chatavana tree [4] 2 M सम्यक्पाकोस्य 3 M पाकोस्येति
4 M चतस्रोङ्गुलयो 5 The āragvadha (amalatasa) tree [8]
6 Citron [5] 7 M व्रियतेनेन 8 The varaṇa tree [5] 9 The keśara tree[4]

पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः ।

पारि पारं गतं भद्रमस्य । 'णिवि सेचने' (भ्वा० प० से०) । निम्बः । मन्दा आरा ऽस्य[1] । पारे गतं जन्मास्य । 'फरहद'॥[2]

तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तकः ॥ २६ ॥

वञ्जुलश्चित्रकृच्च

अतिक्रान्तो निशा । तिनिशः । स्यन्दनः रथोपयोगित्वात् । नीयते नेमिः । णीञोमिः (उ० ४ ३४)। रथस्य द्रुः । अनिशयितो मुक्तो विस्तारोऽस्य[3] ॥ २६ ॥ वञ्च्यते वञ्जुलः । बाहुलकादुलो जश्च । 'सादन' लोके ॥[4]

अथ द्वौ पीतनकपीतनौ ।

आम्रातके

पीतं करोति । आम्रमतति । श्रीणि । 'अमन्त (?)' लोके ॥[5]

मधूके तु गुडपुष्पमधुद्रुमौ ॥ २७ ॥

वानप्रस्थमधुष्ठीलौ

मन्यते मधूकः । 'उलूकादयश्च' (उ० ४ ४१) इति साधुः । गुड इव पुष्पमस्य । मधुनामा द्रुमः ॥ २७ ॥ वनप्रस्थे वनैकदेशे भवः । मधुप्ठीवनि । पृषोदरादि (६ ३ १०९)। 'महुआ' लोके ॥[6]

जलजेऽत्र मधूलकः ।

जलजे मधूके मधु लानि । मधूलकः । एकम् ॥[7]

पीलौ गुडफलः स्रंसी

पील प्रतिष्टम्भे' (भ्वा० प० से०)। मृगय्वादि (उ० १ ३७) । स्रंसयति मलम् । णिनि (३ ३ १७०)। 'पीलव' लोके ॥[8]

तस्मिंस्तु गिरिसम्भवे ॥ २८ ॥

अक्षोटकन्दरालौ द्वौ ।

गिरिजे तु तस्मिन्पीलौ ॥ २८ ॥ अक्षस्येवोटा पर्णान्यस्य । अक्षोटः । कर्परमालनि[9] । 'कन्दराल' इति पाठे, कन्दरास्यास्ति । पर्वतवृक्षः । 'अखरोट' लोके ॥[10]

---

1 आराम्य 2 The pharahada or coral tree [4] 3 M विस्तारोम्य
4 The tinisa tree [7] 5 The amratka or hog plum tree
6 The madhūka (mahuva) tree [5] 7 The madhūlaka tree [1] 8 The pilu tree 9 M कर्परमालनि 10 The akṣoṭa or walnut tree [2]

ओड्रवोटस्तु निकोचक ।

अङ्वस्य-उट । निकुच्यते । 'कुच शब्दे तारे' (भ्वा० प० से०) । 'ढेरा' [लोके] ॥[1]

पलाशे किंशुकः पर्णो वातपोथ

पल मासमश्नाति । किञ्चित् शुक इव । प्रशस्तानि पर्णान्यस्य पर्णं । वात पोथयति । 'पुथ हिंसायाम्' (दि० प० से०) । 'पराश' इति लोके ॥[2]

अथ वेतसे ॥ २९ ॥

रथाभ्रपुष्पविदुलशीतवानीरवञ्जुला ।

वितस्यति वेतस ॥ २९ ॥ रमन्तेऽस्मिन्[3] रथ । हनिकुषि—' (उ० २ २) इति क्थन् । अभ्रमिव पुष्पमस्य । विदोल्यते विदुल । 'दुल उत्क्षेपे' (चु० प० से०) । शीतो वीर्येण । वाति नीरं वानीरम् । वज गतौ' (भ्वा० प० से०) । वाहुलकादुलचनुमो । षट् । वेरसा लोके । वेत्र ' इत्यस्य तु भ्रम । तस्य हि 'वेत्रम्' इति नाम । वेतसोनदीतटगोदवो गुल्म ।[4]

द्वौ परिव्याधविदुलौ नादेयी चाम्बुवेतसे ॥ ३० ॥

विध्यतेऽम्भसा[5] परिव्याध । नद्या भवा नादेयी । जलवेतसस्य चत्वारि । अयमेव वेरसा' इत्यन्ये ॥ ३० ॥[6]

शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचका ।

शोभामनक्ति । अञ्जू व्यक्त्यादौ (रु० प० से०) । ल्युट् (३ ३ ११३) । सुष्ठु मनक्तीति । दन्त्यादिर्वा । शिनोति तैक्ष्ण्यात् । शिग्रु । 'शिञ् निशाने' (स्वा० उ० अ०) । जम्वादयश्च' (उ० ४ १०२) इति साधु । तीक्ष्णो गन्धोऽस्य[7] । आक्षीवयति । 'क्षीवृ मदे' (भ्वा० आ० से०) । ह्रस्वादिरपि । मुञ्चति गन्धम् । 'सहिजन [लोके] ॥[8]

रक्तोऽसौ मधुशिग्रु स्यात्

रक्तो रक्तपुष्पोऽसौ[9] मधु मधुर । 'सुनुगा लोके' ॥[10]

---

1 The ankota tree [2] 2 The palaśa tree [4] 3 M रमन्तेरस्मिन् 4 Cane [7] 5 M विध्यतेम्भसा 6 The water growing cane [4] 7 M गन्धोस्य 8 The Sobhanjana (sahajana) tree [4] 9 M रक्तपुष्पोसौ 10 The madhuśigru tree [1]

अरिष्टः फेनिलः समौ ॥ ३१ ॥

न रिष्टमस्मात् । फेनोऽस्यास्ति[1] । 'रीठी' [लोके] ॥ ३१ ॥[2]

बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि ।

बिलति बिल्व । 'बिल भेदने' (तु० प० से०) । उल्वादि (उ० ४.-९५) । शाण्डिल्य इव मान्यत्वात् । शैलूष इव नानारूपपरिवर्तनात् । मा लक्ष्मी लाति । बाहुलकादूर । श्रीप्रद फलमस्य । 'बेल' [लोके] ॥[3]

प्लक्षो जटी पर्कटी स्यात्

प्लक्ष्यते । 'प्लक्ष भक्षणे' (भ्वा० प० से०) । जटा सन्त्यस्य । पृच्यते । 'पृची सपर्के' (रु० प० से०) । बाहुलकात् कट । 'पाकरि' [लोके] ॥[4]

न्यग्रोधो बहुपाद्वट ॥ ३२ ॥

न्यक् तिर्यक् । रुणद्धि मार्गम् । बहव पादा अस्य । वटति । 'वट वेष्टने' (भ्वा० प० से०) । 'बरगद' [लोके] ॥ ३२ ॥[5]

गालवः शाबरो लोध्रस्तिरीटस्तिल्वमार्जनी ।

गालवस्यापत्यम् । शबराणामयम् । दन्त्यादिरपि । रुणद्धि । बाहुलकाद्रत् । तीर्यते मलमनेन । 'कृतृकृपिभ्य[6] कीटन्' (उ० ४. १८४) । 'तिलस्नेहने' (तु० प० से०) । उल्वादि (उ० ४ ९५) । मार्ष्टि अनेन । लोध्र [स्य] ॥[7]

आम्रश्चूतो रसालः

अम्यते । आम्र । 'अम गत्यादौ' (भ्वा० प० से०) । 'अमितम्योर्दीर्घश्च' (उ० २ १६) इति रक् । च्योतति रस चूत । रसमलति ॥[8]

असौ सहकारोऽतिसौरभ ॥ ३३ ॥

अतिशयित सौरभमस्य आ [म्रस्य] ॥ ३३॥[9]

कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलु पुरः ।

कुम्भोलूखलाकाराद् वृक्षकोशान्निर्याति । कुम्भेति पृथगपि नाम । कोशे भव ।

---

1. M फेनोस्यास्ति 2 The arista (ritha) tree [2] 3 The bilva (bela) tree [5] 4 The plaksa (pakara) tree [3] 5 The nyagrodha or banyan tree [3] 6 M कृतृकपिभ्य 7 The lodhra tree [6] 8 The mango tree [3] 9 A very *fragrant mango* [2]

गुडति रक्षति वातरोगात्। गुग्गुलु। 'पुर अग्रगमने' (तु० प० से०)। 'गूगुर' [लोके]॥[1]

शेलु श्लेष्मातकः शीत उद्दालो बहुवारकः॥ ३४॥

शिलति शेलु। 'शिल उञ्छे' (तु० प० से०)। बाहुलकादु। श्लेष्माणमतति। क्वुन् (उ० २ ३२)। बहून वारयति। 'लहटोरा' [लोके]॥ ३४॥[2]

राजादन पियालः स्यात्सन्नकद्रुर्धनुष्पट।

राजभिरद्यते। पियति पियाल। 'रिपि गतौ' (रु० प० से०)। सन्नो लीन कद्रूवर्णोऽस्य[3]। धनुष इव पटो विस्तारोऽस्य[4]। 'चार', 'चिरौंजी' [इति लोके]॥[5]

गभारी सर्वतोभद्रा काश्मरी मधुपर्णिका॥ ३५॥
श्रीपर्णी भद्रपर्णी च काश्मर्यश्चापि

क जल बिभर्ति कभारी। पृषोदरादित्वात् 'गभारी' इत्यपि। काशते काश्मरी। मनिन्। 'वनो र च' (४ १ ७)। मधु इव पर्णान्यस्या॥ ३५॥ श्रीयुक्तानि पर्णान्यस्या। काश्मरीशब्दोऽस्त्यस्य[6]। 'अन्येभ्योऽपि[7]—' (वा० ५ १ १२०) इति मप्। 'खभारि' [लोके][8]

अथ द्वयो।

कर्कन्धूर्बदरी कोली कोल कुवलफेनिले॥ ३६॥

कटक बधाति कर्कन्धू। 'अन्दूदृम्भू—' (उ० १ ९३) इति साधु। 'बद स्थैर्ये' (भ्वा० प० से०)। दिविभ्रमि—' (?) इत्यर। कोलति। 'कुल सस्त्याने' (भ्वा० प० से०)। इन्। गौरादित्वात् (४ १ ४१) ङीपि 'काली' इत्यपि। कौ वलति। फेनोऽस्यास्ति[9]। 'बैर' वृक्ष [स्य]॥ ३६॥[10]

सौवीर बदर घोण्टा

सुवीरदेशे भवम्। 'घुण भ्रमणे' (भ्वा० आ० से०)। बाहुलकाट्ट। घोण्टा। 'बैर' फलम्॥[11]

---

1 Guggulu (a particular fragrant gum resin) [5] 2 The sleşmataka (lahatora) tree [5] 3 M कद्रूवर्णोस्य 4 M विस्तारोस्य 5 The piyala tree [4] 6 M काश्मरीशब्दोस्त्यस्य 7 M अन्येभ्योपि 8 The gambhari tree [7] 9 M फेनोस्यास्ति 10 The jujube tree [6] 11 The fruit of jujube [2]

अथ स्यात्स्वादुकण्टक ।
विकङ्कत सुवावृक्षो ग्रन्थिलो व्याघ्रपादपि ॥ ३७ ॥

स्वादुश्चासौ कण्टकयुक्तश्च । कंकि (भ्वा०आ०से०) गत्यय । अतश्चन्यय । सुवाया वक्ष ग्रन्थि लाति । व्याघ्रस्येव पादावस्य । कठार [लोके] ॥३७॥[1]

ऐरावतो नागरङ्ग

इरावत्या विद्युत इवायम् । नागा रजन्त्यन । नारङ्गी [लोके] ॥[2]

नादेयी भूमिजम्बुका ।

नद्या भवा । भूमेर्जम्बू । ह्रे ॥[3]

तिन्दुक स्फूर्जक काल स्कन्धश्चशितिसारके ॥ ३८ ॥

निम्यति तिन्दुक । मृगय्वादि (उ० १ ३७) । स्फूर्जति स्फूर्जक । काल स्कन्धोऽस्य[4] । शिति काल सारो मज्जास्य । तेंदु [लोके] ॥[5]

काकेन्दु कुलक काकपीलुक काकतिन्दुके ।

काकाना तिन्दु । पृषोदरादि (६ ३ १०९) । कुत्स्य गृहस्य प्रतिकृतिरिव । 'पील प्रतिष्टम्भे (भ्वा० प० स०) । पीलु । कटुतिन्दुर । काचिला लोके ॥[6]

गोलीढा झाटलो घण्टापाटलिर्मोक्षमुष्ककौ ॥ ३९ ॥

गाभिर्लीढ । झाट सघात लाति । बाहुलकाद्दन्तोष्ठ्य[7] घत्व च । पट गतौ, (भ्वा० प० से०) पाट लाति । डि । मोक्षयति रोगम् । मुष्के (तु० प० अ०) सन् । मुपस्तेय (क्र्या० प० से०) । मृवभूमुपि— (उ० ३ ४१) इति कक् । 'मोप लोके ॥ ३९ ॥[8]

तिलक क्षुरक श्रीमान्

तिल स्नेहने (तु० प० स०) । वतुन् (उ० २ ३२) । क्षुर विलेखन (तु० प० से०) । श्रणि । तिलकनाम्नव प्रसिद्धस्तिलपुष्पाम ॥[9]

समौ पिचुलझावुकौ ।

पिचु तूल लाति । भाम् इति नाम वेति गच्छति । मितद्र्वादि (वा० ३ २ १८०) । झाऊ लोके ॥[10]

---

1 The vikankata tree [5] 2 The Orange tree [5] 3 the nadeyi tree[2] 4 M स्कन्धास्य 5 The tinduka (tendu)tree [5]
6 The katutinduka (Kocila) tree [4] 7 M बाहुल्काद्दन्ते ≡
8 The golidha tree [5] 9 The tilaka tree [2] 10 The picula (jhau) tree [2]

श्रीपर्णिका कुमुदिका कुम्भी कैटर्यकट्फलौ ॥ ४० ॥

श्री पर्णे यस्या । कुमुद इव कुमुदिका । कुम्भीव कुम्भी । केटति कैटर्यं । 'किट त्रासे' (भ्वा० प० से०) । कटति फलमस्य । 'कट वर्षावरणयो' (भ्वा० प० से०) । 'कायफर' [लोके] ॥ ४० ॥[1]

क्रमुक पट्टिकाख्यः स्यात्पट्टी लाक्षाप्रसादनः ।

क्रामति क्रमुक । वाहुलकादुक । पट्टोऽस्यास्ति[2] पट्टी । पट्टिकाख्यो लोध्र । ला ॥ प्रसादयति । रक्तलोध्र[स्य] पट्टिकालोध्र [स्य] ॥[3]

तूदस्तु यूप क्रमुको ब्रह्मण्यो ब्रह्मदारु च ॥४१॥
तूल च

तुदति तूद । पृषोदरादि (६ ३ १०९) । यूपप्रकृतित्वाद्यूप । ब्रह्मणि वैदिके साधु । ब्रह्मणोदारु ॥४१॥ तूलयति । 'तूल निष्कर्षे (भ्वा० प० से०) । 'तूत [लोके] ॥[4]

नीपप्रियकदम्बास्तु हलिप्रिये ।

नयति सुख नीय । 'पानीविषिभ्य प' (उ० ३ २३) । प्रीणाति प्रियक । 'कद' सौत्रोहिंसार्थं । 'कदि— (उ० ४ ८२) इत्यम्बच् । हलिन प्रिय । 'कदम्ब' [इति ख्यातस्य] ॥[5]

वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ॥४२॥

वीर इव वृक्षो दु स्पर्शत्वात् । अरुर्व्रण करोति । अग्निरिव मुख यस्या । भल्ल इवातति । 'भेलो' [लोके] ॥ ४२ ॥[6]

गर्दभाण्डे कन्दरालकपीतनसुपार्श्वकाः ।
प्लक्षश्च

गर्द शब्दमुक्त भाण्डमस्य । कन्दरा लाति । क पीतयति । शोभन पार्श्व मस्य । प्लक्षति । 'अन्येभ्योऽपि[7]—' (वा० ३ २ १०१) इति ड । 'गजहटा' [लोके] ।[8]

---

1 The kāyaphara tree [5] 2 M पट्टास्यास्ति 3 The red lodhra tree[4] 4 The tula (tuta) tree [6] 5 The Kadamba tree [4] 6 The bhallataka (marking nut) tree [3] 7. M अन्यभ्योपि 8 The plakṣa tree [5]

तिन्तिडी चिञ्चाम्लिका

निम्यति तिन्तिडी । 'अलीकादयश्च' (उ० ४ २५) इति निपातित । 'चिम्' इत्यव्यक्त शब्द चिनोति । चिञो (स्वा० उ० अ०) ड (वा० ३ २ १०१) । अम्ला रसोऽस्यास्ति[1] ॥[2]

अथो पीतसालके ॥ ४३ ॥
सर्जकासनबन्धूकपुष्पप्रियकजीवका ।

पीत सारोऽस्य[3] ॥४३॥ सृजति सर्जक । ण्वुल् (३ १ १३३) । अस्यति-असनम् । ल्यु (३ १ १३३) । बन्धूकस्येव पुष्पाण्यस्य । जीवयति जीवक । 'विजयसार' ॥[4]

साले[5] तु सर्जकार्श्याश्वकर्णका सस्यसवर ॥४४॥

सरयत साल । 'षल गतौ' (भ्वा० प० स०) । कृपति कृप । स एव कार्श्य । 'कार्श्य' इत्यपि । अश्वकर्ण इव पत्रमस्य । सस्यं संव्रियते । 'शेखुआ' [लोके] ॥४४॥[6]

नदीसर्जो वीरतरुरिन्द्रद्रु ककुभोऽर्जुन ।

नद्या सर्ज । वीरश्चासौ तरुश्च । ककुभ सन्त्यस्य । अर्जुन धवलत्वात् । 'कोह' [लोके] ॥[7]

राजादन फलाध्यक्षः क्षीरिकायाम्

राज्ञा भक्ष्य । क्षीरमस्त्यस्या । 'खारी' [लोके] ॥४४॥[8]

अथो द्वयो ॥४५॥
इङ्गुदी तापसतरुः

इङ्गति-इङ्गुदी । अस्यास्तैल तापसानामुपयुज्यते । 'केवटी' [लोके] ॥[9]

भूर्जे चर्मिमृदुत्वची ।

भुवमूर्जयति । चर्मास्यास्ति । 'भोजपत्रवृक्षस्य' ॥[10]

---

1 M रसोस्यास्ति 2 The tamarind tree [3] 3 M सारोस्य 4 The vijayasara tree [6] 5 M शाले 6 The sala (śekhva) tree [5] 7 The arjuna tree [5] 8 The kṣirika tree [3] 9 The ingudi tree [2] 10 The birch tree [3]

पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः ॥४६॥

पिच्छास्यास्ति। पूर्यतेऽनया[1]। मुञ्चति। 'शल चलने' (भ्वा० आ० से०)। 'मल धारणे' (भ्वा० आ० से०)। शाल् चासौ मलिश्च। 'सेंवर' [सेमल] [लोके] ॥४६॥[2]

पिच्छा तु शाल्मलीवेष्टे

'पिच्छ बाधे' (चु० प० से०)। शाल्मल्या वेष्टो निर्यास। 'मोचरस' [लोके] ॥[3]

रोचनः कूटशाल्मलिः।

रोचयति। कूट कृष्ण शाल्मलि। द्वे ॥[4]

चिरबिल्वो नक्तमालः करजश्च करञ्जके ॥ ४७ ॥

चिर बिलति। नक्त मालो धारणमस्य। करेण जायते। क रञ्जयति। 'करञ्ज' चिलबिल'] इति ख्यातस्य]। कञ्जा' लोके ॥ ४७ ॥[5]

प्रकीर्यः पूतिकरजः पूतीकः कलिमारकः।

प्रकीर्यते। अघ्न्यादित्वात् (उ० ४ १११) यक्। पुनाति पूतीक। तिन्तिडीकादयश्च[6] (उ० ४ २०) इति साधु। कलिं मारयति। 'कण्टकवत्करञ्जस्य ॥[7]

करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी ॥ ४८ ॥

वक्ष्यमाणा करञ्जभेदा षड्ग्रन्थोहस्तिवारणाद्य। 'मर्कटीवशीकरञ्ज उदस्याङ्गारवल्लरी' इति केचित्। वस्तुत षड्ग्रन्थादय पर्याया। तथा च भावप्रकाशे— 'उदकीर्यस्तृतीयोऽन्य षड्ग्रन्थी हस्तिवारुणी। मर्कटी वायसी चापि करञ्जी करमञ्जिका ॥' इति। करञ्जिका। 'डिठोहरी' लोके ॥ ४८ ॥[8]

रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः।

रोहति रोही। रोहितो वर्णेन। प्लीह्न शत्रु। दाडिमपुष्पमिव। रोहित [स्य] ॥[9]

---

1 M पूर्यतेनया 2 The silk-cotton tree [5] 3 Gum or exudation of the silk cotton tree [2] 4 A species of the शाल्मली tree [2] 5 The karanja tree [4] 6 M तिडीकादयश्च 7 The thorny Karañja tree [5] 8 The different species of the Karañja tree [1 each] 9 The rohita tree [4]

गायत्री बालतनयः खदिरो दन्तधावन ॥ ४९ ॥

गायन्त त्रायते । बालास्तनया पत्राण्यस्य । 'खद स्थैर्ये' (भ्वा० प० से०) किर च् (उ० १ ५१) । दन्तान् धावयति । 'खयर' [लोके] ॥४९॥[1]

अरिमेदोविट्खदिरे

अरिरिव मेद स्नेहोऽस्य[2] । विड्गन्धि खदिर[3] । वैद्यके [अरिमेदकारादि] प्रसिद्ध ॥[4]

कदर खदिरे सिते ।

सोमवल्कोऽपि

क जल दृणाति । सोम इव वल्कोऽस्य[5] । श्वेतखदिर [स्य] ॥[6]

अथ व्याघ्रपुच्छगन्धर्वहस्तकौ ॥५०॥

एरण्ड उरुबूकश्च रुचकश्चित्रकश्च स ।

चञ्चु· पञ्चाङ्गुलो मण्डवर्धमानव्यडम्बकाः ॥५१॥

व्याघ्रस्येव पुच्छमस्य । गन्धर्वस्य हस्त इव ॥५०॥ आ ईरयति वायुम् । बाहुलकादण्डच् । उरु महान्त वाति । 'उल्कादयश्च' (उ० ४ ४१) इति साधु । राचते राचक । चित्रयति । क्वुन् (उ० २ ३२) । चञ्चति । 'चन्चु गतौ' (भ्वा० प० से०) । पञ्चाङ्गुलयोऽस्य[7] । मण्डयति । वर्धते वर्धमान । व्यड[8] मलमम्बयति । 'अवि सस्ने' (भ्वा० आ० स०) । 'रेंड' [लोके]॥५१॥[9]

अन्या शमी शमीर स्यात् शमी सक्तुफला शिवा ।

शमयति रोगान् । सक्तुवत्फलमस्या । शिवकल्याण करोति । त्रीणि । 'शमी'[10] ।

पिण्डीतको मरुबक· श्वसन करहाटक ॥५२॥

शल्यश्च मदने

पिण्डी तनोति । मरु वाति । क्वुन् (उ० २ ३२) निर्जलेऽपि श्वसिति ।[11] कर हाटयति । 'हट दीप्तौ' (भ्वा० प० से) ॥५२॥ 'शल गतौ' (भ्वा० प० से०) । शल्य । मदयति । 'मयनफर' [लोके] ॥[12]

---

1 The khadira tree [4] 2 M स्नेहास्य 3 M खदिर 4 The arimeda tree [2] 5 M वल्कोस्य 6 White khadira tree [2] 7 M पञ्चाङ्गुलयोस्य 8 M व्यड 9 The Caster oil plant [11] 10 The śamī tree [4] 11 M निर्जलेपि 12 The mayanaphala tree [6]

शक्रपादपः पारिभद्रकः ।
भद्रदारुद्रुकिलिमं पीतदारु च दारु च ॥५३॥
पूतिकाष्ठं च सप्त स्युर्देवदारुणि

शक्रस्य पादपः । पारि प्राय भद्रमस्य । द्रुश्चासौ किलिमम् । पीतम् ॥५३॥ पूति च तत्काष्ठं च । 'देवदारु' ॥[1]

अथ द्वयोः ।
पाटलिः पाटलाऽमोघा काचस्थाली[2] फलेरुहा ॥५४॥
कृष्णवृन्ता कुबेराक्षी

पाटं लाति । न मोघा । काचस्य कान्त्यर्थस्य स्थाली । फले रोहति ॥५४॥ कृष्णं वृन्तमस्याः । कुबेरस्येवाक्ष्यस्याः । 'पाडर' [लोके][3]

श्यामा तु महिलाह्वया ।
लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली ॥५५॥
विष्वक्सेना गन्धफली कारम्भा प्रियकश्च सः ।

श्यामोऽस्त्यस्याः[4] । महिलाया आह्वयोऽस्याः[5] । लतति । 'लति' सौत्रः । गवि भूमौ वन्द्यते । गुन्द्रयति । 'गुदि क्षोदे' (?) । प्रियं गच्छति । मृगय्वादि (उ० १ ३७) । फलमस्त्यस्याः । गौरादित्वात् (४ १ ४१) फली ॥५५॥ विष्वक् सेना । सर्वतोबध्नाति । गन्धवत्फलमस्याः । ईषद् रम्भा । प्रीणाति प्रियकः । दाच्छाफल (?) 'प्रियङ्गु' ॥[6]

मण्डूकपर्णपत्रोर्णनटकट्वङ्गटुण्टुकाः ॥५६॥
स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः ।
शोणकश्चारलौ

मण्डूक इव पर्णमस्य । पत्रे उर्णाऽस्य[7] । नटति । कट्वङ्गान्यस्य । 'टुण्टु' इति कायति ॥५६॥ सीव्यति स्योनः । बाहुल्कात् । स्योनमकति स्योनाकः । तालव्यादिरपि । शुकनासेव पुष्पमस्य । ऋच्छति ऋक्षः । दीर्घं वृन्तमस्य ।

---

1 The devadaru (pine) tree [8] 2 K reads काच स्थाली 3 The patala (pādara) tree [7] 4 M श्यामोस्त्यस्या 5 M आह्वयोस्या । 6 The priyangu tree (said to put forth blossoms at the touch of women) [12] 7 M उर्णास्य ।

कुटन् वक्रीभवन् नटति । 'शोणृ वर्णे' (भ्वा० प० से०) शोणक । इयर्ति अरलु । 'अर्तेररु' (उ० ४७९) । 'सवन' [सरिवन] [लोके][1]

तिष्यफला त्वामलकी त्रिषु ॥५७॥
अमृता च वयस्था च

तिष्य मङ्गल्य फलमस्या । आमलते । 'मल धारणे' (भ्वा० आ० से०) । क्वुन् (उ० २ ३२) ॥ ५७ ॥ न म्रियनेऽनया[2] । वयो यौवन तिष्ठत्यनया । 'अवरा' [लोके] ॥[3]

त्रिलिङ्गस्तु विभीतक ।
[ना] अक्षस्तुष कर्षफलो भूतावास कलिद्रुमः ॥५८॥

बिभ्यत्यस्माद् । क्तान्तात्क । अश्नति । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । तुष्यति तुष । कर्षं फलमस्य । भूतानामावास । कलेर्द्रुम 'बहेरा' [लोके] ॥५८॥[4]

अभया त्वव्यथा पथ्या कायस्था पूतनाऽमृता ।
हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥५९॥

न भयमस्या । न व्यथा यस्या । कायस्तिष्ठत्यनया । हरिरितो यस्या । हिमवति जाता । चेतयति । अतिप्रशस्ता श्रेयसी । 'हरड' [लोके] ॥५९॥[5]

पीतद्रु सरल पूतिकाष्ठं च

पीतो द्रुर्वृक्ष । सरति सरल । पूते पावनस्य काष्ठम् । 'चीड' [लोके] ॥[6]

अथ द्रुमोत्पलः ।
कर्णिकार परिव्याधो[7]

द्रुमे उत्पलवत्पुष्पमस्य । कर्णिकामियर्ति । परिविध्यति । 'कठचपा' [लोके] ॥[8]

---

1 the śoṇaka tree [12] 2 M म्रियतेनया 3 the myrobalan tree [4] 4 the terminalia belerica (bahera) tree [6] 5 The harada or yellow myrobalan tree [11] 6 The sarala tree [3] 7 K. and B read परिव्याधे 8 The kaṭha-campā tree [3]

लकुचो लिकुचो डहुः ॥६०॥

'लव आस्वादने' (?)। बाहुलकादुच । पृषोदरादित्वात् (६ ३ १०९) पक्षे इत्वम् । दहति डहु । मृगय्वादि (उ० १ ३७) । 'बडहर' [लोके] ॥६०॥[1]

पनसः कण्टकिफलः

पनन पण, सोऽस्यास्ति[2] । 'पनस' इति दन्त्योऽपि[3] । द्वे । 'कटहर' [लोके][4]

निचुलो हिज्जलोऽम्बुजः ।

निचोल्यते निचुल । चुल समुच्छ्राये' (चु० प० से०) । 'हि गतौ' (स्वा० प० अ०) । हिनोति हिव्—तत्—जलमस्य । 'इज्जल' इत्यपि पाठ । 'ईजरु' इति 'समुद्रफल' इति च लोके ॥[5]

काकोदुम्बरिका फल्गुर्मलयूर्जघनेफला ॥६१॥

काकप्रिया उदुम्बरी । फलति फल्गु । 'फलिपाटि—' (उ० १ १८) इति साधु । मलमवते मलयू । 'यु जुगुप्सायाम्' (चु० आ० से०) । बाहुलकाद्दीर्घ मलात्पुनाति मलपू ' इत्यपि कश्चित् । जघने फलमस्या । 'कठूमरि' [लोके] ॥६१॥[6]

अरिष्टः सर्वतोभद्रो हिङ्गुनिर्यासमालकः ।
पिचुमन्दश्च निम्बे

न रिष्टमस्मात् । सर्वतोभद्रमस्मात् । हिङ्गुसमो निर्यासोऽस्य ।[7] 'मल धारणे' (भ्वा० आ० से०) । ण्वुल् (३ १ १३३) । पिचु कुष्ठभेद मन्दयति । 'पिचुमर्द' इत्यन्य । निम्यति । 'णिवि सेचने' (भ्वा० प० से०) । 'नीव' [लोके] ॥[8]

अथ पिच्छिलाऽगुरुशिंशपा ॥६२॥

पिच्छाऽस्त्यस्या[9] । न गुरुरस्मात् । क्लीबम् । 'शिम्' इत्यव्यक्त शब्द शपति । 'अगुरुतुल्या शिंशपा' इत्यन्ये । त्रीणि । 'सीसव' [लोके] ॥६२॥[10]

---

1 A kind of bread fruit tree [3] 2 M सोस्यास्ति 3 M दन्त्योपि 4 The jack tree [2] 5 A kind of tree [3] 6 The opposite-leaved fig tree [4] 7 M निर्यासोस्य 8 The nimva tree [6] 9 M पिछास्त्यस्या 10 The śiśama tree

कपिला भस्मगर्भा सा

कपिला वर्णेन। भस्म[1] गर्भे यस्या । द्वे ॥[2]

शिरीषस्तु कपीतनः ।

मण्डिलोऽपि

शॄ हिंसायाम्' (क्रया० प० से०)। 'शॄपॄभ्यां किन्' (उ० ४.२७) इतीषन्। कपीना तनो विस्तार.। बाहुलकाद्दीर्घः। 'मडि कल्याणे' (चु० प० से०)। 'सलिकल्यनि—' (उ० १ ५४) इति इलच्। 'शिरीस' [लोके] ॥[3]

अथ चाम्पेयश्चम्पको हेमपुष्पकः ॥६३॥

चम्पादेशे भवश्चाम्पेय.। 'चपि गत्याम्' (चु० प० से०)। चम्पयति। ण्वुल्। हेमवर्णं पुष्पमस्य। 'चम्पा' [लोके] ॥ ६३ ॥[4]

एतस्य कलिका गन्धफली स्यात्

गन्ध फल साध्यमस्या । एकम्।[5]

अथ केशरे[6]।

बकुल·

केशा सन्त्यस्य। वङ्कते गच्छति। बाहुलकादुच्। 'मौलसिरी' [लोके] ॥[7]

वञ्जुलोऽशोके

न शोकोऽस्मात्[8]। अशोक[स्य] द्वे ॥[9]

समी करकदाडिमौ ॥ ६४ ॥

करोति दोषाभावम्। 'कृञादिभ्यो वुन्' (उ० ५.३५)। दलनं दाल। 'भावप्रत्ययान्तादिमप्' (वा० ४.४ २०)। द्वे। 'अनार' [लोके] ॥६४॥[10]

चाम्पेय केशरो नागकेशरः काञ्चनाह्वयः।

नागाख्याः केशरा. सन्त्यस्य। काञ्चनस्याह्वय। 'नागकेशर' [लोके] ॥[11]

जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥ ६५ ॥

---

1. M. भस्म 2. Brown s'is'ama tree [2] 3. The s'iriṣa tree [3]. 4. The Campaka tree which bears yellow, fragrant flowers [3] 5. The bud of a Campaka tree [1] 6 Majority reads केसरे 7 The vakula tree [2] 8. M नोकेश्म 9. The as'oka tree [2] 10 The pomegrante tree 11. The nagakes'ara tree [4]

जयति जया । तर्कमृच्छति । नद्या भवा । विजयन्तस्येयम् ॥ ६५ ॥[1]

श्रीपर्णमग्निमन्थ स्यात् कणिका गणिकारिका

जय

श्री पर्णेऽस्य[2] । अग्निं मथ्नाति । 'कण शब्दे' (भ्वा० प० से०) । वबुन् (उ० २ ३२) । गणिका समूहमियर्ति । पञ्च । 'अगथु' (?) [लोके][3]

अथ कुटज शक्रो वत्सको गिरिमल्लिका ॥ ६६ ॥

कुटे शक्रे जायते । शक्नोति शक्र । वत्स इव । गिरेर्मल्लिका । 'कुरैया' [लोके] ॥ ३६ ॥[4]

एतस्यैव कलिङ्गेन्द्रयवभद्रयवं फले ।

कलिं गच्छति । इन्द्रयव [स्य] ॥[5]

कृष्णपाकफलाविग्नसुषेणा करमर्दके ॥ ६७ ॥

कृष्णा पाकोऽस्य । कृष्णपाक फलमस्य । आ विजतेस्म । ओविजी (तु०प०से०) क्त । शोभना सेनाऽस्य[6] । कर मृद्नाति । 'करवद' [करोदा] [लोके] ॥६७॥[7]

कालस्कन्धस्तमाल स्यात्तापिच्छोऽपि

ताम्यति तमाल । तमिविशिभ्या कालन् (उ० १ ११८) । तापित छादयति । पृषोदरादि (६ ३ १०९) । तमाल [स्य] ॥[8]

अथ सिन्दुक ।

सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि ॥ ६८ ॥

स्यन्दते सिदु । सिदु वृणोति । शोभनो रसोऽस्य[9] । इन्द्रस्य सुरस । निर्गुडति । 'गुड रक्षायाम्' (तु० प० से०) । पृषोदरादि (६ ३ १०९) । इन्द्रस्येयमिन्द्राणी । 'मेउडी' [लोके] ॥ ६८ ॥[10]

वेणी खरा गरी देवताडो जीमूत इत्यपि ।

वेणीव वेणी । खरा तीक्ष्णत्वात् । गिरति गरी । 'गरागरी' इत्यन्ये पेठु । देवमिन्द्र ताडयति । जीमूत इव । देवदालीस्तिरपसावत्फला व्रतति (?) । 'वदाल' लोके ।[11]

---

1 The jaya tree [5] 2 M पर्णेस्य 3 The s'rīparṇa tree [5] 4 The kuṭaja tree [4] 5 The indrayava tree [3] 6 M सेनास्य 7 A kind of tree bearing small sour fruits [4] 8 The tamala tree which has a very dark bark [3] 9 M रसोस्य 10 The sinduvara tree [5] 11 The vandala tree [5]

श्रीहस्तिनी तु भूरुण्डी

श्रिया हस्तो विद्यतेऽस्या [1] । भुवं तण्डयत्याच्छादयति । 'हथिकन' [लोके] ॥[2]

तृणशून्यं तु मल्लिका ॥६९॥

भूपदी शीतभीरुश्च

तृणशून्ये गुल्मे साधु । 'मल्ल धारणे' (भ्वा० आ० से०) ॥ ६९ ॥ भुवि पदमस्या । शीताद्भीरु । 'मालती मल्लिका बेल्लि' ॥[3]

सैवास्फोता वनोद्भवा ।

आस्फोटयत्यास्फोता । पृषोदरादि (६ ३ १०९) । 'वनबेल्लि' ॥[4]

शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा ॥ ७० ॥

शेरते शेफा , अलयो यस्य । सुष्ठु वहति । नीलिका पर्णेन ॥ ७० ॥[5]

सितासौ श्वेतसुरसा भूतवेशी

शोभनो रसोऽस्या [6] । भूतानि विशति । द्वे ॥[7]

अथ मागधी ।

गणिकायूथिकाम्बष्ठा

मगधेषु भवा । गणिकेव गणिका । यूथमस्त्यस्या । अम्बेव मातेव तिष्ठति । 'जूही' [लोके] ॥[8]

सा पीता हेमपुष्पिका ॥ ७१ ॥

हेमवत्पुष्पमस्या । एकम् ॥[9]

अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ।

अतिक्रान्तो मुक्ताम् । पुण्डयते पुण्ड्रः । पुडि खण्डने (भ्वा० प० से०) । वसन्ते पुष्प्यति । मधौ पुष्प्यति । 'माधवी' [इति ख्यातः] ॥[10]

सुमना मालती जातिः

---

1 M विद्यतेस्या 2 Sunflower [2] 3 The jasmine plant [3] 4. A wild variety of the jasmine plant [3] 5 The śephālika plant [4] 6 M रसास्या 7 White sephālika [1] 8 A kind of jasmine [4] 9 A kind of jasmine [2] 10 Mādhavi or spring Creeper with white fragrant flowers[2]

शोभन मनोऽस्याम्[1]। मा लतति। जायते जाति। क्तिजन्तान्ङीप्। 'चव-द्लि' [चमेली] [लोके] ॥[2]

सप्तला नवमालिका ॥७२॥

सह मनो बुद्धीन्द्रियाणि लाति। नवा स्तुत्या मालाऽस्या[3]। 'नवारी' [लोके] ॥७२॥[4]

माध्य कुन्दम्

माध्ये भवम्। माध्यम्। कु मुद्र यति। 'कुन्द [स्य]' ॥[5]

रक्तकस्तु बन्धूको बन्धुजीवक।

रक्तपुष्पकत्वाद् रक्तक। वध्नाति चित्त बन्धूक। 'उलूकादयश्च' (उ० ४४१) इति साधु। बन्धुर्जीवानाम्। 'दुपहरिआ' [लोके] ॥[6]

सहा कुमारी तरणि

सहते सहा। कुमारीव कुमारी। तरन्त्यनया। 'अतिसृ—' (उ० २१०२) इत्यनि। 'गुलाब' लोके। 'शतपत्री त्वस्यैवभेद। 'सेवती' लोके ॥[7]

अम्लानस्तु महासहा ॥७३॥

म्लाययति। 'कटसरैंआ' [लोके] ॥७३॥[8]

तत्र शोणे कुरबक

शोणे रक्ते तस्मिन्। कुत्सितोरवोऽत्र[9] ॥ [एकम्][10]

तत्र पीते कुरण्टक[11]।

कौ रम्यते कुरण्टक ॥[12]

नीला झिण्टी द्वयोर्बाणा दासी चार्तगलश्च सा ॥७४॥

नीलपुष्पा सा। झिण्टी। 'झिम् रटति। वण्यते वाणा। 'वण शब्दे' (भ्वा० प० से०)। दास्यते दासी। 'दसु उपक्षये' (दि० प० से०)। आर्तं क्षीणो गलति ॥७४॥[13]

---

1 M मनोरया 2 Cameli, a kind of jasmine plant [3] 3 M मालास्या 4 Navamalika, a kind of jasmine [2] 5 Kunda, a kind of jasmine bearing white and delicate flowers [2] 6 Bandhūka, a flower plant bearing red flowers [3] 7 The aloe plant [3] 8 the amaranth plant [2] 9 M खोत्र 10 the red species of amaranth [1] 11 B reads कुरण्टक 12 The yellow species of amaranth [1] 13 The blue species of amaranth [3]

सैरेयकस्तु झिण्टी स्यात्

सीरे भवः । झिण्टीमात्रस्येदम् ॥[1]

तस्मिन् कुरवकोऽरुणे ।

तस्मिन् सैरेयके ॥[2]

पीता कुरण्टको झिण्टी तस्मिन्सहचरी द्वयोः ॥७५॥

पीता झिण्टी कुरण्टक. । तस्मिन् सैरेयके ॥७५॥[3]

ओड्रपुष्पं जपापुष्पम्

आ ईषदुनत्ति, ओड्रम् । उन्दी (रु० प० से०) 'स्फायि—' (उ०२.१३) इति रक् । दस्य डः । ओड्रं पुष्पमस्य । जपतीति जपा 'अडहुल' [लोके] ॥[4]

वज्रपुष्पं तिलस्य यत् ।

वज्रमिव पुष्पं तिलस्य पुष्पम् । एकम् ।[5]

प्रतीहासशतप्रासचण्डातहयमारकाः ॥७६॥

करवीरे

प्रतीपो हासो विकासः । शतं प्रास्यति । हयाना मारकः ॥७६॥ करं वीरयति । 'कण्डइल' [लोके] ॥[6]

करीरे तु क्रकरग्रन्थिलावुभौ ।

करिण ईरयति । क्रेति करोति क्रकर. ॥[7]

उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः ॥७७॥

मातुलो मदनश्च

उन्मत्तयति । कितवा. सन्त्यस्य । 'धुर्वी हिंसायाम्' (भ्वा० प० से०) । धूर्तः । धयति धातून् धत्तूरः । कनकमाह्वयोऽस्य[8] ॥७७॥ मा नास्ति तुलाऽस्य[9] । मदयति । 'धतूर' [लोके] ॥[10]

अस्य फले मातुलपुत्रकः ।

मातुलस्य पुत्र इव । धत्तूरफल [स्य] ॥[11]

---

1. Amaranth (in general) [2] 2. Red amaranth [1] 3. Yellow amaranth [2] 4. China rose [2] 5. The flower of sesamum [1] 6. The karavira (kaṇḍayil) plant [5] 7. Karīra, a thorny plant growing in deserts [2] 8. M. कनकमाह्वयोस्य 9. तुलास्य 10. The dhatūra tree [5] 11. the fruit of a dhatūra tree [1].

फलपूरो बीजपूरः रुचको मातुलुङ्गके ॥७८॥

फलेन पूर्यते । बीजेन पूर्यते । रोचते रुचक । मातुलमुङ्गति । 'उगि वजन' (?) । शकन्ध्वादि । 'बिजउरा' [लोके] ॥७८॥[1]

समीरणो मरुवकः प्रस्थपुष्प फणिज्जकः ।
जम्बीरोऽपि

समीरयति । मरौ वाति । वसुन् (उ० २ ३२) । प्रस्थे सानौ पुष्यति । फणीव उज्झको वर्जकोऽस्य । पृषोदरादि (६ ३ १०९) । जम्यते जम्बीर । 'मरुआ [इति ख्यात]॥[3]

अथ पर्णासे कठिंजरकुठेरकौ ॥७९॥

पर्णान्यस्यति । कठिन जारयति । कुठ प्रतिघाते (भ्वा० प० से०) कुठेरक । कृष्णपत्रा 'ममरी' ॥७९॥[4]

सितेऽर्जकोऽत्र

अर्जयति । श्वेतपत्रा 'ममरी' ॥[5]

पाठी तु चित्रको वह्निसंज्ञक ।

पाठोऽस्यास्ति[6] । चित्त वुद्धि त्रायते । 'चीत' [चीता] [लोके] ॥[7]

अर्काह्वसुकास्फोतगणरूपविकीरणाः ॥८०॥
मन्दारश्चार्कपर्णे

अर्कमाह्वा यस्य । वसतीति वसु । 'शृस्वृ—' (उ० १ १०) इत्यु । तत क । आस्फोटयति । गणा बहूनि रूपाण्यस्य । विकीरयति ॥८०॥ मन्दा आराऽस्य[8] । अर्कामानि पत्राण्यस्य । मन्दार [स्य][9] ॥[9]

अत्र शुक्लेऽलर्कप्रतापसौ ।

अल भूषणे (भ्वा० प० से०) अलु वारणार्कश्च । प्रहृष्ट तापस । श्वेतमन्दार [स्य] ॥[10]

---

1 Vijapūra (vijaura) a common Citron tree[4] 2 M वजकोस्य
3 A strong fragrant plant [5] 4 The par̄nāsa tree bearing black leaves [1] 5 The Parnasa tree with white leaves [1]
6 The Citraka tree [3] 7 M वारास्य 8 Arka, a medicinal plant [7] 9 The arka bearing white flowers [2]

शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ॥८१॥

शिवप्रिया मल्ली । पशुपतेरयम् । एकोष्ठीलो मज्जास्यस्य । वाति बुक । 'वक' इत्यन्ये । वसति वसु । 'वकहल' 'वहहोलचिरी' इति च ॥[1]

वन्दा वृक्षादनी वृक्षरुहा जीवन्तिकेत्यपि ।

वन्द्यते वृन्दा । वृक्षमत्ति । वृक्षे रोहति । जीवति जीवन्ती । 'हहिनन्दि–' (उ० ३.१२७) इति झच् । 'वादा' [लोके] ॥[2]

वत्सादनी छिन्नरुहा गुडूची तन्त्रिकाऽमृता ॥८२॥
जीवन्तिका सोमवल्ली विशल्या मधुपर्ण्यपि ।

वत्सैरद्यते । छिन्ना रोहति । गुडति रक्षति । वाहुलकादूचट् । तन्त्रयति । 'तन्त्रि कुटुम्बधारणे' (चु० उ० से०) ॥८२॥ विगत शल्यमस्या । मधुमयानि पर्णान्यस्या । 'गुरुचि' [लोके] ॥[3]

मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा ॥८३॥
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ।

मूर्वति । 'मुर्वी बन्धने' (भ्वा० प० स०) । मुरति मोरटा । 'मुर संवेष्टने' (तु० प० से०) । 'शकादिभ्योऽटन्[4]' (उ० ४ ८१) । तेजति तेजनी । स्रवति ॥ ८३ ॥ मधु लाति । 'अन्येषामपि—' (६ ३ १३७) इति दीर्घ । मधुन श्रेणिरत्र । गो कर्ण इव । पीलोरिव पर्णान्यस्या । 'चिह्नारु' [लोके] ॥[5]

पाठाऽम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा ॥८४॥
एकाष्ठीला पापचेली प्राचीना वनतिक्तिका ।

पाठ्यते पाठा । विद्धौ कर्णौ यया । स्थापयति । अतिप्रशस्त । रसोऽस्त्यस्या[6] ॥८४॥ पापे चलति । पचादौ 'चेलट्' इति निपातित । प्राचि भवा । वने तिक्ता । पाठी [पाठा] [इति ख्याता] ॥[7]

कटु कटम्भराऽशोकरोहिणी कटुरोहिणी ॥८५॥
मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी ।

कटति कटु । 'कटे वर्षादौ' (भ्वा० प० से०) । 'शॄस्पृ—' (उ० १ १०) इत्यु । कट भरति । अशोक रोहयति । कटुश्चासौ रोहिणी च ॥ ८५ ॥

---

1 the vuka (bakahala) tree [5] 2 A parasitical plant, a kind of pot herb [4] 3 The guduci (guruci) plant [9]
4 M शकादिभ्यटन् 5 The *murva creeper* [10] 6 M रसोऽस्त्यस्या
7 The paṭhā plant [10]

मत्स्यानां पित्तमिव । कृष्णो भेदश्छेदोऽस्याः[1] । चक्रवदङ्गमस्याः । शकुलैरद्यते । 'कुटुकी' [कुटकी] [इति ख्याता] ॥[2]

आत्मगुप्ताऽजहाऽव्यण्डा[3] कण्डूरा प्रावृषायणी ॥८६॥
ऋष्यप्रोक्ता शूकशिम्बिः कपिकच्छुश्च मर्कटी ।

आत्मना गुप्ता । न जहाति शूकानजहा । 'जहाजडा' इति चान्ये । कण्डूं राति । प्रावृषि भवा ॥ ८६ ॥ ऋष्यैर्मृगैः प्रोक्ता । शूकयुक्ता शिम्बिः । कपीनां कच्छूः । मर्कटीव । केवाछ [केवाच] [लोके] ॥[4]

चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा ॥८७॥
प्रत्यक्श्रेणी सुतश्रेणी चण्डा[5] मूषिकपर्ण्यपि ।

चित्रं रूपमस्त्यस्याः । उपगता चित्रम् । न्यग् रोहति । द्रवति । शं वृणोति । वर्षति वृषा ॥ ८७ ॥ प्रतीची श्रेणी यस्याः । सुतानां श्रेणिरस्याः । मूषिकपर्णमस्याः । 'मूसाकानी' [लोके] ॥[6]

अपामार्गः शैखरिको धामार्गवमयूरकौ ॥८८॥
प्रत्यक्पर्णी कीशपर्णी किणिही खरमञ्जरी ।

अपमार्जन्त्यनेन । शिखरे प्रायेण भवति । अयममार्गं वाति धामार्गवं । मयूरप्रतिकृतिः ॥ ८८ ॥ प्रत्यञ्चि पर्णान्यस्याः । कीशवत्पर्णान्यस्याः । 'केशपर्णी' इत्यन्ये । किणिनो जिहीते । खरा मञ्जरिरस्याः । 'चिचिह्वा' [चिचिढा] [लोके] ॥[7]

हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टिका ॥८९॥
अङ्गारवल्ली बालेयशाकवर्वरवर्धकाः ।

हन्ति रोगं हञ्जी । पृषोदरादि (६.३.१०९) । ब्राह्मणी, पवित्रत्वात् । पद्मा तत्तुल्यत्वात् । भर्गोऽस्त्यस्या[8] । ब्राह्मणस्य यष्टिरिव ॥८९॥ अङ्गारवद् वल्ल्यस्याः बालेयशाको गर्दभयोग्यत्वात् । वर्वति । वृध् (स्वा० उ० से०) यङ्लुगन्तः । 'वृधु[9] छेदने' (स्वा० वा० से०) । वर्धक. । 'भरंगी' [लोके] ॥[10]

---

1. M. भेदश्छेदोऽस्याः 2 The kutaki plant [8] 3. B. reads अज°-जुहाऽव्यण्डा 4. The markati (Kevāca) tree [9] 5. B. reads चण्डा 6. The Mūsikaparni (musakani) plant [10] 7. The apamarga plant [8] 8. M. भर्गोऽस्त्यस्याः 9. M. वर्धु 10. The bhargi plant [9].

मञ्जिष्ठा विकसाजिङ्गी समङ्गा कालमेषिका ।९०॥
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ।

मञ्जौ शोभने वर्णे तिष्ठति । विकसति । 'कस हिंसायाम्' (भ्वा० प० से०) 'जिगि गतौ' (?) । सम्यगङ्गान्यस्या । काले मिष्यन शब्द्यते ॥९०॥ मण्डूकवत्पर्णमस्या । मण्डयते मण्डी । योजनगामिनी वल्ली 'मजीठ' [लोके] ॥[1]

यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः ॥९१॥
रोदनी कच्छुराऽनन्ता समुद्रान्ता दुरालभा ।

'यसु प्रयत्ने' (दि० प० से०) । घञ् (३ ३ १८) । यास । यवान् स्यति । दुःस्पर्शः कण्टकित्वात् । धन्वनो यास मरुभवत्वात् । कुं नाशयति ॥९१॥ रोदयति । कच्छु राति । न अन्तोऽस्या ।[2] समुद्रान्ताऽस्त्यस्या [3] । दुःखेनालभ्यते[4] । 'यवासा' [इति ख्यात] ॥[5]

पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिवल्लिका । ९२॥
क्रोष्टुविन्ना सिंहपुच्छी कलशिर्धावनिर्गुहा ।

पृश्निरल्प पर्णमस्या । पृथगसक्त पर्णमस्या । अङ्घ्रेरारम्य पर्णमस्या ॥९२॥ क्रोष्टुभिर्विन्ना दत्तेव । कल श्यति । धावति । वाहुल्कादनि । 'धाञ्-पात' इति 'पिठवनि' [पिठिवनि] इति च ॥[6]

निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका । ९३॥
प्रचोदनी[7] कुली क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ।

निदिह्यते । 'दिह उपचये' (अ उ० अ०) । कृ (३ २ १०२) । स्पृशति स्पृशी । व्याजिघ्रति । 'वृह वृद्धौ' (भ्वा० प० अ०) । बृहती । कण्टकानियति । 'ऋ गतौ' (जु० प० अ०) ॥ ९३ ॥ प्रणोदयति , 'प्रतोदनी' इति पाठान्तरम् । कालति । 'कुल संस्त्याने' (भ्वा० प० से०) । 'कुणी' इति पाठान्तरम् । क्षुणत्ति क्षुद्रा । 'स्फायि—' (उ० २ १३) इति रक् । राष्ट्रमस्त्यस्या । 'भटकटैआ' [लोके] ।[8]

नीली काला क्लीतकिका ग्रामीणा मधुपर्णिका ॥ ९४ ॥
रञ्जनी श्रीफली तुत्या द्रोणी दोला च नीलिनी ।

---

1 The manjistha (madder) creeper [8] 2 M न्नोऽस्या 3 M. समुद्रान्तोऽस्त्यस्य 4 M दुःखेनालभ्यते 5 The yavasa grass or Creeper [10] 6 The simhapucchi (pithvana) plant [9] 7 K and B read प्रतोदनी 8 The kantakarika (bhatakataiya) plant [10]

नीलो वर्णेन । एव काला । क्लीतकम् । क्रयोऽस्त्यस्या.[1] ग्रामे भवा । मधुराणि पर्णान्यस्या ॥ ९४ ॥ रञ्जयति रञ्जनी । श्रीवतमलमस्या । 'तुत्थ आवरणे' । तुथत । 'तुच्छा' इति पाठान्तरम् । द्रवति द्रोणी । 'वहिश्रि—' (उ० ४ ५१) इति ति । 'तूणी' इत्यन्ये । मेलयति मेला । 'दोला' इत्यन्ये । नीलो पर्णोऽस्त्यस्या[2] । 'नील' [इति ख्यात] ॥[3]

अवल्गुज सोमराजी सुवल्लि सोमवल्लिका ॥९५॥
कालमेषी कृष्णफला वाकुची पूतिफल्यपि ।

अवल्गोरशमनाज्जात । सोम इव राज्यस्य । शोभना वल्ल्यस्या । सोमस्य वल्लि ॥९५॥ काल मिषति । 'मिष स्पर्धायाम्' (तु० प० से०) । वात सङ्कोचयति वाकुची । पृषोदरादि (६ ३ १०९) । पूति गन्ध फलेऽस्या । 'बकुची' [लोके] ॥[4]

कृष्णोपकुल्या वैदेही मागधी चपला कणा ॥९६॥
उषणा पिप्पली शौण्डी कोला

कृष्णा वर्णेन । उपगता कुल्याम् । विदेहेषु भवा । मगधेषु भवा । चपति । 'चप सान्त्वने' (भ्वा० प० से०) । कणति । 'कण शब्दे' (भ्वा० प० से०) ॥९६॥ 'उष[5] रुजायाम्' (भ्वा० प० से०) उषणम् । पिपर्ति पिप्पली । शुण्डाया मद्यपानगृहे भवा । कोलति । 'पीपरि' [लोके] ॥[6]

अथ करिपिप्पली ।
कपिवल्ली कोलवल्ली श्रेयसी वसिर[7] पुमान् ॥९७॥

करिपिप्पली बृहत्वात् । कपिरिव वल्ली । कोल इव वल्ली । वस्ते वसिर । 'गजपीपरि' [लोके] ॥९७॥[8]

चव्य तु चविका
चव्यते चव्यम् । 'चाव' [इति ख्यातम्] ॥[9]

काकचिञ्चीगुञ्जे तु कृष्णला ।
काकवर्णा चिञ्चा । गौरादि (४ १ ४१) । गुञ्जति गुञ्जा । कृष्ण वर्णं लाति । 'घुघुची' [लोके] ॥[10]

1 M क्रयणस्य 2 M नीलो पर्णोऽस्त्यस्या 3 The nili or indigo plant [11] 4 The vakuci (vakuci) plant [10] 5 M उष 6 Pippali or long pepper [10] 7 B reads वसिर 8 Gajapippali [5] 9 Cavya (Cabha) [2] 10 The guñja shrub bearing a red black berry [3]

पलङ्कषा त्विक्षुगन्धा श्वदंष्ट्रा स्वादुकण्टकः ॥९८॥
गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि ।

पलं मांसं कषति । इक्षोरिव गन्धोऽस्या[1] । शुना दंष्ट्रेव । संज्ञापूर्वकत्वान्न वृद्धिः । स्वादुः कण्टकोऽस्य ॥९८॥ गोः पृथिव्याः कण्टकः । गां क्षुरति । 'गुखुल' [गोखुरु] [लोके] ॥[2]

विश्वा विषा प्रतिविषातिविषोपविषारुणा ॥९९॥
शृङ्गी महौषधं च

विशति विश्वा । वेवेष्टि । प्रतीपं विषमस्याः । अरुणो वर्णेन ॥९९॥ शॄ हिंसायाम्' (क्र्या० प० से०) । महदौषधम् । 'अतीस [लोके] ॥[3]

अथ क्षीरावीदुग्धिके[4] समे ।

क्षीरमवति । दुग्धमस्त्यस्याः । 'दूधी' [लोके] ॥[5]

शतमूली बहुसुताऽभीरुरिन्दीवरी वरी ॥ १०० ॥
ऋष्यप्रोक्ताऽभीरुपत्री नारायण्यः शतावरी ।
अहेरु

न भीरुः । इन्दीवरमस्त्यस्याः । वृणाति वरी ॥१००॥ ऋष्यैः प्रोक्ता । अभीरूणि पत्राण्यस्याः । नारायणाज्जाता । शतेनावृणोति । न हिनोति । 'शतावरि' [इति ख्याता] ॥[6]

अथ पीतद्रुकालीयकहरिद्रवः ॥१०१॥
दार्वी पचंपचा दारुहरिद्रा पर्जनीत्यपि ।

कलेरयम् । हरिः पीतो द्रुरस्य । दारु । हरिद्रैकदेशो दार्वी । गौरादि (४ १ ४१) ॥१०१॥ अतिशयेन पचति पचंपचा । पिपर्ति पालयति । परं चासौ जनयति पर्जनी । 'दारुहरदी' [लोके] ॥[7]

वचोग्रगन्धा षड्ग्रन्था गोलोमी शतपर्विका ॥१०२॥

वक्ति वचा । शतं पर्वाण्यस्याः । 'वच' [लोके] ॥१०२॥[8]

---

1 M गन्धोऽस्य 2 The gokṣuraka (gokharu) plant [7] 3 Ativisa (atisa), a poisonous yet highly medicinal plant [8] 4 B and K read क्षीरावी and दुग्धिका separately 5 Dugdhika, a kind of grass [2] 6 Satavari, a medicinal plant [9] 7 The dāruharidrā plant [7] 8 The vaca plant [5]

शुक्ला हैमवती

हिमवति भवा । 'श्वेतवच' [इति] ॥[1]

वैद्यमातृसिंह्यौ तु वाशिका ।

वृषोऽटरूष सिंहास्यो वासको वाजिदन्तकः ॥१०३॥

हिनस्ति सिंही । वास्यते । 'वासृ शब्दे' (दि० आ० से०) । 'वासिका' इत्यन्ये ॥१०३॥ वर्षति मधु । 'वृषु सेचने' । अटान् गच्छतो रुषति । सिंहास्यस्तनुरयमुख । एव वाजिदन्त । अडूस' [लोके] ॥१०३॥[2]

आस्फोता[3] गिरिकर्णी स्याद्विष्णुक्रान्ताऽपराजिता ।

गिरिर्वाल्मूषिका, तत्कर्णतुल्यपत्र । अ पराजिता ॥[4]

इक्षुगन्धा तु काण्डेक्षुकोकिलाक्षेक्षुरक्षुरा ॥१०४॥

काण्डेनेक्षु । कोकिलस्याक्षीव । इक्षुमिवगन्धं राति । 'तालमखाना' [लोके] ॥१०४॥[5]

शालेय स्याच्छीतशिवश्छत्रा मधुरिका मिसि ।

मिश्रेयाऽपि

शालायां भव । शीतोऽसौ[6] शिव । छत्रमस्त्यस्य । मधुरोऽस्त्यस्या ।[7] मिषति मिसि । 'मिसी' । इत्यन्ये । मिश्रमीयते । 'सौंफ' [लोके] ॥[8]

अथ सीहुण्डो वज्रद्रु स्नुक्स्नुही गुडा ॥१०५॥

समन्तदुग्धा

'सी' इति हुण्डते । 'ष्णुह उद्गिरणे' (दि० प० से०) ॥ १०५ ॥ समन्तादुग्धमस्या । 'सेहुण्ड' [लोके] ॥[9]

अथो वेल्लममोघा चित्रतण्डुला ।

तण्डुलश्च कृमिघ्नश्च विडङ्गं पुंनपुंसकम् ॥ १०६ ॥

'वेल्ल चलने' (भ्वा० प० से०) । 'तड आघाते' (चु० प० से०) । 'मनिभिदर्शि—' (उ० ४ १०७) इति तण्डुल । विट् अङ्गमस्य । 'बाउ-भिरंग' [वायविडंग] [लोके] ॥ १०६ ॥[10]

---

1 White vaca [2] 2 Aṭarūṣa (adusa), a very useful medicinal plant 3 B reads आस्फोता 4 The aparajita plant [4] 5 The kokilakṣa (talamakhana) plant [5] 6 M शीतौ 7 M मधुरा वस्या 8 Sweet cummin [6] 9 The sihunda or milk-hedge plant [6] 10 The vidana plant [6]

बला वाट्यालकः

वाटीमलति । 'वरिआरा' [लोके] ॥[1]

घण्टारवा तु शणपुष्पिका ।

घण्टेवारौति । ['सनई' लोके] ॥[2]

मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च ॥ १०७ ॥

मृद्वी कोमला । गोस्तनी तत्तुल्यत्वात् । द्राक्ष्यते शब्द्यते । 'दाप' [दाख] [लोके] ॥ १०७ ॥[3]

सर्वानुभूतिः सरला त्रिपुटा त्रिवृता त्रिवृत् ।

त्रिभण्डी रेचनी[4]

सर्वैरनुभूयते । त्रय. पुटा अस्या. । त्रीनवयवान् वृणोति । त्रीन् दोषान् भण्डते । रेचयति । सम्र । 'तिधार' [लोके] ॥[5]

श्यामापालिन्द्यौ तु सुषेणिका ॥ १०८ ॥

कालामसूरविदलार्धचन्द्रा कालमेषिका ।

पालयति पालिन्दी । सुष्ठु सेनया पाति ॥ १०८ ॥ मसूरवद्द्विदलमस्याः । काल मिषति । 'श्यामतिधारा' [इति ख्याता] ॥[6]

मधुकं क्लीतकं यष्टीमधुकं मधुयष्टिका ॥ १०९ ॥

मध्विव । यष्टी मध्विव । 'जेठीमधु' [लोके] ॥ १०९ ॥[7]

विदारी क्षीरशुक्लेक्षुगन्धा क्रोष्टी च या सिता ।

विदारयति । क्रोशति क्रोष्ट्री । 'बिलाईकंद' [लोके] ॥[8]

अन्या क्षीरविदारी स्यान्महाश्वेतर्क्षगन्धिका ॥ ११० ॥

अन्या असिता । क्षीरवती विदारी । ऋक्षवद्गन्धोऽस्याः[9] । त्रीणि ॥ ११० ॥[10]

लाङ्गली शारदी तोयपिप्पली शकुलादनी ।

लाङ्गलाकारोऽस्त्यस्याः[11] । शरदि भवा[12] । 'जलपीपरि' 'पनिसगा' [लोके] ॥[13]

---

1. The bala (variara) plant [2] 2. A kind of flax [2] 3. The drakṣa or grape plant [5] 4. B. and K. read रोचनी 5. The s'uklatridhara plant [7] 6. The s'yamatridhara plant [7] 7. The medicinal plant, called jethimadhu [4] 8. The vidari plant 9. M. ऋक्षवद्गन्धो स्या: 10. The kṣiravidari plant [3] 11. M. लाङ्गलाकारोस्त्यस्या: 12. M. भावा 13. Jalapipṛali [4].

खराश्वा कारवी दीप्यो मयूरो लोचमस्तकः[1] ॥ १११ ॥

खर अश्वोऽस्या[1] । केन जलेनारीति । दीपे साधु । 'मीनातेरूरन्' (उ० १. ६७) । मयूर । लोचो दर्शनीयो मस्तकोऽस्य[2] । 'अजमोदा' [लोके] ॥ १११ ॥[3]

गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा ।

गोपायति । शारिरस्त्यस्या । उत्पलसदृशपत्रा । 'साड' [लोके] ॥[4]

योग्यमृद्धिः सिद्धिलक्ष्म्यौ

युज्यते योग्यम् । ऋध्नोति । 'ऋधु वृद्धौ' (स्वा० प० से०) ॥[5]

वृद्धेरप्याह्वया इमे ॥ ११२ ॥

इमे चत्वारो वृद्धयाख्यौषधेरपि नामानि ॥ ११२ ॥[6]

कदली वारणबुसा मोचा रम्भाशुमत्फला ।[7]
काष्ठीला[8]

केन वायुना दल्यते । मुञ्चति मोचा । रमते रम्भा । 'रमेरशब्लिटौ (७ १ ६३) इति नुम् । ईषदष्ठीलमस्या । 'केरा' [लोके] ॥[9]

मुद्गपर्णी तु काकमुद्गा सहेत्यपि ॥ ११३ ॥

काकाना मुद्ग राति । 'मुगवनि' 'वनमूंगी' इति च ॥ ११३ ॥[10]

वार्ताकी हिङ्गुली सिंही भण्टाकी दुष्प्रधर्षिणी ।

वार्तमयोग्यमर्कति । हिङ्गु लाति । भण्यते भण्टाकी । 'पिनाकादयश्च' (उ० ४ १५) इति साधु । पञ्च । 'वनभाटा ।' [इति] ॥[11]

नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ॥ ११४ ॥
नकुलेष्टा भुजङ्गाक्षी छत्राकी सुवहा च सा ।

नकुलानामिय प्रिया । 'रस आस्वादने' (चु० उ० से०) । 'रास्नासास्ना–' (उ० ३ १५) इति साधु ॥ ११४ ॥ छत्रमकति । नव । 'रासना' भेद ।[12]

---

1 M अश्वोस्या 2 M मस्तकास्य 3 The ajamoda plant [5]
4 The sariva plant bearing lotus like leaves [5]
5 Rddhi, a medicinal plant [4] 6 The vrddhi plant [5]
7 B and K read this line as follows कदली वारणबुसारम्भा मोचांशुमत्फला । 8 B reads काष्ठिला 9 The plantain tree [6]
10 Kakamudga [3] 11 The brinjal plant growing in deserts [5] 12 The rasna plant [9]

विदारिगन्धांशुमती शालपर्णी[1] स्थिरा ध्रुवा ॥ ११५ ॥

विदार्या इव गन्धोऽस्याः[2]। शालस्येव पर्णान्यस्याः। 'शखिनि' (सखिन) [लोके] ॥ ११५ ॥[3]

तुण्डिकेरी समुद्रान्ता कर्पासी बदरेति च ।

तुण्डिकान् शरीराणि ईरयति। 'कृञः पास.' (उ० ५. ४५)। कर्पासी। बदति बदरा। 'कपास' [लोके] ॥[4]

भारद्वाजी तु सा वन्या

भरद्वाजस्येयम्। 'वनकपास' [लोके] ॥[5]

शृङ्गी तु ऋषभोवृषः ॥ ११६ ॥

ऋषति। 'ऋषीगतौ' [तु० प० से०]। 'ऋषिवृषिभ्यां किन्' (उ० ३. १२३) इत्यामच्। 'ककराशीगी' [लोके] ॥ ११६ ॥[6]

गाङ्गेरुकी नागबला झषा ह्रस्वगवेधुक ।

गाङ्गं जलमीरयति। मृगय्वादि. (उ० १. ३७) झषति हिंसार्थः। गवि भूमावेधते गवेधुका। ह्रस्वा चासौ सा च। 'गुडशकरी' [लोके ॥[7]

धामार्गवो घोषकः स्यात्

धामार्जति[8] धामार्गवः। घोषति। कर्कों [टकी] घटपत्र—(१) 'खेखसा' [लोके] ॥[9]

महाजाली स पीतकः ॥ ११७ ॥

जालं वितानः। पीतपुष्प—'खेखसा' ॥११७॥[10]

ज्योत्स्नी[11] पटोलिका जाली

ज्योत्स्नाऽस्त्यस्या.[12]। पटति विस्तीर्यते। 'कपिगडि—' (उ० १.६६) इत्योलच्। जालं विस्तारोऽस्या अस्ति। 'चिचिडा' [लोके] ॥[13]

---

1. H. reads सालपर्णी 2. M. गन्धोस्या 3. S'alaparṇī [5] 4. The cotton plant [4] 5. The vanakapasa plant [1] 6. Ṛsabha (medicinal plant) [3] 7. The nagabala (gudas'akari) plant [4] 8. M. धाम अर्जति 9. A kind of vegetable [2] 10. A kind of vegetable. [2] 11. Majority reads ज्यौत्स्नी 12. M. ज्योत्स्नास्त्यस्या 13. A kind of vegetable.

नादेयी भूमिजम्बुका।

भूजम्बूर्भूलग्नपत्रा जम्बूः ॥[1]

स्याल्लाङ्गलिक्यग्निशिखा

लाङ्गलवत्तनोति। अग्निरिव शिखाऽस्ति[2]। द्वे। 'करिआरी' [लोके] ॥[3]

काकाङ्गी काकनासिका ॥११८॥

काकस्येवाङ्गमस्या। 'कौआठोरी' [लोके] ॥११८॥[4]

गोधापदी तु सुवहा

गोधावत्पादो मूलमस्या। 'हंसपदी' 'लज्जालू' [इति च लोके] ॥[5]

मुसली तालमूलिका।

भेरी मूलमध्ये प्रतति। मुस्यति खण्डयति मुसली। वृषादिः (उ० १.१०६)। तालस्येव मूलमस्या। 'मुसरि' [लोके] ॥[6]

अजशृङ्गी विषाणी स्यात्

अजशृङ्गमिव। विषाणमस्त्यस्या। 'मेढासींगी' [लोके] ॥[7]

गोजिह्वादार्विके समे ॥ (१६)॥

गोजिह्वेव। 'गोभी' [इति ख्याता] ॥११९॥[8]

ताम्बूलवल्ली ताम्बूली नागवल्ल्यपि

ताम्यति। ताम् वुली च सा। 'वुल् निमज्जने' (चु० प० से०)। पृषोदरादि. (६.३.१०९)॥ 'पान' [लोके] ॥[9]

अथ द्विजा।

हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी ॥१२०॥

द्विर्जाता। हरति। रेणुरस्या अस्ति। कुन्तिषु भवा। 'रेनुक' [इति ख्याता] ॥ १२० ॥[10]

एलापालुकमैलेयं सुगन्धि हरिवालुकम्।

वालुकं च

---

1. Bhūmijambuka [2] (Cf. Amarakośa 2. 4.38) 2. M. शिखास्ति 3. The safflower plant [2] 4. A kind of flower [2] 5. A sensitive plant [2] 6. Curculigo Orchioides [2] 7. The ajaśṛṅgī plant [2] 8. Cauliflower; Cabbage [2] 9. The betel plant [3] 10. Reṇukā a plant [6].

'एलयति । 'इल प्रेरणे' (चु० प० से०) । तच्च तद्वालुकं च । 'ह्रस्वः' [एलवालुकम्] इति स्वामी । इलाया भवम् । 'एलुवालुक' [लोके] ॥[1]

अथ पालङ्क्यां मुकुन्दः कुन्दकुन्दुरू ॥१२१॥

पालयति पालम्, तमङ्कयते । 'अङ्क पदे—' (चु० उ० से०) । 'अचो यत्' (३.१.९७) । पालङ्क्या 'पालिन्दी' इति वैद्याः । मुखो कुन्द इव । कुं भूमिं द्यति । 'आतः—' (३.२.३) क. । 'कुन्दुः' इति पाठान्तरम् । 'कोन्दरू' 'पालकशाक' [इति च लोके] । 'मल्लकीनिर्यास. सुगन्धिद्रव्यं कुन्दकुन्दुरू' इत्यन्ये ॥१२१॥[2]

वालं ह्रीबेरबर्हिष्ठोदीच्यं केशाम्बुनाम च ।

ह्रीयुक्तं वेरमस्य । बर्हिषि तिष्ठति । उदीचिभवम् । केशाम्बुनोर्नाम यस्य । 'सुगन्धवाला' [लोके] ॥[3]

कालानुसार्यवृद्धाश्मपुष्पशीतशिवानि तु ॥१२२॥
शैलेयम्

कालेनानुस्रियते । वृद्धमिव । अश्मनः पुष्पमिव । शीतं च तच्छिवम्[4] ॥१२२॥ शिलाया भवम् । 'छरीला' [लोके] ॥[5]

तालपर्णी तु दैत्या गन्धकुटी मुरा ।
गन्धिनी

दितेरियम् । गन्धस्य कुटीव । मुरति । 'मुर वेष्टने' (तु० प० से०) । 'एकाङ्गी' [इति ख्याता] ॥[6]

गजभक्ष्या तु सुवहा सुरभी रसा ॥१२३॥
महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति च ।

गजभक्ष्यते । सुष्ठु रम्यते सुरभिः ॥१२३॥ महदीरणमस्याः । कुन्दुरुरिव । सल्लु लक्यते । 'शालई' [इति] सर्जभेद ॥[7]

अग्निज्वालासुभिक्षे तु धातकी धातृपुष्पिका ॥१२४॥

अग्नेर्ज्वालेव रक्तपुष्पत्वात् । सुष्ठु भिक्षते । धातुं करोति । ण्यन्त. । धातृ-

---

1. Elabaluka a granular substance used for perfume [5] 2. Pālaka, a kind of green vegetable [4] 3. Hrībera, a kind of perfume [1] 4. M. तन् शिवं 5. Śilājita or benzoin [5] 6. Mura, a kind of perfume [5] 7. The sallakī tree [8]

पुष्पमस्या । 'धातुरक्ता धातुकी अतएव धातुपुष्पी' इति स्वामी। 'धवई' [लोके] ॥१२४॥[1]

पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुला

पृथुरिव पृथ्वीका । चन्द्रस्य कर्पूरस्य बालेव । एलयति । निश्चिता कुटिरस्य । 'इलायची' [लोके] ॥[2]

अथ सा ।

सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटि ॥१२५॥

उपकुञ्चति । 'तुच्छा' इति स्वामी । कुरति शब्दायते । त्रय पुटा यस्या । त्रुटयति । 'छोटी इला [य] ची' [लोके] ॥१२५॥[3]

व्याधि कुष्ठं पारिभव्य वाप्यं[4] पाकलमुत्पलम् ।

विगत आधिरनेन । कुष्यति कुष्ठम् । परिभवे साधु । अदन्तात्स्वार्थेऽण्[5] (५४३८)। 'पारिभाव्यम्' इत्यन्ये । वाप्या भवम् । वाप्यम् । पाक लाति । 'पल गतौ' (भ्वा० प० से०) । 'कूट' [लोके] ॥[6]

शङ्खिनी चोरपुष्पी स्यात्केशिनी

शङ्ख इव । केशा सन्त्यस्या । 'कवडोना' (?) [लोके][7]

अथ वितुन्नक ॥१२६॥

झटाऽमलाऽज्झटा ताली शिवा तामलकीति च ।

वितुद्यते स्म ॥१२६॥ झट सघातोऽस्त्यस्या[8] । अमला निर्मला । अज्झटा-दयर्थकारिसघाता । 'आत्' आश्चर्ये । ताडयति ताली । ताम्यति तामलकी । 'भूम्यामलकी' [इति ख्याता] ॥[9]

प्रपौण्डरीक पुण्डर्यम्

प्रकृष्ट पौण्डरीकम् । 'पुडि खण्डने' (भ्वा० प० से०) । पुण्डत्यार्थं प्रधानम् । 'पडेरिआ' [लोके] ॥[10]

अथ तुन्नकुबेरक ॥१२७॥

कुणि कच्छ' कान्तलको नन्दिवृक्ष

1 The dhava tree [5] 2 Cardamom [5] 3 Small Cardamom [5] 4 B reads व्याप्यम् 5 M अदन्तात्स्वार्थेण 6 Kūṭa, a medicinal substance [5] 7 The corapuṣpi Creeper [3] 8 M सघातोस्त्यस्या 9 Bhumyamalaki (small myrobalan) [6] 10 The puṇḍarya tree [2]

तुद्यते स्म । कुत्सित वेर देहमस्य । 'कुण शब्दे' (तु० प० से०) । कुणति कुणि । 'तुणि' इत्यपि पाठ । कच्यते कच्छ । कान्तो लक्ष्यते नन्द्या वृक्ष । 'तुणी' [इति स्यात] ॥[1]

अथ राक्षसी ।

चण्डा धनहरी क्षेमदुष्पत्रगणहासका ॥ १२८ ॥

रक्षस इयम् । चण्डते चण्डा । क्षिणोति क्षेमम् । 'क्षि हिंसायाम्' (स्वा० प० से०) । दुष्टानि पत्राण्यस्य । 'दुष्पत्र' इति स्वामी । 'भटिउर' इति नेपाले स्यात सुगन्धिद्रव्यम् ॥ १२८ ॥[2]

व्याघ्रायुध व्याघ्रनख करज चक्रकारकम् ।

व्याघ्रस्यायुधमिव । 'व्याडायुधमपि' [क्वचित्पाठ] । चक्रस्य कारकम् । 'नखनखी' [इति] सुगन्धद्रव्य [स्य] ॥ १२८ ॥[3]

सुषिरा विद्रुमलता कपोताङ्घ्रिर्नटीनली ॥ १२९ ॥

सुषिरस्यास्ति । नटयति नटी । पञ्च । 'नलुका' इति 'यावारी' इति च उत्तरापथे प्रसिद्ध सुगन्धद्रव्यम् ॥ १२९ ॥[4]

धमन्यञ्जनकेशी च हनुर्हट्टविलासिनी ।

धम्यते धमनि । अञ्जनमिव केशा अस्या । हन्तीति हनु । हट्टे विलसति ॥[5]

शुक्ति शङ्ख खुर कोलदल नखम्

शोचति शुक्ति । न खनति नखम् । नखी समुद्रकर्कटस्य नख । 'चत्वारि चत्वारि नामानि' इत्यन्ये । 'हनु' इत्यादि नखस्यैव नाम वैद्यके प्रसिद्धम् । यद्वृहन्नखस्तस्य तु नखीहनुरित्यादि नाम । अञ्जनकेश्यन्त पञ्चस नालिकाया नामानीति प्रसिद्धमेव । व्याघ्रनख समुद्रकर्कटस्य वृहन्नखो ह्रस्वस्तस्यैव नखी ॥[6]

अथाढकी ॥१३०॥

काक्षी मृत्स्ना तुवरिका मृतालकसुराष्ट्रजे ।

आढौकते आढकी ॥ १३० ॥ कक्षे भवा । तुवरोऽस्त्यस्या ।[7] मृतमालयति । पट् । अरहरि' [अरहर] [लोके] ॥[8]

---

1 The tuni tree [6] 2 A kind of perfume known as bhativura in Nepal [5] 3 Vyasghranakha, a kind of perfume [4] 4 Nali, a kind of perfume called yavari in northern region [5] 5 Hattavilasini, a sort of perfume [4] 6 Nakha, a kind of perfume [5] 7 M तुवरोस्त्यस्या 8 A kind of pulse [6]

कुटन्नटं दाशपुरं वानेयं परिपेलवम् ॥ १३१ ॥
प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च ।

कुटन्नटयति । दशपुरे भवम् । वने जातं वानेयम् । नन्द्यादि (४ ३ ९७) । परितः पेलवं मृदु ॥१३१॥ प्लवते । गा जलं पिपर्ति । गा जलं नर्दयति । 'केवटी' 'मोथा' [इति च लोके] ॥[1]

ग्रन्थिपर्णं शुकं बर्हपुष्पं स्थौणेयकुक्कुरे ॥ १३२ ॥

ग्रन्थौ पर्णान्यस्य । शोषति शुकं । बर्हं प्रशस्तम् । पुष्यति पुष्पम् । स्थूणाया अपत्यम् । कुक्कुरोऽस्यास्ति[3] । 'गठिवन' इति लोके ग्रन्थिपर्णस्यैव भेदः शुकादि० । लोके 'थुनेर' इति ॥ १३२॥[4]

मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षा लङ्कोपिकेत्यपि ॥ १३३ ॥

मरुतां माला । पिशुना गन्धसूचनात् । स्पृशति स्पृक्का । बाहुलकात्कक् । वहते वधूः । कोटिभिर्वर्षैर्वर्धते । लङ्कायामुप्यते । 'ब्रुकण्' [बीजसन्ताने] (स्वा० ३० अ०) । वधुन् (उ० २ ३२) । 'लकोई' इति 'कपुरी' इति च सुगन्धि-शाक [स्य] ॥ १३३ ॥[5]

तपस्विनी जटा मांसी जटिला लोमशा मिसी ।

जटाऽस्त्यस्या ।[6] सा च मासी च । 'मनेर्दीर्घश्च' (उ० ३ ६४) इति स । मिषति मिसी । 'जटामासी' [इति ख्याता] ॥[7]

त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकम् ॥ १३४ ॥

त्वग्वृक्षवल्कलत्वात् । पत्राकृतिपत्रम् । 'सम्प्रोदश्च कटच्' (५ २ २९) । उत्कटम् । 'भृञ् कित्नुट् च' (उ० १ २५) इति गन् । अर्श आदत्वि (५ २ १२७) त्वचम् । चोचं प्रशस्तं वल्कलमस्यास्ति । 'तज' [लोके] ॥ १३४॥[8]

कर्चूरको द्राविडकः काल्पको वेधमुख्यकः ।

कर्चति त्वग्दोषं[9] कर्चूरं । खर्जूरादयश्च (उ० ४ ९०) इति साधु । द्रविडदेशे जातः । कल्पे विधौ भवः । 'कचूर' [इति ख्यातः] । [10]

---

1 Motha, a kind of grass [9] 2 B reads ग्रन्थिपर्णम् 3 M कुक्कुरोस्यास्ति 4 The granthiparna tree [5] 5 The sprkka (lakoi) plant [10] 6 M जटास्त्यास्या 7 The jatamasi plant [6] 8 Tvakpatra or taja [5] 9 M त्वचदोष 10 Karcuraka (kacura), a fragrantplant [4]

ओषध्यो जातिमात्रे स्युः

जातिमात्रविवक्षायामोषधिः ॥

अजातौ सर्वमौषधम् ॥ १३५ ॥

द्रव्यमात्रविवक्षायां चूर्णगुटिकादि औषधम् ॥ १३१ ॥

शाकाख्यं पत्त्रपुष्पादि

पत्रपुष्पादिः शाकः ॥[1]

तण्डुलीयोऽल्पमारिषः ।

तण्डुलाय हित. । अल्पश्चासौ मारिषः । 'चवराई' लोके ॥[2]

विशल्याऽग्निशिखाऽनन्ता फलिनी शक्रपुष्प्यपि ॥१३६॥

विगतं शल्यमस्या. । शक्रः, अर्जुनवृक्षः । तस्य पुष्पमिव । पञ्च । 'करिआरी' [लोके] । एवं मुक्तापीयं शाकत्वात्पुनरुक्ता ॥[3]

स्याद्दक्षगन्धा छगलाण्ड्यावेगी[4] वृद्धदारकः ।

जुङ्गः

छगलस्येवाण्डान्यस्यीन्यस्याः । आवेगोऽस्त्यस्याः[5] जुङ्गति । 'जुगि वर्जने' (भ्वा० प० से०) । 'विधार' [लोके] ॥[6]

ब्राह्मी तु मत्स्याक्षी वयस्था सोमवल्लरी ॥१३७॥

ब्रह्मण इयम् । वयसि तिष्ठत्यनया । 'ब्राह्मी' [इति ख्याता] ॥१३७॥[7]

पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती ।

पटूनि पर्णान्यस्याः । स्वर्णवत् क्षीरमस्याः । 'चोप' [लोके] ॥[8]

हयपुच्छी तु काम्बोजी माषपर्णी महासहा ॥१३८॥

कम्बोजदेशे भवा । 'मषवनि' 'बन उर्दी इति च ॥१३८॥[9]

तुण्डिकेरी रक्तफला बिम्बिका पीलुपर्ण्यपि ।

1. Any edible leaf, fruit or root used as vegetable [1] 2. Tanduliya (caurāī), a kind of green vegetable [2] 3. Indrapuṣpī (kariyāni), a kind of herb [4] 4. B. reads छगलान्त्र्यावेगी 5. M. आवेगोऽस्त्यस्या 6. The vṛddhadāraka (vidhara) herb [5] 7. Brahmī, a sort of medicinal plant [5] 8. Svarṇakṣīrī (makoya), a modicinal plant 9. Māṣaparṇī, a kind of bean's plant [5].

तुण्डिकान् ईरयति । बिम्बी कायति । 'कुन्दुरू' [लोके] ॥[1]

वर्वरा कवरी तुङ्गी खरपुष्पाजगन्धिका ॥१३९॥

वृञो वरच् । वर्वरा । कस्य शिरसो वरी । तुञ्जति । 'तुजि हिंसायाम्' (भ्वा० प० से०) । न्यङ्क्वादि (७ ३ ५३) । 'ममरी' [लोके] ॥[2]

एलापर्णी तु सुवहा रास्ना युक्तरसा च सा ।

एलाया इव पर्णान्यस्याः । युक्तो रसो यस्याः । 'रासन' [लोके][3]

चाङ्गेरी चुक्रिका दन्तशठाऽम्बष्ठाऽम्ललोणिका ॥१४०॥

चाङ्ग दक्षमीरयति । चुक्रम् [ति] चुक्र । 'चुक्क व्यथने' (चु० प० से०) । अम्ला च लूनयति च । 'अचिलोना' [इति ख्याता] ॥१४०॥[4]

सहस्रवेधी चुक्रोऽम्लवेतसश्शतवेध्यपि ।

सहस्र विध्यति । अम्लश्चासौ वेतसश्च । 'अमिलवेत' [अमलवेत] [लोके] ॥[5]

नमस्कारी गण्डकाली समङ्गा खदिरेत्यपि ॥१४१॥

नमस्करणशीला । गण्डेषु ग्रन्थिषु काली । खदति खदिरा । 'लज्जालू' 'लजारु' [इति च] लोके ॥१४१॥[6]

जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।[7]

जीवति । 'जीवइ' शाक । 'डोडी' गुर्जरदेशे ॥[8]

कूर्चशीर्षो मधुरकः शृङ्गह्रस्वाङ्गजीवकाः ॥१४२॥

कूर्चं श्मश्रु । तद्वच्छीर्षमस्य । जीवकोऽष्टवर्गान्तर्गत ॥१४२॥[9]

किराततिक्तो भूनिम्बोऽनार्यतिक्त

किरातदेशे जातस्तिक्त । त्रीणि । 'चिराइता' [लोके] ॥[10]

अथ सप्तला ।

विमला सातला भूरिफेना चर्मकषेत्यपि ॥१४३॥

सात सुख लाति । सातला रक्तक्षीरसीहुण्ड ॥१४३॥[11]

---

1 A kind of vegetable [4] 2 Mamari, a kind of vegetable [5] 3 The plant, elaparni or mimosa octondra [4] 4 The ambaṣṭhā (acilonā) plant [5] 5 The amalaveto plant [4] 6 The namaskāri (bajaru) plant [4] 7 B reads मधु, स्रवा as two separate names 8 The jiva plant known as dodi in Gujrat 9 The jivaka plant [5] 10 The bhūnimba (ciraytā) plant [3] 11 The saptalā or red milk hedge tree [5]

वायसोली स्वादुरसा वयस्था

वायसवल्लीयते वायसोली । 'काकोली' [इति ख्याता] ॥[1]

अथ मुकूलक ।

निकुम्भो दन्तिका प्रत्यक्श्रेण्युदुम्बरपर्ण्यपि ॥१४४॥

मङ्कते मकूल । 'मकि मण्डने' (भ्वा० आ० से०) । नियत कुम्भ । दाम्यति दन्ती । 'दला (न्ता)' [लोके] ॥१४४॥[2]

अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका ।

अज मोदयति । द्वे अजमोदायवानी भेद । ब्रह्मणा दृभ्यते । 'दृभी ग्रन्थे' (तु० प० से०) । दुष्टो यव । 'यवा' इति ॥[3]

मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ॥१४५॥

पौष्करे मूले [इत्यन्वय] पुष्णाति । पुष करन् (उ० ४ ४) । कश्मीरेषु भवम् । 'पुष्करमूल [स्य]' त्रीणि ॥१४५॥[4]

अव्यथाऽतिचरा पद्मा चारटी पद्मचारिणी ।

अतिचरति । पद्यते पद्मम् । चारयति । 'शकादिभ्योऽटन्' (उ० ४ ८१) । 'गुलाव' लोके । पञ्च पद्मचारिण्या ॥[5]

काम्पिल्य कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपि ॥१४६॥

कम्पिलाया भव । पञ्च 'कबीला' लोके ॥१४६॥[6]

प्रपुन्नाडस्त्वेडगजोदद्रुघ्नश्चक्रमर्दकः ।

पद्माट उरणाख्यश्च

पुमास नाटयति । एडो मेष एव गजोऽस्य[7] । चक्र दद्रु मृद्नाति । पद्ममटति । उरणो मेष , तस्याख्याऽस्य[8] । 'चकवड' [लोके] ॥[9]

पलाण्डुस्तु सुकन्दक ॥ १४७ ॥

पलस्याण्डमिव पलाण्डु । 'पिआजु (ज)' [लोके] ॥ १४७ ॥[10]

---

1 The kakolı plant [3] 2 Dartı, a medicinal plant [5]
3 Ajamoda (ajavāna), a very useful medicinal plant [4]
4 Puṣkaramula [3] 5 The padmacarını or rose plant [5]
6 The kampilya (kabıla) tree [5] 7 M गजोस्य 8 M तस्याख्यास्य 9 The Cakramardaka (Cakavada) tree [6]
10 Onion [2]

लतार्कदुर्द्रुमौ तत्र हरिते

लतासु अर्क इव । दुष्टो द्रुम । हरितपलाण्डु ॥[1]

अथ महौषधम् ।

लशुन गृञ्जनारिष्टमहाकन्दरसोनका ॥ १४८ ॥

लशति छिनत्ति रोगान् । गृञ्ज्यते गृञ्जना । 'गृजिशब्दे' (स्वा० प० स०) । न रिष्टमस्मात् । महत्वन्दमस्य । रसमोन । 'लहसुन' [लोके] ॥ १४८ ॥[2]

पुनर्नवा तु शोथघ्नी

पुनरसौक्ष्ण नवा । द्वे । 'गदहपुर्ना' [लोके]॥[3]

वितुन्नं सुनिषण्णकम् ।

विगत तुन्न व्यथनमस्मात् । सुष्ठु निषण्णमस्मात् । द्वे । 'विसखपरिआ' [लोके] ॥[4]

स्याद्वातकः शीतलोऽपराजिता शणपर्ण्यपि ॥ १४९ ॥

आवात करोति । शणपर्णी ॥ १४९ ॥[5]

पारावताङ्घ्रि कटभी पण्या ज्योतिष्मती लता ।

कटवद्भाति । गौरादि (४ १ ४१) । पण्यते पण्या । पञ्च । 'ककूदनि' [लोके] ॥[6]

वार्षिकं त्रायमाणा स्यात्त्रायन्ती बलभद्रिका ॥ १५० ॥

वर्षासु भवम् । त्रायते । बलेनभद्रा । 'त्रायमान' [लोके] ॥ १५० ॥[7]

विष्वक्सेनप्रियागृष्टिर्वाराही बदरेति च ।

गृध्यते गृष्टि । पृषादरादि (६ ३ १०९) । 'गेंटि (ठि)' [लोके] ॥[8]

मार्कवो भृङ्गराजः स्यात्

मचति मार्कव । भृङ्ग इव राजते । 'भगरैया' [लोके] ॥[9]

काकमाची तु वायसी ॥ १५१ ॥

काकान् मचते । 'मचि धारणे' । 'मेवैया' [लोके] ॥१५१॥[10]

शतपुष्पासितच्छत्रातिच्छत्रामधुरा मिसि ।

---

1 Green Onion [2] 2 Garlic [6] 3 The punarnava plant [2] 4 Vitunna, a pot herb [2] 5 Sanaparni, a plant beter known as paṭasana [2] 6 Jyotiṣmatī (kakūdani) [5] 7 The trayamana plant [4] 8 The varahi tree [5] 9 Bhṛngaraja, a useful medicinal plant [2] 10 The makoya plant [2]

शतं पुष्पमस्याः । 'शौफ' [लोके] ॥[1]

अवाक्पुष्पी कारवी च

कां सेति । 'मंगरैल' [लोके][2]

सरणा तु प्रसारिणी ॥ १५२ ॥

तस्यां कटंभरा राजबला भद्रबलेति च ।

प्रसारयति । राजेव बलदा । 'गन्धप्रसारणि' [इति ख्याता] ॥[3]

जनी जतूका रजनी जतुकृच्चक्रवर्तिनी ॥ १५३ ॥

संस्पर्शा

जनयति जनी । 'उलूकादयश्च' (उ० ४. ४१) । जतूका । रज्यतेऽनया[4] । जतु करोति । चक्रवर्तितुं शीलमस्या ॥ १५३ ॥ स्पृश्यते । 'ययरी' इति उत्तरदेशे प्रसिद्धं सुगन्धिद्रव्यम् ॥[5]

अथ शटी गन्धमूलीषड्ग्रन्थिकेत्यपि ।

कर्चूरोऽपि पलाशः

'शट रुजादौ' (भ्वा० प० से०) । पलमश्नाति । 'कचूर' [लोके] ॥[6]

अथ कारवेल्लः कटिल्लकः ॥ १५४ ॥

सुषवी च

कारे वेल्लति । 'वेल्ल चलने' (भ्वा० प० से०) । 'कठ घोके' (भ्वा० प० से०) । बाहुलकादिल्लः ॥ १५४ ॥ सुषुवति । गौरादिः (४. १. ४१) । 'करैला' [लोके] ॥[7]

अथ कुलकं पटोलस्तिक्तकः पटुः ।

पाठ्यति पटोलः । 'परवर' [लोके] ॥[8]

कूष्माण्डकस्तु कर्कारुः

कु' ईषदुष्मा अण्डेषु बीजेषु यस्य । कर्कदेशासावरुः बस्ति शोपकः. 'कोहेड़ा' [कोहड़ा] [लोके] ॥[10]

---

1. Sweet cummin [5] 2. Karavi (mangraila) [2] 3 The gandhaprasarini plant [5] 4. M. रज्यतेनया 5. Cakravartini, a fragrant substance called yayari in northern India [6] 6. The karcūra or zedoary plant. [5] 7. Karavella (Karailā) [3] 8. Paṭola (paravara), a species of cucumber [4] 9. M. ॡ 10. Pumpkin [2].

एर्वारुः कर्कटी स्त्रियौ ॥ १५५ ॥

आ समन्तात्, ईरयति वारयति च एर्वारु । 'इर्वारु' इति क्वचित् । कर्कमटति । 'काकरि' [लोके] ॥ १५५ ॥[1]

इक्ष्वाकुः कटुतुम्बी स्यात्

इक्षुमाकरोति । मृगय्वादि (उ० १.३७) । तुम्बति रुचिम् । द्वे । 'तितलौकी' [लोके] ॥[2]

तुम्ब्यलावूरुभे समे ॥

न लम्बते । 'नञि लम्बेर्नलोपश्च' (उ० १ ८७) ॥[3]

चित्रा गवाक्षी गोडुम्बा[4]

चीयते चित्रा । गा तुम्बति । 'तुबि अर्दने' (भ्वा० प० से०) । पृषोदरादि' (६ ३ १०९) । धन्वन्तरिमदनपालादिनिघण्टुषु 'गोडुम्बा' शब्दो न दृश्यते किं तु 'गवादनी' इति । तस्मादत्र 'गोजग्धा' इति सुपाठः[5] । 'गोडुम्बा' इत्यपि क्वचिल्लभ्यते ॥[6]

विशाला त्विन्द्रवारुणी ॥ १५६ ॥

'इन्द्रा मृगादनी स्यादिन्द्रवारुणी चान्या विशाला गजचिर्भटा' इति वैद्यके प्रसिद्धत्वात् । 'इन्द्रवारुणी या तु बृहत्फला सा विशाला' 'काकरिभेद' इति तु रामाश्रमस्य भ्रम । रोग्धी त्विन्द्रसुचित्रा गावा वा (?) । इन्द्र वारयति । 'इद्रायणि' [लोके] ॥ १५६ ॥[7]

अर्शोघ्नः शूरणः कन्दः

अर्शांसि हन्ति । शूरयति । कन्दयति । 'शूरण' इति स्यात ॥[8]

गण्डीरस्तुसमष्ठिला ।

गण्डति गण्डीर । 'गाडर' [लोके] ॥[9]

कलम्बी

के लम्बते । 'करेंबु' [लोके] ॥[10]

---

1 Karkaṭi (kankari , a kind of cucumber 2 Bitter gourd (titalauki) [2] 3 Gourd [2] 4 E reads गोडुम्बा, and K reads गोतुम्बा 5 M सुपठम् 6 Citra, a kind of cucumber [3] 7 Indravāruṇī, a kind of medicinal plant [2] 8 Suraṇa, a kind of esculent root [3] 9 A kind of grass of which khaga is the root [2] 10 Karembu, a kindof vegetable [1]

उपोदका

उप अधिकमुदकमस्याः । 'पोइ' [लोके] ॥[1]

अस्त्री तु मूलकं

मूलति । 'मूल प्रतिष्ठायाम्' (भ्वा० प० से०) । 'मूरी (ली)' [लोके] ॥[2]

हिलमोचिका ॥ १५७ ॥

हिलति मोचयति च । 'हिलिसा' [लोके] ॥ १५७ ॥[3]

वास्तूकं शाकभेदाः स्युः

वसति वास्तूकः । 'उलूकादयश्च' (उ० ४.४१) इति साधुः । 'बथुआ [लोके] ॥[4]

दूर्वा तु शतपर्विका ।

सहस्रवीर्याभार्गव्यौ रुहानन्ता

'दूर्वी हिंसायाम्' (भ्वा० प० से०) । दूर्वा । षट् 'दूर्वा' [इति ख्यातस्य] ॥[5]

अथ सा सिता ॥ १५८ ॥

गोलोमी शतवीर्या च गण्डाली शकुलाक्षकः ।

सिता दूर्वा ॥ १५८ ॥ गोलोमसु जाता । गण्डमलति । 'शुक्लदूर्वा' ॥[6]

कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ॥ १५९ ॥

कुरून् विन्दति । 'मुस्त संघाते' । चत्वारि । 'मोथा' [लोके] ॥ १५९ ॥[7]

स्याद्भद्रमुस्तको गुन्द्रा

गा जलं द्राति । 'गोंद' [लोके] ॥[8]

चूडाला चक्रलोच्चटा ।

उच्चटति । 'मुस्ताविशेषस्य' त्रीणि ॥[9]

वंशे त्वक्सारकर्मारत्वचिसारतृणध्वजाः ॥ १६० ॥

शतपर्वा यवफलो वेणुमस्करतेजनाः ।

वमति वंशः । कर्मा राति । तृणेषु ध्वज इव ॥ १६० ॥ वेणति वेणुः ।

---

1. Upodaka (poi), a kind of herb [1] 2. Radish [1] 3. Hilisa [1] 4. Vastuva, a kind of vegetable [1] 5. Dūrva (bent grass) [6] 6. White durva [4] 7. The musta (motha) grass [4] 8. The gundra (gonda) grass [2] 9. Cakrala, a kind of motha grass [3].

'वेणृ निशामनादौ' (भ्वा० उ० से०)। मस्कते। 'मस्क गतौ' (भ्वा० आ० से०)। 'वास' [लोके] ॥[1]

वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ॥ १६१ ॥

अनिलेन ताडिता वेणवो ये शब्दायन्ते ते कीचकाः ॥ १६१ ॥[2]

ग्रन्थिर्ना पर्वपरुषी

ग्रन्थ्यते ग्रन्थिः। पिपर्त्ति परुः। 'गांठि' [गाँठ] [लोके] ॥[3]

गुन्द्रस्तेजनकः शरः ॥

गां द्राति गुन्द्रः। शृणाति शरः। 'सरहरी' [लोके] ॥[4]

नडस्तु धमनः पोटगलः

'नड गहने'। 'धमि' सौत्रः। पोटः संश्लिष्टो गलोऽस्य[5]। 'नल' [इति ख्यातः]॥[6]

अथो काशमस्त्रियाम् ॥ १६२ ॥

इक्षुगन्धा पोटगलः

काशृ दीप्तौ' (भ्वा० आ० से०) ॥ १६२ ॥ 'कास' [लोके] ॥[7]

मुञ्जमनि तु बल्वजाः ।

वल संवरणे' (भ्वा० आ० से०)। वज गतौ' (भ्वा० प० से०)। वल् वासौ वजश्च। वगई' [लोके] [8]

रसाल इक्षुः

इष्यते इक्षुः। 'इषे क्सु' (उ० ३ ५७)। 'ऊँख' [ख]' [लोके] ॥[9]

तद्भेदाः पुण्ड्रकान्तारकादयः ॥ १६३ ॥

पुण्ड्यते। 'पुडि खण्डने'। 'पवडा' [लोके]। कान्तमृच्छति। 'कतारा' [लोके]॥ १६३ ॥[10]

स्याद्वीरणं वीरतरम्

वीरयति वीरणम् ॥[11]

---

1 Bamboo [10] 2 A sounding bomboo [1] 3 The joint or knot of a bamboo, cane sc [3] 4 Sara, a kind of white reed [3] 5 M गलोस्य 6 The nala reed [3] 7 Kaga, a kind of grass used for making mats sc [4] 8 Vagai, a kind of grass [1] 9 Sugar-cane [2] 10 Different kinds of sugar-cane [1 each] 11 Virana, a kind of fragrant grass [2]

मूलेऽस्योशीरमस्त्रियाम् ।
अभयं नलदं सेव्यमभृणालं जलाशयम् ॥ १६४ ॥
लामज्जकं लघुलयमवदाहेष्टकापथे ।

अस्य वीरणस्य मूले । भयमस्मात् । नलं गन्धं ददाति । मृणालमिव । सादृश्ये नञ् ॥ १६४ ॥ लातिला । सा मज्जाऽस्य[1] । लीयते दाहोऽस्मात्[2] [लघु] लयम् । अवलीयते दाहोऽनेन[3] । इष्टकापथमस्य । उशीर' [इति ख्यातस्य] ॥[4]

नलादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि ॥ १६५ ॥

तृण्यते तृणम् । 'तृणु अदने' (त० उ० से०) । गीर्यते गर्मुत् । 'ग्रो मुट् च' (उ० १.९५) इत्युतिः । श्यामकति । 'गर्मुच्छ्यामाकौ तृणधान्यविशेषौ ॥१६५॥

अस्त्री:कुशः[5] कुथो दर्भः पवित्रम्

कौ शेते कुशः । दभ्यते दर्भः । पूयतेऽनेन[6] पवित्रम् । 'कुश' [इति ख्यातः] ॥[7]

अथ कत्तृणम् ।
पौरसौगन्धिकध्यामदेवजग्धकरौहिषम् ॥ १६६ ॥

कुत्सितं तृणम् । पुरे भवम् । सुगन्धः प्रयोजनमस्य । ध्यायति ध्यामम् । देवैर्जग्धमिव । रोहति रौहिषम् । 'रोहिस' [लोके] ॥ १६६ ॥[8]

छत्रातिच्छत्रपालघ्नौ

पालं क्षेत्रं हन्ति । 'जलजतृणविशेषस्य' ॥[9]

मालातृणकभूस्तृणौ ।

मालाकाराणि तृणान्यस्य । भुवस्तृणम् । पारस्करादिः (६.१.१५७) । द्वे ॥[10]

शष्पं बालतृणम्

शष्प्यते शष्पम् । 'शष हिंसायाम्' (भ्वा० प० से०) । 'नवतृण [स्य]' ॥[11]

घासो यवसम्

अद्यतेऽनेन[12] घासः । यूयते यवसम् । 'घास' [लोके] ॥[13]

---

1. M. मज्जास्य 2. M. दाहोस्मात् 3. M. दाहोनेन 4. Us/ira, the fragrant root of a virana plant [10] 5. B. and K. read कुशम् 6. M पूयतेनेन 7. Kus/a, a kind of holy grass used in several religious ceremonies [4] 8. Kohisa. a kind of fragrant grass [6] 9. Palaghna, a water- growing grass [2] 10. Malatrnta, a kind of fragrant grass [2] 11. Young grass [2] 12. M. अद्यतेनेन 13. Meadow-grass [2].

तृणमर्जुनम् ॥ १६७ ॥

अर्ज्यते । 'तृण'–[मात्रस्य] ॥ १६७ ॥[1]

तृणानां संहतिस्तृण्या नड्या तु नडसंहतिः ।

संहति समूह । 'पाशादिभ्यो य' (४ २ ४९) [तृणनडसमूहयोरेकैकम्] ॥[2]

तृणराजाह्वयस्ताल

'तल प्रतिष्ठायाम्' (चु० प० से०) । 'ताल' [लोके] ॥[2]

नालिकेरस्तु लाङ्गली ॥१६८॥

नालिकामीरयति । 'नरियर' [नारियल] [लोके] ॥१६८॥[3]

घोण्टा तु पूगः क्रमुको गुवाकः खपुरः

घोणते घोण्टा । पुनाति पूगः । क्रामति क्रमुकः । 'गु पुरीषोत्सर्गे' (तु० प० अ०) । 'पिनाकादयश्च' (उ० ४ १५) इति गुवाकः । ख पिपर्ति । 'सुपारी' [लोके] ॥[4]

अस्य तु ।

फलमुद्वेगम्

अस्य पूगस्य फलम् । उद्वेजयति ॥[5]

एते च हिंतालसहितास्त्रय ॥१६९॥

खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः ।

इति वनौषधि वर्गः ॥४॥

एते नालिकेरादयो हिंतालेन सहितास्चत्वारः तृणजातीया द्रुमाः । हीनोऽल्पस्ताल[6] ॥१६९॥ 'खर्ज व्यथने' (भ्वा० प० से०) । केतयति । 'वनखजूरि' [लोके] । अननासो विष्णुकन्द' । 'अननास' [लोके] 'खर्वुज हिमकर्कटम् ।' 'खर्बूज' [लोके] ॥[7]

इति वनौषधि वर्गः ॥४॥

---

1 Grass in general [2] 2 A heap of grass, and a quantity of reeds [1 each] 2 The palm tree [2] 3 Cocoa nut [2] 4 The betel nut tree [5] 5 Betel nut [1] 6 M हीनोऽल्पस्तालः 7 Four kinds of grass-trees (tṛṇadruma) [1 each]

सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केशरी[1] हरिः ।

हिनस्ति सिंहः । मृगाणामिन्द्रः । पञ्चं विस्तृतमास्यमस्य । हरिणी पिङ्गले अक्षिणी यस्य । केशराः स्कन्धवालाः सन्त्यस्य । हरति हरिः । 'अच इः' (उ० ४.१३८) । 'सिंह' [इति ख्यातः][2]

शार्दूलद्वीपिनौ व्याघ्रे

शृणाति शार्दूलः । 'शॄ हिंसायाम्' (क्र्या० प० सें०) । दुल च् (उ० ४.९०) । दुक् दीपौ । द्वीपं चर्मास्त्यस्ति । व्याजिघ्रति । 'बाघ' [लोके] ॥[3]

तरक्षुस्तु मृगादनः ॥१॥

तरं मार्गं क्षिणोति तरक्षुः । मृगय्वादिः (उ० १.३७) । 'तेंदुला' [लोके] ॥१॥[4]

वराहः शूकरो[5] घृष्टिः कोलः पोत्री किरिः[6] किटिः ।
दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ॥२॥

वरमाहन्ति शूकोऽस्त्यस्या[7] । घर्षति[8] । 'घृषु संघर्षे' (भ्वा० प० सें०) । पोत्रं मुखाग्रमस्त्यस्य । किरति । बाहुलकात् किः । केटति । 'किट गतौ' (भ्वा० प० सें०) । 'इगुपधात्कित्' (उ० ४.११९) । दंष्ट्राऽस्त्यस्य[8] । घोणा नासाऽस्य[9] । व्रीह्यादी (निः) (५.२.११६) । क्रोडोऽस्यास्ति[10] । 'क्रुड निमज्जने' (तु० प० सें०) । 'सूअर' [लोके] ॥२॥[11]

कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः ।
मर्कटो वानरः कीशो वनौकाः

कम्पते कपिः । 'कुण्डिकम्प्योर्नलोपश्च' (उ० ४.१४३) इतीन् । प्लवेन गच्छति । शाखासञ्चारी मृगः । वली मुखेऽस्य[12] । मर्कति मर्कटः । 'मर्कः' सौत्रः ग्रहणार्थः । 'शकादिभ्योऽटन्' (उ० ४.८१) । वने राति वनरः, तस्यायं वानरः । 'की' इति शब्दमीष्टे । 'वानर' [इति ख्यातस्य] ॥[13]

---

1. B. and K. read केसरी 2. Lion [6] 3. Tiger [[illegible]] 4. Hyena [2] 5. Majority reads सूकरो 6. B. prefers किरः 7. M. शूकोऽस्त्यस्य 8. M. दंष्ट्रास्त्यस्य 9. M. नासास्य 10. M. क्रोडोस्यास्ति 11. Hog [12] 12. M. मुखेस्य 13. Monkey [9].

अथ भल्लुके ॥३॥

ऋक्षाच्छभल्लभाल्लूकाः

भल्लते हिनस्ति भल्लुक.। 'भल्ल हिंसायाम्' (भ्वा० आ० से०)। बाहुलकादु ॥३॥ ऋक्ष्णोति ऋक्षः। 'ऋक्ष हिंसायाम्' (स्वा० प० से०)। अच्छ अभिमुखं भल्लते। भालयति भालूक । 'भल आमण्डने' (चु० आ० से०) उलूकादि (उ० ४४१)। भल्लतेऽस्तु[1] भल्लूक.। 'भालु' [लोके] ॥[2]

गण्डके खड्गखड्गिनौ।

गच्छति गण्ड । 'गमन्ताड्ड' (उ० १ ११४)। खडति भिनत्ति खड्ग.। गन् कित् (उ० १.१२४)। 'गैंडा' [लोके] ॥[3]

लुलापो महिषो वाहद्विषत्कासरसैरिभाः ॥४॥

लुलति पङ्के, आपते च। 'मह पूजायाम्' (भ्वा० प० से०)। अविमह्यो- टिषच्' (उ० १ ४५)। वाहाना द्विषन्। ईषत् सरति। सीरिपु माति। ततोऽण्[4]। सैरिभ । 'भैंसा' [इति ख्यातस्य] पञ्च ॥४॥[5]

स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः।

शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः ॥५॥

गा विकृता वाच मिनोति। 'डुमिञ् प्रक्षेपे' (स्वा० उ० से०)। 'कृवापा-' (उ० १.१) इत्युण्। सृजति सृगाल । सरति गालयति वेति वा। शालव्यादि [शृगाल] अपि। क्रोशति। 'फे' इत्यव्यक्तं रौति। अमति जम्बुक। 'जमु' अदने' (भ्वा० प० से०)। 'सियार' [लोके] ॥५॥[6]

ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक्।

अवतीति ओतु। 'सितनि—' (उ० १.६९) इति तुन्। बिडमालाति। मार्ष्टि मार्जार। 'कञ्जिमृजिभ्या चित्' (उ० ३.१३७) इत्यारन्। वृषान् मूषकान् दशति। 'बिलारि' [लोके]।[7]

त्रयो गोधारगोधेरगोधेया गोधिका मजे ॥६॥

गोधाया अपत्यम्। 'चदनगोह' [इति ख्यातस्य] ॥६॥[8]

---

1. M. भल्लतेस्तु 2. Bear [4] 3 Khinoceros [3] 4. M. तत्र 5. Buffalo [5] 6. Jackal [10] 7. Cat [5] 8 Iguana [3].

श्वावित्तु शल्यः

श्वान विध्यति । 'शल चलने' (भ्वा० प० से०) । यत् । 'साही' [लोके] ॥[1]

तल्लोम्नि शलली शललं शलम् ।

वृषादित्वात् (उ० १ १०६) कलच् । शललम् । त्रीणि 'साहीकण्टकस्य' ॥

वातप्रमीर्वातमृग

वात प्रमिमीते वाताभिमुख धावनात् । वात इव मृग । निरङ्कुशो मृगविशेष पृषतभेद ॥[2]

कोक ईहामृगो वृक ॥७॥

कोकते । 'कुक वृक आदाने' (भ्वा० आ० से०) । ईहामृगस्येवा [स्य] । 'वीगु' [लोके] ॥७॥[3]

मृगे कुरङ्गवातायुहरिणाजिनयोनय ॥

मृग्यते व्याधै[4] । कौ रङ्गोऽस्य[5] हरिणाकृतिर्महानयम् । वातमयत । उण् । हरति मन । 'श्यास्त्या—' (उ० २ ४६) इतीनच् । ताम्रवर्ण । 'मृग' [इति ख्यात] ॥[6]

ऐणेयमेण्याश्चर्माद्यम्

'एण्या ढञ्' (४ ३ १५९) ॥[7]

एणस्यैणमुभे त्रिषु ॥८॥

एणचर्मादौ तु 'प्राणिरजतादिभ्योऽञ्' (४ ३ १५४) ॥८॥[8]

कदली कन्दली चीनश्चमूरुप्रियकावपि ।
समूरुश्चेति हरिणा अमी अजिनयोनय ॥९॥

के दलति । कन्दे लीयते । चिनोति चीन । चम्वामुरुर्यस्य । शोभनावूरू यस्य । एते हरिणभेदाश्चर्मण्युपयुक्ता ॥९॥[9]

---

1 Porcupine [2] 2 The quill of a procupine [3] 3 A swift antelope [2] 4 Wolf [3] 5 M रङ्गोस्य 6 Deer [5] 7 The skin and horns of a female deer [1] 8 The skin etc of a deer [1] 9 Six varieties of deers [1 each]

कृष्णसाररुरुन्यङ्कुरङ्कुशम्बररौहिषाः ।
गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगा ॥१०॥

कृष्णेन सार शबल । रौति रुरु । जन्वादि (उ० ४ १०२) शरत्पुच्छ-शृङ्ग । न्यञ्चतीति न्यङ्कु । 'नावञ्चे' (उ० १ १७) इति कु । बहुविषाण । रमते रङ्कु । मृगय्वादि (उ० १ ३७) । श वृणोति शबर । रोहिष तृणभेदमत्ति । पृषता सन्त्यस्य । 'चीतर' [लोके] । एति एण, कृष्णहरिण । ऋच्छति ऋश्य । गवय एव 'रोझ' लोके । रोहितो रक्तत्वात् । चमति चमर । एते द्वादशमृगभेदा ॥१०॥[1]

गन्धर्वं शरभो राम सृमरो गवय शश ।
इत्यादयो मृगेन्द्राद्या गवाद्या पशुजातय ॥११॥

शरे माति । रमते । सृ गतौ (भ्वा० प० अ०) । सृघस्यद यमरच् (३ २ १६०) । गामयते गवय । 'शश प्लुतगतौ' (भ्वा० प० से०) । 'खरहा' [लोके] । इत्यादयो ये अत्रोक्ता ये च पूर्वोक्ता सिंहाद्या वक्ष्यमाणाश्च ये गोमेषहस्त्यादय सर्वे ते पशुजातय । पश्यति सर्वमविशेषणेति पशु । 'अर्जिदृशि— (उ० १ २७) इत्यु, पशिश्च ॥११॥[2]

उन्दुरुर्मूषिकोऽप्याखुः

उनत्ति, उन्दुरु । मुष्णाति । मुष्णातेर्दीर्घश्च' (उ० २ ४२) इति किक्न् । आ खनति, आखु । '—खनिशृभ्या डिच्च' (उ० १ ३३) इत्यु । 'मूस' [लोके] ॥[3]

गिरिका बालमूषिका ।

गिरति गिरिका । बाला चासौ मूषिका च ॥ द्वे ॥[4]

सरट. कृकलास स्यात्

सरति सरट । कृक गल लासयति । 'गिर्गिटान' । (गिरगिट) [लोके] ॥[5]

मुशली[6] गृहगोधिका ॥१२॥

मुशलमिव । 'बिछ्तुइया बिस्तुइया' [च लोके] ॥१२॥[7]

---

1 Other twelve kinds of deers [1 each] 2 Six different kinds of animals [1 each] 3 Rat [3] 4 Small mouse [2] 5 Lizard [2] 6 Majority reads ...

लूता स्त्री तन्तुवायोर्णनाभमर्कटका· समाः । -

लुनाति लूता । तन्तून् वयति । ऊर्णेव तन्तुर्नाभावस्य । 'इचापो —' (६.३.६३) इति ह्रस्व । मर्कति । 'मकरी' [लोके] ॥[1]

नीलङ्गुस्तु कृमि

नितरा लङ्गति । 'लगि गतौ' (भ्वा० प० से०) । 'खद शङ्कु—' (उ० १ ३७) इति साधु । क्रामति कृमि । 'क्रमिशति—' (उ ४.१२१) इति किरिदप ॥[2]

कर्णजलौका शतपद्युभे ॥१३॥

कर्णस्य जलौकेव । 'गोजर' [लोके] ॥१३॥[3]

वृश्चिक· शूककीटः स्यात्

वृश्चति वृश्चिक । 'व्रश्चिकृष्यो. किकन्' (उ० २.४०) । शूकयुक्त कीट. । 'ऊर्णादिभक्षकस्य कृमिविशेषस्य' द्वे ॥[4]

अलिद्रुणौतु वृश्चिके ।

अलति अलि । दीर्घादि [आलि.] अपि । द्रुणति द्रुण । 'द्रुण हिंसायाम्' (तु० प० से०) । 'द्रोण.' इत्यन्ये । 'बीछी' [लोके] ॥[5]

पारावत कलरव कपोत

[गुडप्रियस्तीक्ष्णदष्ट्रः । 'चिउटा' । मत्कुणो रक्तबीजक । खट्वाकृमि] परमवति । ततो जात पारावात. । कस्य वायो पोत इव । 'परेवा', 'कबूतर' [इति च लोके] । 'गृहक.' त्वन्य. ॥[6]

अथ शशादनः ॥ १४ ॥

पत्री श्येनः

प्रशस्तं पत्त्रमस्य । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । 'श्यास्त्या—' (उ० २. ४६) इतीनच्[7] । 'बाज' [लोके] ॥[8]

उलूके तु वायसारातिपेचकौ ।

उलति दहति । 'उलूकादय —' (उ० ४ ४१) इति साधु । 'पचिम-

---

1 Spider [4] 2 A small insect [2] 3 Centipede [3] 4. A kindof insect that eats woolen garments[2] 5. Scorpian [2] 6. Pigeon [3] 7. M. इति इनच् 8. Hawk [3].

च्योरिच्योरिच्च—' (उ० ५. ३७) इति वुन् । पेचकः । 'घूक' 'कुचकुचवा' इति च [लोके] ॥[1]

व्याघ्राटः स्याद्भरद्वाजः

व्याघ्रमटति । भरद्वाजस्यापत्यम् । 'मर्दुल' [लोके][2]

खञ्जरीटस्तु खञ्जनः ॥ १५ ॥

खञ्जति । बाहुलकाद् रीटन् । 'खडैचा' [लोके] ॥ १५ ॥

लोहपृष्ठस्तु कङ्कः स्यात्

लोहमिव पृष्ठमस्य । 'ककि गतौ' (भ्वा० आ० से०) । 'ककहडा' [लोके] ॥[4]

अथ चापः किकीदिविः ॥

चपति । 'चप हिंसायाम्' (चु० प० से०) । 'किकी' इति दीव्यति । 'चास' [लोके][5]

कलिङ्गभृङ्गधूम्याटाः

के मूर्ध्नि लिङ्गमस्य । भृङ्ग इव । धूम्या धूमसमूहमटति । 'भुजंटा' [लोके] ॥[6]

अथस्याच्छतपत्रकः ॥ १६ ॥

दार्वाघाटः

दारु आहन्ति 'कठफोरवा' [लोके][7]

अथ सारङ्ग.[8] स्तोकचातक समाः ।

सारमङ्गमस्य । स्तोकं जलमस्य । चतति । चतति । 'चते याचने' (भ्वा० प० से०) । 'पिपीहा' (लोके) ॥[9]

कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ॥ १७ ॥

कृकेन गलेन वक्ति । 'कृकेवच स्वरच' (उ० १.६) इत्युण् । 'कुक आदाने' (भ्वा० आ० से०) । स चासौ कुटति च । 'कुट कौटिल्ये' (तु० प० से०) । 'मुरगा' [लोके] ॥ १७ ॥[10]

1. Owl [3] 2 Sky-bark [2] 3 Wag-tail [2] 4 Heron [2] 5. Blue jay [2] 6 A kind of bird [3] 7. Wood-pecker [2] 8. B reads शारङ्ग. 9. Cataka bird supposed to live only on rain-drops [3]

चटकः कलविङ्कः स्यात् तस्य स्त्री चटका

चटति । 'चट भेदने' (भ्वा० प० से०) । कल वङ्कते गच्छति । पृषोदरादि (६ ३ १०९) । [द्वे 'चटकस्य' एकम् 'चटकस्त्रिया'] ॥[1]

तयोः ।

पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव हि ॥ १८ ॥

चटकायाश्चटकस्य[2] च । 'चटकाया ऐरक्' (४ १ १२८) । चटकाच्च स्त्र्यपत्ये लुग्वक्तव्य (वा० ४ १ १२८) ॥ १८ ॥[3]

कर्करेटुः करेटुः स्यात्

कर्कं रेटति । 'रेटृ भाषणे' (भ्वा० उ० से०) ॥ द्वे ॥[4]

कृकणक्रकरौ समौ ।

'कृ' इति कणति । 'क्र' इति शब्द करोति । द्वे ॥[5]

वनप्रियः परभृतः कोकिलः पिक इत्यपि ॥ १९ ॥

'चत्वारः पर्यायाः' इति युक्त वन प्रियमस्य । काकेन भृत । कोकते । 'सलिकलि—' (उ० १ ५४) इतीलच्[6] । अपि कायति पिक । 'कोइल' (लोके) ॥ १९ ॥[7]

ध्वाङ्क्षे तु करटारिष्टबलिपुष्टसकृत्प्रजाः ।

ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ॥ २० ॥

'का' शब्द कायति । के रटति । न रिष्टमस्य । बलिना पुष्ट । ध्वाङ्क्षति । ध्वाक्षि शब्दे (भ्वा० प० से०) । आत्मान घोषयति । 'वय गतौ' (भ्वा० आ० से०) 'वयश्च' (उ० ३ १२०) इत्यसच् । 'कौआ' (लोके) ॥[8]

द्रोणकाकस्तु काकोलः

द्रोणाख्य काक । काकयति । 'कक लौल्ये' (भ्वा० आ० स०) । 'डोम काक' [इति ख्यात] ॥[9]

---

1 Male and female sparrows [1 each] 2 M चटकाया चटकस्य वा 3 The male and female issue of a sparrow [1 each] 4 Kareṭu (ṭiṭihiri), a kind of bird [2] 5 Krakara, a bird which cries 'kra' [2] 6 M इति इल्च् । 7 Cuckoo [4] 8 Crow [10] 9 Raven [2]

दात्यूह कालकण्ठक ।

दाति मरणमूहते । द्वे ॥[1]

आतायिचिल्लौ

आतायते । 'ताय्—' (भ्वा० आ० से०) । 'सुपि—' (३ २ ७८) इति णिनि । चिल्ल शैथिल्ये' (भ्वा० प० से०) । 'चील्ह' [लोके] ॥[2]

दाक्षाय्यगृध्रौ

'दक्ष वृद्धौ (भ्वा० आ० से०) । 'शृदक्षि—' (उ० ३ ९६) इत्याय्य । ततोऽण्[3] (४ ३ १२०) । गृध्यते । क्रन् (उ० २ २४) । 'गीध' [लोके] ॥[4]

कीरशुकौ समौ ॥ २१ ॥

'की शब्दमीरयति । शुक गतौ (?) । सुग्गा' [लोके] ॥ २१ ॥[5]

क्रुङ् क्रौञ्च

क्रुञ्चे (भ्वा० प० से०) क्विनि (३ २ ५९) प्रज्ञाद्यणि (५ ४ ३८) क्रौञ्च । 'करांकुलि [लोके] ॥[6]

अथ बक कह्व

वक्ति बक । न्यङ्क्वादि (७ ३ ५३) । के जले ह्वयति । 'बकु (गु)ला' [लोके] ॥[7]

पुष्कराह्वस्तु सारस ।

सरसि भव । 'सहरस [सारस] [लोके] ॥[8]

कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामक ॥ २२ ॥

कोकते । चक्रते । रक् (उ० २ १३) । चक्र' इति वाक् यस्य । वचेर्घञ् (३ ३ १९) । रथाङ्गस्य चक्रस्याह्वयो नामास्य । 'चकवाक' [इति ख्यात] ॥ २२ ॥[9]

कादम्ब कलहस स्यात्

कदम्बे समूहे भवति । कलो मधुरवाक् हंस । 'बतक [लोके] ॥[10]

---

1 Gallinule [2] 2 Kite [2] 3 M ततोण् 4 Vulture [2] 5 Parrot [2] 6 Krauñca or curlew [2] 7 Crane [2] 8 Sarasa or Indian crane [2] 9 Ruddy goose [2] 10 Kalahamsa, a kind of goose [2]

उत्क्रोशकुररौ समौ ।

उत्क्रोशति । 'कुङ् शब्दे' (भ्वा० आ० से०) । 'कुवः क्ररन्' (उ०३.१३३) । द्वे । कुररोऽपि क्रौञ्चभेद एव ॥[1]

हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ॥ २३ ॥

हन्ति गच्छति । श्वेता गरुतः पक्षा अस्य । चक्राण्यङ्गान्यस्य । 'सामान्यहंसस्य' चत्वारि ॥ २३ ॥[2]

राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः ।

चञ्चुभिः सहितैश्चरणैर्लोहितैरुपलक्षितास्ते हंसानां राजा । 'रक्तहंसस्य' [एकम्] ॥[3]

मलिनैर्मल्लिकाख्यास्ते

किञ्चिद्धूम्रवर्णैश्चञ्चुचरणैरुपलक्षिताः । 'मल्लिकः' इति आख्या येषाम् । 'धूम्रहंसस्य' [एकम्] ॥[4]

धार्तराष्ट्राः सितेतरैः ॥ २४ ॥

कृष्णैश्चञ्चुचरणैरुपलक्षिताः । धृतराष्ट्रे भवाः । 'कृष्णहंसस्य' [एकम्] ॥२४॥[5]

शरारिराटिराडिश्च[6]

शरं नीरमृच्छति । 'अच इः' (उ० ४.१३८) । अतति । 'अज्यतिभ्यां च' (उ० ४.१३०) इतीण् । आ अटति । इन् (उ० ४.११७) । 'आडी' जलपक्षी ॥[7]

बलाका बिसकण्ठिका ।

बलां कायति । बिसवत्कण्ठोऽस्याः[8] । बकभेदः ॥[9]

हंसस्य योषिद्वरटा

वृणोति वरटा । हंसस्य स्त्री ॥[10]

---

1. Osprey [2] 2. A gander in general [5] 3. Flamingo (a sort of white goose with redlegs and bild) [1] 4. A flamingo with smoke-coloured legs and bill [1] 5. A flamingo with black legs and bill [1] 6. B. reads शरारिराटिरा, डिश्च 7. Ādi, a kind of bird [1] 8. M. बिसवत्कण्ठोऽस्याः 9. Valāka-a kind of crane [2] 10. Female goose [1].

सारसस्य तु लक्ष्मणा ॥ २५ ॥

लक्ष्म विद्यतेऽस्या:[1] । 'सरहस—' स्य पत्नी ॥ २५ ॥[2]

जतुकाऽजिनपत्त्रा स्यात्

जत्विव । इवार्थे कन् (५.३.९६) । अजिनमिव पत्त्रमस्याः । 'चमगुदरो' [लोके] ॥[3]

परोष्णी तैलपायिका ।

परं शत्रुरुष्णं यस्या । तैलं पिबति । 'गादुर' [लोके] ॥[4]

वर्वणा मक्षिका नीला

वरं वणति । पृषोदरादि (६ ३ १०९) । नीलवर्णमक्षिकाया एकम् ॥[5]

सरघा मधुमक्षिका ॥ २६ ॥

सरं गतिमन्तं घातयति । द्वे । 'मधुमाछी' [लोके] ॥ २६ ॥[6]

पतङ्गिका पुत्तिका स्यात्

पतद् अङ्गमस्या । पुत् कुत्सितं तनोति । 'अन्येभ्योऽपि[7]—'(वा० ३.२.१०१) इति ड: । स्वार्थे कन् (५ ३.७५) । मधुमक्षिकाविशेष. ॥[8]

दंशस्तु वनमक्षिका ।

दशति दंश. । द्वे 'डासा' इति ख्यातायाः ॥[9]

दंशी तज्जातिरल्पा स्याद्

'छोन्डासा' [लोके] ॥[10]

गन्धोली वरटा द्वयो: ॥ २७ ॥

गन्धयत्यर्दयति । ओलच् । 'वरटा' 'वरई' [इति च लोके] ॥२७॥[11]

भृङ्गारी चीरुका चीरी झिल्लिका च समा इमाः ।

भृङ्गमाराति । 'ची' इति शब्दं रौति चीरुका । 'चि' इति ईरयति । 'चिल्ल शैथिल्ये' (भ्वा० प० से०) । पृषोदरादित्वात् (६.३ १०९) [redacted] । 'झीगुर' [लोके] ॥[12]

---

1. M. विद्यतेस्या. 2 Female crane (sārasa) [1] 3. Bat [2] 4 Akind of bat [2] 5. Blue fly [1] 6. Honey bee [2] 7. M. अन्येभ्योपि 8 Pataṅgikā, a kind of honey bee [2] 9. Gad-fly [2] 10. Small gad-fly [1] 11. Wasp [2] 12. Cricket [4].

समौ पतङ्गशलभौ

'शल चलने'। 'कृशृशलि—' (उ० ३.१२२) इत्यभच्। 'टीडी' [लोके] ॥[1]

खद्योतो ज्योतिरिङ्गणः ॥ २८ ॥

ज्योतिरिवेङ्गति[2]। 'इगि गतौ' (भ्वा० प० से०)। 'जुगनूं' [लोके] ॥२८॥[3]

मधुव्रतो मधुकरो मधुलिण्मधुपालिनः।
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः ॥ २९ ॥

मधुव्रतं भक्षमस्य। अलो वृश्चिकलाङ्गूलम्। तद्वदिवास्यास्ति। 'अतः—' (५.२.११५) इनिः। द्वौ रेफौ नाम्नि यस्य। बिभर्ति भृङ्गः। भ्राम्यति। 'अतिकमि—' (उ० ३.१३२) इति करन्। अलति। इन् (उ० ४.११७)। 'भंवरा' [लोके] ॥२९॥[4]

मयूरो बर्हिणो बर्हीं नीलकण्ठो भुजङ्गभुक्।
शिखावलः शिखी केकी मेघनादानुलास्यपि ॥३०॥

मयते। खर्वादिः। बर्हमस्यास्ति। 'फलबर्हाभ्यामिनच्' (वा० ५.२.१२२)। मेघनादेनानुलसति। 'मुरैला' [लोके] ॥३०॥[5]

केका वाणी मयूरस्य

के मूर्ध्नि कायते ॥[6]

समौ चन्द्रकमेचकौ।

चन्द्र इव। मेचको वर्णेन। पिच्छस्य चन्द्राकृतेर्द्वे ॥[7]

शिखा चूडा

शेते शिखा। 'चुड समुच्छ्राये' (तु० प० से०)। भिदादित्वात् (३.३.१०४) अङ्दीर्घौ ॥द्वे॥[8]

शिखण्डस्तु[9] पिच्छबर्हे नपुंसके ॥३१॥

शिखाभिर्डयते। 'पिच्छ कुट्टने' (चु० प० से०)। 'बृह वृद्धौ' (भ्वा० प० से०)। अच् (३.१.१३४)। बर्हः। 'मयूरपंखस्य' त्रीणि ॥३१॥[10]

---

1. Grass-hopper [2] 2. M. ज्योतिरिव इङ्गति 3. Fire-fly [2] 4. Bhramara or black bee [11] 5. Peacock [9] 6. The peacock's cry [1] 7. The eye in pecock's tail [2] 8. The peacock's crest [2] 9. B. reads शिखण्डश्च 10. The peacock's tail [3].

खगे विहङ्गविहगविहङ्गमविहायसा ।
शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजा ॥३२॥
पतत्रिपत्रिपतगपतत्पत्ररथाण्डजा ।
नगौकोवाजिविकिरविविष्किरपतत्रय ॥३३॥
नीडोद्भवाः गरुत्मन्त पित्सन्तो नभसङ्गमा ।

खे गच्छति[1] । विहायसि गच्छति । 'विहायसो विहच—' (वा० ३ २ ३८) । 'खच्च डिद्वा' (वा० ३ २ ३८), डि (वा० ३ २ ४८) विहग । विहाययति । 'हय गतौ' (स्वा० प० से०) । सर्वधातुभ्योऽसुन्[2] (उ० ४ १८८) । शक्नोति । 'शकेरुनोन्तोन्त्युनय' (उ० ३ ४९) इतिप्रत्ययचतुष्टयम् । द्विर्जायते ॥ ३२ ॥ पतत्र पत्र वास्त्यस्य । पतेन पक्षेण गच्छति । पतति । पतत् पत्र रथ इव यस्य । वाजा पक्षा सन्त्यस्य । विकिरति । वातीति वि । 'वातेर्डिच्च' (उ० ४ १३३) इतीण् । 'विष्किर शकुनौ—' (६ १ १५०) इति निपात । 'पतेरत्रिन्' (उ० ४ ६९) ॥३३॥ नीडे उद्भव । गरुत पक्षा येषाम् । पतितुमिच्छन्त पित्सन्त । 'पक्षी' [लोके] ॥[3]

तेषा विशेषा हारीतो मद्गु कारण्डव प्लव ॥३४॥
तित्तिरि कुक्कुभो लावो जीवंजीवश्चकोरक ।
कोयष्टिकष्टिट्टिभको वर्तको वर्तिकादय ॥३५॥

एते पक्षिणा विशेषा । हारि मनोहारि इत गमन यस्य । रमण रण्ड । का ईषद् रण्ड वाति ॥३४॥ 'तित्ति' शब्द राति । कि । 'तीतिर' [लोके] । 'कुक्कु' शब्देन भाति । 'वनकुक्कुट' [लोके] । लावयति लाव । जीव जीव जीवयति । चकते चकोरक । 'वठि— (उ० १ ६४) इत्योरन् । क जल यष्टिरिव । 'टिट्टि' शब्देन भाति । 'टिटिहिरी' [लोके] । वर्तते । 'वटई' [लोके] । वर्तकस्त्रियस्तदन्या वर्तिका ॥३५॥[4]

गरुत्पक्षच्छदा पत्र पतत्र च तनूरुहम् ।

गृणाति । 'मृग्रोरुति' (उ० १ ९४) । 'पक्ष परिग्रहे (चु० प० से०) । छाद्यतेऽनेन[5] । पतन्त्यनेन । 'दाम्नी—' (३ २ १८२) इति ष्ट्रन् । पतन्त्र त्रायते । 'पद्' पक्षस्य ॥[6]

---

1 M गछति 2 M सर्वंधातुभ्योसुन् 3 Bird [27] 4 Different kinds of birds [1 each] 5 M छाद्यनेनेन 6 Wing [6]

स्त्री पक्षतिः पक्षमूलम्

पक्षस्य मूलं पक्षतिः ॥[1]

चञ्चुस्त्रोटिरुभेस्त्रियौ ॥ ३६ ॥

'चञ्चु गतौ' (भ्वा० प० से०)। त्रोट्यते। 'ठोर' [लोके] ॥ ३६ ॥[2]

प्रडीनोड्डीनसंडीनान्येताः खगगतिक्रियाः।

प्रकृष्टं डयनम्। डीङः (दि० आ० अ०) निष्ठातस्य नः। एते पक्षिणां गतिविशेषाः ॥[3]

पेशीकोशो[4] द्विहीनेऽण्डम्

पेशीनां मांसखण्डानां कोशो भाण्डागारम्। अमति निस्सारयत्यस्मादण्डः। द्वाभ्यां हीने क्लीबे ॥[5]

कुलायो नीडमस्त्रियाम् ॥ ३७ ॥

कुलमयते। नितरामीड्यते। 'खोंता' 'झोंझ' [इति च] लोके ॥ ३७ ॥[6]

पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः।

पुनाति पोतः। 'हसि—' (उ० ३.८६) इति तन्। पच्यते परिणम्यतेऽनेन'। 'ऋ गतौ' (भ्वा० प० से०)। 'अर्भकपृथुक—' (उ० ५.५३) इति साधुः। डिम्भयति। 'डिभिसंघे'। पर्यंयति। 'पृथु प्रक्षेपे'। 'शव गतौ' (भ्वा० प० से०)। धञन्तात्कन् (५.३.७५)। शिनोतिशिशुः। 'शः कित् सन्वच्च' (उ० १.२०) इत्युः ॥[8]

स्त्रीपुंसौ मिथुनं द्वन्द्वम्

स्त्री च पुमांश्च। 'मिथृ मेधृ संगमे' (भ्वा० उ० से०)। 'क्षुधिपिशि—' (उ० ३.५५) इत्युनन्। द्वौ द्वौ। 'द्वन्द्वं रहस्य—' (८.१.१५) इति निपातः। त्रीणि ॥[9]

युग्मं तु युगलं युगम् ॥३८॥

'युजिरुचि—' (उ० १.१४६) इति मक्। युग्मम्। न्यङ्क्वादित्वात् (७.३.५३) कुत्वम्। युगं लाति ॥३८॥[10]

---

1. The root of a wing [2] 2. Beak or bill [2] 3. Three kinds of the flying of binds [1 each] 4. B. पेशी कोशो 5. Egg [2] 6. Nest [2] 7. M. परिणम्यतेऽनेन 8. The young of any animal or bird [7] 9. Couple [3] 10. Pair [3].

समूहनिवहव्यूहसंदोहविसरव्रजा ।
स्तोमौघनिकरव्रातवारसंघातसंचया ॥३९॥
समुदाय समुदयः समवायश्चयो गण ।
स्त्रिया तु संहतिर्वृन्द निकुरम्ब कदम्बकम् ॥४०॥

समूह्यते । 'ऊह् वितर्के' (भ्वा० आ० से०) । 'वह प्रापणे' (भ्वा० उ० अ०) । निवह । सदुह्यते । विसरति । 'व्रज गतौ' (भ्वा० प० से०) । 'अर्तिस्तु—' (उ० १ १४०) इति स्तुञो (अ० उ० अ०) मन् । आ उह्यतेऽनेन[1] । घञ् (३ ३ १२१) । न्यङ्क्वादि (७ ३ ५३) । नि करोति । ण्यन्ताद्व्रतशब्दाद् घञ् (३ ३ १९) । वार्यतेऽनेन[2] वार । घ (३ ३ ११८) । संहन्यते । घञ् (३ ३ १९) । हनस्त (७ ३ ३२) । 'हो हन्ते —' (७ ३ ५४) । सचीयते । 'एरच्' (३ ३ ५६) ॥ ३९ ॥ समुदायते । 'अय गतौ' (भ्वा० आ० से०) समुदीयते । इण (अ० प० अ०) अच् (३ ३ ५६) । समवाय्यते । 'अय गतौ' (भ्वा० आ० से०) । गण्यते । 'गण सघाते' (चु० उ० से०) । सहन्यते । वृणोति वृन्दम् । 'अब्दादयश्च' (उ० ४ ९८) इति साधु । निकुरति । 'कुर छेदने' (तु० प० से०) । अम्बच् । कदम्बयते । द्वाविंशति ॥४०॥[3]

वृन्दभेदा समैर्वर्गः

समैरुपलक्षितम् । वृज्यते वर्ग ॥[4]

संघसार्थौ तु जन्तुभिः ।

सजातीयैर्जन्तुभिरुपलक्षितम् । सरति । 'सर्तेर्णित्' (उ० २ ५) इति थन् ॥[5]

सजातीयै कुलम्

सजातीयैरेव समूहे ॥[6]

यूथं तिरश्चा पुनपुंसकम् ॥४१॥

'यु मिश्रणे' (अ० प० से०) । '—पृष्ठयूययूथ—' (उ० २ १२) इति साधु । तिर्यक्समूहे यूथम् ॥४१॥[7]

1 M उह्यतेनेन 2 वार्यतेनेन । 3 Multitude or Collection [22] 4 A class of similar things e g brāhmaṇa-varga, s'aila varga etc [1] 5 Group (as pakṣi sangha, manuṣya-sangha &c) [1] 6 Race or family [1] 7 A flock of birds [1]

पशूनां समजः

'अज गत्यादौ' (भ्वा० प० से०) । अप् (३ ३ ६९) ॥[1]

अन्येषां समाजः

अन्येषां सघः समाजः । घञ् (३ ३ १९) ॥[2]

अथ सधर्मिणाम् ।

स्यान्निकायः

निचीयते । घञि कुः ॥[3]

पुञ्जराशी तूत्करः कूटमस्त्रियाम् ॥४०॥

पुञ्ज्यते पुमांसः जयति वा पुञ्जः । उत्कीर्यते । कूटयति । 'धान्यादेरुच्छ्रितवृन्दस्य' ॥४२॥[4]

कापोतशौकमायूरतैत्तिरादीनि तद्गणे ।

कपोतानां समूहः कापोतम् । एवं शुकानां मयूराणाम् ॥[5]

गृह्यासक्ताः पक्षिमृगाः छेकास्ते गृह्यकाश्च ते ॥४३॥

इति सिंहादिवर्गः ॥५॥

छ्यति छेकः । 'छो छेदने' (दि० प० अ०) । बाहुलकादीषन् । गृह्यते गृह्यः । क्यप् (३ १ ११९) ॥४३॥[6]

इति सिंहादिवर्गः ॥ ५ ॥

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।

मनोरपत्यम् । 'मनोर्जातावञ्यतौ षुक् च' (४ १.१६१) । म्रियन्ते मृताः । ततः स्वार्थे यत् (वा० ५ ४ ३६) । नरति । 'नॄ नये' (भ्वा०, क्र्या० प० से०) अच् (३ १ १३४) ॥[7]

स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥१॥

पुनाति । 'पूञो डुम्सुन्' (उ० ४ ७७) । पञ्चभिर्भूतैर्जन्यते । घञ् (३ ३ १९) । 'पुर अग्रगमने'[8] (तु० प० से०) । 'पुरः कुषन्' (उ० ४ ७४) ।

---

1 A multitude of animals [1] 2 An assembly of human beings [1] 3 An association of kersons who perform like duties [1] 4 M कुप्यति 5 A sheat of grain [3] 6 A flock of pigeons, parrots, peacocks and frankoline patriges [1 each] 7 Tame birds or animals [2] 8 Mankind [6]

पृषोदरादित्वात् (६ ३ १०९) पक्षे दीर्घः । पुरि शेते वा । 'नयतेर्डिच्च' (उ० २ १००) इत्यृन् । 'मनुष्य [जातौ] पुरुष [स्य]' ॥ १ ॥[1]

स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥

स्त्यायेते शुक्रशोणिते अस्याम् ।' स्त्यायतेर्ड्रट्' (उ० ४ १६५) । 'युष' सौत्र सेवार्थ । 'हसृरुहि—' (उ० १ ९७) इत्यति । अल्प बलमस्या । योषति । 'नृनरयोर्वृद्धिश्च' इति ङीष् । सीमन्तोऽस्त्यस्या ।[2] 'वहो धश्च' (उ० १ ८३) इत्यूः । प्रतीप द्रष्टु शीलमस्या । वमति स्नेहम् । ज्वालादि (३ १ १४०) । वन्यते वनिता । मह्यते । 'सलिकलि—' (उ० १ ५४) इतीलच् ॥ २ ॥[3]

विशेषास्तु

स्त्रीणा विशेषा ॥

अङ्गना भीरु कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥
सुन्दरी रमणी रामा

प्रशस्तान्यङ्गान्यस्या । 'भिय क्रुक्लुकनौ' (३ २ १७४) । कामोऽस्त्यस्या [4] । वामे सुन्दरे लोचने यस्या । प्रमदो हर्षोऽस्त्यस्या [5] । मानोऽस्त्यस्या [6] । कम्यते स्म । 'लल ईप्सायाम्' युच् (उ० २ ७८) । प्रशस्तो नितम्बोऽस्या.[7] ॥ ३ ॥ सुष्ठु उनत्त्यरीन् । 'उन्दी' (रु० प० से०) । पृषोदरादि (६. ३ १०९) । रमयति । ल्युट् । ज्वालादित्वात् (३ १ १४०) ण । रामा ।[8]

कोपना सैव भामिनी ।

'भामक्रोध' (भ्वा० आ० से०) । आवश्यके णिनि (३. ३ १७०) ॥[9]

वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥

वर आरोहो नितम्बोऽस्या [10] । मत्तेव काशते । वरवर्णोऽस्त्यस्या [11] । अत्यन्तोत्कृष्टस्त्री' ॥ ४ ॥[12]

---

1 Man [5] 2 M सीमन्तोस्त्यस्या 3 Woman [11] 4 M कामोस्त्यस्या 5 M हर्षोस्त्यस्या 6 M मानोस्त्यस्या 7 M नितम्बोस्या 8 Twelve kinds of beautiful women [1 each] 9 A passionate woman [2] 10 M नितम्बोस्या 11 M वरवर्णोस्त्यस्या. 12 An xecellent woman [4]

कृताभिषेका महिषी

कृतोऽभिषेकोऽस्याः[1] ॥[2]

भोगिन्योऽन्या नृपस्त्रियः ।

अन्या महिषीभिन्ना॥[3]

पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥
भार्या जायाथ पुंभूम्नि दाराः

'पत्युर्नो यज्ञसंयोगे' (४. १. ३३) । पाणिर्गृहीतोऽस्याः[4] । द्वयोः पूरणी । सहधर्म ऽस्त्यस्याः[5] ॥ ५ ॥ भ्रियते भार्या । ण्यत् (३. १. १२४) । जायतेस्याम्[6] । 'जनेर्यक्' (उ० ४. ११०) । दारयन्ति भ्रातॄन् । घञ् (वा० ३. ३. २०) । सप्त ॥[7]

स्यात्तु कुटुम्बिनी ।
पुरन्ध्री

कुटुम्बमस्त्यस्याः । पुरं धारयन्ति । 'संज्ञाया भृतॄवृ–' (३. २. ४६) इति खच् । पृषोदरादिः (६. ३. १०९) । 'पुत्रादिमत्याः सधवायाः' द्वे ॥[8]

सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥

शोभनं चरित्रमस्याः । 'अस भुवि' (अ० प० से०) । 'श्नसोरल्लोपः' (६. ४. १११) ङीप् (४. १. ६) । साध्नोति परलोकम् । 'कृवापा—' (उ० १. १) इत्युण् । चत्वारि ॥[9]

कृतसापत्निकाध्यूढाधिविन्ना[10]

सपत्न्या भावः सापत्नी । ष्यञन्तात् (५. १. २४) ङीप् (४. १. ४१) । ततः कन् (५. ३. ७५) । कृता सापत्निका यस्याः । अधि उपरि स्त्र्युद्वहनमस्याः । अधि उपरि विघ्नं लाभोऽस्याः[11] । 'अनेकभार्यस्य प्रथमभार्या' ॥[12]

---

1. M. कृतोभिषेकोस्याः 2. A consecrated queen [1] 3. Unconsecrated queens [1] 4. M. पाणिर्गृहीतोस्याः 5. M. सहधर्मोस्त्यस्याः 6. M. जायतेस्याम् 7. Wife [7] 8. A woman whose husband and children are living [5] 9. A virtuous woman or cheste wife [4] 10. B. reads कृतसापत्निकाध्यूढाधिविन्ना 11. M. लाभोस्याः 12. A wife, whose husband has married another wife [3].

पृषोदरादित्वात् (६ ३ १०९) पक्षे दीर्घं । पुरि शेते वा । 'नयतेर्डिच्च' (उ० २ १००) इत्यृन् । 'मनुष्य [जातौ] पुरुष [स्य]' ॥ १ ॥[1]

स्त्री योषिदबला योषा नारी सीमन्तिनी वधू ।
प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥

स्त्यायेते शुक्रशोणिते अस्याम् ।' स्त्यायतेर्ड्रट्' (उ० ४ १६५) । 'युष' सौत्र सेवार्थ । 'हृसृरुहि— (उ० १ ९७) इत्यति । अल्प बलमस्या । योषति । 'नृनरयोर्वृद्धिश्च' इति ङीन् । सीमन्तोऽस्त्यस्या ।[2] 'वहो धश्च' (उ० १ ८३) इत्यू । प्रतीप द्रष्टु शीलमस्या । वमति स्नेहम् । ज्वलादि (३ १ १४०) । वन्यते वनिता । मह्यते । 'सलिकलि—' (उ० १ ५४) इतीलच् ॥ २ ॥[3]

विशेषास्तु

स्त्रीणा विशेषा ॥

अङ्गना भीरु कामिनी वामलोचना ।
प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥
सुन्दरी रमणी रामा

प्रशस्तान्यङ्गान्यस्या । भिय क्रुक्लुकनौ (३ २ १७४) । कामो स्त्यस्या[4] । वामे सुन्दरे लोचने यस्या । प्रमदो हर्षोऽस्त्यस्या[5] । मानोऽस्त्यस्या[6] । कम्यते स्म । 'लल ईप्सायाम्' युच् (उ० २ ७८) । प्रशस्तो नितम्बोऽस्या[7] ॥ ३ ॥ सुष्ठु उनत्त्यरीन् । 'उन्दी (रु० प० से०) । पृषोदरादि (६ ३ १०९) । रमयति । ल्युट् । ज्वालादित्वात् (३ १ १४०) ण । रामा ।[8]

कोपना सैव भामिनी ।

'भामक्रोध (भ्वा० आ० से०) । आवश्यके णिनि (३ ३ १७०) ॥[9]

वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥

वर आरोहो नितम्बोऽस्या[10] । मत्तव काशते । वरवर्णोऽस्त्यस्या[11] । अत्यन्तोत्कृष्टस्त्री' ॥ ४ ॥[12]

---

1 Man [5] 2 M सीमन्तोस्त्यस्या 3 Woman [11] 4 M कामोस्त्यस्या 5 M हर्षोस्त्यस्या 6 M मानोस्त्यस्या 7 M नितम्वोस्या 8 Twelve kinds of beautiful women [1 each] 9 A passionate woman [2] 10 M नितम्वोस्या 11 M वरवर्णोस्त्यस्या 12 An xecellent woman [4]

कृताभिषेका महिषी

कृतोऽभिषेकोऽस्याः[1] ॥[2]

भोगिन्योऽन्या नृपस्त्रियः ।

अन्या महिषीभिन्ना॥[3]

पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥
भार्या जायाथ पुंभूम्नि दाराः

'पत्युर्नो यज्ञसंयोगे' (४. १. ३३) । पाणिर्गृहीतोऽस्याः[4] । द्वयोः पूरणी । सहधर्मोऽस्त्यस्याः[5] ॥ ५ ॥ भ्रियते भार्या । ण्यत् (३. १. १२४) । जायतेऽस्याम्[6] । 'जनेर्यक्' (उ० ४. ११०) । दारयन्ति भ्रातॄन् । घञ् (वा० ३. ३. २०) । सप्त ॥[7]

स्यात्तु कुटुम्बिनी ।

पुरन्ध्री

कुटुम्बमस्त्यस्याः । पुरं धारयन्ति । 'संज्ञायां भृतॄवृ–' (३. २. ४६) इति खच् । पृषोदरादिः (६. ३. १०९) । 'पुत्रादिमत्याः सधवायाः' द्वे ॥[8]

सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥

शोभनं चरित्रमस्याः । 'अस भुवि' (अ० प० से०) । 'श्नसोरल्लोपः' (६. ४. १११) ङीप् (४. १. ६) । साध्नोति परलोकम् । 'कृवापा—' (उ० १. १) इत्युण् । चत्वारि ॥[9]

कृतसापत्निकाध्यूढाधिविन्ना[10]

सपत्न्या भावः सापत्नी । व्यञ्जनात् (५. १. २४) ङीप् (४. १. ४१) । ततः कन् (५. ३. ७५) । कृता सापत्निका यस्याः । अधि उपरि रूढमुद्वहनमस्याः । अधि उपरि विन्नं लाभोऽस्याः[11] । 'अनेकभार्यस्य प्रथमभार्या' ॥[12]

---

1. M. कृतोभिषेकोस्याः 2. A consecrated queen [1] 3. Unconsecrated queens [1] 4. M. पाणिर्गृहीतोस्याः 5. M. सहधर्मोस्त्यस्याः 6. M. जायतेस्याम् 7. Wife [7] 8. A woman whose husband and children are living [2] 9. A virtuous woman or chaste wife [4] 10. B. reads कृतसपत्निकाध्यूढाधिविन्ना 11. M. लाभोस्याः 12. A wife, whose husband has married another wife [3].

समान स्याति । 'समाने ख्य —' (उ० ४ १३६) इतीण् । वयसा तुल्या । 'नौवयोधर्म—' (४ ४ ९१) इति यत् । त्रीणि ॥[1]

अथ पतिवत्नी सभर्तृका

पतिरस्त्यस्या । द्वे ॥[2]

वृद्धा पलिक्नी

वर्द्धते वृद्धा । क्त । पलितमस्त्यस्या । 'छन्दसि क्नमेके' (वा० ४ १ ३९) । द्वे ॥[3]

प्राज्ञी तु प्रज्ञा[4]

प्रजानाति । 'आतश्च—' (३ १ १३६) इति क । 'स्वयज्ञाभ्या द्वे ॥[5]

प्राज्ञा तु धीमती ॥ १२ ॥

प्रज्ञास्त्यस्या । द्वे ॥ १२ ॥[6]

शूद्री शूद्रस्य भार्या स्यात्

शूद्रस्य स्त्री । पुयोगे ङीप् (४ १ ४८) ॥[7]

शूद्रा तज्जातिरेव तु[8] ।

शूद्रोत्पन्नाया त्वजादिपनाट्टाप् ॥[9]

आभीरी तु महाशूद्री जातिपुयोगयो समा ॥ १३ ॥

आभीरस्य स्त्री । जातौ पुयोगे च (४ १ ४८) ङीप् । एव महाशूद्री । या तु महती शूद्री तत्र टाबेव । 'ब्राह्मणा [त्] शूद्रकन्यायामाभीरो नाम जायते ॥ १३ ॥[10]

अर्याणी स्वयमर्या स्यात्

अर्यक्षत्रियाभ्या वा (वा० ४ १ ४९) [इति] स्वार्थे ङीपानुकौ । स्वय पुयोग विना । 'वैश्यायाः' द्वे ॥[11]

---

1 A female friend [3] 2 A woman whose husband is alive [2] 3 An old grey haired woman [2] 4 B prefers the following order प्रज्ञा and प्राज्ञा 5 A wise woman [2] 6 An intelligent woman [2] 7 The wife of a Sudra [1] 8 B and K read च in place of तु 9 A woman of the Sudra tribe [1] 10 Either a cowherd's wife or woman of a very low Sudra tribe [2] 11 A woman of the Vaisya tribe [2]

क्षत्रिया क्षत्रियाण्यपि ।

[एवम् । द्वे] ॥[1]

उपाध्यायाप्युपाध्यायी

उपेत्याधीयतेऽस्या[2] । 'विद्योपदेशिन्या' द्वे ॥[3]

स्यादाचार्यापि च स्वतः ॥ १४ ॥

स्वयं मन्त्रव्याख्यात्री ॥ १४ ॥[4]

आचार्यानी तु पुंयोगे

आचार्यस्य स्त्री ॥[5]

स्यादर्यी

एवं पुंयोगे अर्यी ॥[6]

क्षत्रियी तथा ।

क्षत्रियी ॥[7]

उपाध्यायान्युपाध्यायी

उपाध्यायस्य स्त्री । मातुलोपाध्याययोरानुग्वा (वा० ४ १ ४९) ॥[8]

पोटा स्त्रीपुंसलक्षणा ॥ १५ ॥

स्तनश्मश्रुवादियुक्ता स्त्री पोटा ॥ १५ ॥[9]

वीरपत्नी वीरभार्या

वीरः पतिरस्याः । वीरस्य भार्या । द्वे ॥[10]

वीरमाता तु वीरसूः ।

वीरस्य माता । वीरं सूते । द्वे ॥[11]

जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥ १६ ॥

जातमपत्यमस्याः । चत्वारि ॥ १६ ॥[12]

---

1 A women of the Kṣatriya caste [2] 2 M उपेत्याधीयतेस्या 3 A female preceptor [2] 4 A spiritual preceptress [1] 5 The wife of a spiritual preceptor [1] 6 The wife of a Vaiśya [1] 7 The wife of a Kṣatriya [1] 8 The wife of a preceptor [2] 9 A woman with beard or such other masculine features [1] 10 The wife of a hero [2] 11 The mother of a hero [2] 12 A woman recently delivered [4]

स्त्री नग्निका कोटवी स्यात्

'कुट कौटिल्ये' (तु० प० से०) कोट वेति । 'नग्नाया' द्वे ॥[1]

दूती संचारिके समे ।

दूयन्तेऽनया[2] । 'दूङ् उप (परि) ताप (दि० आ० से०) । क्त । संचारयति । द्वे ॥[3]

कात्यायन्यर्धवृद्धा या काषायवसनाधवा[4] ॥ १७ ॥

कतस्यापत्यम् । काषायवस्त्रधारिण्यर्धवृद्धा या विधवा ॥ १७ ॥[5]

सैरन्ध्री परवश्मस्था स्ववशा शिल्पकारिका ।

सीर धरति सीरन्ध्र । मूलविभुजादि (वा० ३ २ ५) । तस्येयम् । एवम् ॥[6]

असिक्नी स्यादवृद्धाया प्रेष्यान्तःपुरचारिणी ॥ १८ ॥

या युवती प्रेष्यान्तश्चारिणी साशिक्नी । छन्दसि क्नपके (वा० ४ १ ३९) इत्यसिताया क्न ॥ १८ ॥

वारस्त्री गणिका वेश्या रूपाजीवा

वारस्य वृन्दस्य स्त्री । गण समूहोऽस्त्यस्या[8] । वेशेन नपथ्येन शोभते । 'कर्मवेशाद्यत्' (५ १ १००) । वस्ता ॥[9]

अथ सा जनैः ।

सत्कृता वारमुख्या स्यात्

वारे वेश्यावृन्दे मुख्या ॥[10]

कुट्टनी शम्भली समे ॥ १९ ॥

कुट्टयति । ल्युट् (३ ३ ११३) । श सुखं रमत । 'भल परिभाषणे' (भ्वा० आ० से०) । द्वे ॥ १९ ॥[11]

विप्रश्निका त्वीक्षणिका दैवज्ञा

---

1 A naked woman [2] 2 M दूयन्तेनया 3 A female messenger [2] 4 B reads कषायवसनाधवा 5 A middle aged widow attired in red clothes [1] 6 An independent female artizan working in another person's house [1] 7 A young maid servant of the harem [1] 8 M गणूहास्त्यस्या 9 Prostitute [4] 10 The chief of a number of harlots [1] 11 Bawd [2]

विविध प्रश्नोऽस्त्यस्या[1]। कन्। शुभाशुभयोरीक्षणमस्त्यस्या । दैवं शुभाशुभं जानाति । त्रीणि 'शुभाशुभलक्षणज्ञाया' ॥[2]

अथ रजस्वला।

स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि ॥ २० ॥
ऋतुमत्यप्युदक्यापि

रजोऽस्त्यस्या[3]। वलच् (५ २ ११२)। स्त्रीधर्मो रजोऽस्त्यस्याः[4]। अवीरा तत्काले वीरसम्बन्धरहिता। अत्रेरपत्यमात्रेयी तद्वदगम्या। मलमस्त्यस्या. ॥ २० ॥ ऋतुरस्त्यस्या । उदकमस्त्यस्या । संज्ञायाम् (?) यत् ॥[5]

स्याद्रज पुष्पमार्तवम्।

रज्यतेऽनेन[6]। 'भूरञ्जिभ्या किन्' (उ० ४. २१६) इत्यसुन्। पुष्यते। ऋतुरेव। प्रज्ञाद्यण् (५ ४ ३८) ॥[7]

श्रद्धालुर्दोहदवती

श्रद्धास्त्यस्या । दोहद गर्भिण्यभिलाषोऽस्त्यस्या[8] । 'इच्छा विशेषवत्या' द्वे ॥[9]

निष्कला विगतार्तवा ॥ २१ ॥

निर्गत कल शुक्रमस्या । 'रजोहीनाया' द्वे ॥ २१ ॥[10]

आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी।

आपन्न सत्त्वो जन्तुरस्याम्। गुरुर्गर्भोऽस्त्यस्या[11]। व्रीह्यादि (५ २ ११६) अन्तरस्त्यस्या गर्भ । चत्वारि ॥[12]

गणिकादेस्तु गाणिक्य गार्भिण यौवतं गणे ॥ २२ ॥

गणिकाना[13] समूहे यञ् (वा० ४ २ ४०)। युवतीना समूह । यन्तात् 'भिक्षादिभ्योऽण्' (४ २ ३८) ॥२२॥ 'यूनस्ति' इति त्यन्तस्य तु 'भस्याढे—'

1 M प्रश्नोरत्यस्या 2 A female fortune teller [3] 3 M रजोस्त्यस्या 4 M रजास्त्वस्या 5 A woman during her menstruation [8] 6 M रज्यतेनेन 7 Menstruation [3] 8 M -भिलापोस्त्यस्या 9 A pregnant woman longing for anything [2] 10 A woman in whom the menstrual discharge has ceased [2] 11 M गुरुगर्भोस्त्यस्या 12 A pregnant woman [4] 13 M. गणिकाणां।

(वा० ६ ३ ६५) इति पुम्वद्भावे (वा० ६ ३ ३५) 'अन्' (६ ४ १३७) इति प्रकृतिभावान् यौवनम्' ॥ २२ ॥[1]

पुनर्भूर्दिधिषूरूढाद्विः

पुनर्भवति संस्कृता । दधाति पापं दिधिषू । 'अन्दूदृम्भू–' (उ० १ ९३) इति साधु । वारद्वयमूढा विवाहिता ॥[2]

तस्या दिधिषु[3] पतिः ।

तस्या. पति दिधिषु । दिधिषुमात्मन इच्छति । क्यजन्तात् (३. १. ८) क्विप् (३. २ १७८) ॥[4]

स तु द्विजोऽग्रे दिधिषु[5] सैव यस्य कुटुम्बिनी ॥ २३ ॥

अग्रे प्रधानं दिधिषुर्यस्य । पुनर्भूर्भार्यैव यस्य प्रधानम् ॥ २३ ॥[6]

कानीनः कन्यकाजातः सुतः

कन्याया अनूढाया अपत्यम् । 'कन्यायाः कनीन च' (४ १. ११६) । द्वे ॥[7]

अथ सुभगासुतः ।

सौभागिनेयः

सुभगाया अपत्यम् । 'कल्याण्यादीनामिनङ्' (४ १ १२६) ॥[8]

स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥

परस्त्रिया अपत्ये। इनङ् (४ १ १२६) । उभयपदवृद्धि (७ ३ १९) ॥ २४ ॥[9]

पैतृष्वसेयः स्यात् पैतृष्वस्रीयश्च पितृष्वसुः सुतः

'पितृष्वसुश्छण्' (४ १ १३२) । 'ढकि लोप ' (४. १. १३३) च ॥[10]

मातृष्वसुश्चैवम्

मातृश्वसुश्चेति । प्राग्वत् ॥[11]

---

1 A number of prostitutes, pregnant women, and young women [1 each] 2 A woman married twice [2] 3 B and K read दिधिषू 4 The husband of a woman married [1] 5 B and K read दिधिषू 6 A man of one of the first three castes who marries a married before [1] 7 The son of an unmarried woman [1] 8 The son of a favourite wife [2] 9. Adulterine (born from another's wife) [1] 10 The son of a paternal aunt [2] 11 The son of a mother's sister [2]

वैमात्रेयो विमातृज ॥ २५ ॥

विरुद्धा माता विमाता । तदपत्ये शुभ्रादित्वात् (४ १ १२३) ढक् ॥[1]

अथ बान्धकिनेय स्याद्वन्धुलश्चासतीसुत ।
कौलटेय कौलटेर

बन्धक्या अपत्यम् । बन्धन लाति । कुलटाया अपत्यम् । ढक् (४ १ १२०) । 'क्षुद्राभ्यो वा' (४ १ १३१) इति ढ्रक् ॥ २६ ॥[2]

भिक्षुकी तु सती यदि ॥ २६ ॥
तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मज ।

सत्ययुक्ता या भिक्षुकी तदपत्य कौलटिनेय । 'कुलटाया वा' (४ १ १२७) इतीनङ् ॥[3]

आत्मजस्तनय सूनु सुत पुत्र ।

आत्मनो देहाज्जात । तनोति कुलम् । 'वल्मिलि—' (उ० ४ ९९) इति कयन् । सूते । 'सुव कित्' (उ० ३ ३५) इति नु । 'पु प्रसवे' (भ्वा० प० अ०) । क्त (३ २ १०२) । पुन्नाम्नो नरकात्त्रायते ॥[4]

स्त्रियां त्वमी ॥ २७ ॥

आहुर्दुहितर सर्वे

स्त्रीलिङ्गास्वेत दुहितर वदन्ति । दोग्धि दुहिता । 'नप्तृनेष्टृ—' (उ० २ ९५) इति साधु ॥[5]

अपत्य तोक तयो समे ।

न पतत्यनेन य । 'तु' सौत्रो हिंसादौ । बाहुलकात्क । तयो तनय दुहित्रो ॥[6]

स्वजाते त्वौरसौरस्यौ

स्वस्माज्जात । उरसा निर्मित । 'उरसोऽण्' च' (४ ४ ९४) ॥[7]

तातस्तु जनक पिता ॥ २८ ॥

तनोति तात । 'दुतनिभ्या दीर्घश्च' (उ० ३ ९०) इति क्त । जनयति । पातीति पिता । 'नप्तृनेष्टृ—' (उ० २ ९५) इति साधु ॥ २८ ॥[8]

1 The son of a step-mother [2] 2 The son of an unchaste woman [5] 3 The son of a chaste female begger [2] 4 Son [5] 5 Daughter [6] 6 Child [2] 7 M उरसेग 8 A legitimate child [2] 9 Father [3]

जनयित्री प्रसूर्माता जननी

[धाविका दुग्धदा धात्री धाविको दुग्धदापतिः ।]

जनयति । प्रसूते । माति गर्भोऽस्याम्[1] ॥[2]

भगिनी स्वसा ।

भग कल्याणमस्त्यस्या । सुष्ठु अस्यति । 'स्वसेऋन्' (उ० २ ९६) । द्वे ॥[3]

ननन्दा तु स्वसा पत्यु

न नन्दति । 'नञि नन्दे ' (उ० २ ९८) इति ऋन् ॥[4]

नप्त्री पौत्री सुतात्मजा ॥ २९ ॥

न पतन्ति पितरोऽनया । पुत्रस्यापत्य स्त्री । विदाद्यञ् (४ १ १०४) ॥ २९ ॥[5]

भार्यास्तु भ्रातृवर्गस्य यातर स्यु परस्परम् ।

यतन्ते यातर । 'यतेर्वृद्धिश्च' (उ० २ ९७) इत्यृन् ॥[6]

प्रजावती भ्रातृजाया

प्रजाऽस्त्यस्या[7] । भ्रातुर्जायाद्वे ॥[8]

मातुलानी तु मातुली ॥ ३० ॥

मातुलस्य पत्नी । मातुलोपाध्याययोरानुग्वा (वा० ४ १ ४९) ॥ ३० ॥[9]

पतिपत्न्यो प्रसू श्वश्रू

पतिपत्न्योर्माता श्वश्रू ॥[10]

श्वशुरस्तु पिता तयो ।

तयो पिता श्वशुर । शु पूजित कृत्वा अश्नुते । 'शावशे –' (उ० १ ४४) इत्युरन् ॥[11]

पितुर्भ्राता पितृव्य स्यात् मातुर्भ्राता तु मातुल ॥ ३१ ॥

---

1 M गर्भोऽस्याम् 2 Mother [3] 3 Sister [2] 4 Husband's sister [1] 5 Grand-daughter [3] 6 The wife of a husband's brother [1] 7 M प्रजाऽस्यस्य 8 Brother's wife [2] 9 The wife of a maternal uncle [2] 10 Mother-in law (a wife's or husband's mother) [1] 11 Father in law (a wife's or husband's father) [1]

'पितृव्यमातुलमातामह–' (४ २ ३६) इति निपात्यन्ते ॥ ३१ ॥[1]

श्यालः स्युर्भ्रातर पत्न्या

श्यायते । 'श्यैङ् गतौ' (भ्वा० आ० अ०) । बाहुलकात्कालन् ॥[2]

स्वामिनो देवृदेवरौ ।

स्वामिन पत्युर्भ्राता कनिष्ठ । दीव्यति । 'अर्तिकमि–' (उ० ३ १३२) इत्यर । 'भ्रातापत्न्या श्यालक स्यात्स्वसा स्याली च शालिका ॥'[3]

स्वस्त्रीयो भागिनेयः स्यात्

स्वसुरपत्यम् । 'स्वसुश्छ' (४ १ १४३) । भगिन्या अपत्यम् ॥[4]

जामाता दुहितु पतिः ॥ ३२ ॥

जाया मिमीते । 'नप्तृ नेष्टृ–' (उ० २ ९५) इति साधु ॥ ३२ ॥[5]

पितामह पितृपिता

'मातृपितृभ्या पितरि डामहच्' (वा० ४ २ ३६)॥[6]

तत्पिता प्रपितामह ।

तस्य पितामहस्य पिता । प्रकर्षेण पितामह ॥[7]

मातुर्मातामहाद्यवम्

मातु पिता मातामह ॥[8]

सपिण्डास्तु सनाभयः ॥ ३३ ॥

सह पिण्डेन वर्तते । समानो नाभिर्मूलपुरुषोऽस्य[9] । सप्तमपुरुषावधय सपिण्डा ॥ ३३ ॥[10]

समानोदर्यसोदर्यसगर्भ्यसहजा. समाः ।

समाने उदरे शयित । 'विभाषोदरे' (६ ३ ८८) सभाव । समाने गर्भे भव । सह तुल्ये उदरे जात । चत्वारि ॥[11]

---

1 A paternal uncle, and maternal uncle [1] 2 Wife's brother [1] 3 Husband s younger brother [2] 4 The son of a sister [2] 5 Son in law (1) 6 Grandfather [2] 7 A great grand father [1] 8 Grand father and great grand father (maternal) [1 each] 9 M न भिमूलपुरुषोस्य 10 *Sapinda* [2] 11 Brother (uterine) [4].

सगोत्रबान्धवज्ञातिबन्धुस्वस्वजना समा ॥ ३४ ॥

समान गोत्र कुलमस्य । बध्नाति बन्धु । 'भृमृशीङ्—' (उ० १ १०) इत्यु । प्रज्ञादिभ्यश्च (५ ४ ३८) बान्धव । ज्ञायते ज्ञाति । 'स्वन शब्दे' (भ्वा० प० से०) । 'अन्येभ्योऽपि[1]—' (वा० ३ ३ १०१) इति ड । स्व आत्मीयश्चासौ जनश्च । षट् ॥ ३४ ॥[2]

ज्ञातेय बन्धुता तेषा क्रमाद्भावसमूहयो ।

ज्ञातेर्भाव । 'कपिज्ञात्योर्ढक्' (५ १ १२७) । बन्धूना समूह । 'ग्रामजनबन्धुभ्यस्तल्' (४ २ ४३) ॥[3]

धव प्रिय पतिर्भर्ता

धवति धव । प्रीणाति प्रिय । क (३ १ १३५) । 'पातर्डति' (उ० ४ ५७) । बिभर्ति । भृञ (जु० उ० से०) तृच् (३ १ १३३) । चत्वारि ॥[4]

जारस्तूपपति समौ ॥ ३५ ॥

जारयति । 'दारजारौ—' (वा० ३ ३ २०) इति घञ् । उपमित पत्या । द्वे ॥ ३५ ॥[5]

अमृते जारज कुण्ड

अमृते पत्यौ जाराज्जात । कुण्ड । कुण्डयत कुलमनेन । 'कुडि दाहे' (भ्वा० आ० से०) ॥[6]

मृते भर्तरि गोलक ।

मृत भर्तरि जाराज्जातो गोलक । 'गुड रक्षायाम्' (तु० प० से०) घञ् (३ ३ १९) । कन् (५ ४ ५) ॥[7]

भ्रात्रीयो भ्रातृजः

भ्रातुरपत्यम् । 'भ्रातुर्व्यच्च' (४ १ १४४) इति छ ॥[8]

भ्रातृभगिन्यौ भ्रातरावुभौ ॥ ३६ ॥

1 M अन्येभ्योपि 2 Kinsman (sagotra) [6] 3 Relationship and kinsmen [1 each] 4 Husband [4] 5 A masculine paramour [2] 6 The son of a woman by a man other than her husband while the husband is alive [1] 7 A widow's bastard [1] 8 Nephew (brother's son) [2]

स्वसा च भ्राता च 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' (१. २. ६८) इत्येकशेषः॥[1]

मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।

माता च पिता च । 'आनङृतो द्वन्द्वे'(६. ३. २५) । 'पिता मात्रा' (१. २. ७०) इत्येकशेषो वा । 'मातरपितरावुदीचाम्' (६. २. ३२) इति निपातः ॥[2]

श्वश्रूश्वशुरौ श्वशुरौ

श्वश्रूश्च श्वशुरश्च । 'श्वशुरः श्वश्र्वा' (१. २. ७१) इत्येकशेषः ॥[3]

पुत्रौ पुत्रश्च दुहिता च ॥ ३७ ॥

पुत्रश्च दुहिता च । 'भ्रातृपुत्रौ–' (१. २. ६८) इत्येकशेषो वा ॥ ३७ ॥[4]

दंपती जंपती जायापती भार्यापती च तौ ।

जाया च पतिश्च । राजदन्तादौ (२. २. ३१) पाठाज्जायाशब्दस्य 'दम्'-भाव 'जम्–' भावौ ॥[5]

गर्भाशयो जरायुः स्यात्

गर्भ[6] आशेतेऽत्र[7] । जरामेति, । 'किजरयोः श्रिणः ।' (उ० १.४) इत्युण् । 'गर्भवेष्टनचर्मणः' द्वे । ' ' लोके ॥[8]

उल्बं च कललोऽस्त्रियाम् ॥ ३८ ॥

उल्लूयते । 'उल्वादयश्च' (उ० ४. ९५) इति साधु । कलं लाति । 'शुक्रशोणितसंपातस्य' द्वे ॥ ३८ ॥[9]

सूतिमासो वैजननः

सूतेः प्रसवस्य मासः । विजायतेऽस्मिन्[10] । ल्युडन्ताद् (३.३.११७) अण् ॥[11]

गर्भो भ्रूण इमौ समौ ।

'गॄ निगरणे' (तु० प० से०) 'अर्तिगृभ्यां भन्' (उ० ३. १५२) । 'भ्रूण आशाविशङ्कयोः' (चु० आ० से०) । घञ् (३. ३. १९) ॥ द्वे ॥[12]

---

1. A brother and a sister. [2] 2. Parents [4] 3.Father-in-law and mother-in-law [2] 4. Son and daughter [1] 5. Married couple [4] 6. M. गर्भे 7. M. भाशेतेऽत्र 8. Womb or uterus [2] 9. A cover, envelope, esp. the membrane sorrounding the embroyo [2] 10. M. विजायतेऽस्मिन् 11. The month of delivery [2] 12. The child in the womb [2].

तृतीयाप्रकृति शण्ढ क्लीबः पण्डो नपुंसकम् ॥ ३९ ॥

स्त्रीपुंसापेक्षया तृतीया प्रकृति प्रकार । शाम्यति शण्ढ । 'शमेढ' (उ० १ ९९) । 'क्लीबृ अधार्ष्ट्ये (भ्वा० आ० से०) 'पडिपशि नाशने' (चु० प० से०) । न स्त्री न पुमान् । पञ्च ॥ ३९ ॥[1]

शिशुत्वं शैशवं बाल्यम्

शिशोर्भाव । 'इगन्ताच्च लघु–' (५ १ १३१) इत्यण् । बालस्य भाव । ब्राह्मणादि (५ १ १२४) । त्रीणि ॥[2]

तारुण्यं यौवनं समे ।

यूनो भाव । 'हायनान्त–' (६ ४ १६७) इत्यण् । द्वे ॥[3]

स्यात्स्थाविरं तु वृद्धत्वम्

स्थविरस्य भाव । युवादि (५ १ १३९) ॥[4]

वृद्धसङ्घेऽपि वार्धकम् ॥ ४० ॥

वृद्धाना सघ । वृद्धाच्च' (वा० ४ २ ३९) इति वुञ् । भावकर्मणोस्तु मनाज्ञादित्वात् (५ १ १३३) । तत स्वार्थे ष्यञि (वा० ५. १ १३३) । तत स्वार्थे ष्यञि (वा० ५ १ ११४) वार्धक्यम् । द्वे ॥ ४० ॥[5]

पलितं जरसा शौक्ल्यं केशादौ

'पल गतौ' (भ्वा० प० स०) । जराहेतुक केशादौ शुक्लत्वम् । एकम् ॥[6]

विस्रसा जरा ।

विस्रस्यतेऽनया[7] । भिदादि (३ ३ १०४) । जीर्यत्यनया । पिदादित्वाद् (३ ३ १०४) अङ् । द्वे ॥[8]

स्यादुत्तानशया डिम्भा स्तनपा स्तनंधयी ॥ ४१ ॥

उत्ताना शेते । अच् (वा० ३ २ १५) । 'डिभि सघे' (चु० उ० से०) । अच् (३ ३ ५६) । स्तनौ पिबति । आत क (३ २ ३) । स्तन धयति । 'नासिकास्तनयो –' (३ २ १९) इति खश्[9] । अतिबाला ॥ ४१ ॥[10]

---

1 An impotent man [5] 2 Childhood [3] 3 youth [2] 4 Old age [2] 5 A collection of old man [2] 6 Greyness of hair brought on by old age [1] 7 M विस्रस्यतेनया 8 Old age [2] 9 M खच 10 A female baby sucking the breast [4]

बालस्तु स्यान्माणवक

बल्यते बाल । मनोरयम् । 'ब्राह्मणमाणव—' (४ २ ४२) इति निपातनाण्ण । 'अल्पे' (५ ३ ८५) इति क । द्वे ॥[1]

वयस्थस्तरुणो युवा ।

वयसि तिष्ठति । तरति । त्रीणि ॥[2]

प्रवया स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥ ४२ ॥

प्रगत वयोऽस्य[3] । तिष्ठति 'अजिरशिशिर–' (उ० १ ५३) इति निपात । जिनाति स्म । क्त । 'ग्रहिज्या–' (६ १ १६) इति इन् । हल (६ ४ २) । 'ल्वादिभ्यश्च' (८ २ ४४) । जीर्यते । क्त । 'जीर्यतेरतृन्' (३ २ १०४) । षट् ॥ ४२ ॥[4]

वर्षीयान् दशमी ज्यायान्

अतिशयेन वृद्ध । 'प्रियस्थिर—' (६ ४ १५७) इति वर्षादेश । दशमोऽवस्थाविशेषोऽस्यास्ति[5] । 'वृद्धस्य च' (५ ३ ६२) इतिज्य । त्रीणि ॥[6]

पूर्वजस्त्वग्रियोऽग्रज ।

'अग्राद्यत्' (४ ४ ११६) । 'घच्छौ[7] च' (४ ४ ११७) ॥[8]

जघन्यजे स्यु कनिष्ठयवीयोऽवरजानुजा ॥ ४३ ॥

जघन्यऽवरकाले जात । अतिशयेन युवा । 'युवाल्पयो कनन्यतरस्याम्' (५ ३ ६४) । पक्षे 'स्थूलदूर—' (६ ४ १५६) इति यणादिलोपगुणौ । अवरस्मिन्काले जात । पञ्च ॥४३॥[9]

अमांसो दुर्बलश्छात

न मासमस्य । दुष्ट बलमस्य । 'छो छेदने[10]' (दि० प० अ०) । क्त (३ ४ ७२) । छात । त्रीणि ॥[11]

बलवान्मासलोऽसल ।

असोऽस्यास्ति[12] । त्रीणि ॥[13]

---

1 Child [2] 2 Young man [3] 3 M वयोस्य 4 Old man [6] 5 M दशमोवस्थाविशेषोस्यास्ति 6 Very old man [3] 7 M घछौ 8 Elder brother [3] 9 Younger brother [5] 10 M च्छेदन 11 A weak man [3] 12 M असास्यास्ति 13 A fat or strong man [3]

तुन्दिलस्तुन्दिकस्तुन्दी बृहत्कुक्षिः पिचिण्डिलः ॥४४॥

तुन्दिरस्यास्ति। तुन्दादिभ्य इलच् (५ २ ११७)। 'तुन्दिवलिवटेर्भः' (४ २ १३९)। बृहत्कुक्षिरस्य। अतिशयितं पिचिण्डमुदरमस्य। पञ्च ॥४४॥[1]

अवटीटोऽवनाटश्चावभ्रटो नतनासिके।

अवनता नासिकाऽस्य[2]। 'नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः' (५ २ ३१)। त्रीणि ॥[3]

केशवः केशिकः केशी

प्रशस्ता केशा अस्य। केशाद्वोऽन्यतरस्याम्[4]' (५ २ १०९)। पक्ष इनिठनौ (५ २ ११५)। त्रीणि ॥[5]

बलिनो वलिभः समौ ॥४५॥

वलिस्चर्मसंकोचोऽस्यास्ति।[6] पामादित्वान्न। द्वे ॥[7]

विकलाङ्गस्तुपोगण्डः

विकलमङ्गमस्य। पुनाति पौ। विच् (३ २ ७५)। स गण्डोऽस्य[8] पोगण्डः। 'स्वभावहीनाधिकाङ्गस्य' द्वे ॥[9]

खर्वो ह्रस्वश्च वामनः।

'खर्व गतौ' (भ्वा० प० से०) 'ह्रस् शब्दे (भ्वा० प० से०) उल्वादि (उ० ४ ९५)। वामयति। नन्द्यादि (३ १ १३४) ॥[10]

खरणाः स्यात्खरणसः

खरा तीक्ष्णा खरस्येव नासिकाऽस्य[11]। 'खुरखराभ्यां नस् वा' (वा० ५ ४ ११८)। पक्षे 'अच् नासिकायाः — (५ ४ ११८) इत्यच् नसादेशश्च। द्वे ॥[12]

विग्रस्तु गतनासिकः[13] ॥४६॥

विगता नासिकाऽस्य[14]। वेर्ग्रो वक्तव्यः' (वा० ५ १ ११८) ॥४६॥[15]

---

1 A man having a protuberant belly [5] 2 M नासिकास्य 3 A man having a flat nose [3] 4 M केशाद्वोन्यतरस्याम् 5 A man having fine hair [3] 6 M बलिश्चर्मसंकोचो स्यास्ति 7 A fold of the skin, wrinkle [2] 8 M गण्डोस्य 9 A man having redundant or deficient limb [2] 10 A sharp nosed man [2] 11 M नासिकास्य 12 Flat nosed [2] 13 B reads गतनासिके 14 M नासिकास्य 15 A noseless man [2]

खुरणाः स्यात्खुरणसः

खुर इव नासिकाऽस्य[1] । द्वे ॥[2]

प्रज्ञुः प्रगतजानुकः ।

प्रगते वातादिना विरले जानुनी अस्य । 'प्रसंम्या जानुनोर्ज्ञुः' (५.४.१२९) । द्वे ॥[3]

ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्

ऊर्ध्वे जानुनी अस्य ॥[4]

संज्ञुः संहतजानुकः ॥४७॥

संहते जानुनी अस्य ॥४७॥[5]

स्यादेडे बधिरः

आ सर्वत[6] ईड्यते । बध्यते । 'इषिमदि—' (उ० १.५१) इति किरच् । द्वे ॥[7]

कुब्जे गडुलः

कु उब्जोऽस्य[8] । 'उब्ज आर्जवे' (तु० प० से) । शकन्ध्वादिः (वा० ६.१.९४) । गडुरस्यास्ति । द्वे ॥[9]

कुकरे कुणिः ।

कुत्सितः, रोगादिना वक्र. करोऽस्य[10] । 'कुण शब्दे' (तु० प० से०) । द्वे ॥[11]

पृश्निरल्पतनौ

पृच्छ्यते पृश्निः । अल्पा तनुरस्य । द्वे ॥[12]

श्रोणः पङ्गौ

'श्रोणृ संघाते' (भ्वा० प० से०) । 'पन स्तुतौ' (भ्वा० आ० से०) । बाहुलकाद्गुः । 'जङ्घाहीनस्य' द्वे ॥[13]

---

1. M. नासिकास्य 2. A person having hoof-like nose [2] 3. Bow-legged, bondy-legged [2] 4 A man having long shanks [2] 5. Knock-kneed [2] 6. M. सर्वत: 7. A deaf man [2] 8. M. उब्जोस्य 9. A crook back [2] 10. M. करोस्य 11. A man having crooked hand [2] 12. A small man [2] 13. A lame man [2].

मुण्डस्तु मुण्डिते ॥४८॥

मुण्डयते । 'मुडि खण्डने' (भ्वा० प० से०) । द्वे ॥ ४८ ॥[1]

वलिरः केकरे

'वल संवरणे' (भ्वा० आ० से०) । बाहुलकात्किरच् । खे मूर्ध्नि करोति केकरः । द्वे ॥[2]

खोडे खञ्ज

'खोडृ गतिप्रतिघाते' (भ्वा० प० से०) । 'खजि गतिवैकल्ये' (भ्वा० प० से०) । द्वे ॥[3]

त्रिषु जरावरा ।

जराशब्दादवरा उत्तानशयाद्यास्त्रिलिङ्गा ॥

जडुल कालक पिप्लु

जडति । बाहुलकादुलच् । कालयति । 'कल क्षेपे' चुरादि । अपि प्लवते । मितद्र्वादि (वा० ३ २ १८०) । 'लच्छन' लोके ॥[4]

तिलकस्तिलकालकः ॥४९॥

तिल इव । कन् (५ ३ ९६) । तिल इव कालक । द्वे ॥४९॥[5]

अनामयं स्यादारोग्यम्

आमयस्याभाव । अरोगस्य भाव । द्वे ॥[6]

चिकित्सा रुक्प्रतिक्रिया ।

'कितव्याधिप्रतीकारे' [वा० इति] सन् । रुज प्रतिक्रिया निरसनम् । द्वे ॥[7]

भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥५०॥

भेष रोग जयति । 'अचेभ्योऽपि[8]—' (वा० ३ २ १०१) इति ड । ओषधेरिदमौषधम् । भेषजमेव । 'अनन्ता—' (३ ४ २३) इति ष्यञ् । न गदोऽस्मात्[9] । जयति रोगान् । 'कृवापाजि—' (उ० १ १) इत्युण् । पञ्च ॥ ५० ॥[10]

---

1 A man with the shaved head [2] 2 A squint eyed man [2] 3 A Crippled man [2] 4 Freckle [3] 5 Mole [2] 6 Good health [2] 7 Treatment [2] 8 M अन्येभ्योऽपि 9 M गदाऽस्मात् 10 Medicine [5]

स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः ।

रुजति देहम् । 'रुजो भङ्गे' (तु० प० अ०) । 'इगुपध—' (३.१.१३४) इति क. । रुजा । उपतापयति । घञि रोगः । विविधा आधयोऽस्मात्[1] । गदति गदः । 'अम रोगे' (भ्वा० प० से०) । आमं यात्यनेन । षट् ॥[2]

क्षयः शोषश्च यक्ष्मा च

क्षयति देहम् । अच् (३.१.१३४) । शोषयति । यक्षयते । 'यक्ष पूजायाम्' (चु० आ० से०) । मनिन् (उ० ४.१४४) । 'क्षयी' [लोके] ॥[3]

प्रतिश्यायस्तु पीनसः ॥ ५१ ॥

प्रतिक्षणं श्यायते । 'श्याद्व्यधा—' (३.१.१४१) इति णः । पीनं स्यति । 'नासारोगविशेषस्य' द्वे ॥ ५१ ॥[4]

स्त्री क्षुत् क्षुतं क्षवः पुंसि

'टुक्षु शब्दे' (अ० प० से०) । क्विप् (वा० ३.३.९४) । क्ते (३.३.११४) क्षुतम् । 'ऋदोरप्' (३.३.५७) । क्षव. । 'छिक्का' [लोके] ॥[5]

कासस्तु क्षवथुः पुमान् ।

'कासृ[6] शब्दकुत्सायाम्' (भ्वा० आ० से०) । 'ट्वितोऽथुच्[7]' (३.३.८९) क्षवथुः । 'खोखी' [लोके] ॥[8]

शोफस्तु श्वयथुः शोथः

'शव गतौ' (भ्वा० प० से०) । बाहुलकात्फ । यश्च । 'च्छ्वोः—' (६.४.१९) इत्यूठ् । 'टुओश्वि—' (भ्वा० प० से०) । 'ट्वितोऽथुच्'[9] (३.३.८९) । त्रीणि ॥[10]

पादस्फोटो विपादिका ॥ ५२ ॥

पादस्य स्फुटनम् । 'स्फुट विकसने' (तु० प० से०) । विपद्यतेऽनया[11] 'पद गतौ' (दि० आ० अ०) । 'रोगाख्यायां ण्वुल्—' (३.३.१०८) । 'बेवाइ' [लोके] ॥५२॥[12]

किलाससिध्मे

के लसति । सिध्यति सिध्मम् । 'सेंहुआ' [लोके] ॥[13]

---

1. M. आधयोस्मात् 2. Disease [7] 3. A pulmonary disease [3] 4. A nasal disease [2] 5 Sneezing [3] 6. M. कास 7. M. ट्वितोथुच् 8. Cough [2] 9. M. ट्वितोथुच् 10. Swelling [3] 11 .M. विपद्यतेनया 12. Cracking of the feet [2] 13. Blotch [2].

कच्छ्वा तु पाम पामा विचर्चिका ।

'कपेश्छ च' (उ० १ ८४) इत्यू । पाति देहमस्मात् । मनिन् (उ० ४ १४४) । 'डाबुभ्याम्—' (४ १ १३) । पामा । विचर्च्यते । 'चर्च अध्ययने' (चु० उ० से) । रोगे ण्वुल् (३ ३ १०८) । खर्जूभेद ।[1]

खर्जूः कण्डूश्च कण्डूया

'खर्ज मार्जने (?) । 'कृषिचमि—' (उ० १ ८१) इत्यू । 'कण्डूञ् गात्र विघर्षणे (कण्ड्वादि) 'कण्ड्वादिभ्यो यक्' (३ १ २७) । 'अ प्रत्ययात्' (३ ३ १०२) । 'खाज' [लोके] ॥[3]

विस्फोट पिटकस्त्रिपु ॥ ५३ ॥

'स्फुटिर विशरणे' (भ्वा० प० से०) । 'पिट शब्दसघातयो ' (भ्वा० प० से०) । द्वे ॥ ५३ ॥[4]

व्रणोऽस्त्रियामीर्ममरु क्लीबे

'व्रण शब्दे' (भ्वा० प० से०) । ईर गतौ' (अ० आ० से०) । बाहुलकान्मन् । 'ऋ गतौ' (जु० प० अ०) । 'अर्तिपृवपि—' (उ० २ ११७) इत्युस् । 'घाय' [लोके] ॥[5]

नाडीव्रण पुमान् ।

नाड्या व्रण । सदा प्रस्रवतो व्रणस्य । 'नसूर' लोके ॥[6]

कोठो मण्डलकम्

'कुठि प्रतिघाते' (भ्वा० प० से०) । अच् (३ १ १३४) आगमस्यानित्यत्वान्न नुम् । मण्डलमिव । 'मण्डलाकारकुष्ठस्य' द्वे ॥[7]

कुष्ठश्वित्रे

'हनिकुषि—' (उ० २ २) इति क्थन् । श्वेतते । 'श्विता वर्णे' (भ्वा० आ० से०) । 'स्फायि—' (उ० २ १३) इति रक् । 'श्वेतकुष्ठस्य' द्वे ॥[8]

दुर्नामकार्शसी ॥ ५४ ॥

दुष्ट नामास्य । इयर्त्यर्श । 'अर्तेर्ध्यांघो शुट् च' (उ० ४ १९५) इत्यसुन् । ,बवासीर' [लोके] ॥५४॥[9]

---

1 Scab, a skin disease [4] 2 Majority reads कण्डू खर्जूश्च
3 Itch [3] 4 Pimple [2] 5 Wound [3] 6 Ulcer [1]
7 Leprosy with round spots [2] 8 White leprosy [2]
9 Piles [2]

आनाहस्तु विबन्ध स्यात्

आनहनम् । 'णह बन्धने' (दि० उ० अ०) । 'बन्ध बधने' (क्रया० प० अ०) । 'आध्मानस्य' द्वे ॥[1]

ग्रहणी रुक् प्रवाहिका ।

गृह्यतेऽग्निरनया[2] । प्रवहति । ण्वुल् (३ १ १३३) । प्रवाहिका । रुक रोग । 'ग्रहणी' [इति ख्याता] ॥[3]

प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथु समा ॥५५॥

'छर्द वमने' (चु० प० से०) । 'टुवम उद्गिरणे' (भ्वा० प० से०) 'इक् कृष्यादिभ्य ' (वा० ३ ३ १०८) । 'वमन' [लोके] ॥५५॥[4]

व्याधिभेदा विद्रधि स्त्री ज्वरमेहभगंदरा ।
अश्मरी मूत्रकृच्छ्र स्यात्पूर्वे शुक्रावधेस्त्रिषु ॥५६॥[5]
रोगहार्यगदकारो भिषग्वैद्यौ चिकित्सके ।

रोग हरति । णिनि (३ २ ७८) । अगदमरोग करोति । विद्यामधीते । चिकित्सति ॥[6]

वार्तो निरामय कल्य उल्लाघोनिर्गतो गदात् ॥५७॥

वृत्तिरस्यास्ति । 'वृत्तेश्च' (वा० ५ २ १०१) इति ण । निर्गत आमयात् । कलासु साधु । 'तत्र साधु ' (४ ४ ९८) इति यत् । 'लाघृ सामर्थ्ये' (भ्वा० आ० से०) । 'अनुपसर्गात्फुल्ल—' (८ २ ५५) इति साधु । चत्वारि ॥५७॥[7]

ग्लानग्लास्नू

ग्लायते स्म ग्लान । 'सयोगादे —' (८ २ ४३) इति निष्ठान । 'ग्लाजिस्थ ग्स्नु ' (३ २ १३९) । 'रोगेण क्षीणस्य' द्वे ॥[8]

---

1 Constipation [2] 2 M गृह्य ग्निरनया 3 Diarrhoea [2] 4 Vomitting [4] 5 This verse remains unexplained in the manuscript The copyist might have missed the commentary of the verse due to oversight Seven kinds of disease [1 each] 6 Physician [5] 7 A man recovered from sickness [3] 8 A languid man [2]

आमयावी विकृतोव्याधितोऽपटुः ।
आतुरोऽभ्यमितोऽभ्यान्त

आमयोऽस्यास्ति[1] । 'आमयस्य दीर्घश्च' (वा० ५ २ १२२) इति विनि । व्याधि सजातोऽस्य[2] । आतोतोर्ति । 'तुर त्वर त्वरणे' 'छान्दसा क्वचिद्भाषायाम्' 'अम रोगे' (चुरा० उ० से०) । चुरादिणिचोर्वैकल्पिकत्वादिट् । सप्त ॥[3]

समौ पामनकच्छुरौ ॥ ५८ ॥

पामाऽस्यास्ति[4] । कच्छुरस्यास्ति ॥ ५८ ॥[5]

दद्रुणो दद्रुरोगी स्यात्

दद्रुरस्यास्ति । शाकीपलालीदद्रूणा ह्रस्वश्च' (५ २ १००) । द्वे ॥[6]

अर्शोरोगयुतोऽर्शस ।

अर्शांसि सन्त्यस्य । ['अर्शआदिभ्य —' (५ २ १२७)] अच् ॥[7]

वातकी वातरोगी स्यात्

'वातातीसाराभ्या कुक् च' (५ २ १२९)॥[8]

सातिसारोऽतिसारकी ॥ ५९ ॥

[स्पष्टम्] ॥[9]

स्यु क्लिन्नाक्षे चुल्लचिल्लपिल्ला क्लिन्नेऽक्षि चाप्यमी ।

क्लिन्ने चक्षुषी अस्य । क्लिन्नस्य चुल् चिल्, पिलो ऽश्च । पुरपश्चक्षुश्च । चोभर' [लोक] ॥[10]

उन्मत्त उन्मादवति

उन्मादोऽस्ति[11] । 'वातकृतचित्तविभ्रमस्य' द्वे ॥

श्लेष्मल श्लेष्मण कफी ॥ ६० ॥

श्लेष्माऽस्यास्ति[13] । 'सिध्मादिभ्यश्च' (५ २ ९७) इति लच् । पामादित्वात् (५ २ १०) न । कफोऽस्यास्ति[14] । त्रीणि ॥ ६० ॥[15]

---

1 M आमयोस्यास्ति 2 M सजातोस्य 3 A diseased man [7]
4 M पामास्यास्ति 5 A scabby man [2] 6 A person suffering from ringworm [2] 7 A person afflicted with piles [1]
8 A gouty man [2] 9 A person suffering for diarrhoea [2]
10 A blear eyed man [4] A blear eye [3] 11 M उन्मादास्ति
12 A lunatic man [2] 13 M श्लेष्मास्यास्ति 14 M कफास्यास्ति
15 A Person affected with exess of phlegm [3]

न्युब्जो भुग्ने रुजा

'उब्ज आर्जवे' (तु० प० से०)। 'भुजन्युब्जौ—' (७.३.६१) इति साधुः। भुग्नः कुब्जः। वक्रपृष्ठः। द्वे ॥[1]

वृद्धनाभौ तुन्दिलतुण्डिभौ[2]।

रोगेण उन्नता नाभिरस्य। 'तुन्दिबलिवटेर्भः' (५.२.१३९)। सिध्मादित्वात् (५.२.९६) लच्। त्रीणि ॥[3]

किलासी सिध्मलः

किलासमस्यास्ति। द्वे ॥[4]

अन्धोऽदृक्

अन्धयति। 'अन्ध दृष्ट्युपघाते' (चु० उ० से०)। नास्ति दृगस्य। द्वे ॥[5]

मूर्च्छाले मूर्तमूर्च्छितौ ॥ ६१ ॥

मूर्च्छाऽस्यास्ति[6]। मूर्च्छतेः क्ते (३.४.७२) 'राल्लोपः' (३.४.२१)। मूर्च्छा जाताऽस्य[7] ॥ ६१ ॥

शुक्रं तेजो रेतसी च बीजवीर्येन्द्रियाणि च ॥

शोचत्यनेन। तेजयति। 'तिज निशाने' (भ्वा० आ० से०)। असुन् (उ० ४.१८८) 'री गत्यादौ' (क्र्या० प० अ०)। 'स्रुरीभ्यां तुट् च' (उ० ४.२०१) विशेषेण ईजते। 'ईज गत्यादौ' (भ्वा० आ० से०)। वीरे साधु। इन्द्रस्यात्मनो लिङ्गम्। 'इन्द्रियमिन्द्रलिङ्ग—' (५.२.९३) इति साधु। षट् ॥[9]

मायुः पित्तम्

मिनोति ऊष्माणम्। 'डुमिञ् प्रक्षेपे' (स्वा० उ० अ०)। 'कृवापा—' (उ० १.१) इत्युण्। पतति पित्तम्। द्वे ॥[10]

कफः श्लेष्मा

के जले फलति। श्लिष्यति। मनिन् (उ० ४.१४४)। द्वे ॥[11]

---

1. A hump-backed man (because of illness) [2] 2. B. prefers तुण्डिभतुण्डिलौ 3. A person having a protuberant navel [2] 4. A man having blotches [2] 5. Blind [2] 6. M. मूर्छास्यास्ति 7. M. जातास्य 8. A person fainted [2] 9. Semen virile [6] 10. Bile [2] 11. Phlegm [2].

स्त्रियां तु त्वगसृग्धरा ॥ ६२ ॥

त्वचति। 'त्वच संवरणे' (तु० प० से०)। असृजो रक्तस्य धरा। द्वे ॥ ६२ ॥[1]

पिशितं तरसं मांसं पललं क्रव्यमामिषम्।

'पिश अवयवे' (तु० प० से०)। क्त (३ २ १०२)। तरो बलमस्यास्ति मनेर्दीर्घश्च' (उ० ३ ६४) इति स। 'क्रुड् गतौ' (भ्वा० आ० अ०)। "अचा यत्' (३ १ ९७) ॥[2]

उत्तप्तं शुष्कमांसं स्याद्वल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥

उत्तप्यते स्म। 'वल्ल संवरणे' (भ्वा० आ० से०)। खर्जादित्वात् (उ० ४ ९०) ऊर। त्रीणि ॥ ६३ ॥[3]

रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम्।

रुणद्धि। 'इषिमदि—' (उ० १ ५१) इति किरच्। अस्यते (दि०प०से०) बाहुलकाद्रुज। अस्यते। रक्। अस्रम्। रज्जे (भ्वा० उ० अ०) क्ते (३ २ १०२) रक्तम्। क्षताज्जातम् 'शोणृ वर्णे' (भ्वा० प० से०)। सप्त ॥[4]

बुक्काऽग्रमांसम्

'बुक्कभषणे' (भ्वा० प० से०)। घञ् (३ ३ १९)। अग्र मुख्य हृदयान्तर्गतं मासम्। द्वे ॥[5]

हृदयं हृत्

ह्रियते[6] हृत्। हृच्च तदपरं च ॥[7]

मेदस्तु वपा वसा ॥ ६४ ॥

'ञिमिदा—' (दि० प० से०)। असुन् (उ० ४ १८८)। 'डुवप्—' (भ्वा० उ० अ०)। भिदाद्यङ् (३ ३ १०४)। वसति वसा। 'मा सस्नेहस्य' त्रीणि ॥[8]

पश्चाद्ग्रीवा शिरा[9]मन्या

पश्चाद्भागे ग्रीवायाः शिरा। मन्या। मने क्यप् (३ ३ ९९) ॥[10]

---

1 Skin [2] [redacted] Flash [6] 3 Dried flesh or meat [3] 4. Blood [7] 5 Flesh in the heart [2] 6 M ह्यते 7 Heart [2] 8 Fat [2] 9 B and K read सिरा 10 The muscle in the back of the neck [1]

नाडी तु धमनिः सिरा ।

'नड भ्रंशे' चुरादेः 'अच इः' (उ० ४.१३८) । 'धमेः' सौत्रात् 'अर्तिसृधृ—' (उ० २.१०२) इति अनिः । 'षिञ् बन्धने' (स्वा० उ० अ०) । रक् । 'शिञ् निशाने' (स्वा० उ० अ०) इत्यस्य वा त्रीणि ॥[1]

तिलकं क्लोम

'तिल स्नेहने' (तु० प० से०) । 'क्लुङ् गतौ' (भ्वा० आ० अ०) । मनिन् (उ० ४.१४४) । 'उदर्यजलाधारस्य' द्वे ॥[2]

मस्तिष्कं गोर्दम्

मस्यति तिकति च । 'गुर्द परिवेष्टने' (?) । 'गुर्दा' [लोके] ॥[3]

किट्टं मलोऽस्त्रियाम् ॥ ६५ ॥

केटति किट्टम् । मलते धारयति । 'कीटी' [लोके] ॥६५॥[4]

अन्त्रं पुरीतत्

'अम गतौ' (भ्वा० प० से०) । 'सर्वधातुभ्यः ष्ट्रन्' (उ० ४.१५८) । पुरी तनोति । द्वे । 'आँतो' [लोके] ॥[5]

गुल्मस्तु प्लीहा पुंसि

गुड्यते रक्ष्यतेऽस्मात्[6] । मक् । 'प्लिह गतौ' (भ्वा० आ० से०) । 'श्वन्नुक्षन्—' (उ० १.१६०) इति साधु । द्वे ॥[7]

अथ वस्नसा ।

स्नायुः स्त्रियाम्

वस्ते, आच्छादयति वस्नम् । 'धापॄ—' (उ० ३.६) इति नः । वस्नं मूल्यं स्यति । स्नाति स्नायु. । बाहुलकादुण् ॥[8]

कालखण्डयकृती तु समे इमे ॥ ६६ ॥

कालं च तत्खण्डं च । यभं करोति यकृत् । 'कुक्षिदक्षिणपार्श्वे यकृत्, वामपार्श्वे प्लीहा' इति वैद्याः । 'वरवटि' लोके ॥ ६६ ॥[9]

---

1. Any tubular vessel of the body [3] 2. Lungs [2] 3. Brain [2] 4. Secretion [2] 5. Entrail [2] 6. M. रक्ष्यतेस्मात् 7. Spleen [2] 8. Nerve or tendon [2] 9. Liver [2].

सृणिका स्यन्दिनी लाला

'सृवृषिभ्यां कित्' (उ० ४ ४९) इति नि । स्यन्दते । णिनि (३ १ १७०)। लाल्यते । 'लल ईप्सायाम्' [चुरादि] । 'लार' [लोके] ॥[1]

दूषिका नेत्रयोर्मलम् ।

दूषयति । 'दोषो णौ' (६ ४ ९०) इत्यूत्वम् । 'कीचर' [लोके] ॥[2]

मूत्रं प्रस्रावः

'मूत्र प्रस्रवणे' (चु० उ० से०)। सूयते स्राव । 'स्रु प्रस्रवणे' (भ्वा० प० अ०) । 'श्रे द्रुस्तु—' (३ ३ २७) इति घञ् । द्वे ॥[3]

उच्चारावस्करौ शमलं शकृत् ॥ ६७ ॥

पुरीषं गूथं[4] वर्चस्कमस्त्री विष्ठाविशौ (षौ) स्त्रियौ ॥

उच्चार्यते त्यज्यते । अवकीर्यते । 'वर्चस्केऽवस्कर[5] (६ १ १४८) इति साधु । 'शकिशम्योर्नित्' (उ० १ ११२) इति कल । 'शवेर्ऋतिन् (उ० ४ ५८) ॥६७॥ पिपर्ति पुरीषम् । 'पॄभ्यां किच्च' (उ० ४ २७) इतीषन् । गूयते । 'गुङ् गतौ' (?) । 'तिथपृष्ठ— (उ० २ १२) इति साधु । कुत्सितं वर्चं । विनिष्ठतेऽनया[6] । आत च (३ १ १३६) । विशति विट् । विष्प् (३ ३ ९४) ॥[7]

स्यात्कर्परः कपालोऽस्त्री

कल्पते कर्पं । त राति । क पालयति । कपार [लोके] ॥[8]

कीकसं कुल्यमस्थि च ॥ ६८ ॥

'कि' इति कसति । 'कस गतौ (भ्वा० प० स०) । कुले भवम् । 'असि सञ्जिभ्यां क्थिन्' (उ० ३ १५४) । त्रीणि । 'हाड' [लोके] ॥ ६८ ॥[9]

स्याच्छरीरास्थ्नि कङ्काल

क काल्यति । 'कल क्षेपे (चु० प० से०) । 'त्वङ्मांसरहितशरीरास्थिन' एवम् ॥[10]

पृष्ठास्थ्नि तु कशेरुका ।

'कश शब्दे' (?) बाहुलकादेरु । 'पृष्ठवंशस्य एकम् ॥[11]

---

1 Saliva [3] 2 Secretion of eyes [1] 3 Urine [2] 4 B reads गूथ पुरीषम् 5 M वर्चस्केऽवस्कर 6 M विनिष्ठतेऽनया 7 Excrement [9] 8 Skull [2] 9 Bone [3] 10 Skeleton [1] 11 Back bone [1]

शिरोस्थनि करोटि स्त्री

क रोटते। 'रुट् दीप्तौ' (भ्वा० आ० से०) ॥[1]

पार्श्वास्थनि तु पर्शुका ॥ ६९ ॥

पर शृणाति। 'आङ्परयो खनिशृभ्या डिच्च' (उ० १ ३३) इति कु ॥ ६९ ॥

अङ्ग प्रतीकोऽवयवोऽपघन

अङ्गति। 'अगि गतौ' (भ्वा० प० से०)। प्रत्येति प्रतीक'। 'अलीका दयश्च' (उ० ४ २५ इति साधु। अव यौति। 'यु मिश्रण' (अ० प० अ०)। अच् (३ १ १३४)। अपहन्यते। 'अपघनोऽङ्गम्'[3] (३ ३ ८१) इति साधु। चत्वारि ॥[4]

अथ कलेवरम्।

गात्रं वपुः सहनन शरीर वर्ष्म विग्रह ॥ ७० ॥

कायो देह क्लीवपुसो स्त्रियां मूर्तिस्तनुस्तनू ।

कले वर श्रेष्ठम्। एति गात्रम्। ष्ट्रन् (उ० ४ १५८)। 'बहुल तनि' (?) इति गा। 'डुवप्'। 'अर्तिनृवपि—' (उ० २ ११७) इत्युसि। सहन्यन्तेऽस्मिन्[5]। शरिण ईरयति। वर्षति। मनिन् (उ० ४ १४४)। विगृह्यते ॥ ७० ॥ चीयते काय। चिञ् (स्वा० उ० अ०) घञ् (३ ३ ४१)। चस्य क। दिह्यते। घञ् (३ ३ १९)। मुर्छा (भ्वा० प० से०)। क्तिच् (३ ३ १७४)। 'राल्लोप' (६ ४ २१)। तन्यते। 'भृमृशि—' (उ० १ ७) इत्यु। 'प्राणिजाते' (?) इत्यूङ् तनू[6] ॥

पादाग्र पदम्

पादस्याग्रम्। प्रगत पदम्[7] ॥[8]

पाद पदङ्घ्रिश्चरणोऽस्त्रियाम् ॥ ७१ ॥

घञ् (३ ३ १६)। पाद। पद्यते क्विप् (३ ३ ९४)। 'पदोऽङ्घ्रि' इति स्वामी। 'पदङ्घ्रिरिति पदादेश' इत्यन्ये। अहत्यङ्घ्रि। 'वङ्क्र्यादयश्च' (उ० ४ ६६) इति साधु। चरन्त्यनेन। चत्वारि ॥ ७१ ॥[9]

---

1 Skull bone [1] 2 Rib [1] 3 M अपघनाङ्गम् 4 Limb [4] 5 M सहन्यतेस्मिन् 6 Body [12] 7 M पद 8 The fore part of the foot [1] 9 Foot [4]

तद्ग्रन्थी घुटिके गुल्फौ

तस्य पादस्य ग्रन्थी । घोटतेऽनया[1] । गल्यते गुल्फ । 'गल अदने' (भ्वा० प० से०) । 'कलिगलिभ्या फगस्योच्च (उ० ५ २६) इति वा । 'घूटा' [लोके] ॥[2]

पुमान्पार्ष्णिस्तयोरध ।

तयोर्गुल्फयोरध । पृष्यते । 'पृषु सेचने (भ्वा० प० से०) । 'घृणिपृश्नि पार्ष्णि– (उ० ४ ५२) इति साधु । पादपश्चाद्भागस्य' एकम् ॥[3]

जङ्घा तु प्रसृता

जङ्घन्यते । हन्तेर्यङ्लुगन्तात् [अयेभ्योऽपि' (वा० ३ २ ४८)] ड। प्रसरति स्म । द्वे ॥[4]

जानूरुपर्वाष्ठीवदस्त्रियाम् ॥ ७२ ॥

'इसनिजनि– (उ० १ ३) इति युण् । ऊर्णूयते । 'ऊर्णोतेर्नुलोपश्च' (उ० १ ३०) इति कु । उरो[5] पर्व । अति शयितमस्थि यस्मिन् । 'आसन्दीवदष्ठीवत्–' (८ २ १२) इति साधु । जङ्घोर्ध्वभागो जानु । त्रीणि ॥ ७२ ॥[6]

सक्थि क्लीवे पुमानूरु

'षञ्ज सङ्गे (भ्वा० प० अ०) । 'असिसञ्जिभ्या क्थिन्' (उ० ३ १५४) । जानूपरिभागस्य' द्वे ॥[7]

तत्सधिः पुसि वङ्क्षण ।

तस्य उरो । 'वक्ष रोषे' (भ्वा० प० से०) । ल्युटि (३ ३ ११३) पृषोदरादित्वान्नुम् । एकम् ॥[8]

गुद त्वपान पायुर्ना

'गुद कीडायाम्' (भ्वा० आ० स०) । क (३ १ १३५) । अपा नित्यनेन । 'अन प्राणने (अ० प० से०) । पाति मन्म् । 'कृवापा–' (उ० १ १) इत्युण् । त्रीणि ॥[9]

---

1 M घोटते नया 2 Ankle [2] 3 Heel [1] 4 Shark [2] 5 M उरा 6 Knee [3] 7 Thigh [1] 8 The thigh joint [1] 9 Anus [3]

वस्तिर्नाभेरधो द्वयोः ॥ ७३ ॥

'वस्तेस्ति' (उ० ४. १७९) । एकम् ॥ ७३ ॥[1]

कटो ना श्रोणिफलकम्

कट्यते । 'कटे वर्षादौ' (भ्वा० प० से०) । श्रोणे[2] फलकमिव, पर्माकारत्वात् । 'ककुद्मत्पार्श्वनिस्सृत' द्वे ॥[3]

कटिः श्रोणिः ककुद्मती ।

इन् (उ० ४. ११७) । 'श्रोणृ सघाते' । मांसपिण्ड. ककुत् । सोऽतिशयितोऽस्याम्[4] । 'कटे' त्रीणि ॥[5]

पश्चान्नितम्बः स्त्रीकट्याः

नितम्बति । 'तम्ब गतौ' (?) । 'स्त्रीकट्या पश्चाद्भागस्य' एकम् ॥[6]

क्लीबे तु जघनं पुरः ॥ ७४ ॥

हन्यते । 'हन्ते. शरीरावयवे द्वे च' (उ० ५. ३२) इत्यच् । 'स्त्रीकट्या पुरोभागस्य' एकम् ॥ ७४ ॥[7]

कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे ।

कूपाविव । नितम्बे तिष्ठतः । द्वयहीने । कुं भूमिं दारयति[8] । 'दृ भये' (क्र्या० प० से०) । कुत्सितं कुन्दरम् । 'पृष्ठवंशादधोगर्तयो' एकम् ॥[9]

स्त्रियां स्फिचौ कटिप्रोथौ

स्फायते स्फिक् । बाहुलकाद्विच् । कट्या प्रोथौ[10] मांसपिण्डौ । 'कटी' 'प्रोथौ' इति नामद्वयं वा । द्वे ॥[11]

उपस्थो वक्ष्यमाणयोः ॥ ७५ ॥

उपतिष्ठते । वक्ष्यमाणयो भगशिश्नयो ॥ ७५ ॥[12]

---

1. The portion of abdomen below the nevel [1] 2 M श्रोणि 3 Broad hips [2] 4 M. सोतिशयितोस्याम् 5 Hip [3] 6 The buttock of a woman [1] 7. The fore part of a female hip 8 M. दरयति 9. The Cavaties of the loins 10. M प्रोथौ 11. Hip or loin 12. The organ of generation of either sex.

भगं योनिर्द्वयो

भज्यते । 'खनो घ च' (३ ३ १२५) इति घित्वाद्ध । यौति । 'वहिश्रि–' (उ० ४ ५१) इति नि । 'द्वयो' इति योतिनान्वेति । द्वे ॥[1]

शिश्नो मेढ्रं मेहनशेफसी ।

शिनोति[4] वर्षति शिश्न । 'शिञ निशाने' (स्वा० उ० अ०) । पृषोदरादि (६ ३ १०९) । मेहन्त्यनेन । 'दाम्नी—' (३ २ १८२) इति ष्ट्रन् । शेते रेत [पाते] । –शीङ फुट् च (उ० ४ २००) इत्यसुन् । 'शेप' इत्यदन्तोऽपि ॥

मुष्कोऽण्डकोशो वृषणः

मुष्णाति । 'सृवृभू–' (उ० ३ ४१) इति यक् । अण्डयो कोश । 'वृषु सेचने' (भ्वा० प० सें०) । त्रीणि ॥

पृष्ठवंशाधरे त्रिकम् ॥ ७६ ॥

पृष्ठवंशस्याधोभागे त्रयाणा सघ । त्रिकम् । एकम् । 'रीढ' [लोके] ॥७६॥

पिचण्डकुक्षी जठरोदरं तुन्दम्

अपि चमति । पिचण्ड । अमन्ताड्ड (उ० १ ११४) । कुष्यते । 'प्लुषिकुषि—' (उ० ३ १५५) इति क्सि । जायतेऽत्र० । 'जनेररष्ठ च' (उ० ५ ३८) इति ठादेश । ऊर्ध्वमियंति । उदरम् । तुदति तुन्दम् । 'अब्दा दय —' (उ० ४ ९८) इति साधु । पञ्च ॥[7]

स्तनौ कुचौ ।

स्तन्यते शब्दते । कुचति । 'कुच सकोचे' (तु० प० से०) । द्वे ॥[8]

चूचुकं तु कुचाग्रं स्यात्

'चूचु' इत्यव्यक्तं कायति । कुचस्याग्रम् । द्वे ॥

न ना क्रोड भुजान्तरम् ॥७७॥

ना पुमान । 'क्रुड् निमज्जन' (?) घञ् (३ ३ १९) । क्रोड । भुजयो रन्तरम् । द्वे ॥७७॥[10]

---

1 The female organ of generation [2] 2 M शिनाति 3 The male organ of generation [4] 4 Testicle (3) 5 The lower part of the back bone [1] 6 M नवंशे 7 Belly [5] 8 Breasts [2] 9 Nipple [2] 10 Lap [2]

उरो वत्सं च वक्षश्च

'अर्तेरुच्च' (उ० ४.१९४) इति असुन् । उरः । वसे छाद्यते वत्सम् । 'वक्ष संघाते' (भ्वा० प० से०) । असुन् (उ० ४.१८८) । त्रीणि ॥[1]

पृष्ठं तु चरमं तनोः ।

पृष्यते सिच्यते [पृष्ठम्] । '-पृष्ठयूथ—' (उ० २.१२) इति साधुः । देहस्य पश्चाद्भागः ॥[2]

स्कन्धो भुजशिरोंऽसोऽस्त्री

स्कद्यते । घञ् (३.३.१९) । 'स्कन्देश्च स्वाङ्गे' (उ० ४.२०६) इति घः । भुजस्य शिरः । अस्यते । 'अंस समाघाते' । त्रीणि ॥[3]

संधी तस्यैव जत्रुणी ॥७८॥

जायते जत्रु । 'जन्वादयश्च' (उ० ४.१०२) इति साधु । 'अंस कक्षयोः संधेः' एकम् ॥[4]

बाहुमूले उभे कक्षौ

कष्यते । 'कष हिंसायाम्' (भ्वा० प० से०) । 'वृतृवदि—' (उ० ३. ६२) इति सः । 'बाह्वोर्मूले' द्वे ॥[5]

पार्श्वमस्त्री तयोरधः ।

पर्शूनां समूहः पार्श्वम् । 'पर्श्वा णस्—' (वा० ४.२.४३) तयोः । कक्षयोरधोभागः ॥[6]

मध्यमं चावलग्नं च मध्योऽस्त्री

मध्ये भवम् । लग्यते स्म । 'लगे सङ्गे' (भ्वा० प० से०) । 'क्षुब्धस्वान्त—' (७.२.१८) इति साधु । 'देहमध्यस्य' त्रीणि ॥[7]

द्वौ परौ द्वयोः ॥७९॥

भुजबाहू प्रवेष्टो दोः स्यात्

परौ भुजबाहू ॥७९॥ भुज्यतेऽनेन[8] । बाह्यते । 'बाहृ प्रयत्ने' (भ्वा०आ०से०) ।

---

1. Chest [3] 2. The back of a body [1] 3. Shoulder [3] 4. Collar-bone [1] 5. Arm-pit [2] 6. The lower part of an arm-pit [1] 7. Waist or the middle of the body [3] 8. M. भुज्यतेनेन ।

मृगव्वादि (उ० १ ३७)। 'वेष्ट वेष्टने' (भ्वा० आ० से०)। अच् (३ १ १३४)। 'दमेर्डोसि' (उ० २ ६९)। चत्वारि ॥[1]

कफोणिस्तु कूर्परः।

क फणति। 'फण गतौ' (भ्वा० प० से०)। इन् (उ० ४ ११७)। कुरति पिपर्ति च। 'कुर शब्दे' (तु० प० से०), 'पॄ पालनादौ' (जु० प० से०) 'केहुनी [लोके] ॥[2]

अस्योपरि प्रगण्ड स्यात्

अस्य कूर्परस्योर्ध्वं प्रत्यासन्न कपोलो गण्डोऽस्य[3] ॥[4]

प्रकोष्ठस्तस्य चाप्यधः ॥८०।

प्रकुष्यते। उषि–कुषि—' (उ० २ ४) इति थन्। 'कफोणेरधोमणि बन्धपयन्त ' ॥८०॥

मणिबन्धादाकनिष्ठ करस्य करभो बहिः।

मणिर्बध्यतेऽत्र[7]। तत कनिष्ठा तो हस्तस्य बहिर्भाग करभ। करे भाति ॥[8]

पञ्चशाख शय पाणिः

पञ्च शाखा, अङ्गुलयोऽस्य[9]। शतेऽस्मिन्[10] सर्वम्। 'पुसि—' (३ ३ ११८) इति घ। शम ' इत्यपे। पणन्तेऽनेन[11] पाणि त्रीणि ॥[12]

तर्जनी स्यात्प्रदेशनी ॥८१॥

तर्ज्यतेऽनया[13]। प्रदिश्यतेऽनया[14]। 'अङ्गुष्ठसमीपाङ्गुल्या ' द्वे ॥८१॥[15]

अङ्गुल्य करशाखाः स्युः

अङ्गति। 'अगि गतौ' (भ्वा० प० से०)। 'ऋतन्यञ्जि—' (उ० ४ २ इत्युलि। करस्य शाखा इव। द्वे ॥[16]

---

1 Arm [2] 2 Elbow [2] 3 M गण्डोस्य 4 The upper part of the arm from the elbow to the houslder [1] 5 M उप 6 Fore arm [1] 7 M मणिर्बध्यतेत्र 8 The back of the hand from the wrist to the little finger [1] 9 M अङ्गुल्योस्य 10 M शेतेस्मिन् 11 M पणन्तेनेन 12 Hand [3] 13 M तर्ज्यतेनया 14 M प्रदिश्यतेनया 15 Fore finger [2] 16 Fingers [2]

पुंस्यङ्गुष्ठः प्रदेशिनी ।

मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ॥८२॥

अङ्गुशब्दोऽङ्गवाची[1] । तत्र तिष्ठन्ति एता अङ्गुल्यः ॥८२॥[2]

पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।

पुनर्भवति । करे रोहति । नखमस्य । नखं राति । चत्वारि ॥[3]

प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥८३॥

प्रादिश्यते । तलत्यत्र । 'तल प्रतिष्ठायाम्' (चु० प० से०) । गोः कर्ण इव । 'तर्जन्यादिसहिते वितृस्तेऽङ्गुष्ठे[4]' क्रमेणैकैकम् ॥ ८३ ॥[5]

अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ।

कनिष्ठया सहिते विस्तृतेऽङ्गुष्ठे[6] । वितस्यते । 'तसु उपक्षये' (दि० प० से०) । द्वादशाङ्गुलय. प्रमाणमस्य । द्वे ॥[7]

पाणौ चपेटप्रतलप्रहस्ताविस्तृताङ्गुलौ ॥ ८४ ॥

'चप सान्त्वने' (भ्वा० प० से०) । अच् (३.१.१३४) । 'इट् गतौ (भ्वा० प० से०) । चपश्चासाविटश्च । प्रतलति । प्रसृतो हस्तोऽस्य[8] । त्रीणि ॥८४॥[9]

द्वौ सहतौ सिंहतलप्रतलौ वामदक्षिणौ ।

सिंहस्येव तलमत्र । 'मिलितयोर्वामदक्षिणपाण्योर्विस्तृताङ्गुल्यो.' [द्वे] ॥[10]

पाणिर्निकुब्जः प्रसृतिः

नितरां कुब्जः । प्रसृता सृतिरस्य ॥[11]

---

1. M. अङ्गुशब्दोङ्गवाची 2. Thumb [2] Middle, third and last fingers [1 each] 3. Nail [4]. 4. M. विस्तृतेङ्गुष्ठे 5. The span of the thumb and fore finger, the span of the thumb and middle finger and the span of the thumb and the third finger [1 each] 6. M. विस्तृतेङ्गुष्ठे 7. The measure of length epual to twelve angulas (being the distance between the extended thumb and the little finger [2] 8 M. हस्तोस्य 9. Slap [3] 10. The palms of the hand opened and joined together [1] 11. The palm of the hand stretched out and hallowed [1].

तौ युतावञ्जलि पुमान् ॥ ८५ ॥

'अञ्जू व्यक्त्यादौ' (रु० प० से०)। 'ऋतण्यञ्जि—' (उ० ४ २) इत्यलि। तौ प्रसृतौ मिलितौ ॥ ८५ ॥[1]

प्रकोष्ठे विस्तृतकरे हस्तः

बाहौ प्रसारितपाणौ हस्त । हसति। 'हसिमृग्रि—' (उ० ३ ८६) इति तन्। विस्तृत करो यस्मिन्। एकम् ॥[2]

मुष्ट्या तु बद्धया।

स रत्नि ष्यात्

स हस्त बद्धया मुष्ट्या उपलक्षित । रमन्तेऽस्मिन्[3] रत्नि । ऋच्छतीति वा। 'ऋ गतौ' (भ्वा० प० अ०)। 'ऋतनि—' (उ० ४ २) इति कत्निच ॥[4]

अरत्निस्तु निष्कनिष्ठेन मुष्टिना ॥ ८६ ॥

नास्ति रत्निर्मुष्टिरस्मिन्नरत्नि । निष्क्रान्ता कनिष्ठास्मिंस्तादृशो मुष्टिस्तेनोप लक्षित स अरत्नि ॥८६॥[5]

व्यामो बाह्वो सकरयोस्तयोस्तिर्यगन्तरम्।

विशेषण अम्यतेऽनेन[6]। स्वे स्वे पार्श्वे प्रसारितयोर्बाह्वोर्मध्यम् ॥[7]

ऊर्ध्वविस्तृतदो पाणिनृमाने पौरुषं त्रिषु ॥ ८७ ॥

दोषौ च पाणी च। तत्। ऊर्ध्वं विस्तृत दो पाणि येन स । तादृशो ना। तस्य य मान परिमाणम्। पुरुष प्रमाणमस्य। 'पुरुषहस्तिभ्यामण्' (५ २ ३८) ॥८७॥[8]

1 A cavity formed by folding and joining the open hands together [1] 2 The measure of length equal to 24 angulas or about 18 inches [1] 3 M रमन्तेस्मिन् 4 The distance from the elbow to the closed fist [1] 5 The distance from the elbow to the tip of the little finger [1] 6 M अम्यनेनेन 7 The measure of length equal to the space between the tips of the fingers of either hand when the arms are extended [1] 8 The full height of a man, the height to which he reaches with both arms elevated [1]

कण्ठो गलः

कणति । 'कणेष्ठः' (उ० १.१०३) । गिरति गलः । 'ग्रीवाग्रभागस्य' द्वे ॥[1]

अथ ग्रीवायां शिरोधिः कंधरेत्यपि ।

गृणाति ग्रीवा । 'जिह्वाग्रीवा—'(उ० १.१५५) इति साधुः । शिरो धीयतेऽस्याम्[2] । कं शिरसो धरा । त्रीणि ॥[3]

कम्बुग्रीवा त्रिरेखा सा

कम्बुः शङ्ख इव ग्रीवा । तिस्रो रेखा यस्याम् । 'शङ्खाकृतिग्रीवायाः एकम् ॥[4]

अवटुर्घाटा कृकाटिका ॥ ८८ ॥

न वटत्यवटुः । बाहुलकादुः । घाटयति । 'घट संघाते' (चु० प० से०) । कृकं कण्ठमटति । ग्रीवायामुन्नतो भागः । 'घाटी' लोके ॥ ८८ ॥[5]

वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।

उच्यतेऽनेन ।[6] 'गुधृवीप [चि] वचि—' (उ० ४.१६६) इति त्रः । अस्यतेऽन्नमस्मिन् ।[7] ण्यत् (३.३.११३) । वदत्यनेन । तुण्डति । 'तुडि तोडने' (भ्वा० प० से०) । आ अनित्यनेन । लप्यतेऽनेन[8] । 'लप व्यक्तायां वाचि' (भ्वा० प० से०) । खन्यतेऽनेन[9] । 'डित् खनेर्मुट् च—' (उ० ५.२०) इत्यच् ॥[10]

क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका ॥ ८९ ॥

घ्रायतेऽनेन[11] । ल्युट् (३.३.११७) गन्धस्य वहा । घोणति, अनया । 'घुण भ्रमणे' (भ्वा० प० से०) । नासतेऽनया[12] । 'णासृ शब्दे' (भ्वा० आ० से०) ॥ ८९ ॥[13]

ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।

उष्यते । 'उष दाहे' (भ्वा० प० से०) । 'उषिकुषि—' (उ० २.४) इति थः । न ध्रियते । 'धृङ्अवस्थाने' (तु० आ० अ०) रदनाः छाद्यन्तेऽनेन[14] । दशनानां वाससी इवाच्छादकत्वात् । चत्वारि ॥[15]

---

1. Throat [2] 2. M. धीयतेस्याम् 3. Neck [3]. 4. A conch-shaped neck [2] 5. The raised and straight part of the neck [3] 6. M. उच्यतेनेन 7. M. अस्यतेन्नमस्मिन् 8. M. लप्यतेनेन 9. M. खन्यतेनेन 10. Mouth or face [8] 11. M. घ्रायतेनेन 12. M. नासतेनया 13. Nose [6] 14. M. छाद्यन्तेनेन 15. Lip [4].

अधस्ताच्चिबुकम्

चीवति । 'चीवृ आदाने' (भ्वा० उ० से०) । मृगय्वादिः (उ० १.३७) । चिनोति शोभामिति वा । 'ओष्ठादधोभागस्य' एकम् । 'ठोडी' लोके ॥[1]

गण्डौ कपोलौ

गण्डति । क पोलयति ॥[2]

तत्परो हनुः ॥९०॥

ताभ्यां कपोलाभ्या पर, अधः । हन्ति हनुः । 'शृस्वृ–' (उ० १. १०) इत्युः । 'चौमरि' (?) लोके ॥ ९० ॥[3]

रदना दशना दन्ता रदाः

रद्यतेऽनेन[4] । 'रद विलेखने' (भ्वा० प० से०) । दश्यतेऽनेन[5] । दाम्यति दन्तः । रदति चत्वारि ॥[6]

तालु तु काकुदम् ।

तालयति । मृगय्वादि. (उ० १. ३७) । काकुर्जिह्वा दीयतेऽनेन[7] । द्वे ॥[8]

रसज्ञा रसना जिह्वा

रस जानाति । रस्यतेऽनया[9] । 'रस आस्वादने' (चु० उ० से०) । लिहन्त्यनया । 'शेवयह्वजिह्वा–' (उ० १. १५५) इति साधु । त्रीणि ॥[10]

प्रान्तावोष्ठस्य सृक्किणी[11] ॥९१॥

सृजति । बाहुलकात्क्विन् ॥९१॥[12]

ललाटमलिकं गोधिः

ललं विलासमटति । अलति । 'अलिकॄपिभ्या किच्च' (उ० ४.१७) इतीकन् । गुध्यते । 'गुध परिवेष्टने' (दि० प० से०) । त्रीणि ॥[13]

ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।

भ्रमयति । 'भ्रमेर्डूः' (उ० २.६८) । 'भौंह' लोके ॥[14]

---

1. The lower part of the lip [1] 2. Cheek [2] 3. Chin [1] 4. M. रद्यतेनेन 5. M. दश्यतेनेन 6. Tooth [4] 7. M. दीयतेनेन 8 Palate [2] 9 M. रस्यतेनेया 10. Tongue [3] 11. M. सृक्विनी B. prefers सृक्कणी 12. The Corners of the lips [1] 13. Forehead [1] 14. Eye-brow [3].

कूर्चमस्त्री भ्रुवोर्मध्यम्

कुरति । वाहुलकाच्चट् ॥[1]

तारकाऽक्ष्णः कनीनिका ॥९२॥

तारयति । 'कनी दीप्तौ (भ्वा० प० से०) । वाहुलकादीनन् । द्वे ॥९२॥[2]

लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।

दृग्दृष्टी च

लोच्यतेऽनेन[3] । नीयतेऽनेन[4] । 'दाम्नी—' (३ २ १८२) इति पक्षे ष्ट्रन् । ईक्ष्यतेऽनेन[5] । चक्षतेऽनेन[6] । 'चक्षे शिच्च' (उ० २ ११९) इत्युसि । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । इन् (उ० ४ ११७) । दृश्यतेऽनया[7] । क्तिनि (३ ३ ९३) दृष्टि । अष्ट ॥[8]

अस्रु नेत्राम्बु रोदनं चास्रमश्रु च ॥९३॥

अस्यति, अश्नुते वा । अस्रादि (उ० ५ २९) । रचते अन्यत्रापीति रक् । अस्रम् । पञ्च ॥ ९३ ॥[9]

अपाङ्गौ नेत्रयोरन्तौ

अपकृष्टावङ्गात् 'वाह्यौ' इति शेष ॥[10]

कटाक्षोऽपाङ्गदर्शने ।

कटं गण्डमश्नुते । 'अक्षू व्याप्तौ' (भ्वा० प० से०) । अपाङ्गेन दर्शनम् । द्वे ॥[11]

कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥९४॥

कर्णयति । 'कर्ण भेदने' (चु० उ० से०) । शब्दो गृह्यतेऽनेन[12] । श्रूयतेऽनेन[13] ष्ट्रन् (उ० ४ १५८) । असुनि (उ० ४ १८८) श्रव ॥९४॥[14]

उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ।

उत्तमं च तदङ्गं च । 'श्रयतेः स्वाङ्गे शिरः । किच्च' (उ० ४ १९३) इत्यसुन् । 'कुमारशीर्षयो —' (३ २ ५१) इति निर्देशात् शीर्षदिशोऽपि ।

1 The middle part of the eye-brows [1] 2 The pupil of the eye [3] 3 M लोच्यतेनेन 4 M नीयतेनेन 5 M ईक्ष्यतेनेन 6 M चक्षतेनेन 7 M दृश्यतेनया 8 Eye [8] 9 Tear [5] 10 The Corners of the eyes [1] 11 Side glance [2] 12 M गृह्यतेनेन 13 M श्रूयतेनेन 14 Ear [6]

मुह्यन्त्यनेन । 'श्वन्नुक्षन्—' (उ० १.१६०) इति साधुः । 'मसी परिणामे' (दि० प० से०) । क्तान्तात् (३.२ १०२) कन् । पञ्च ॥[1]

चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ॥९५॥

'चि' इत्यव्यक्तं कुरति । कुन्तं कुन्ताकारं लाति । वलति । 'वल प्राणने' (भ्वा० प० से०) । कच्यते । 'कच बन्धने' (भ्वा० प० से०) । के शेते । ड. (वा० ३.२ १०१) । शिरसि रोहति । षट् ॥९५॥[2]

तद्वृन्दे कैशिकं कैश्यम्

केशानां समूहः । 'अचित्त—' (४.२ ४७) इति ठक् । 'केशाश्वाभ्यां यञ्छौ—' (४ २ ४८) । द्वे ॥[3]

अलकाश्चूर्णकुन्तलाः ।

अलति । चूर्णस्य क्षोदादिक्षोदस्य कुन्तलाः ॥[4]

ते ललाटे भ्रमरकाः

भ्रमर इव । एकम् ॥[5]

काकपक्षः शिखण्डकः ॥ ९६ ॥

काकस्य पक्ष इव । शिखाया अण्ड इव । क्षत्रियाणां चूडा । 'बुलबुल' लोके ॥ ९६ ॥[6]

कबरी केशवेशः

कं वृणोति कबरी । अच् (३ १. १३४) । 'को [र] रन्' (उ० ४. १५४) इति सूत्रेण वा । केशानां वेशो मार्जनाद्यन्थविशेषः । द्वे ॥[7]

अथ धम्मिलः संयताः कचाः ।

'धम्मि' सौत्रः । धम्मेलं । संयताः बद्धाः । 'जूरा (डा)' लोके ॥[8]

शिखा चूडा केशपाशी

शेते शिखा । 'शीङो ह्रस्वश्च' (उ० ५. २४) इति [illegible] । चूड्यते । 'चुड

1. Head [5] 2. Hair [6] 3 A quantity of hairs [2] 4 Curled hairs [2] 5 The hairs hanging on the forehead [1] 6 A lock of hairs [2] 7. A braid of hairs [2] 8 Tide hairs [2].

समुच्छ्राय' (चु० प० से०)। भिदादौ निपान। प्रशस्ता केशा केशपाशी। 'चोटी [लोके]॥[1]

व्रतिनस्तु जटा सटा ॥ ९७ ॥

व्रतिन शिखा। जटति। 'जट संघाते' (भ्वा० प० से०)। 'षट अवयवे' (भ्वा० प० से०) ॥ ९७ ॥[2]

वेणि प्रवेणि[3]

वेणति। 'वेणृ निशामनादौ' (भ्वा० उ० से०)। 'प्रोषितभर्तृकादिधार्यकेश-रचनाविशेषस्य द्वे' इत्यके। 'स्त्रीचोटी' [लोके]॥[4]

शीर्षण्यशिरस्यौ विशदे कचे।

शिरसि भव। 'वा केशेषु' इति शीर्षन्। विशदे स्नानादिनिर्मले॥[5]

पाश पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥ ९८ ॥

पाश्यते। 'पश बन्धे' [चुरादि]। पक्ष्यते। 'पक्षपरिग्रहे' (भ्वा० प० से०)। कचात्परे सन्त कलापार्थाः ॥ ९८ ॥[6]

तनूरुह् रोम लोम

तन्वा रोहति। 'नामन्-सीमन्-' (उ० ४ १५०) इति साधु। रूयते लूयते वा। श्रोणि। 'रोवाँ [लोके]॥[7]

तद्वृद्धौ श्मश्रु पुमुखे।

तस्य वृद्धिस्तस्या श्मनि मुखे श्रयते। मितद्रवादि (वा० ३ २ १८०)। पुसो मुखे। एकम्। 'दाढ़ी' [लोके]॥[8]

आकल्पवेषौ नेपथ्य प्रतिकर्मप्रसाधनम् ॥ ९९ ॥

आकल्पनम्। विश्यते[9]। नयतेर्णिचि (३ २ ७५) गुण (७ ३ ८४) नेपथ्यम्। प्रत्यङ्ग कर्म। प्रसाध्यतेऽनेन[10]। अलङ्काररचनादिकृतशोभाया ' पञ्च ॥ ९९ ॥[11]

दर्शेते त्रिपु

एते वक्ष्यमाणा।

---

1 Crest hair [3] 2 Matted hairs [2] 3 B reads वेणिप्रवेणी 4 Braided hairs [2] 5 Clean hair [2] 6 A mass of hairs [3] 7 The hair on the body (of men and animals) [3] 8 Beard [1] 9 विश्यत 10 M प्रसाध्यतेऽनेन 11 Decoration [3]

अलङ्कर्ताऽलङ्करिष्णुश्च

अलं करोति । 'अलङ्कृञ्–' (३ २ १३६) इतीष्णुच्[1] । 'अलङ्करणशीलस्य' द्वे ॥[2]

मण्डितः ।

प्रसाधितोऽलङ्कृतश्च भूषितश्च परिष्कृतः ॥ १०० ॥

'मडि भूषायाम्' (भ्वा० प० से०) । 'भूष अलङ्कारे' (भ्वा० प० से०) । 'सम्परिभ्याम्–' (६ १ १३७) इति सुट् । पञ्च ॥ १०० ॥[3]

विभ्राड् भ्राजिष्णुरोचिष्णू

विभ्राजते । 'भुवश्च' (३ २ १३८) इति चादिष्णुच् । रोचते । 'अलंकृञ्–' (३ २. १३६) इतीष्णुच्[4] । 'अलङ्कारादिना शोभमानस्य' त्रीणि ॥[5]

भूषा तु स्यादलङ्क्रिया ।

'इच्छ शश्च' (३ ३ १००) द्वे ॥[6]

अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् ॥ १०१ ॥

मण्डनं च

अलङ्क्रियतेऽनेन[7] । आभ्रियतेऽनेन[8] । पञ्च ॥ १०१ ॥[9]

अथ मुकुटं किरीटं पुंनपुंसकम् ।

मुखे कुट्यते मुकुटम् । किरति । 'कॄतॄ—' (उ० ४ १८४) इति कीटन् । द्वे ॥[10]

चूडामणिः शिरोरत्नम्

चूडाया मणिः । शिरसो रत्नम् । द्वे ॥[11]

तरलो हारमध्यगः ॥ १०२ ॥

तरं लाति । एकम् ॥[12]

---

1 M इति इष्णुच 2 Decorating [2] 3 Decorated or ornamented [5] 4 M इति इष्णुच 5 Richly decorated [3] 6 Decoration with ornaments [2] 7 M अलङ्क्रियतेऽनेन 8 M आभ्रियतेऽनेन 9 Ornament [5] 10 Crown [2] 11 Crest jewel [2] 12 The central gem of a necklace [1]

वालपाश्या पारितथ्या

वालपाशे साधु । परितस्तथामूता । स्वार्थे ष्यञ् (वा० ५ १ १२४)। 'सीमन्तस्थितायां स्वर्णादिपट्टिकायाः' द्वे ॥[1]

पत्रपाश्या ललाटिका ।

पत्रमिव पाश्या । 'कर्णललाटात्कनलंकारे' (४ ३ ६५) । 'ललाटभूषणस्य' द्वे ॥[2]

कर्णिका तालपत्रं स्यात्

कर्णस्यालंकारः । तालस्य पत्त्रम् ॥ द्वे ॥[3]

कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥

'कुडि दाहे (भ्वा० आ० से०) वृषादि (उ० १ १०६) ॥ द्वे ॥ १०३ ॥[4]

ग्रैवेयकं कण्ठभूषा

ग्रीवायां भवम् । 'कुलकुक्षि—' (४ २ ९६) इति ढकञ् । 'कण्ठा' [लोके] ॥[5]

लम्बनं स्याल्ललन्तिका ।

लम्बते । 'लड विलासे' (भ्वा० प० से०) । शतृर्ङीप् (४ १. ६) । 'किंचिदवलम्बमानकण्ठभूषणस्य' द्वे ॥[6]

स्वर्णैः प्रालम्बिका

सैव ललन्तिका स्वर्णैः कृता प्रालम्बते ॥[7]

अथोरःसूत्रिका मौक्तिकैः कृता ॥ १०४ ॥

सैव ललन्तिका मौक्तिकैः कृता । उरसः सूत्रमिव ॥ १०४ ॥[8]

हारो मुक्तावली

ह्रियतेऽनेन[9] । घञ् (३ ३ १९) । मुक्तानामावली दीर्घा पङ्क्तिः । द्वे ॥[10]

---

1 A golden ornament worn in the hair [2] 2 An ornament worn on the forehead [2] 3 A kind of ear-ornament [2] 4 Ear ring [2] 5 A kind of neck ornament called कण्ठा 6 A short necklace [2] 7 The short necklace made of gold [1] 8 A necklace of pearls hanging over the breast [1] 9 M ह्रियतेनेन 10 A necklace of pearls [2]

देवच्छन्दोऽसौ शतयष्टिकः ।

असौ हारः । शतयष्टिकः शतलतिकः । देवैं छन्द्यते । 'छदि संवरणे' (चु० प० से०) ॥[1]

हारभेदा यष्टिभेदाद् गुच्छगुच्छार्धगोस्तनाः ॥ १०५ ॥
अर्धहारो माणवक एकावल्येकयष्टिका ।
सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥ १०६ ॥

यष्टीनां भेदात्, हारभेदाः स्युः । गूयते । गुङ (भ्वा० आ० अ०) छक् । 'द्वात्रिंशल्लतिको गुच्छो गुच्छार्धंऽस्तत्त्व सख्यकः ।' चत्वारिंशल्लतो गोस्तनः । गो[2] स्तन इव ॥ १०५ ॥ चतुःपञ्चाशल्लतोऽर्धहारः[3] । विंशतिलतो माणवकः, अल्पत्वात् । एका चासावावली च । एकावल्येव सप्तविंशतिमुक्ताभिः कृता नक्षत्राणां मालेव ॥ १०६ ॥[6]

आवापकः पारिहार्यः कटकः[7] वलयोऽस्त्रियाम् ।

आ उप्यते । 'डुवप्' (भ्वा० उ० अ०) । परिह्रियते । ण्यत् (३ १ १२४) । कटति । वुन् (उ० २ ३२) । वल्ते । 'वलिमडि–' (उ० ४ ९९) इति कयन् । प्रकोष्ठाभरणस्य[8] चत्वारि । 'चूरा (डी)' लोके ॥[8]

केयूरमङ्गदं तुल्ये

के बाहुशिरसि यौति । खर्जादि (उ० ४ ९०) । अङ्गं दयते । 'बाजूबन्द' [लोके] ॥[9]

अङ्गुलीयकमूर्मिका ॥ १०७ ॥

अङ्गुलौ भवम् । 'जिह्वामूला—' (४ ३ ६२) इति छः । ऊर्मिरिव । 'मुंदरी' [लोके] ॥ १०७ ॥[10]

साक्षराऽङ्गुलिमुद्रा सा

सा ऊर्मिका साक्षरा चेत् । अङ्गुल्या मुद रानि । 'मोहर' [लोके] ॥[11]

---

1 A pearl necklace of hundred strings [1] 2 B reads गुच्छगुच्छार्ध 3 M गुच्छार्ध 4 M गो 5 M चतुःपञ्चाशल्लतोऽर्धहारः 6 Seven kinds of pearl necklaces [1 each] 7 B and K read कटः 8 A bracelet worn on the fore arm [4] 9 Armlet [2] 10 A finger ring [2] 11 A seal ring [1]

कङ्कणं करभूषणम् ।

कं शुभं कणति । द्वे ॥[1]

स्त्रीकट्यां मेखला काञ्ची सप्तकी रसना तथा ॥ १०८ ॥
क्लीबे सारसनं च

मखं गति लाति । काञ्चते । 'काचि दीप्त्यादौ' (भ्वा० आ० से०) । सपति । 'षप समवाये' (भ्वा० प० से०) । तत् । 'रस शब्दे' (भ्वा० प० से०) । १०८ । सारं उत्कृष्टं सनमस्य । 'स्त्रीकटिभूषणस्य' पञ्च ॥[3]

अथ पुंस्कट्यां शृङ्खलं त्रिपु ।

पुंसो कट्यां चेत्काञ्ची । शृङ्गैः खलति । एकम् ॥[4]

पादाङ्गदं तुलाकोटिः

पादस्याङ्गदमिव । तुलाकारं कोटिरग्रमस्य । द्वे । 'विछिआ' [लोके] । 'पायजेव' इत्यन्ये ॥[5]

मञ्जीरो नूपुरोऽस्त्रियाम् ॥ १०९ ॥

मञ्जति । 'मञ्जे.' सौत्रादीरः । नुवति पुरम् । 'नु स्तुतौ' (तु० प० से०) । 'घुघरु' [लोके] ॥ १०९ ॥[6]

हंसकः पादकटकः

हंस इव । पादस्य कटकः, वलयः । 'गुजरी' इति 'जेहरि' इति च लोके ॥[7]

किंकिणी क्षुद्रघण्टिका ।

किंचित्किणोऽत्र[8] । क्षुद्रा चासौ घण्टिका । 'घटि दीप्तौ' (चु० उ० से०) । 'घुघरु' [लोके] । 'पादाटनोऽङ्घ्रिवलयम्[9]' "जेहरि" 'नवटोऽङ्गुष्ठमौद्रिकम्[10] । "अनवट" 'ताटङ्कः कर्णवलयम्' "वीर" 'हुन्माणिक्यं च तुञ्जिका ।' "घुंघुरू" [लोके] ॥[11]

---

1. A bracelet worn round the wrist [2] 2. Majority reads रशना 3. The girdle of a woman [5] 4. The girdle of a man [1] 5. A kind of anklet called pāyajeba or vichiyā [2] 6. Anklet [2] 7. A kind of anklet called gujari or jehari [2] 8. M. किंचित्रवात्र 9. M. पादाटनोऽङ्घ्रिवलय 10. M. नवटोऽङ्गुष्ठमौद्रिक 11. A small bell (ghungharu) [2].

त्वक्फलकृमिरोमाणि वस्त्रयोनिः

त्वक्फल क्रिमि रोम चेति । वस्त्रस्ययोनिरुपादानकारणम् ॥[1]

दश त्रिषु ॥ ११० ॥

वक्ष्यमाणानि दश त्रिषु ॥ ११० ॥

वाल्कं क्षौमादि

वल्कस्य त्वचो विकार वाल्कम् । क्षौमादि । क्षुमाया विकार । 'भगरा' लोके ॥[2]

फलं तु कार्पासं बादरं च तत् ।

फलस्य विकार । कर्पास्या बादर्याश्च फल कर्पास बदर तस्य विकार ॥[3]

कौशेयं कृमिकोशोत्थम्

कोशे सम्भूतम् । 'कोशाड्ढञ्' (४ ३ ४२) ॥[4]

राङ्कवं मृगरोमजम् ॥ १११ ॥

'रङ्कोरमनुष्येऽण् च' (४ २ १००) । मृगशब्देन पशुमात्रग्रहणाच्छम्बलाद्यपि राङ्कवम् ॥ १११ ॥[5]

अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे ।

न आहतम् । निर्गता प्रवाणी तन्तुवायशलाकाऽस्मात् । 'तन्त्रादचिरापहृते' (५ २ ७०) । नव च तदम्बरं च । चत्वारि ॥[8]

तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम् ॥ ११२ ॥

उद्गम्यतेऽनेनेत्यत्र 'ऽमिलप्यते' । 'धौत' [एवम्] ॥ ११२ ॥[10]

पत्त्रोर्णं धौतकौशेयम्

पत्रैः इवोर्णाऽस्यत्र[11] । धौत च तत्कौशेयम् । प्रक्षालितकौशेयम् ॥[12]

---

1 The material of cloth such as bark [1] 2 The cloth made of the barks of trees [1] 3 The cloth made of the fruits of Cotton plant [3] 4 Silk [1] 5 M रङ्कोरमनुष्येण् 6 A woolen cloth made of deer's or animal's hair [2] 7. M न'तुवाय शलाकाऽस्य त 8 A new cloth [4] 9 M उद्गम्यतेऽमिलप्यते 10 A pair of washed clothes [1] 11 M कृमि ऊर्णा यत्र 12 A washed silk-garment [2]

बहुमूल्यं महाधनम्।

- बहुमूल्यमस्य। महद्धनं मूल्यमस्य ॥[1]

क्षौमं दुकूलं स्यात्

कूलति। 'कुल आवरणे' (भ्वा० प० से०)। 'पट्टवस्त्रस्य' द्वे ॥[2]

द्वे तु निवीतं प्रावृतं त्रिषु ॥ ११३ ॥

निवीयते। 'व्येञ्–' (भ्वा० उ० अ०)। क्त. (३.२.१०२) 'उपभुक्तवस्त्रस्य' द्वे ॥ ११३ ॥[3]

स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः।

दशति। भिदादिः (३. ३. १०६)। 'वसेस्तिः' (उ० ४. १७९)। 'वस्त्रान्तदशायाः' द्वे ॥[4]

दैर्घ्यमायाम आनाहः

'कञ्चुकं गात्रवसनम्' "जामा" 'कञ्चुकी कुचगोपिका' "चोली"। दीर्घस्य भावः। आयम्यतेऽनेन[5] ॥[6]

परिणाहो विशालता ॥ ११४ ॥

विशालस्य भावः। 'पनहा' [लोके] ॥ ११४ ॥[7]

पटच्चरं जीर्णवस्त्रम्

'पटत्' इत्यव्यक्तशब्दं चरति। जीर्णं च वद्वस्त्रं च ॥[8]

समौ नक्तककर्पटौ।

नजते। 'ओलजी व्रीडे' (तु० आ० से०)। बाहुलकात्तन्। क्रे पटः कर्पटः। दाक्ष्यादिः (वा० ६. १. ९४)। 'प्रस्वेदादिमार्जनार्थं हस्तस्य वस्त्रखण्डस्य' द्वे ॥[9]

वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् ॥ ११५ ॥

वस्यतेऽनेन[10]। ष्ट्रन् (उ० ४. १५८)। 'वसेर्णित्' (उ० ४. २१७) इत्यसुन्। चिल्यतेऽनेन[11]। 'चिल वसने' (तु० प० से०)। अंशुस्वामिनि ॥ ११५ ॥[12]

---

1. Costly or expensive [2] 2. Silken cloth or woven silk [2] 3. A cloth worn out [2] 4. The border of a cloth [2] 5. M. आयम्यतेऽनेन 6. The length of a cloth [3] 7. The breadth of a cloth [2] 8. Old or rugged cloth [2] 9. A piece of cloth (hand-keirchef) [2] 10. M. वस्यतेऽनेन 11. M. चिल्यतेऽनेन 12. Cloth (in general) [6].

सुचेलक॰ पटोऽस्त्री

शोभन चेलमेव । पटति । 'पट गतौ' (भ्वा॰ प॰ से॰) । 'शोभनवस्त्रस्य' द्वे[1] ॥

ना वराशि स्थूलशाटक ।

वरमश्नुते, अस्यति वा । वराशि । 'शट रुजादौ' (भ्वा॰ प॰ से॰) । 'स्थूलपटस्य' द्वे ॥[2]

निचोलः प्रच्छदपट

निचोल्यते । चुल समुच्छ्राये' [चुरादि] । प्रच्छद्यते । 'छद संवरणे' (चु॰ उ॰ से॰) । येन शय्यादि प्रच्छाद्यते । बुरका' इत्यस्येत्यन्ये ॥[3]

समौ रल्लककम्बलौ ॥ ११६ ॥

रमण रत् । रत लाति रल्लः । क बलयति । 'कम्ब गतौ' वा ॥ ११६ ॥[4]

अन्तरीयोपसंव्यानपरिधानान्यधोंशुके ।

अन्तरा भवम् । गहादित्वात् (४ २ १३८) [illegible] । उपसंवीयतेऽनेन[5] । परिधीयते । अधोदेहभागस्यांशुकम् । 'परिधानवस्त्रस्य' चत्वारि ॥[6]

द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा ॥ ११७ ॥
संव्यानमुत्तरीयं च

प्राव्रियतेऽनेन[7] । घञ् (३ ३ ५४) । उत्तरे आसज्यते । 'बृहत्या आच्छादने' (५ ४ ६) कन् ॥ ११७ ॥ संवीयतेऽनेन[8] । उत्तरस्मिन् देहभागे भवम् । 'उपरि-वस्त्रस्य' पञ्च ॥[9]

चोलकूर्पासको स्त्रियाम्[10] ।

कूर्परे अस्यते । पृषोदरादि (६ ३ १०९) । 'आप्रपदीनकञ्चुकस्य' इत्येके । 'स्त्रीणां कञ्चुलिकाख्यस्य' इत्यन्ये ॥[11]

नीशार स्यात् प्रावरणे हिमानिलनिवारणे ॥ ११८ ॥

नितरां शीर्यते । 'शॄ वायु—' (वा॰ ३ ३ २१) इति घञ् ॥ ११८ ॥[12]

---

1 Fine cloth [2] 2 coarse cloth [2] 3 Coverlet or covering [2] 4 Blanket [2] 5 M उपसंवीयतेऽनेन 6 Under or lower garment [4] 7 M प्राव्रियतेऽनेन 8 M संवीयतेऽनेन 9 Upper garment [5] 10 B reads स्त्रियां 11 Bodice [2] 12 Warm cloth (as razai, blanket &c) [1]

अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम् ।

अर्धोरौ कायते । डः (३.२.१०१) । चण्डा[1] कोपनामतति । क्वुन् (उ० २.३२) । 'लहंगा' [लोके] ॥[2]

स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥ ११९ ॥

आप्रपदं पादाग्रं प्राप्नोति । 'पादाग्रपर्यन्तलम्बमानवस्त्रस्य' एकम् ॥११९॥[3]

अस्त्री वितानमुल्लोचः

वितन्यते । घञ् (३.३.१९) । ऊर्ध्वं लोचति । 'लोचृ भासने' (चु० उ०से०) । 'चंदवा [लोके] ॥[4]

दूष्याद्यं वस्त्रवेश्मनि ।

दूष्यते दूष्यम् । 'वस्त्रगेहस्य' एकम् ॥[5]

प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ॥ १२० ॥

प्रतिगतासीरम् । 'जुः' सौत्रो गतौ (३.२.१५७) । ल्युडन्तात् (३.३.११७) कन् । तिरस्क्रियतेऽनया[6] । 'कनात' [लोके] ॥-१२० ॥[7]

परिकर्माङ्गसंस्कारः

मलवर्जनार्था क्रिया परिकर्मस्नानोद्वर्तनादि । अङ्गं संस्क्रियतेऽनेन[8] । 'शरीर शोभाधायककर्मण.' द्वे ॥[9]

स्यान्मार्ष्टिर्मार्जना मृजा ।

'मृजू शुद्धौ' (अ० प० से०) 'व्यास—' (३.३.१०७) इति युच् । 'प्रोञ्छनादिनाङ्गनिर्मलीकरणस्य' त्रीणि ॥[10]

उद्वर्तनोत्सादने द्वे समे

उद्वर्त्यतेऽनेन[11] । उत्साद्यतेऽनेन[12] । 'षद्लृ—' (तु० प० अ०) । 'उद्वर्तनद्रव्येणाङ्गनिर्मलीकरणस्य' द्वे ॥[13]

---

1. M. चण्ड 2. Short petticoat [2] 3. A garment reaching to the feet [1] 4. Canopy [2] 5. Tent [1] 6. M. तिरस्क्रियतेनया 7. Curtain [3] 8. M. संस्क्रियतेनेन 9. Painting or perfuming the body [2] 10. Cleansing the body [3] 11. M. उद्वर्त्यतेनेन 12. M. उत्साद्यतेनेन 13. Cleaning the body with perfumes or fragrant unguents [2].

आप्लाव आप्लव ॥१२१॥

स्नानम्

'प्लुङ्—'(भ्वा० आ० से०)। 'विभाषाडि रुप्लुवो' (३ ३ ५०) इति वा घञ् ॥१२१॥ 'ष्णा शौचे' (अ० प० अ०)। भावे ल्युट् (३ ३ ११५) त्रीणि ॥[1]

चर्चा तु चार्चिक्य स्थासकः

चर्च्यते। 'चर्च अध्ययने' (चु० उ० से०)। धात्वर्थे ण्वुल् (वा० ३ ३ १०८) चर्चिका। स्वार्थे ष्यञ् (वा० ५ १ १२४)। बाहुलकात्स, स्थास, स्त क। 'चन्दनादिना देहविलेपनस्य' त्रीणि ॥[2]

अथ प्रबोधनम्।

अनुबोध

'प्रयत्नेनोद्बोधनस्य' द्वे ॥[3]

पत्रलेखा पत्राङ्गुलिरिमे समे ॥१२२॥

पत्राकारा रेखा। पत्रार्थेऽङ्गुलिव्यापार[4]। 'स्तनकपोलादौ केशरादिना विरचितस्य तिलकविशेषस्य' द्वे ॥१२२॥[5]

तमालपत्रतिलकचित्रकाणि विशेषकम्।
द्वितीयं च तुरीयं च न स्त्रियाम्

तमालपत्रमिव। तिलवत् कायति। चित्रयति। विशेषयति। 'टीका [लाके]। द्वितीय तिलक तुरीय विशेषक स्त्रिया न भवत। किं तु पुनपुसकयो चत्वारि ॥[6]

अथ कुङ्कुमम् ॥१२३॥

कश्मीरजन्माग्निशिख[7] वर बाह्लीकपीतनम्।
रक्तसंकोचपिशुन धीरलोहित चन्दनम् ॥१२४॥

'कुङ्कुम' इति शब्दोऽस्यास्ति[8]। अर्श आद्यच् (५ २ १२७) ॥१२३॥

---

1 Bathing [3] 2 Smearing the body with sandal or unguents [2] 3 Reviving the scent of a perfume [2] 4 M पत्रार्थंगुलिव्यापार 5 Drawing lines of painting on the body with coloured sandal, saffron, or any other fragrant substance [2] 6 The mark made with sandal wood or any other unguents on the forehead [4] 7 Majority reads काश्मीरजमाग्निशिख 8 M शब्दोस्यास्ति।

'करोर्मुट् च' (उ० ४ ३२) इतीरन् । कश्मीरे जन्मास्य । अग्निरिव शिखाऽस्य[1] । वृत्र (स्वा० उ० से०) अप् (३ ३ ५८) वरम् । बह्लीके देशे भवम् । पीन करोति । रज्यते स्म रक्तम् । सकोचयति । 'कुच सपर्चनादौ' (भ्वा० प० से०) पिशति । 'पिश अवयवे' (तु० प० से०) । 'क्षुधिपिशि—' (उ० ३ ५५) इति उनन्, कित् । धियमीरयति । लोहित च तच्चन्दन च । एकादश 'केशरी (रि) [लोके] ॥१२४॥[2]

लाक्षा राक्षा[3] जतु क्लीबे यावोऽलक्तो द्रुमामय ।

लक्ष्यते । रक्ष्यते । जायते । 'फलिपाटि—' (उ० १ १८) इत्यु । तोऽन्नादेशश्च[4] । यौति यव स एव याव । न रक्तोऽस्मात्[5] । द्रुमाणामामय । पट् ॥[6]

लवङ्ग देवकुसुम श्रीसंज्ञम्

लव गच्छति, लूयते वा । देवाना कुसुमम् । श्रिय सज्ञाऽस्य[7] । त्रीणि ॥[8]

अथ जायकम् ॥१२५॥

कालीयकं च कालानुसार्यं च

जयति गन्धान्तरम् । 'जि अभिभवे' (भ्वा० प० से०) । ण्वुल् (३ १. १३३) ॥१२५॥ कालम्येदम् । 'वृद्धाच्छ' (४ २ ११४) । कालेन वस्तुना, अनुसर्तुं याग्यम् । 'कलवक' [लोके][9]

अथ समार्थकम् ।

वंशकागुरुराजार्हलोहकृमिजजोङ्गकम् ॥१२६॥

वशाऽस्यत्र[10] । कन् (५ २ ११५) । न गुरु यस्मात् । राजानमर्हति । लूयते । 'लूह गार्द्ध्ये' (?) । कृमिभिर्जायते । पट् । 'अगर' [लोके] ॥१२६॥[11]

कालागुर्वगुरु

काल च तदगुरु च । 'कालागुरो' इ ॥[12]

स्यात्तन्मङ्गल्या मल्लिगन्धि यत् ।

मल्लिकायुगस्येव गन्धा यस्य । एकम् ॥[13]

---

1 M शिखास्य 2 Saffron [1] 3 B reads गणा लाक्षा 4 M तान्नादेशश्च 5 M रक्तोऽस्मात् 6 Lac (red) used by women to dye certain parts of the body [6] 7 M सज्ञास्य 8 Clove (3) 9 A kind of sandal wood [3] 10 M वशोऽस्यत्र 11 The fragrant aloe wood and tree [6] 12 Black kind of aloe wood [2] 13 A kind of aloe wood [1]

यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥
बहुरूपोऽपि

यक्षान् धूपायति । सर्जस्य सालस्य रस । राति अलति च । सर्वे रस्यते ॥ १२७ ॥ बहूनि रूपाण्यस्य ॥ 'राल' [लोके] ॥[1]

अथ वृकधूपकृत्रिमधूपकौ ।

वृक इव धूप । द्वे ॥[2]

तुरुष्क पिण्डक सिह्लो यावनोऽपि

तुर त्वरणे' (जु० प० से०) । उसन्तात्क । 'पिडि सघाते' (भ्वा० आ० से०) । अजतात् (३ १ १३४) क । 'सि' इति ह्लादयति । ड । यवनदेशे भव । 'सिल्हार' [लोके] ॥[3]

अथ पायस ॥ १२८ ॥
श्रीवासो वृकधूपोऽपि श्रीपिष्ट[4]—सरलद्रवौ ।

पयसो विकार ॥ १२८ ॥ श्रियो वासः । श्रिय सरलद्रवस्य पिष्टस्तच्चूर्णेन जनितत्वात् । 'सरलो देवदारुरेव' इति भ्रम ॥[5]

मृगनाभिर्मृगमदः कस्तूरी च

मृगस्य नाभि । कसति गन्धोऽस्या[6] । 'कस गतौ' (भ्वा० प० से०) । खर्जूरादि (उ० ४ ९०)[7] त्रीणि ॥[8]

अथ कोलकम् ॥ १२९ ॥

ककोलक[9] कोशफलम्

ककोलति । 'कुल सस्त्याने' (भ्वा० प० से०) ॥ १२९ ॥ क कोल्यति । कोशे फलमस्य । 'मरिच' 'ककोल' [इति च ख्यातस्य] ॥[10]

अथ कर्पूरमस्त्रियाम् ।
घनसारश्चन्द्रसंज्ञ सिताभ्रो हिमवालुक ॥ १३० ॥

करोतीति कर, स चासौ पूरश्च । घनो दृढ सारोऽस्य । चन्द्रस्य संज्ञा यस्य । सितमभ्रमिव । हिमा वालुकाऽस्य[11] । 'वालुका' इत्यपि नामेत्यन्ये ॥१३०॥[12]

---

1 Resin [5] 2 Compound perfume [2] 3 Benzoin [4] 4 B reads श्रीवेष्ट—5 Turpentine [5] 6 M गन्धोऽस्या 7 Musk [3] 8 Majority reads ककोलकम् 9 A perfume prepared with the berries of the kankola plant [3] 10 M मारीच 11 M. वालुकाऽस्य 12 Camphor [5]

गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् ।

गन्धसारो द्रवोऽस्य[1] । मलये जातः । भद्रा श्रीरस्य । चन्दयति । 'चदि आह्लादने' (भ्वा० प० से०) । ल्युट् (३.४.११३) चत्वारि ॥[2]

तैलपर्णिकगोशीर्षे हरिचन्दनमस्त्रियाम् ॥ १३१॥

तिलपर्णी वृक्षभेदस्तत्र जातः (४.३.२५) अण् । गोः शीर्षमिव । हरेरिन्द्रस्य चन्दनम् । 'चन्दनविशेषाणां' पृथक् पृथक् ॥ १३१ ॥[3]

तिलपर्णी तु पत्राङ्गं रञ्जनं रक्तचन्दनम् ।

कुचन्दनं च

तिलस्येव पर्णान्यस्याः । पत्रमेवाङ्गमस्य । रञ्जयति । कुचन्दनं निर्गन्धत्वात् । 'रक्तचन्दनस्य' ॥[4]

अथ जातीकोशजातीफले समे ॥ १३२ ॥

जात्याः कोशः 'जायफर' [लोके] ॥ १३३ ॥[5]

कर्पूरागुरुकस्तूरी कंकोलैर्यक्षकर्दमः ।

कर्पूरादिभिः सममार्गैर्यक्षप्रियः कर्दमः ॥[6]

गात्रानुलेपनी वर्तिर्वर्णकोऽस्त्री विलेपनम्[7] ॥१३३॥

गात्रमनुलिप्यतेऽनया[8] । वर्त्यते । 'अच इः' (उ० ४.१३८) । 'गात्रानुलेपनयोग्यस्य पिष्टसुगन्धस्य' चत्वारि । वर्णं करोति । ण्वुल् (३.१.१३३) । 'घृष्टचन्दनादिलेपमात्रस्य' द्वे ॥१३३॥[9]

चूर्णानि वासयोगाः स्युः

'चूर्ण प्रेरणे' (चु० प० से०) । घञ् (३.३.१९) । वासे सुगन्धीकरणे योगा उपायाः । 'पटवासादिक्षोदस्य' द्वे ॥[10]

---

1. M. द्रवोम्य 2. Sandal wood [5] 3. White sandal wood, gośīrṣa, and yellow sandal wood, haricandana [1 each] 4. Red sandal [5] 5. Nutmeg [2] 6. An ointment consisting of camphor, agallochum, musk and kaṅkola in equal propontions [1] 7. B. reads वर्तिर्वर्णकं स्याद्विलेपनम् 8. M. गात्रमनुलिप्यतेऽनया 9. An ointment prepared with rubbed sandal and other fragrant perfumes [4] 10. Perfumed powder [2].

भावित वासितं त्रिपु ।

भाव्यते । वास्यते । 'वस स्नेहनादौ' (चु० उ० से०) 'द्रव्यान्तरभावितस्य' द्वे ॥[1]

संस्कारो गन्धमाल्याद्यैर्यः स्यात्तदधिवासनम् ॥१३४॥

धूपादिभिर्वस्त्रादीना य सस्कार । अधिक वास्यते । 'वास उपसेवायाम्' [चुरादि] ॥१३४॥[2]

माल्य मालास्रजौ मूर्ध्नि

मल्यते । 'मल धारणे' (भ्वा० आ० स०) । ण्यत् (३ १ १२४) । मा लाति । सृज्यते स्रक् । मूर्ध्नि शिरसि । अङ्गान्तरस्योपलक्षणमिदम् । त्रीणि ॥[3]

केशमध्ये तु गर्भक ।

गर्भ इव । एकम् ॥[4]

प्रभ्रष्टक शिखालम्बि

शिखातो लम्बते । एकम् ॥[5]

पुरो न्यस्त ललामकम् ॥१३५॥

पुरोभागे न्यस्तं माल्य ललाटपर्यन्त ललाममिव ॥१३५॥[6]

प्रालम्बमृजुलम्बि स्यात्कण्ठात्

प्रालम्बते । ऋजु लम्बित शीलमस्य ॥[7]

वैकक्षक तु तत्

यत्तिर्यक् क्षिप्तमुरसि

तिरश्च्य कक्षोऽस्माद्विकक्षमुरस्तत्र भवम् । एकम् ॥[8]

शिखास्वापीडशेखरौ ॥१३६॥

शिखालिप्तमाल । आपीडयति । 'पीड अवगाहने' (चु० प० से०) । द्वे ॥१३६॥[9]

---

1 Any perfumed or scented thing [2] 2 Scenting with perfumes or odorous substances [1] 3 Garland [3] 4 A garland worn in the hair [1] 5 A garland hanging from the crest [2] 6 A garland worn on the fore head [1] 7 A garland worn straight [1] 8 A garland worn sideways like the sacred thread [1] 9 A garland worn on the head [2]

रचना स्यात्परिस्पन्द

रच्यते। 'स्पदि किंचिच्चलने' (भ्वा० आ० से०)। भावे घञ् (३ ३ १८)। 'शिल्पादिरचनाया' द्वे ॥[1]

आभोगः परिपूर्णता।

भुजेर्घञ् (३ ३ १८)। परिपूर्णस्य भाव । द्वे ॥[2]

उपधान तूपबर्हः

उपधीयते शिरोऽत्र[3]। उपबृह्यतेऽत्र[4]। 'बृह वृद्धौ' (भ्वा० प० से०)। 'शिरोनिवेशनस्य' द्वे ॥'तकिआ' [लोके] ॥[5]

शय्यायां शयनीयवत् ॥१३७॥

शयनम्

शय्यतेऽस्मिन्[6]। शयनीयम्। ल्युटि शयनम्। त्रीणि 'तुलिकादे'। 'तोसक' [लोके] ॥१३७॥[7]

मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः।

मञ्च्यते। 'मचि धारणे' (भ्वा० आ० से०)। परितोऽङ्क्यते[8]। 'अकि लक्षणे' (भ्वा० आ० से०)। 'परेश्च घाङ्कयो' (८ २ २२) इति वा ल । खट्यते। 'खट काङ्क्षायाम्' (भ्वा० प० से०)। क्वुन् (उ० १ १५२)। चत्वारि ॥[9]

गेन्दुक कन्दुक

गाते गा, स इन्दुरिव। कन्द्यते। 'कदि रोदने' (भ्वा० प० से०)। बाहुलकादुक। 'गेंदा' [लोके] ॥[10]

दीप प्रदीप

दीप्यतेऽनेन[11]। द्वे ॥[12]

पीठमासनम् ॥१३८॥

पठन्त्यत्र। 'पिठ हिंसादौ' (भ्वा० प० से०)। बाहुलकाद्दीर्घ। आस्यतेऽत्र[13]। द्वे ॥१३८॥[14]

समुद्रक सम्पुटक

समुद्गच्छति। ड (वा० ३ २ ४८)। संपुट्यते। 'पुट संश्लेषणे' (तु० प० से०)। 'डब्बा' [लोके] ॥[15]

---

1 Making a garland [2] 2 Completion [2] 3 M शिरोत्र 4 M उपबृह्यतेत्र 5 Pillow [2] 6 M शय्यतेस्मिन् 7 Bed [3] 8 M परितोङ्क्यते 9 Cot [4] 10 Ball [2] 11 M दीप्यतेनेन 12 Lamp [2] 13 M आस्यतेत्र 14 Seat [2] 15 Casket [2]

प्रतिग्राह पतद्ग्रह ।

प्रति गृह्णाति । ण (३ १ १४३) । पततो ग्रह । 'पीकदानी' [लोके] ॥[1]

प्रसाधनी कङ्कतिका

प्रसाध्यतेऽनया[2] । कङ्कते । बाहुलकादतच् । 'ककही' [लोके] ॥[3]

पिष्टात पटवासक ॥१३९॥

पिष्टमतति । पटो वास्यते येन । बुक्का [लोके] ॥१३९॥[4]

दर्पणे मुकरादर्शौ

दर्पयति । 'दृप हर्षमोचनयो' (दि० प० अ०) । मङ्कते । 'मकि मण्डने' (भ्वा० आ० से०) । 'मुकुरदर्दुरौ (उ० १ ४०) इति साधु । आदर्श्यतेऽत्र[5] । त्रीणि ॥[6]

व्यजन तालवृन्तकम् ।

इति नृवर्ग ॥६॥

व्यजन्त्यनेन । 'अज गतिक्षेपणयो (भ्वा० प० से०) । तालस्येव वृन्तमस्य ॥[7]

इति नृवर्ग ॥६॥

सततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वशोऽन्ववाय सतान

सतन्यते । तनोते (तु० उ० से०) क्तिन् (३ ३ ९४) । गा यायते । जन्यतेऽनेन[8] । कोलति कुलति वा । अभिजायते । घञ् (३ ३ १९) । इण । (अ० प० अ०) 'एरच्' (३ ३ ५६) । उच्यते । 'वश कान्तौ' (अ० प० से०) । पृषोदरादित्वान्नुम् । अन्ववाय्यते । 'अय गतौ (भ्वा० आ० से०) । 'तनोतेरण' (वा० ३ १ १४०) इति ण । नव ॥[9]

वर्णा स्युर्ब्राह्मणादयः ॥१॥

वर्ण्यते । 'वर्ण प्रेरणे' (चु० प० से०) ॥१॥[10]

---

1 Spitting pot [2] 2 M प्रसाध्यतनया 3 Comb [2] 4 Powder [2] 5 M आदर्शनेत्र 6 Mirror [3] 7 Fan [2] 8 M जन्यतनत्र 9 Lineage or family [9] 10 Brahmana and other castes

विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम् ।

चत्वार एव वर्णाः । 'चतुर्वर्णादीनाम्' (वा० ५.१.१२४) इति ष्यञ् ॥[1]

राजबीजी राजवंश्यः

राज्ञो बीजमस्त्यस्य । राज्ञो वंशे साधुः । द्वे ॥[2]

बीज्यस्तु कुलसंभवः ॥२॥

बीजे साधुः । कुले संभवोऽस्य[3] । द्वे ॥२॥[4]

महाकुलकुलीनार्यसभ्यसज्जनसाधवः ।

महच्च तत्कुलं च । तदपत्यम् । कुलादञ्खञौ (४.१.१४१) । कुलस्यापत्यम् । 'कुलात्ख' (४.१.१३९) । अर्यते । 'ऋ गतौ' (भ्वा० प० अ०) । ण्यत् (३.१.१२४) । सभायां साधुः । सश्चासौ जनश्च । 'कृवापा—' (उ० १.१) इत्युण् । साधुः । षट् 'कुलीनस्य' ॥[5]

ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ॥३॥

आश्रमोऽस्त्री

ब्रह्म वेदः । तदध्ययनार्थं व्रतमपि ब्रह्म । तच्चरितुं शीलमस्य । गृहाः दाराः सन्त्यस्य । वनमेव प्रस्थो देशः । 'तत्र भवः' (४.३.५३) । भिक्षते । तच्छीलः । 'सनाशंस—' (३.२.१६८) इत्युः ॥३॥ आसमन्तात् श्रमोऽत्र । एकम् ॥[6]

द्विजात्यग्रजन्मभूदेववाडवाः ।

विप्रश्च ब्राह्मणः

द्वे जाती जन्मनी अस्य । जन्मना उपनयनेन च । अग्रे आदौ जन्मास्य । भुवो देवः । वडवाया जातः । विप्राति । 'प्रा पूर्तौ' (अ० प० अ०) । ब्रह्मणोऽपत्यम्[7] ॥[8]

असौ षट्कर्मा यागादिभिर्युतः ॥४॥

असौ विप्रः यागादिभिर्युतः षट्कर्मा, षट्कर्माण्यस्य । एकम् ॥[9]

---

1. The aggregate of the four Hindu castes [1] 2. A royal descent [2] 3. M. संभवोस्य 4. Good family [2] 5 A high descent [6] 6. Four āśramas brahmacarya, gārhasthya, vānaprastha and sanyāsa 7. M. ब्रह्मणोऽपत्यम् 8. Brahmaṇa [6] 9. A Brahmaṇa performing the six duties enjoined on him [1].

विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुध ।
धीरो मनीषी ज्ञ प्राज्ञ संख्यावान्पण्डित कविः ॥५॥
श्रीमान्सूरि कृती कृष्टिर्लब्धवर्णो विचक्षण ।
दूरदर्शी दीर्घदर्शी

वेत्ति । 'विद शतुर्वसु' (७ १ ३६) । विप्रकृष्ट निश्चिनोति । पृषोदरादि (६ ३ १०९) । दोष जानाति । अस्तीति सन् । शत्रन्त । सुष्ठु ध्यायति । कुङ (भ्वा० आ० अ०) विच् (३ २ ७५) । गुण (७ ३ ८४) । कोर्वेदस्य विद । बुध्यते बुध । धियमीरयति । मनीषाऽस्यास्ति[1] । व्रीह्यादि (५ २ ११६) । जानाति ज्ञ । प्रज्ञ एव प्राज्ञ । सख्या विचारणाऽस्त्यस्य[2] । सदसद्विवेचिनी बुद्धि पण्डा, सा जाताऽस्य[3] । 'कुङ् शब्दे' (भ्वा० आ० अ०) । 'अच इ' (उ० ४ १३८) ॥५॥ धीरस्यास्ति । सूते सूरि । क्रि (उ० ४ ६४) । कृतमनेन । 'इष्टादिभ्यश्च' (५ २ ८८) इतीनि । कर्षति । क्तिच् (३ ३ १७४) । लब्धो वर्णो[4] स्तुतिर्येन । विचष्टे । 'अनुदात्तेतश्च—' (३ २ १४९) इति युच् । दूरात्पश्यति ॥[5]

श्रोत्रियच्छान्दसौ समौ ॥६॥

छन्दोऽधीते[6] । 'श्रोत्रियश्च—' (५ २ ८४) । 'तदधीते—' ४ २ ५९) पक्षे अण् । द्वे ॥६॥[7]

उपाध्यायोऽध्यापक

उपेत्याधीयतेऽस्मात्[8] । 'इङश्च (३ ३ २१) इति घञ् । अध्यापयति । ण्वुल् (३ १ १३३) ॥ द्वे ॥[9]

अथ स्यान्निषेकादिकृद्गुरु[10] ।

निषेको गर्भाधानम् । गृणाति धर्मम् । 'गॄ शब्दे' (क्र्या० प० से०) । 'कृग्रोरुच्च' (उ० १ २४) इत्यु । एकम् ॥[11]

मन्त्रव्याख्याकृदाचार्य

मन्त्रस्य वेदस्य व्याख्यान करोति । आचर्यते । ण्यत् (३ १ १२४) ॥[12]

---

1 M मनीषास्यास्ति 2 M विचारणास्त्यस्य 3 M जातास्य
4 M वर्ण 5 Scholar or learned man [22] 6 M छन्दोधीते
7 A Brahmaṇa well versed in the veda [2] 8 M उपेत्या धीयतेस्मात् 9 Preceptor [2] 10 H reads स निषकादिकृद्गुरु
11 Gurū (spiritual preceptor) [1] 12 An interpretor of the veda [1]

आदेष्टा त्वध्वरे व्रती ॥७॥

यष्टा च यजमान

आदिशति प्रेरयति । ऋत्विजो यागादौ व्रत भोजनादिनियमोऽस्यास्ति[1] ॥७॥ यजते । तृच् (३ १ १३३) । 'पुङ्यजोः शानन्' (३ २ १२८) । त्रीणि ॥[2]

अथ स सोमवति दीक्षितः ।

स व्रती सोमपानवति यागे आदेश सन् । दीक्षा जाताऽस्य[3] । एकम् ॥[4]

इज्याशीलो यायजूक

इज्या शीलमस्य । पुन पुनर्यजते । 'यजजपदशा यङ' (३ २ ११६६) इत्यूक । द्वे ॥[5]

यज्वा तु विधिनेष्टवान् ॥८॥

'सुयजोर्ङ्वनिप्' (३ २ १०३) । एकम् ॥८॥[6]

स गीष्प (र्प) तीष्ट्या स्थपति

स यज्वा । बृहस्पतिसवेनेष्टवान् । स्थीयते स्थ । घञर्थे (वा० ३ ३ ५८) क । स्थस्य पति । एकम् ॥[7]

सोमपीती तु सोमप ।

सोम पीतोऽनेन[8] । पिबते थकि (उ० २ ७) । 'पीथी' इत्यपे । द्वे ॥[9]

सर्ववेदा स येनेष्टो याग सर्वस्वदक्षिणः ॥९॥

सर्वं वेदयति । असुन् (उ० ४ १९८) । सर्वस्व दक्षिणा यत्र स विश्वजिदादिर्येन कृत ॥९॥[10]

अनूचान प्रवचने साङ्गेऽधीती

अनूक्तवान् । 'उपेयिवान्–' (३ २ १०९) इति साधु । प्रोच्यते प्रवचनो वेदस्तत्राधीतमनेन । एकम् ॥[11]

---

1 M नियमोस्यास्ति 2 One who performs a sacrifice (yajña) [3] 3 M जातास्य 4 A priest engaged in somavat sacrifice [1] 5 A constant sacrificer [2] 6 A performer of sacrifice in accordance with vedic precepts [1] 7 A sacrificer of bṛhaspatiyāga [1] 8 M पीतोनेन 9 A soma-sacrificer 10 A person, who performs sacrifice by giving away all his wealth in dakṣiṇā 11 A person who teaches vedas with their branches (aṅgas) [1]

गुरोस्तु य ।

लब्धानुज्ञ समावृत्तः

गुरो सकाशाल्लब्धाप्राप्तानुज्ञा येन । वृते 'गत्यर्था—' (३ ४ ७२) इति क्त ॥[1]

सुत्वा त्वभिषवे कृते ॥ १० ॥

सुनोति सुत्वा । 'सुयजोर्ङ्वनिप्' (३ २ १०३) । अभिषवोऽवभृथस्नानम् । एकम् ॥[2]

छात्रान्तेवासिनौ शिष्ये

गुरोर्दोषावरण छत्रम् । तच्छीलमस्य, छात्र । 'छत्रादिभ्यो ण' (४ ४ ६२) । अन्ते समीपे वसति । शिष्यते । 'एतिस्तु—' (३ १ १०९) इति क्यप् । 'शास इत्—' (६ ४ ३४) । त्रीणि ॥[3]

शैक्षा प्राथमकल्पिका ।

शिक्षामधीयते । प्रथमकल्प आरम्भ प्रयोजनमेषाम् । 'प्रथमारब्धवेदाना' द्वे ॥[4]

एकब्रह्मव्रताचारा मिथ सब्रह्मचारिण ॥ ११ ॥

एकस्मिन्ब्रह्मणि व्रते चाचरण येषा ते । परस्पर समान ब्रह्म चरन्ति । 'व्रते' (३ २ ८०) इति णिनि । एकम् ॥ ११ ॥[5]

सतीर्थ्यास्त्वेकगुरव

समाने तीर्थे गुरौ वसति । 'समानतीर्थे वासी' (४ ४. १०७) इति यत् । एको गुरुरेषाम् ॥ द्वे ॥

चितवानग्निमग्निचित् ।

'अग्नौ चे' (३ २ ९१) इति क्विप् । एकम् ॥[7]

पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम् ॥ १२ ॥

परपराया आगत । अणन्तात् (४ ३ ७४) स्वार्थे ष्यञ् । पारपर्यंश्चा सावुपदेशश्च । 'अनन्तावसथ—' (५ ४ २३) इति ञ्य । इतिह्यम् । द्वे ॥ १२ ॥[8]

---

1 A pupil, who has returned home with permission of his Guru [1] 2 A student who has performed his ablutions (subsequent or preparatory to a sacrifice) [1] 3 Disciple [3] 4 One, who has just entered upon the study of the Vedas and Sikṣa [1] 5 A student going through the same studies and observing the same [1] 6 A fellow student [1] 7 A person, who has kept the sacred fire [1] 8 Traditional instruction (aitihya) [2]

उपज्ञा ज्ञानमाद्यं स्यात्

'आतश्च—' (३ ३ १०६) इत्यङि उपज्ञा ॥[1]

ज्ञात्वारम्भ उपक्रमः ।

क्रमे (भ्वा० प० से०) घञि (३ ३ १८) उपक्रमः ॥[2]

यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥ १३ ॥

इज्यतेऽनेन[3] । 'यजयाच—' (३ ३ ९०) इति नङ् । सूयते सोमोऽत्र[4] । षूञ् (स्वा० उ० अ०) अप् (३ ३ ५७) । न ध्वरति । 'धृ कौटिल्ये' (भ्वा० प० अ०) । घञि (३ ३ १८) यागः । सप्तभिरग्निजिह्वाभिस्तन्यते । 'सितनि—' (उ० १ ६९) इति तुन् । मखत्यत्र । 'मख गतौ' (भ्वा० प० से०) । क्रियते । 'कृञ कतुः (उ० १ ७७) । सप्त ॥ १३ ॥[5]

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ १४ ॥

पाठो घञ् (३ ३ १८) । हवनं होमः । 'अर्तिस्तु—' (उ० १ १४०) इति मन् । अतिथीनां गृहागतानां सपर्या पूजनम् । 'बल दाने' (भ्वा० आ० से०) । इन् (उ० ४ ११७) । 'अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥" (मनु ३ ७०) ॥ १४[6]

समज्या परिषद् गोष्ठी सभासमितिसंसदः ।
आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः ॥ १५ ॥

समजन्त्यस्याम् । 'अज गतौ (भ्वा० प० से०) । 'संज्ञायां समज—' (३ ३ ९९) इति क्यप् । परितः सीदन्त्यस्याम् । गावोऽनेकार्थाश्चास्तिष्ठन्त्यस्याम्[7] । सह भान्त्यस्याम् । समियन्त्यस्याम् । इण (अ० प० से०) क्तिन् (३ ३ ९४) । संसीदन्त्यत्र । आतिष्ठन्त्यत्र । सदेरसुन् (उ० ४ १८८) । सद । नव ॥ १५ ॥[8]

प्राग्वंशः प्राग्घविर्गेहात्

हविः शालायाः पूर्वभागे यजमानादीनां स्थित्यर्थं गेहं प्राग्वंशः । प्राङ् वंशः स्थूणाऽत्र[9] ॥[10]

---

1 The knowledge acquired by self [1] 2 Commencemant [1] 3 M इज्यतेनेन 4 M सोमोत्र 5 Sacrifice (yajña) [7] 6 Five sacrifices enjoined to be performed daily by aBrāhmaṇa 7 M गावोनेकार्थाचस्तिष्ठन्त्यस्याम् 8 Assembly or meeting [9] 9 M स्थूणात्र 10 A sort of sacrificial room for yajamāna and others [1]

सदस्या विधिदर्शिन ।

सदसि साधव । विधिं पश्यन्ति । ऋत्विग्विशेषा एते ॥[1]

सभासद सभास्तारा सभ्या सामाजिकाश्च ते ॥ १६ ॥

सभाया सीदन्ति । सभा स्तृणन्ति । 'स्तृञ् आच्छादने' (क्र्या० प० से०) । समाज रक्षन्ति । चत्वारि ॥ १६ ॥[2]

अध्वर्यूद्गातृहोतारो यजुस्सामर्ग्विद क्रमात् ।

न ध्वरति । विच् (३ २ ७५) । अध्वर यौति । यजुर्वेत्ति य । उद्गायति सामवित् । होता स य ऋग्वेद वेद ॥[3]

आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्चते ॥ १७ ॥

अग्निमिन्ध, अग्नित् । अग्नीध स्थानमाग्नीध्रम् । 'अग्नीध शरणे रण् भ च' (वा० ४ ३ १२०) । तात्स्थ्यात् सोऽप्याग्नीध्र[4] ॥ १७ ॥[5]

वेदि परिष्कृता भूमि

वेद्यते वेदि । 'अच इ' (उ० ४ १३८) । परित कृता सस्कृता ॥[6]

समे स्थण्डिलचत्वरे ।

स्थल स्थम । 'ष्ठल स्थाने' (भ्वा० प० से०) । 'मिथिलादयश्च' (उ० १ ५७) इति साधु । चतन्त्यस्मिन् । ष्वरच् (उ० २ १२२) । 'यागार्थं सस्कृत भूमे ' द्वे ॥[7]

चपालो यूपकटकः

'चष भक्षणे' (भ्वा० उ० से०) । 'सानसि—' (उ० ४ १०७) इति साधु । यूपस्याग्रे कृत कटाकार । द्वे ॥[8]

कुम्बा सुगहना वृति ॥ १८ ॥

'कुबि आच्छादने' (भ्वा०, चु० प० से०) । गहना निबिडा वृतिर्वेष्टनम् ॥ १८ ॥

---

1 A priest who superintends performances of a sacrifice [1] 2 A member of or spectator at an assembly [1] 3 The sacrificial priests well versed in the first three vedas [1 each] 4 M आग्नीध्र 5 A priest who kindles the sacred fire [3] 6 Altar [1] 7 An altar prepared for a sacrifice [2] 8 A wooden ring on the top of a sacrificial post [2] 9 The enclosure round a sacrificial ground [1]

यूपाग्रं तर्म

यूपस्याग्रम् । तरति । मनिन् (३ २ ७५) इ ॥[1]

निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।

निर्मथ्यत । तच्च तद्दारु च । ऋच्छति । '—सृधृयमि—' (उ० २ १०२) इत्यनि ॥[2]

दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ १९ ॥

दक्षिणोऽग्नि[3] । 'गृहपतिना सयुक्ते ञ्य ' (४ ४ ९०) । आहूयतेऽत्र[4] ॥१९॥[5]

अग्नित्रयमिदं त्रेता

त्रायते वा । त्रासु इता त्रेता ॥[6]

प्रणीत सस्कृतोऽनल ।

प्रकर्षं नीत । एकम् ॥[7]

समूह्य परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥ २० ॥

समूह्यते । वहे (भ्वा० उ० अ०) ऊहे (भ्वा० आ० से०) वा । परिचीयते, उपचीयते च । 'अग्नौ परिचाय्योपचाय्यसमूह्या ' (३ १ १३१) । प्रयोगोऽस्ति[8] यथा ते । अग्नौ प्रयोक्तव्या अग्निनामानीत्यर्थ ॥ २० ॥[9]

यो गार्हपत्यादानीय दक्षिणाग्नि प्रणीयते ।

तस्मिन्नानाय्य

दक्षिणाग्नित्वेन सस्क्रियते । आनीयत । 'आनाय्योऽनित्ये[10]' (३ १ १२७) । यस्तु वैश्यकुलयोनि स 'आनेय ' ॥[11]

अथाग्नायी स्वाहा च हुतभुक्प्रिया ॥ २१ ॥

अग्ने स्त्री । वृषाकपि—' (४ १ ३७) इत्यैङ् । सुष्ठु आहूयन्तेऽनया[12] । ड (वा० ३ २ १०१) । हुतभुज प्रिया । त्रीणि ॥ २१ ॥[13]

---

1 The top of a sacrificial post [2] 2 A piece of wood used for kindling the sacred fire by attrition [1] 3 M दक्षिणोऽग्नि 4 M आहूयतेऽत्र 5 Three sacred fires 6 Three sacred fires taken collectively [1] 7 The fire consecrated by mantras [1] 8 M प्रयोगोऽस्ति 9 The sacrificial fire arranged in a circle [3] 10 M आनाय्योऽनित्ये 11 The sacred fire taken from gārhapatya [1] 12 M आहू न्तेऽनया 13 Svaha, the wife of Agni

ऋक्सामिधेनी धाय्या सा या स्यादग्निसमिन्धने ।

समिध आधीयन्तेऽनया[1] । 'समिधामाधाने षेण्यण्' (वा० ४ ३ १२०) । धीयतेऽग्निरनया[3] । 'पाय्यसानाय्य—' (३ १ १२९) इति साधु । 'अग्नि प्रज्वाल्यते यया ऋचा सा' द्वे ॥[4]

गायत्रीप्रमुख छन्द

गायन्त नायते । गौरादि (४ १ ४१) । षडक्षरपदा गायत्री, सप्ताक्षर० मुष्णिक्, इत्यादि । छन्द्यते [illegible]द । असुन् । एकम् ॥[5]

हव्यपाके चरुः पुमान् ॥ २२ ॥[6]

हव्यस्य पाक । चर्यते चरु । भृमृशी—' (उ० १ ७) इत्यु ॥ २२ ॥[6]

आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगत ।

आमिष्यते । मिषु सेचने' (भ्वा० प० से०) । बाहुलकात्सक् । शृते तप्ते दुग्धे दधियोजनात् ॥[7]

धवित्रं व्यजन तद्यद्रचित मृगचर्मणा ॥ २३ ॥

धूयतेऽनेनः । 'अर्तिलूधूसू—' (३ २ १८४) इत्र. । मृगचर्मणा यद्रचितम् ॥ २३ ॥[9]

पृषदाज्य सदध्याज्ये

पृषद्भि सहितमाज्यम् । दध्ना सहिते घृते एकम् ॥[10]

परमान्न तु पायसम् ।

परम च तदन्न च । पयसि सस्कृतम् । द्वे ॥[11]

हव्यकव्ये दैवपित्र्ये[12] अन्ने

हूयते । 'अचो यत्' (३ १ ९७) । कूयते पितृभ्य । 'कु शब्दे' (अ०प०अ०) । देवाश्च हव्यम्, पितृश्च कव्यम् ॥[13]

---

1 Majority reads च 2 M आधीयन्तेनया 3 M धीयतेग्निरनया.
4 The mantra which is recited while kindling the sacrificial fire [1] 5 Metre e g Gyatri, usnik sc [1]
6 An oblation of rice, barley and pulse boiled for presentation to the gods and manes [1] 7 A mixture of boiled and coagulated milk [1] 8 M धूयनेनेन 9 A fan made of the deer's skin [1] 10 Ghee mixed with coagulated milk [1] 11 Rice boilded in milk [2] 12 E prerers दैवपित्रे
13 Oblations to gods and manes [1 each]

पात्रं स्रुवादिकम् ॥ २४ ॥

स्रवति घृतादिकम्। 'स्रुवः कः' (उ० २.६१) ॥ २४ ॥[1]

ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः ।

ध्रुवति । उपबिभर्ति । 'द्युतिगमिजुहोतीनां द्वे च' जुहूः । स्रवति स्रुवः । भेदास्तु स्त्रियः । स्रुवः चिक् (उ० २.६२) एतद्भेदा स्त्रियः ॥[2]

उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ २५ ॥

उपाक्रियते । 'कृञ् हिंसायाम्' (स्वा० उ० अ०) ॥[3]

परंपराकं शमनं प्रोक्षणं च वधार्थकम् ।

परंपराया अकनम् । 'अक गतौ' (भ्वा० प० से०) । शाम्यतेः (दि० प० से०) ल्युट् (३.३.११५) । प्रकर्षेणोक्षणम् । वध हिंसायाम् । 'यज्ञाङ्गपशुहिंसनस्य' त्रीणि ॥[4]

वाच्यलिङ्गाः प्रमीतोपसंपन्नप्रोक्षिता हते ॥ २६ ॥

'मीञ् हिंसायाम्' (क्र्या० उ० अ०) । मीतः । 'पद गतौ' (दि० आ०अ०), क्तः । 'यज्ञे हतस्य पशोः' त्रीणि ॥ २६ ॥[5]

सांनाय्यं हविः

संनीयते । 'पाय्यसांनाय्य—' (३.१.१२९) इति साधुः । हूयते । 'अर्चिशुचि—' (उ० २.१०८) इतीसिः । सांनाय्यं हविर्विशेषः । द्वे ॥[6]

अग्नौ तु हुतं त्रिषु वषट्कृतम् ।

हुतं प्रक्षिप्तम् । वषण्मन्त्रेण कृतम् । 'प्रक्षिप्तहुतस्य' द्वे ॥[7]

दीक्षान्तोऽवभृथो यज्ञे[8]

अवभ्रियतेऽनेन[9] । 'अवे भृञः' (उ० २.३) इति क्थन् । दीक्षाया अन्तः । प्रधानकर्मसमाप्तौ यज्ञे क्रियमाण इष्टिविशेषः ॥[10]

1. The laddle and other wooden vessels used in a sacrifice [1] 2. A sacrificial laddle [3] 3. The animal killed in a sacrifice [1] 4. Immolatien of an animal at sacrifice [3] 5. Immolated animal at sacrifice [3] 6. A kind of oblation [2] 7. The oblation offered to fire [2] 8. Majority reads यज्ञः 9. M. अवभ्रियतेनेन 10. A supplementary sacrifice at the end of a principal sacrifice [1].

तत्कर्मार्हं तु यज्ञियम् ॥ २७ ॥

त्रिपु

तस्य यज्ञस्य क्रियामर्हति । यज्ञमर्हति । 'यज्ञर्त्विग्भ्याम्—' (५ १ ७१) इत्यत्रोपसंख्यानाद् घ ॥ २७ ॥[1]

अथ क्रतुकर्मेष्टम्

क्रतुर्यज्ञ । कर्म दानादि । इदमिष्टशब्दवाच्यम् ॥[2]

पूर्तं खातादिकर्माणि ।

पुष्करिणी खननदेवालयादिनिर्माणादि पूर्तम् ॥[3]

अमृतं विघसो यज्ञशेषभोजनशेषयो ॥२८॥

यज्ञे होमावशिष्टमाज्यपुरोडाशाद्यमृतम् । देवातिथिगुर्वादिशिष्ट विघस । 'घञपोश्च' (२ ४ ३८) इत्यदो घस्लृ ॥२८॥[4]

त्यागो विहायित दानमुत्सर्जनविसर्जने ।
विश्राणनं वितरण स्पर्शनं प्रतिपादनम् ॥२९॥
प्रादेशन निर्वपणमपवर्जनमंहति ।

'त्यज हानौ' (भ्वा० प० अ०) । हाको (जु० प० अ०) ण्यन्तात्क्त (३ ३ ११४) । सृज विसर्गे' (तु० प० अ०) । 'श्रण दाने' [चुरादि] 'स्पृश स्पर्शे' (तु० प० अ०) ॥२९॥ 'दिश अतिसर्जने' (तु० उ० अ०) । 'डुवप्' (भ्वा० उ० अ०) । 'वृजी वर्जने (अ० आ०, रु० प०, चु० उ० से०) । 'हन्तेरह च' (उ० ४ ६२) इत्यति ॥[5]

मृतार्थं तदहर्दानं[6] त्रिपु स्यादौर्ध्वदेहिकम् ॥३०॥

मृतार्थं तदह प्रेतदिने प्रेतमुद्दिश्य मरणदिनमारभ्य सपिण्डीकरणपर्यन्त दीयमान जलपिण्डादिकम् । देहादूर्ध्वम् । ऊर्ध्वदेह । तत्र भव । अध्यात्मादि (वा० ४ ३ ६०) । केचिदुभयपदवृद्धिमाहु ॥३०॥[7]

---

1 A sacrificial thing [1] 2 Iṣṭa i e, performing sacrifices and doing charitable works [1] 3 Purta i e, act of pious liberality (such as digging well &c) [1] 4 The residue or leaving of a sacrifice, and remains of food [1 each]
5 Donation or gift [13] 6 Majority preferes मृतार्थं तदहर्दानं
7 Funeral rites [1]

पितृदानं निवापः स्यात्

पितृभ्यो दानम् । न्युप्यते । 'डुवप्' (भ्वा० उ० अ०) घञ् । 'सपिण्डादूर्ध्वं पितृद्देशेन दानस्य' द्वे ॥[1]

श्राद्धं तत्कर्म शास्त्रतः ।

श्रद्धाऽस्त्यस्मिन्[2] । 'प्रज्ञाश्रद्धा—' (५ २ १०१) इति ण । तेषां पितॄणां कर्म । शास्त्रविधानेन ॥[3]

अन्वाहार्यं मासिके[4]

अनु आ ह्रियते । ण्यत् (३ १ १२४) । मासे भवम् द्वे ॥[5]

अशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम् ॥३१॥

पञ्चदशमुहूर्त्तात्मकस्य दिनस्याष्टमो भाग । कुत्सितं तपति ॥३१॥[6]

पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा ।

'इषेरनिच्छार्थस्य' (वा० ३ ३ १०७) युच् । 'परेर्वा' (वा० ३ १ १०७) 'गवेष मार्गणे' [चुरादि] । 'धर्माद्यन्वेषणस्य' चत्वारि ॥[7]

सनिस्त्वध्येषणा

सननं सनि । 'षणु दाने' (तु० उ० से०) । इषर्युच् (वा० ३ ३ १०७) । गुर्वाराधनस्य द्वे ॥[8]

याच्ञाभिशस्तिर्याचनार्थना ॥३२॥

याच (भ्वा० उ० से०) नङ् (३ ३ ९०) अ भवासनम् । 'शसु स्तुत्यादौ (भ्वा० प० से०) । क्तिन् (३ ३ ९४) । 'अर्थ याच्ञायाम्' (चु० उ० से०) । चत्वारि ॥३२॥[9]

पट् तु त्रिषु

इत पट् त्रिषु ॥

---

1 An offering to the manes [2] 2 M श्रद्धात्रास्ति 3 The funeral rite perfermed for the departed spirits of dead relatives [1] 4 B मासिक 5 The eigth part, of a day [1] 6 The monthly sraddha performed on the day of new moon [1] 7 A religious enquiry [4] 8 A respectful solicitation, entreaty [2] 9 Asking; begging [4]

अर्घ्यमर्घार्थ पाद्यं पादार्थवारिणि[1]।

जले। पादायेदम्॥[2]

क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि॥३३॥

अतिथये इदम्। 'अतिथेर्ञ्यः' (५ ४ २६)। अतिथौ साधु। पथ्यतिथि—' (४.४ १०४) इति ढञ्। एकैकम्॥३३॥[3]

स्युरावेशिक आगन्तुरतिथिर्ना गृहागते।

अवेशो, अगेहे भव। अध्यात्मादि (वा० ४ ३ ६०)। आगच्छति। सितनि—' (उ० १ ६९) इति तुन्। अतति। 'ऋतन्यञ्जि—' (उ० ४२) इति इथिन्। 'गृहागतस्य' त्रीणि॥ प्राघूर्णकप्राघुणकावभ्युत्थान तु गौरवम् इति क्वचित्॥[4]

पूजा नमस्याऽपचितिः सपर्याऽर्चाऽर्हणा समा॥३४॥

'पूज पूजायाम्' (चु० प० से०)। नमस्करणम्। क्यजन्ताद् (३ १ १९) अ (३ ३ १०२)। 'सपर पूजायाम्' कण्ड्वादि। यक् (३ १ २७)। 'अर्च पूजायाम्' (भ्वा० प० से०)। 'अर्ह पूजायाम्' [चुरादि]। 'पूजायाः' षट्॥[5]

वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्।[6]

'वरिवस्' शब्द पूजार्थ। तत क्यच् (३ १ १९) श्रोतुमिच्छा। श्रुव (भ्वा० प० अ०) सन्। परित चरणम्। '—परिचर्यापरिसर्या—' (वा० ३ ३ १०१) इति साधु। 'सेवायाः' चत्वारि॥[7]

व्रज्याटाट्या पर्यटनम्

'व्रजयजो —' (३ ३ ९८) इति क्यप्। अटनम्। 'परिचर्या—' (वा० ३ ३ १०१) इत्यादिना निपातित। 'अटनस्य' त्रीणि॥[8]

---

1 Majority reads पादाय वारिणि 2 Arghya i e the respectful offering or oblation to gods and venerable men, and arghya the offering of water for washing feet [1 each] 3 Hospitality, and hospitable person [1 each] 4 Guest [3] 5 Worship [6] 6 B reads परिचर्याप्युपासना 7 Service [4] 8 Wandering or rooming about [3]

चर्या त्वीर्यापथे स्थिति[1] ॥३५॥

चरणम् । 'गदमदचर—' (३ १ १००) इति यत् । 'ईर गतौ' (अ० आ० से०) । ण्यत् (३ १ १२४) । ईर्याया पन्था ईर्यापथ । ईर्यापथे ध्यानाद्युपाये परिव्राजकाना स्थिति ॥ ३५ ॥[2]

उपस्पर्शस्त्वाचमनम्

उपस्पर्शनम् । 'चमु अदने' (भ्वा० प से०) ॥[3]

अथ मौनमभाषणम् ॥

मुने कर्म । [मौनम् ।] ॥[4]

आनुपूर्वी स्त्रिया वावृत्परिपाटी अनुक्रम ॥ ३६ ॥

पर्यायश्च

पूर्वं पूर्वमनुपूर्वम्, पूर्वानुक्रमेण च । अनुपूर्वं भाव । हढादित्वात् (५ १ १२३) ष्यञ् । ङीप् । आवर्तनमत्र । वृते (भ्वा० आ० से०) क्विप् (वा० ३ ३ ९४) । परिपटनम् । 'पट गतौ' (भ्वा० प० से०) । ण्यन्तात् 'अच इ' (उ० ४ १३८) । क्रमे (भ्वा० प० से०) घञ् (३ ३ १८) ॥ ३६ ॥ पर्ययणम् । इणो घञ् (३ ३ ३८) । 'क्रमस्य' पञ्च ॥[5]

अतिपातस्तु स्यात्पर्यय उपात्यय ।

अतिक्रम्य पतनम् । पर्ययणम् । 'एरच्' (३ ३ ५६) । 'क्रमोल्लङ्घनस्य' त्रीणि ॥[6]

नियमो व्रतमस्त्री

नियमनम् । अच् । 'व्रतमात्रस्य' द्वे ॥[7]

तच्चोपवासादि पुण्यकम् ॥ ३७ ॥

तदुपवासादि व्रत पुण्यमेव । 'सज्ञाया कन्' (५ ३ ७५) ॥ ३७ ॥[8]

उपवस्त्तूपवासः

उपवसनम् । 'वसु स्तम्भे' (दि० प० से०) । क्त (३ ३ ११४) । प्रज्ञादणि (५४३८) 'औपवस्तम्' अपि । अमतेर्घञ् (३ ३ १८) । द्वे ॥[10]

---

1 Majority reads (चीर्यापथस्थिति) 2 Performance of spiritual practices [1] 3 Sipping water before religious ceremonies [2] 4 Silence [2] 5 Sequence or order [5] 6 Inversion or violation of order [3] 7 Religious practice or austerity [2] 8 Meritorious acts such as fasting sc. [1] 9 B and K prefer औपवस्तं and औपवस्त्र respectively 10 Fasting [2]

विवेक पृथगात्मता।

'विचिर पृथग्भावे' (रु० उ० अ०)। घञ् (३ ३ १८)। पृथगात्मा यस्य तस्य भाव । 'प्रकृतिपुरुषादिभेदज्ञानस्य' द्वे ॥[1]

स्याद्ब्रह्मवर्चस वृत्ताध्ययनर्द्धि

ब्रह्मणस्तपसो वर्च । ब्रह्महस्तिभ्याम्—' (५ ४ ७८) इत्यच् । वृत्तमाचार, तस्य अध्ययनस्य च ऋद्धि ॥ ३८ ॥[2]

अथाञ्जलिः ॥ ३८ ॥

पाठे ब्रह्माञ्जलिः

ब्रह्मणोऽञ्जलि [3] । वेदपाठकाले कृतोऽञ्जलिरित्यर्थ [4] ॥[5]

पाठे विप्रुषा ब्रह्मबिन्दव ।

वेदपाठ मुखान्निर्गता बिन्दवो ब्रह्मबिन्दव ॥[6]

ध्यानयोगासने ब्रह्मासनम्

ध्यानस्य योग उपाय, तस्यासन स्वस्तिकादि ब्रह्मण सम्बन्धि आसनम् । एकम् ॥[7]

कल्पे विधिक्रमौ ॥ ३९ ॥

कल्पने । अच् (३ १ १३४)। विधान विधि । क्रमणमनन । घञ् । श्रीणि ॥ ३९ ॥[8]

मुख्य स्यात्प्रथम कल्प

मुखमिव । शाखादि (५ ३ १०३) ॥[9]

अनुकल्पस्ततोऽधम ।

अनु हीन कल्प । यथा—व्रीह्यभावे यवादि ॥[10]

---

1 Discriminative knowledge (between Puruṣa and Prakṛti) [2] 2 *Pre-eminence of religious practices and sacred knowledge* [2] 3 M ब्रह्मण अञ्जलि 4 M कृतोऽञ्जलिरित्यर्थं 5 The respectful salutation with folded hands while repeating the Vedas [1] 6 Drops of saliva sputtered while reciting the Vedas [1] 7 Brahmasana, a position for meditation [1] 8 Sacred precept or rule [3] 9 Principal precept [1] 10 Secondary precept [1]

संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः ॥ ४० ॥

सस्कार उपनयनम्, तत्पूर्वकं श्रुतेर्ग्रहणं वेदपाठारम्भविधिविशेष ॥४०॥[1]

समे तु पादग्रहणमभिवादनमित्युभे ।

पादयोर्ग्रहणं स्पर्शः । अभिमुखीकरणार्थं वादनम् । 'वैधस्य नामोच्चारणादिपूर्वकनमस्कारस्य' द्वे ॥[2]

भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी ॥ ४१ ॥

भिक्षते । 'सनाशस—' (३ २ १६८) इत्यु । परित्यज्य सर्वं व्रजति । कर्मन्देन प्रोक्तमधीते । 'कर्मन्दकृशाश्वादिनि' (४ ३ १११) । पाराशर्येण प्रोक्तमधीते । 'पाराशर्य—' (४ ३ ११०) इति णिनि । 'मस्करमस्करिणौ—' (६ १ १५४) इति निपात । पञ्च 'सन्यासिन' ॥ ४१ ॥[3]

तपस्वी तापस पारिकाङ्क्षी

तपोऽस्यास्ति[4] । 'तप सहस्राभ्याम्—' (५ २ १०२) इति विनि । 'अण् च' (५ २ १०३) । परिकाङ्क्षते । णिनि (३ २ ७८) । पृषोदरादि (६ ३ १०९) । त्रीणि ॥[5]

वाचयमो मुनि ।

वाचं यच्छति । 'वाचंयमपुरंदरौ—' (६ ३ ६९) इति साधु । 'मनेरुच्च' (उ० ४ १२२) इतीनि । 'मौनिन' द्वे ॥[6]

तपःक्लेशसहो दान्त.

तपस क्लेश, तं सहते । दमे (दि० प० अ०) क्त (३ ४ ७२) द्वे ॥[7]

वर्णिनो ब्रह्मचारिण ॥ ४२ ॥

वर्णं स्तुतिरस्यास्ति । ब्रह्म वेदाध्ययनार्थं व्रतं चरति ॥ ४२ ॥[8]

ऋषय सत्यवचस.

ऋषन्ति जानन्ति । 'ऋषी गतौ' (तु० प० से०) ॥[9]

---

1 Commencement of reading the Veda after the performance of the preparatory rite [1] 2 Salutation [2] 3 Ascetic [5] 4 M तपोऽस्यास्ति 5 An ascetic, who practices penance [2] 6 A sage practicing silence [2] 7 One, who bears the pain of religious austerity [1] 8 Brahmacarin [2] 9 Sage [2]

स्नातकस्त्वाप्लुतव्रती ।[1]

आप्लुतश्चासौ व्रती च । समाप्तवेदव्रत ॥[2]

ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते ॥ ४२ ॥

इन्द्रियाणां समूहो जितो यैः । यतमस्ति । यतन्ते (भ्वा० आ० से०) इनि (४ ११७) । 'जितेन्द्रियस्य' त्रीणि ॥ ४३ ॥[3]

यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ।

स्थाण्डिलश्च

स्थण्डिले भूमौ शेते । व्रते (३ २ ८०) इति णिनिः । 'स्थण्डिलाच्छयितरि व्रते' (४ २ १५) इत्यण् । द्वे ॥[4]

अथ विरजस्तमसः स्युर्द्वयातिगाः ॥ ४४ ॥

रजस्तमोभ्यां विगताः । द्वयमतिगच्छन्ति । द्वे ॥[5]

पवित्रः प्रयतः पूतः

पुनाति । 'अशित्रादिभ्य इत्रोत्रौ' (उ० ४ १७२) । प्रकर्षेण यतः । यमक्तः । पूञः । त्रीणि ॥[6]

पाखण्डाः[7] सर्वलिङ्गिनः ।

पातीति पाः वैदिकमार्गः तं खण्डयति । सर्वाणि लिङ्गानि येषाम् । द्वे ॥[8]

पालाशो दण्ड आषाढो व्रते

आषाढीपूर्णिमा प्रयोजनमस्य । 'विशाखाषाढादण्-' (५ १ ११०) । व्रते ब्रह्मचर्ये यः पलाशस्य दण्डः स इत्यर्थः ।[9]

राम्भस्तु वैणवः ॥ ४५ ॥

रम्भस्य वेणोर्विकारः व्रत एव, अन्यत्र वैणव एव ॥ ४५ ॥[10]

---

1 B and K read respectively as, स्नातकस्त्वाप्लुतो व्रती and स्नातकस्त्वाप्लवव्रती 2 A Brāhmaṇa, who has completed his study of the Vedas [2] 3 An ascetic who has controlled his sense-organs [3] 4 An ascetic, who sleeps on bare ground while performing religious austerities [2] 5 A person who is free from the influence of rajas and tamas qualities [2] 6 A holy person [3] 7 Majority prefers पाषण्डाः 8 Heretic [2] 9 A staff of the palāśa wood carried by an ascetic [1] 10 A bamboo staff carried by an ascetic or religious student [1]

अत्री कमण्डलु कुण्डी

कस्य जलस्य मण्ड सार , त लाति । मृग्व्यादि (उ० १ ३७)। 'कुडि दाहे' (भ्वा० आ० से०)। कुण्डी वमन्त चेत् । द्वे ॥[1]

व्रतिनामासन वृषी ।

व्रतिना ब्रह्मचार्यादीनामासनम् । वृवन्त सीदन्त्यस्याम् । ड (वा० ३ २. १०१)। एकम् ॥[2]

अजिनं चर्म कृत्ति स्त्री

'अज गतौ' (भ्वा० प० से०)। इनच् (उ० २ ४८)। चर्यते । मनिन् (उ० ४ १४४)। कृत्यते । 'कृती छेदने' (तु० प० से०)। क्तिन् (३ ३ ९४)। त्रीणि ॥[3]

भैक्षं भिक्षाकदम्बकम् ॥ ४६ ॥

भिक्षाणा समूह । 'भिक्षादिभ्योऽण्[4]' (४ २ ३८) ॥ ४६ ॥[5]

स्वाध्याय स्याज्जप

स्वस्य अध्ययनम् । 'इडश्च' (३ ३ २१) इति घञ् । 'व्यधजपो –' (३ ३ ६१) इत्यप् । 'वेदाध्ययनस्य' द्वे ॥[6]

सुत्याभिषव सवनं च सा ।

'सज्ञाया समज–' (३ ३ ९९) इति षुञ (स्वा० उ० से०) क्यप् । अपि (३ ३ ५७) अभिषव । ल्युटि (३ ३ ११५) सवनम् । 'सोमलताकण्डनस्य' त्रीणि ॥[7]

सर्वैनसामपध्वंसि जप्य त्रिष्वघमर्षणम् ॥ ४७ ॥

सर्वाणि एनासि अपध्वसते । णिनि (३ ३ ७८)। 'पोरदुपधात्' (३ १ ९८) इति यत्, जप्यम् । अघ मर्षति ॥ ४७ ॥[8]

दर्शश्च पौर्णमासश्च यागौ पक्षान्तयो पृथक् ।

अमावास्या क्रियमाणो याग उपचाराद्दर्श । पक्षान्तयोरमावस्यापौर्णमास्यो क्रियमाणो ॥[9]

---

1 A water pot used by ascetics [2] 2 The seat of an asectic or religious student [1] 3 Skin (of animal used as seat) [3] 4 M भिक्षादिभ्योञ 5 Things collected as alms [1] 6 The study of the Vedas [2] 7 Extraction of soma juice [3] 8 The mantra that destroys all sins [1] 9 Sacrifices which are performed on the amavasya and pūrnimā [1 each]

शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः ॥ ४८ ॥

यच्छत्यनेन यम । शरीरमात्रेण साध्यं यावज्जीवं कर्म सत्यास्तेयादि यत्कर्म नित्यं कर्तव्यम् ॥ ४८ ॥[1]

नियमस्तु स यत्कर्माऽनित्यमागन्तुसाधनम् ।

न तु यावज्जीवम्, आगन्तुभि कामनया समयविशेषादिभिर्हेतुभि. साध्यमुपवासस्नानादि, तन्नियम ॥[2]

उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ॥ ४९ ॥

अजेवैतेवा उपवीत यज्ञार्थं सूत्रम् । प्रोद्धृते वहिष्कृते सति वामस्कन्धार्पितम् । द्वे ॥ ४९ ॥[3]

प्राचीनावीतमन्यस्मिन्

प्राचीन प्रदक्षिणमावीतम् । अन्यस्मिन्वामे करे प्रोद्धृते सति ॥[4]

निवीतं कण्ठलम्बितम् ।

नि अधोवीतं कण्ठाल्लम्बित करद्वये वहिष्कृते सति ॥[5]

अङ्गुल्यग्रे तीर्थं दैवम्

अङ्गुलीनामग्रे देवानामिदं दैवं तीर्थम् ॥[6]

स्वल्पाङ्गुल्योर्मूले कायम् ॥ ५० ॥

स्वल्पाङ्गुल्यो कनिष्ठिकयोरधोभाग । क. प्रजापतिर्देवतास्य[7] ॥ ५० ॥[8]

मध्येऽङ्गुष्ठाङ्गुल्योः पित्र्यम्

अङ्गुष्ठतर्जन्योर्मध्ये पितरो देवतास्य[9] ॥[10]

मूले त्वङ्गुष्ठस्य ब्राह्मम् ।

ब्रह्मा देवतास्य[11] ॥[12]

---

1. Yama [1] Ct. yogasūtra, 2 30 2. Niyama [1] Ct. yoga sūtra, 2 32 3 The sacred thread over the left shoulder and under the right arm [2] 4. The sacred thread over the right shoulder and under the left arm [1] 5 The sacred thread worn round the neck [1] 6. Devatirtha [1] 7. M. देवतास्य 8. Kāyatirtha [1] 9. M. देवतास्य 10 Pitrtirtha [1] 11. M देवतास्य 12. Brahmatirtha [1]

स्याद्ब्रह्मभूय ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ॥५१॥

ब्रह्मणा भाव । 'भुवो भावे' (३ १ १०७) इति क्यप् । सह युनक्तीति सयुक्, तस्य भाव । ब्रह्मणा सायुज्यम् ॥ ५१ ॥[1]

देवभूयादिक तद्वत्

देवस्य भाव देवभूय देवत्वमित्यादि ॥[2]

कृच्छ्रं सातपनादिकम् ।

कृन्तत्यनेन । 'कृतेरछ—' (उ० २ २१) । सतपति । ल्युट् (३ ३ ११३) । तस्येद कर्म । सान्तपन देहसाध्यम् ॥[3]

संन्यासवत्यनशने पुमान् प्राय

सम्यक् न्यास , आत्यन्तिकस्त्याग , तद्युक्ते अनशने अभोजने मरणोद्देश्यक । प्रकृष्टमयनम् । इण् (अ० प० अ०) 'एरच्' (३ ३ ५६) एकम् ॥[4]

अथ वीरहा ॥५२॥

नष्टाग्नि·

वीराऽग्नि[5], त हन्ति ॥५२॥ नष्टोऽग्निर्यस्य[6] । 'प्रमादादिना यस्याग्निहोत्राग्निर्नष्ट ' एकम् (?) ॥[7]

कुहना लोभान्मिथ्येर्यापथकल्पना ।

'कुह विस्मापन' (चुरादि) । 'ण्यास—' (३ ३ १०७) इति युच् । ईर्यापथस्याचारभेदस्य मिथ्यात्वेन[8] कल्पना सम्पादनम् । 'धनादिलिप्सया मिथ्याधर्माश्रयणदम्भादि ' एकम् ॥[9]

व्रात्यः संस्कारहीन. स्यात्

व्रातमर्हति । सस्कारै , उपवीतादिभिर्हीन । द्वे ॥[10]

---

1 Complete identity of soul with Brahman, the supreme Spirit [3] 2 Identity with gods [3] 3 Penance (as santapana sc) [1] 4 Giving up food after Complete renunciation of the world and its attachments [1] 5 M वीराग्नि 6 M नष्टाग्निर्यस्य 7 A Brahmana, who has neglected his sacred fire [2] 8 M मिथ्या अतत्त्वे 9 Interested performance of religious austerities [1] 10 A person, who has lost his caste owing to non performance of purificatory rites [2]

अस्वाध्यायो निराकृति ॥५३॥

न स्वाध्यायो वेदाध्ययनमस्य । आकृतेरध्ययनचेष्टाया निर्गत । द्वे ॥५३॥[1]

धर्मध्वजी लिङ्गवृत्ति

धर्मस्य ध्वजश्चिह्नमस्यास्ति । भिक्षाचर्य जटादिधारण लिङ्गमाश्रमादि चिह्नधारण वृत्तिर्जीविकास्य । द्वे ॥[2]

अवकीर्णी क्षतव्रत ।

किर (तु० प० से०) क्त (३ ३ ११४)। अवकीर्ण विक्षिप्त व्रतमनेन । क्षत खण्डित ब्रह्मचर्यमस्य । द्वे ॥[3]

सुप्ते यस्मिन्नस्तमेति सुप्त यस्मिन्नुदेति च ॥५४॥

अशुमानभिनिर्मुक्ताभ्युदितौ तौ[4] यथाक्रमम् ।

अभि सर्वत साय तेन कर्मणा निश्चयेन मुक्त । उद् अतिशयेन इत गनम् । एकैकम् ॥[5]

परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ॥५५॥

परिविन्दति ज्येष्ठ परित्यज्य भार्या लभते । 'ज्येष्ठे अविवाहिते सति कृतोद्वाह कनिष्ठ' ॥५५॥[6]

परिवित्तिस्तु तज्ज्यायान्

परि वजन विन्दति लभते । तस्य परिवेत्तुर्ज्यायान् ज्येष्ठ । 'परिवेत्तुर्ज्येष्ठ भ्रातुरेकम्' ॥[7]

विवाहोपयमौ समौ ।

तथा परिणयोद्वाहोपयामा पाणिपीडनम् ॥५६॥

विशिष्ट वहनम् । घञ् (३ ३ १८)। उपयमन घञ् । परिणयनम् । 'एरच्' (३ ३ ५६)। पाण पीडनम् । विवाह । षट् ॥५६॥[8]

व्यवायो ग्राम्यधर्मो मैथुन निधुवन रतम् ।

व्यवयानम् । इण (अ० प० अ०) घञ् । ग्राम्याणा जनाना धर्म ।

---

1 A student, who has not studied the Vedas [2] 2 A religious hypocrite [2] 3 A student who has Violated his religious practices [2] 4 B reads न 5 One asleep at sunrise and sunset [1 each] 6 A younger brother married before the elder [1] 7 The unmarried elder brother, whose younger brother is married [1] 8 Marriage 6]

मिथुनस्य कर्म । नितरां धुवनं हस्तपादादिचालनम् । रमे क्त (३ ३ ११४)। पञ्च ॥[1]

त्रिवर्गो धर्मकामार्थैः

त्रयाणां वर्गः समूहः ॥[2]

चतुर्वर्गः समोक्षकैः ॥५७॥

मोक्षेण सहितैर्धर्मादिभिश्चतुर्णां वर्गः । एकम् ॥२७॥[3]

सबलैस्तैश्चतुर्भद्रम्

बलेन सहितैर्धर्मादिभिश्चत्वारि भद्राणि श्रेष्ठानि यत्र ॥[4]

जन्याः स्निग्धा वरस्य ये ।

इति ब्रह्मवर्गः ॥७॥

जनीं वधूं वहन्ति । 'संज्ञायां जन्या' (४ ४ ८२) इति यत् । वरस्य ये स्निग्धास्तत्पक्षाः ॥[5]

इति ब्रह्मवर्गः ॥ ७ ॥

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।

मूर्धन्यभिषिक्तः । राज्ञोऽपत्यम् ।[6] 'राजश्वशुराद्यत्' (४ १ १३७) बाहुभ्यां जातः । क्षत्त्रस्यापत्यम् । 'क्षत्राद्घः' (४ १ १३८) । विशेषेण राजति । पञ्च 'क्षत्रियस्य' ॥[7]

राजा राट् पार्थिवः क्ष्माभृन्नृपभूपमहीक्षितः ॥८॥

राजति । 'कनिन्युवृषि—' (उ० १ १५७) इति कनिन् । क्विप् (३ २ ६१) । राट् । पृथिव्या ईश्वरः । 'सर्वभूमिपृथिवीभ्यामणञौ' (५ १ ४१) । महीं क्षियति । 'क्षि निवासगत्योः' (तु० प० अ०) । सप्त 'राज्ञः' ॥[8]

राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ।

प्रणता अशेषाः सामन्ताः स्वदेशानन्तरराजानो यस्य । अधिक ईश्वरः । एकम् ॥[9]

---

1 Sexual intercourse [5] 2 The first three ends of human life taken Collectively [1] 3 The four ends of human life taken Collectively [1] 4 The aggregate of the four ends of human life (caturbhadra) [1] 5 The friend, attendant or relative of a bridegroom [1] 6 M राजन्यम् 7 Kṣatriya [5] 8 King [6] 9 A supreme King [1]

चक्रवर्ती सार्वभौम

चक्रे राजमण्डले वर्तते । णिनि (३ २ ७८) । सर्वभूमेरीश्वर । 'समुद्रान्तभूमेरीश्वरस्य' द्वे ॥[1]

नृपोऽन्यो मण्डलेश्वर ॥ २ ॥

मण्डलस्य भूम्येकदेशस्य ईश्वर । एकम् ॥ २ ॥[2]

येनेष्ट राजसूयेन मण्डलस्येश्वरश्च य ।
शास्ति यश्चाज्ञया राज्ञः स सम्राट्

सम्यक् राजति । क्विप् (३ २ ६१) । सार्वभौमविशेषोऽयम् ॥[3]

अथ राजकम् ॥ ३ ॥
राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् ।

राज्ञा समूह ॥ ३ ॥ राजन्याना समूह । 'गोत्रोक्षोष्ट्र–' (४ २ ३९) इति वुञ् ॥[4]

मन्त्री धीसचिवोऽमात्यः

मन्त्रोऽस्यास्ति[5] । धिया सचिव सहाय । अमा सह भव । 'अव्ययात्त्यप्' (४ २ १०४) । त्रीणि ॥[6]

अन्ये कर्मसचिवास्ततः ॥ ४ ॥

ततो धीसचिवादन्ये कर्मसचिवा ॥ ४ ॥[7]

महामात्रा प्रधानानि

महामात्रा येषाम्[8] । प्रकर्षेणाधीयन्ते । 'प्रधानस्य' द्वे ॥[9]

पुरोधास्तु पुरोहित ।

पुरोऽग्रे[10] धायते पुरोधा॰ । 'दधातेर्हि' (७ ४ ४२) । क्त (३ २ १०२) ॥[11]

---

1 A universal king or ruler, whose dominions extend as far as ocean [1] 2 A ruler of certain country or province [1] 3 A paramount monarch, who rules over other princes, and has performed the rajasūya sacrifice 4 A number or collection of sovereigns and Kṣatriyas [1 each] 5 M मन्त्रास्य मिन 6 Minister or councillor [3] 7 Minister for action [1] 8 M येषा 9 Chief minister [2] 10 M पुरस्त्रे 11 Family priest [2]

द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥

ऋणादीनि विवादस्थानानि व्यवहाराः तेषां द्रष्टरि निर्णेतरि प्राड् प्रश्नः, विवाकः विवेकः तौ स्तोऽस्य[1] प्रश्नविचारयोः कुशल इत्यर्थः । अक्षाणां व्यवहाराणां दर्शकः द्वे ॥ ५ ॥[2]

प्रतीहारो[3] द्वारपालद्वास्थद्वास्थितदर्शकाः ।

'उपसर्गस्य घञि—' (६ ३ १२२) दीर्घः, प्रतीहारः । द्वारं पालयति । द्वारि तिष्ठति । 'द्वारपालस्य' पञ्च ॥[4]

रक्षिवर्गस्त्वनीकस्थः

रक्षिणां वर्गः । अनीके तिष्ठति । द्वे 'रक्षितृकारणस्य' ॥[5]

अथाध्यक्षाधिकर्तौ समौ ॥ ६ ॥

अधिगताक्ष[6] व्यवहारम् । 'व्यापारितस्य' द्वे ॥[7]

स्थायुकोऽधिकृतो ग्रामे

स्थातुं शीलमस्य । 'लषपत—' (३ २ १५४) इत्युकञ् । 'ग्रामाधिकारिण' एकम् ॥[8]

गोपो ग्रामेषु भूरिषु ।

गोपायति । आयामाव, अच् । 'बहुग्रामाधिकृतस्य' एकम् ॥[9]

भौरिकः कनकाध्यक्षः

भूरिणि सुवर्णे नियुक्तः । ठञ् (४ ४ ६९) ॥ द्वे ॥[10]

रूप्याध्यक्षस्तु नैष्किकः ॥ ७ ॥

निष्के हेम्नि नियुक्तः । 'टङ्कशालानियुक्तस्य' द्वे ॥ ७ ॥[11]

अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः ।

अन्तर्वंशोऽस्यास्ति[12] । एकम् ॥[13]

सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ८ ॥

सुष्ठु विदन्तः विदाः शान्ति । सुविदल्ला स्त्रियः । तासामिमे रक्षकाः ।

1 M स्तोऽस्य 2 Judge [2] 3 B and K. read प्रतीहार 4 Door keeper [5] 5 Sentinel or gaurd [2] 6 M अधिगताक्ष 7 Head or employer [2] 8 The head of a village [1] 9 The head of a number of villages [1] 10 The superintendent of gold in a royal treasury [2] 11 A mint master [2] 12 M अन्तर्वंशो-ऽस्यास्ति 13 A superintendent of women apartments [1]

कञ्चुकश्चोलकोऽस्त्यषाम्[1]। स्थपतय स्वामिन । ष्यन् (वा० ५ १ १२४)। सुविदामिमे । 'रत्नगारे वही रक्षाधिकृतस्य चत्वरि ॥ ८ ॥[2]

शण्ढो वर्षवरस्तुल्यौ

शाम्यति । 'शमेर्ढ' (उ० १ ९९) । वर्षस्य रेत पातनस्य वर । असत्तान्त पुरस्था । 'खोजा' लोके ॥[3]

सेवकार्थ्यनुजीविन ।

सेवन्ते । अर्थ सन्निहितोऽस्यास्ति[4] । योगि ॥[5]

विषयानन्तरो राजा शत्रु

विषय स्वदेश, तदपेक्षया अव्यवहितदेशस्य राजा शत्रु । शातयति । शदॢ, (भ्वा० प० अ०) ष्यन्तात् रुशातिभ्या क्रुन् (उ० ४ १०३) ।[6]

मित्रमत परम् ॥ ९ ॥[7]

मेद्यति । 'अमिचिमिदि-- (उ० ४ १६३) इति क्त । अत शत्रो ॥९॥[7]

उदासीन परतर ।

अतिशयितपरतर । उदास्ते । ईदास (७ २ ८३) इतीत्वम् ।[8]

पार्ष्णिग्राहस्तु पृष्ठत ।

पार्ष्णि पश्चात् पद गृह्णाति । 'जिगीषो पृष्ठगामस्थस्य राज ' एवम् ॥[9]

रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृद ॥ १० ॥

द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रव ।

अभिघातिपरारातिप्रत्यर्थिपरिपन्थिन ॥ ११ ॥

'रप व्यक्ताया वाचि' (भ्वा० प० से०) । 'रपरिच्चोपधाया ' (उ०१ २६) । वैरमस्यास्ति । सपत्नीव । 'ष्यन् सपत्ने' (३ १ १४५) इति निर्देशादत्र । 'ऋ गतौ' (जु० प० अ०) । 'अच इ ' (उ० ४ १३८) । अरि । 'द्विषोऽमित्रे'[10] (३ २ १३१) शतृ । युचि (३ २ १५१) द्वेषण । दुष्ट हृदयमस्य ॥ १० ॥ द्वेष्टि । क्विप् (३ २ ६१) । विरुद्ध पक्षोऽस्य[11] । न हितमस्मात् । 'अमेर्द्विषति

1 M कञ्चुकश्चालकऽस्यषा 2 Kañcukin (an old attendant on the women's apartments [4] 3 Eunuch [2] 4 M सन्निहितास्यास्ति 5 Servant [2] 6 A rival neighbouring king [1] 7 A friendly neighbouring king [1] 8 A neutral neighbouring king [1] 9 A king who follows his friendly king fighting for victory [1] 10 M द्विषामित्र 11 M पक्षोऽस्य ।

चित्' (उ० ४ १७३) इतीत्रन् । दसति । 'दसु उपक्षये' (दि० प० से०) । 'यजिमनि—' (उ० ३ २०) इति युच् । शत्रुरिव । प्रज्ञाद्यण (५ ४ ३८) । अभिहन्तुं शील । णिनि (३ २ ७८) । पिपर्ति रोषम् । पृ पालने' (जु०प०से०) । अच् (३ १ १३४) । न राति सुखम् । प्रतिकूलमर्थयति । परि दोषाख्यान पश्यति । 'पथि गतौ' (चु० प० से०) ॥ ११ ॥[1]

वयस्य स्निग्ध सवया

वयसा तुल्य । यत् (४ ४ ९१) । स्निह्यति । 'मतिबुद्धि—' (३ २ १८८) इति क्त । समान वयोऽस्य[2] । 'ज्योतिर्जनपद—' (६ ३ ८५) इति स । 'तुल्य वयस ' त्रीणि ॥[3]

अथ मित्र सखा सुहृत् ।

मेद्यति । क्त्रन् । समान ख्यायते लोकै । 'समाने ख्य —' (उ० ४ १३६) इतीन्, डित् [च] । शोभन हृदयमस्य । त्रीणि ॥[4]

सख्य साप्तपदीन स्यात्

सख्युर्भाव । 'सख्युर्य' (५ १ १२६) । सप्तभि पदैरवाप्यते । 'साप्तपदीन सख्यम् (५ २ २२) इति साधु । द्वे ॥[5]

अनुरोधोऽनुवर्तनम् ॥ १२ ॥

अनुरोधनम् । घञ् (३ ३ १८) । अनुगम्य वर्तनम् । 'आराध्यादेरिष्ट सपादनस्य' द्वे ॥ १२ ॥[6]

यथार्हवर्ण प्रणिधिरपसर्पश्चर स्पश ।

चारश्च गूढपुरुषश्च

यो योऽर्हं[7] । यथार्हं वर्णो रूपमस्य । प्रकर्षेण निधीयतेऽत्र[8] । घो कि (३ ३ ९२) । अपसर्प । 'सृप्लृ गतौ' (भ्वा० प० से०) । अच् (३ १ १३४) । चरति । स्पशति । 'स्पश बाधनस्पर्शया' (भ्वा० उ० से०) । प्रज्ञाद्यणि (५ ४ ३८) चार । गूढश्चासौ पुरुषश्च । 'हरिकारा' लोके । सप्त ॥[9]

आप्त प्रत्ययितस्त्रिषु ॥ १३ ॥

आप्यते स्म । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । प्रत्ययो विश्वास सजातोऽस्य[10] । 'विश्वस्तस्य' द्वे ॥ १३ ॥[11]

---

1 Enemy [19] 2 M वयोऽस्य 3 Companion of the same age [3] 4 Friend [3] 5 Friendship [2] 6 Fulfilling one's wishes [2] 7 M यो यो र्हं 8 M निधीयतेऽत्र 9 Spy [7] 10 M सजातास्य 11 A trust worthy person [2]

सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि ।
स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि ॥ १४ ॥

संवत्सर वेद । अण् (४ २ ५९) । ज्योतिषमधीते वेद वा । दैव जानाति । गणयति । ज्ञानमस्यास्ति । अष्टौ ॥ १४ ॥[1]

तान्त्रिको ज्ञातसिद्धान्तः

तन्त्र सिद्धान्तमधीते । ज्ञात सिद्धान्तो येन ॥[2]

सत्त्री गृहपतिः समौ ॥

सत्त्रमस्यास्ति । गृहस्य पति । 'सदान्नदानादिकर्तुर्गृहस्थस्य' द्वे ॥[3]

लिपिकरोऽक्षरचणोऽक्षरचुञ्चु –तु[4] लेखके ॥ १५ ॥

लिपिं करोति । दिवाविभा–' (३ २ २१) इति ट । अक्षरैर्वित्तः । 'तेन वित — (५ २ ५६) [इति] चणप् । लिखति । चत्वारि ॥ १५ ॥[5]

लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ ।

लिखित यदक्षरसस्थान तत्र । लिखित च अक्षरविन्यासश्च तयो समाहारे' इत्यन्ये । लिप्यतेलिपि । 'इक् कृष्यादिभ्य ' (वा० ३ ३ १०८) 'लिबि ' सौत्र इत्याहु । पत्त्राञ्जन मसिर्मेलामपीकज्जलकन्यकामसी । वर्णदूत स्वस्तिवक्त्रो लेखो याचिवहारक । स मन्त्रहारक शायोऽपकर्गल[6] शाब्द पत्रमणि वानि । सुधा ॥[7]

स्यात्सदेशहरो दूत

कागद सदेश हरति । 'हरत —' (३ २ ९) इत्यच् । दूयतेस्म । दूङ् (दि० आ० से०) क्त[8] (३ ४ ७२) द्वे ॥[9]

दूत्य सद्भावकर्मणी ॥१६॥

दूतस्य भाव । 'दूतवणिग्भ्या च' इति य ॥१६॥[10]

अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ।

अध्वानमल गच्छति । 'अध्वनो यत्खौ' (५ २ १६) । पन्थान नित्य गच्छति । 'पथो ण नित्यम् (५ १ ७६) । 'पथ एकन्' (५ १ ७५) ॥[11]

---

1 Astrologer [8] 2 A person well versed in any science or doctrine [2] 3 House holder [2] 4 B reads त 5 Writer [4] 6 M शाण पक्वंल 7 Written characters [2] 8 M क्त 9 Messenger [2] 10 The work of a messenger [1] 11 Traveller [5]

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ॥१७॥
राज्याङ्गानि प्रकृतय पौराणा श्रेणयोऽपि च ।

स्वामी राजा । अमात्यो मन्त्री[1] । कोशो भाण्डार । राष्ट्र देश । पर्वतादि दुर्गाणि । वल सै [न्यम्] ॥१७॥ राज्यस्याङ्गानि साधनानि । प्रकृष्ट कुर्वन्ति राज्यम् । क्तिच् (३ ३ १७४) । पौराणा नागराणाम् । श्रीयते श्रेणि । 'वहिश्री—' (उ० ४ ५१) इति नि । एक मुख्या सजातीयसमूहा स्वाम्यमात्यादिपरस्परोपकारक सप्ताङ्ग राज्य पौरश्रेणिमि सहाष्टाङ्गम् । द्वे ॥[2]

सधिर्ना विग्रहो यानमासन द्वैधमाश्रय ॥१८॥
षड्गुणा

धान्‍न कि (३ ३ ९२) सधि । विविध ग्रहणम् । यान यात्रा । द्विप्रकारा द्वैधम् । 'द्वित्र्योश्च धमुज्' (५ ३ ४५) । आश्रयणम् । 'एरच्' (३ ३ ५६) ॥१८॥ एतानि षड् गुणशब्दवाच्यानि ॥[3]

शक्तयस्तिस्र प्रभावोत्साहमन्त्रजा ।

शक्यो जेतुमनया । भवत्यनेन भाव । घञ् (३ ३ २४) । उक्त च— 'कोशदण्डबल प्रभुशक्ति इति । उत्सहतेऽनेन[4] । घञ् (३ ३ १२१) उक्त हि— विक्रम बलमुत्साहशक्ति ' इति । सध्यादीना सामादीना च यथावस्थापन मन्त्रशक्ति ॥[5]

क्षय स्थान च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ॥१९॥

अष्टवर्गस्यापचय क्षय । उपचयो वृद्धि । उपचयोपचयाभाव स्थानम् । 'कृषिर्वणिक्पथो दुर्ग सेतु कुञ्जरबन्धनम् । खन्याकरबलादान शून्याना च निवेशनम् ॥ ' इत्यष्टवर्ग । त्रयाणा वर्ग ॥१९॥[6]

स प्रताप प्रभावश्च यत्तेज कोशदण्डजम् ।

कोशो धनम्, दण्ड सैन्यादि, ताभ्या जात यत्तेज । द्वे ॥[7]

---

1 M म त्रा ■ Seven requisites of regal administration [2] 3 The expedients to be used by a king in foreign policies being (i) peace or alliance (ii) war (iii) march or exkpedition (iv) halt (v) duplicity and (vi) seeking shelter 4 M उत्सहतनेन 5 Three regal powers namely utsahas'akti prabhavas'akti and mantras'akti 6 Three states of loss stablity and increase 7 Glory, majesty, dignity [2]

भेदोदण्ड साम दानमित्युपायचतुष्टयम् ॥२०॥

शत्रारमात्यादीनामुपायन पृथक्करण भेद । दमे (दि० प० से०) 'अम न्ताडड (उ० १ ११४)। 'साम सान्त्वप्रयोग (चु० उ० से०) बाहुल कात्कनिन् । प्रियवचनादिभि कोपोपशामन साम । दान धनस्य । उपायतेऽनन[1] । घञ् (३ ३ १२१) ॥२०॥[2]

साहस तु दमो दण्ड

सहसि बले भवम् । त्रीणि ॥[3]

साम सान्त्वम्

सान्त्वनम् । घञ् (३ ३ १८) ॥[4]

अथो समौ ।

भेदोपजापौ

'जप मानसे' (भ्वा० प० से०) । घञ् (३ ३ १८ । द्वे ॥[5]

उपधा धर्माद्यैर्यत्परीक्षणम् ॥२१॥

उपधीयते ज्ञानमत्र । 'आतश्च—' (३ ३ १०६) इत्यङ् । धर्मार्थकामैर-मात्यादीना राज्ञा परीक्षणमुपधा ॥२१॥[6]

पञ्च त्रिषु

निरशलाका ता पञ्च ॥

अषडक्षीणो यस्तृतीयाद्यगोचर ।

अविद्यमानानि षड् अक्षीण्यत्र[7] । 'अषडक्षाशित—' (५ ४ ७) इति ख । द्वाभ्यामेव कृतो मन्त्र इत्यर्थ ॥[8]

विविक्तविजनच्छन्ननिश्शलाकास्तथा रह ॥२२॥
रहश्चोपांशु चालिङ्गे

विविश्वन्ति जना अत्र । क्त (३ ४ ७६) । विगतो जनोऽस्मात्[9] । छाद्यते ।

---

1 M उपायतेनेन 2 Four means of success against an enemy i e (i) sāman (Conciliation) dāna (bribery) (ii) danda (punishment) and (iv) bheda (sowing difference) 3 Punishment i e open attack [3] 4 Conciliation or negotiation [2] 5 Sowing dissensions [2] 6 Trial or test of honesty (of ministers and others by a king 7 M षडक्षत्र 8 Secret talks between two persons [1] 9 M जनास्मात् ।

'छद अपवारणे' (चु० उ० से०) क्त (३ २ १०२)। शलाकाया निर्गतं । शलाका शारिका । रह्यते । 'रह त्यागे' (भ्वा० प० से०)। असुन् (उ० ४-१८८) ॥२२॥ उपगता अशव किरणा अत्र । एते द्वे अलिङ्गे अव्यये ॥[1]

रहस्यं तद्भवे त्रिषु ।

रहो भवम् । दिगादि (४ ३ ५४)। एकम् ॥[2]

समौ विस्रम्भविश्वासौ

'स्रम्भु विश्वासे' (भ्वा० आ० से०)। दन्त्यादिरपि । 'श्वस प्राणने' (अ० प० से०)। घञ् (३ ३ १८)। द्वे ॥[3]

भ्रेषो भ्रंशो यथोचितात् ॥ २३ ॥

उचिताद् भ्रंशोऽध पतनम्[4]। 'भ्रेषृ चलने' (भ्वा० उ० से०)। घञ् (३ ३ १८)। एकम् ॥ २३ ॥[5]

अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम् ।

भ्रेषादन्य । नियमेन ईयते । 'परिण्यार्नीणा –' (३ ३ ३७) इति घञ् । कल्पनम् । घञ् (३ ३ १८)। 'दिश अतिसर्जने' (तु० उ० अ०)। उचितो रूपमस्य । सम्यगञ्जात्म[6]। 'उचितस्य' पञ्च ॥[7]

युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥ २४ ॥

न्याय्यं च त्रिषु षट

युजे (रु० उ० अ०) क्त (३ २ १०२)। उपाय एव । 'उपायाद्ध्रस्वत्वं' (ग० ५ ४ ३४) इति ठक् । 'पोरदुपधात्' (३ १ ९८) इति यत् । लभ्यम् । अभिनीयते स्म । णीञ् (भ्वा० उ० अ०) क्त (३ २ १०२) ॥ २४ ॥ न्यायदनपेतम् । 'धर्मपथ्यर्थ—' (४ ४ ९२) इति यत् । षट् त्रिषु । 'न्यायागतस्य' षट् ॥[8]

सम्प्रधारणा तु समर्थनम् ।

धृञ (भ्वा० उ० अ०) ण्यास–'(३ ३ १०७) इति युच् । 'अर्थ याच्ञायाम्' (चु० उ० से०)। 'इदमुचितमेवेति निश्चयस्य' द्वे ॥[9]

अववादस्तु निर्देशो निदेश शासनं च स ॥ २५ ॥

शिष्टिश्चाज्ञा च

अवलम्ब्य वदनम् । घञ् (३ ३ १८)। निर्देश कार्यादेश । शासेर्ल्युट्

---

1 Lonely place [6] 2 Secret [1] 3 Confidence [2] 4 M भ्रंशोऽध पतनम् 5 Deviation [2] 6 M सम्यगञ्जात्म 7 Propriety [5] 8 Proper or just [6] 9 Determining the propriety of anything [2]

(३ ३ ११५) ॥ २५ ॥ 'क्तिनावादिभ्य' (३ ३ ९४) । शिष्टि । आतश्च–' (३ ३ १०६) इत्यङ् । 'आज्ञाया' षट् ॥[1]

संस्था तु मर्यादा धारणा स्थितिः ।

संतिष्ठतेऽनया[2] । 'मर्या' इति सीमार्थेऽव्ययम्[3] । तत्रादीयते । अङ् (३ ३ १०६) । धारयति धर्मम् । युच् (उ० २ ७८) । 'स्थागापा–' (३ ३ ९५) इति क्तिन् । 'न्याय्यपथस्थिते' चत्वारि ॥[4]

आगोऽपराधो मन्तुश्च

'इण आगोऽपराधे च' (उ० ४ २११) इत्यसुन् आगादेशश्च । अपराधनम् । मन्यते । कमिमनि—' उ० १ ७२) इति तु । त्रीणि ॥[6]

समे तूद्दानबन्धने ॥ ७६ ॥

उत्पूर्वाद् द्यतेर्ल्यट् (३ ३ ११५) ॥ २६ ॥[7]

द्विपाद्यो द्विगुणो दण्डः

द्वौ पादौ परिमाणमस्य । 'पणपाद–' (५ १ ३४) इति यत् । 'शास्त्रबोधितदण्डाद्द्विगुणदण्डस्य' एकम् ॥[8]

भागधेयः करो बलिः ।

भाग एव । 'नामरूप— (वा० ५ ४ ३५) इति धय । कीर्यते । अप् (३ ३ ५७) । बल्यते । बल दाने (?) । इन् (उ० ४ ११७) । 'कर्षकादिभ्यो राजग्राह्यभागस्य' द्वे ॥[9]

घट्टादिदेयं शुल्कोऽस्त्री

घट्टादौ देयम्[10] । शुल्क्यते । 'शुल्क अतिसर्जने' (चु० प० से०) । एकम् ॥[11]

प्राभृतं तु प्रदेशनम् ॥ ७७ ॥

भृञ (भ्वा० उ० अ०) क्त (३ २ १०२) । 'देवताभ्यो मित्रादिभ्यश्च दीयमानस्य' द्वे ॥ २७ ॥[12]

उपायनमुपग्राह्यमुपहारस्तथोपदा ।

इणो गतेर्वा (भ्वा० आ० से०) ल्युट् (३ ३ ११३) । उपायनम् ।

1 Order or command [6] 2 M संतिष्ठतेऽनया 3 M सीमार्थेऽव्ययम् 4 Propriety of conduct [4] 5 M आगोऽपराधे 6 Offence [3] 7 Confinement or imprisonment [2] 8 Double penalty [1] 9 Rent or tax [3] 10 M देया 11 Tax (payable from the income) [1] 12 Gift or present (especially to gods and friends) [2]

उपगृह्य [ते । घ] ञ् । उपदीयते । 'आतश्च—' (३ ३ १०६) इत्यङ् । चत्वारि ॥ 'अकोर' लोके । वस्तुतस्तु प्रसक्त प्रम्वादिभ्यो दीयमानमु [पा] यनम्, रहसि दीयमान तूपदेति भेद ॥[1]

यौतकादि तु यद् देय सुदायो हरण च तन् ॥ २८ ॥

युतकयोनिसम्बन्ध, तत्र भवम् । अण् (४ ३ ५३) । सुदीयते । डुदाञ् (जु० उ० अ०) युगागम (७ ३ ३३) । ह्रियते । कर्मणि ल्युट् (३ ३ ११३) ॥ २८ ॥[2]

तत्कालस्तु तदात्व स्यात्

स चासौ कालश्च । तदेत्यस्य भाव । 'वर्तमानकालस्य' द्वे ॥[3]

उत्त्वायति काल उत्तर ।

आ यम्यन्तेऽत्र[4] । यमे (भ्वा० प० अ०) क्तिन् (३ ३ ९४) । एकम् ॥[5]

सादृष्टिक फल सद्य

सदृष्टौ प्रत्यक्षे भवम् । अध्यात्मादि (वा० ४ ३ ६०) । 'व्यापारानन्तर जायमानफलस्य' एकम् ॥[6]

उदर्क फलमुत्तरम् ॥ २९ ॥

उदर्ग्यते । 'अर्क स्तवने' (चु० प० से०) । उत्तर भाविकर्मफलम् ॥२७॥[7]

अदृष्ट वह्नितोयादि

अग्नितोयादिकृत भयमदृष्टम् ॥[8]

दृष्ट स्वपरचक्रजम् ।

स्वपरयोश्चक्र सैन्यम् । ताभ्या जातम् । 'स्वपरसैन्यात्परराष्ट्राच्चौरादे परचक्राद्वाहविलोपादेर्भयम्' ॥[9]

महीभुजामहिभय स्वपक्षप्रभव भयम् ॥ ३० ॥[10]

स्वस्य पक्षोऽहिरिव[11] । ततो जात भयम् ॥ ३० ॥[12]

---

1 Gift (in general) [4] 2 Dowery [3] 3 The present time [2] 4 B and K read this quarter as follows उत्तर काल आयति 5 M आयम्यन्तेऽत्र 6 The future time [1] 7 Immediate Consequence [1] 8 The future result of an action [1] 9 Unforeseen calamity or danger (such as from fire, water &c) [1] 10 Visible danger as from thief, enemy &c [1] 11 M पक्षाहिरिव 12 Danger of a king from his own men [1]

प्रक्रिया त्वधिकारः स्यात्

प्रकर्षोपकरणं । 'कृञ श च' (३ ३ १००)। स्त्रि (७४.२८)। 'राज्ञा छत्रधारणादिव्यापारस्य' द्वे ॥[1]

चामरं तु प्रकीर्णकम् ।

चमरस्येदम् । प्रकीर्यतेऽस्मात्[2] । द्वे ॥[3]

नृपासनं तु यद्भद्रासनम्

नृपस्यासनम् । भद्रं च तदासनं च । 'मण्यादिकृतराजासनस्य' द्वे ॥[4]

सिंहासनं तु तत् ॥ ३१ ॥

हैमम्

हेमविकारो नृपासनं सिंहाकारमासनम् ॥[5]

छत्रं त्वातपत्रम्

छाद्यतेऽनेन । ष्ट्रन्तात्त्रन् (उ० ४ १५८) आतपात्त्रायते । द्वे ॥[6]

राज्ञस्तु नृपलक्ष्म तत् ।

तत् छत्रम् । नृपस्य लक्ष्म ॥ एकम् ॥[7]

भद्रकुम्भः पूर्णकुम्भः

भद्रः कुम्भः । पूर्णः कुम्भः । द्वे ॥[8]

भृङ्गारः कनकालुका ॥ ३२ ॥

बिभर्ति जलम् । 'भृङ्गारभृङ्गारौ च' (उ० ३ १३६) इति साधुः । कनकस्यालुः । संज्ञायां कन्' (५ ३ ७५)। 'सुवर्णकृतजलपात्रस्य' द्वे ॥ ३२ ॥[9]

निवेशः शिबिरं षण्ढे

निविशन्तेऽत्र[10] । घञ् (३ ३ २१)। शवन्त्यत्र । 'शव गतौ' (भ्वा० प० से०)। बाहुलकात्किरच् अच इत्वं च । षण्ढे क्लीबे । द्वे 'सैन्यावासस्य' । 'डेरा' लोके ॥[11]

सज्जनं तूपरक्षणम् ।

सज्जन्तेऽनेन[12] । 'सैन्यरक्षणार्थनियुक्तप्राहरिकादिन्यासस्य' द्वे ॥[13]

---

1 The bearing of royal insignia [2] 2. M. प्रकीर्यतेऽस्मात् 3 Chowry [2] 4 A royal seat [3] 5 A royal seat made of gold [1] 6 Umbrella [2] 7 A royal umbrella [1] 8 A jar filled with water [2] 9 A golden pitcher [2] 10 M निविशन्तेत्र 11 Camp (for army) [2] 12 M सज्जन्तेनेन 13 Gaurd, sentry [2]

हस्त्यश्वरथपादान्तं सेनाङ्गं स्याच्चतुष्टयम् ॥ ३३ ॥

पदातीनां समूहः ॥ ३३ ॥[1]

दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ ३४ ॥
इभः स्तम्बेरमः पद्मी

प्रशस्ता दन्ता अस्य दन्ती । 'दन्तशिखात्[2]—' (५ २ ११३) इति वलच् । 'वले' (६ ३ ११८) इति दीर्घः । हस्तः शुण्डोऽस्यास्ति[3] । द्वौ रदावस्य । अनेकेन करेण मुखेन च पिबति । द्वाभ्यां पिबति । मतङ्गादुपजातः । 'गज मदने' (भ्वा० प० से०) । अच् (३ १ १३४) । न अगः । अतिशयितः कुञ्जो हनुरस्य । 'खमुख—' (वा० ५ २ १०७) इति रः । वारयति शत्रुबलम् ॥ ३४ ॥ एति इभः । 'इण् विन्' (उ० ३ १५३) इति भः । स्तम्बे रमते । पद्मं बिन्दुजालमस्यास्ति । पञ्चदश ॥[4]

यूथनाथस्तु यूथपः ।

यूथस्य हस्तिवृन्दस्य नाथः । यूथं पाति । 'यूथमुख्यहस्तिनः' द्वे ॥[5]

मदोत्कटो मदकलः

मदेन दानजलेन उत्कटो गजः । मदेन कलते । 'अन्तर्मदस्य हस्तिनः' द्वे ॥[6]

कलभः करिशावकः ॥ ३५ ॥

कलं भाषते । ड (वा० ३ २ १०२) । करिणः शावकः । द्वे ॥ ३५ ॥[7]

प्रभिन्नो गर्जितो मत्तः

गर्जयति । त्रीणि ॥[8]

समावुद्वान्तनिर्मदौ ।

उद्गतं मदवमनमस्मात् । 'गतमदस्य' द्वे ॥[9]

हास्तिकं गजता वृन्दे

हस्तिनां समूहः । 'अचित्त—' (४ २ ४७) इति ठक् । 'गजसहायाभ्यां च' (वा० ४ २ ४३) इति तल् । द्वे ॥[10]

---

1 The component part of an army [2] 2 M दन्तशिखात् 3 M शुण्डास्यास्ति 4 Elephant [15] 5 The leader of a flock of elephants [2] 6 A rutting elephant [2] 7 A young elephant [2] 8 A furious elephant [2] 9 An elephant out of rut [2] 10 A herd of elephants [2]

करिणी धेनुका वशा ॥३६॥

करोऽस्त्यस्या । धेनुरिव । इवे कन् (५ ३ ९६) । वष्टि । 'वशिरण्योश्च' (वा० ३ ३ ५८) इत्यप् ॥३६॥[1]

गण्ड' कट

गण्डति । अच् (३ १ १३४) । कटति । 'कटे वर्षादौ' (भ्वा० प० से०) 'गजगण्डयो ' द्वे ॥[2]

मदो दानम्

माद्यत्यनेन । द्यत्यनेन । द्वे ॥[3]

वमथुः करशीकर ।

वम्यते । 'द्वितोऽथुच्[4]' (३ ३ ८९) । करस्य शीकर । 'शुण्डानिर्गतजलस्य' द्वे ॥[5]

कुम्भौ तु पिण्डौ शिरस

कु भुवमुम्भति । शकन्ध्वादि (वा० ६ १ ९४) । पिण्डवे । 'पिडि'सघाते । एकम् ॥[6]

तयोर्मध्ये विदु पुमान् ॥३७॥

तयो कुम्भयो । वेत्ति सज्ञामत्र घातेन । विदे (अ० प० से०) बाहुलकात्कु ॥३७॥[7]

अवग्रहो ललाटं स्यात्

अवगृह्यतेऽङ्कुशेन[8] । एकम् ॥[9]

इषीका त्वक्षिकूटकम् ।

ईष्यते । 'ईष उञ्छे' (भ्वा० प० से०) । 'ईषे किद्ध्रस्वश्च' (उ० ४ २१) इषीकन् । अक्षिकूटक चक्षुर्गोलकम् । एकम् ॥[10]

---

1 A female elephant [3] 2 The temple of an elephant [2] 3 The juice or ichor that exudes from the temples of an elephant in rut [2] 4 M ट्वितोऽथुच् 5 The water emitted from the trunk of an elephant [2] 6 The frontal globes on the forehead of an elephant [2] 7 The middle of the frontal globes on an elephant's forehead [1] 8 M अवगृह्यतेऽङ्कुशेन 9 The forehead of an elephant [1] 10 The eyeball of an elephant [1]

अपाङ्गदेशो निर्याणम्

निर्यान्त्यनेन । एकम् ॥[1]

कर्णमूलं तु चूलिका ॥३८॥

चूल्यतेऽनया । 'चूल समुच्छ्राये' (चु० प० से०) । 'सञ्ज्ञायाम्' (३ ३ १०९) ण्वुल् ॥३८॥[3]

अथ कुम्भस्य वाहित्थम्

कुम्भस्याधः । ललाटादधोभागः । वहत्यवश्यं वाहि तत्र तिष्ठति । पृषोदरादित्वात्सस्य तः । एकम् 'वहित्याधाभागो दन्तमध्य' ॥[4]

प्रतिमानमधोऽस्य यत् ।

प्रतिमीयतेऽनेन[5] । 'मीञ् हिंसायाम्' (क्र्या० उ० अ०) । 'मीनाति—' (६ १ ५०) इत्यात्वम् । एकम् ॥[6]

आसनं स्कन्धदेशः स्यात्

आस्यतेऽत्र[7] । द्वे ॥[8]

पद्मकं बिन्दुजालकम् ॥३९॥

पद्ममिव । बिन्दूना जालकमिव । 'गजस्य मुखादिस्थबिन्दुसमूहस्य' द्वे । ॥ ३९ ॥[9]

पक्षभागः पार्श्वभागः

पक्षयत्यनेन । 'पक्ष परिग्रहे' (चु० प० से०) । पक्षस्य भागः । 'गजपार्श्वस्य' द्वे ॥[10]

दन्तभागस्तु योऽग्रतः ।

दन्तस्य भागः । 'अग्रभागस्य' एकम् ॥[11]

---

1 The corner of an elephant's eye [1] 2 M चूल्यतनया 3 The root of an elephant's ear [1] 4 The part of an elephant's forehead below the frontal globes [1] 5 M प्रतिमयतनन 6 The part of an elephant's head between the tusks [1] 7 M आस्यतत्र 8 The shoulder of an elephant [1] 9 The coloured spots on the trunk and face of an elephant [1] 10 The flank of an elephant [2] 11 The fore part of an elephant [1]

द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमात् ॥४०॥

पूर्वजङ्घाभागो गात्रम् । पश्चाज्जङ्घाभागोऽवरम्[1] । गातेऽनेन[2] । 'गाङ् गतौ' (अ० आ० अ०) । अव राति । क (३ १ १३६) ॥४०॥[3]

तोत्रं वैणुकम्

तुदन्त्यनेन । 'दाम्नी—' (३ २ १८२) इति ष्ट्रन् । वेणुरिव । 'ताडनदण्डस्य' द्वे ॥[4]

आलानं बन्धस्तम्भे

आलीयतेऽन[5] । लीङ् (दि० आ० अ०) ल्युट् (३ ३ ११७) । 'बन्धनस्तम्भस्य' द्वे ॥[6]

अथ शृङ्खले ।[7]

अन्दुको निगडोऽस्त्री

शृङ्ग प्राधान्य खलति । 'खल सञ्चलने' (भ्वा० प० से०) । अन्द्यतेऽनेन[8] । 'अदि बन्धने' (भ्वा० आ० से०) । 'अन्दूदृम्भू—' (उ० १ ९३) इति साधु । स्वार्थे क । निर्गतो गड सेचनमस्मात्कठिनत्वात् । त्रीणि ॥[9]

अङ्कुशोऽस्त्री सृणिः स्त्रियाम् ॥ ४१ ॥

अङ्क्यतेऽनेन[10] । 'सानसिवर्णसि—' (उ० ४ १०७) इति साधु । सरति अनया । 'सृवृषिभ्यां कित्—' (उ० ४ ४९) इति नि । 'शॄ हिंसायाम्' (क्र्या० प० से०) 'सृणिवृष्णि—' (४ ५२) इति वा साधु । द्वे ॥ ४१ ॥[11]

दूष्या कक्ष्या वरत्रा स्यात्[12]

दूष्यतेऽनया[13] । 'दोषो णौ' (६ ४ ९०) इत्यूत् । कक्षे भवा । वर त्रायते । गजस्य मध्यबन्धनस्य' त्रीणि ॥[14]

---

1 M पश्चाज्जङ्घाभागावर [2] M गातनेन 3 The parts of an elephant behind and above its thigh [1 each] 4 The goad for driving an elephant [2] 5 M आलीयतेऽन 6 The post to which an elephant is tied [2] 7 B prefers शृङ्खला 8 M अन्द्यतेनेन 9 The chain for elephant's feet [2] 10 M अङ्क्यतेनेन 11 The hook for driving an elephant [2] 12 B reads च 13 M दूष्यतेनया 14 The girth of an elephant [3]

कल्पनासज्जने[1] समे ।

ण्यन्तायुच् (३.३.१०७) कल्पना । एवं 'षस्ज गतौ' । 'पल्याणाद्यारोपणेन सज्जीकरणस्य' द्वे ॥[2]

प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ॥ ४२ ॥

प्रकृष्टा वेणिः । 'कृदिकारात्—' (ग० ४.१.४५) इति वा ङीप् । आस्तीर्यतेऽनया[3] । बहवो वर्णा सन्त्यस्य । परिस्तूयते । 'अर्तिस्तुसु—' (उ० १.१४०) इति मन् । कुथ्यति । 'कुथ पूतीभावे' (दि० प० से०) । 'गजोपर्यास्तरणचित्रकम्बलस्य' द्वे ॥ ४२ ॥[4]

वीतं त्वसारं हस्त्यश्वम्

न सारो बलं यस्य तादृशं हस्त्यादि ॥[5]

वारी तु गजबन्धनी ।

वध्यतेऽस्याम्[6] । 'गजबन्धनशालायाः' द्वे ॥[7]

घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ॥ ४३ ॥

वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ।

घोटते । 'घुट परिवर्तने' (भ्वा० आ० से०) । ण्वुल् (३.१.१३३) । वेति । 'वी गत्यादौ' (अ० प० अ०) । क्तिच् (३.३.१७४) । तुरेण त्वरया गच्छति । डः (वा० ३.२.४८) । 'गमश्च' (३.२.४७) इति खच् । 'खच्च वा डिद्' (वा० ६.२.३८) । 'अशू व्याप्तौ' (स्वा० आ० से०) 'अशूप्रुषि—' (उ० १.१५२) इति क्वन् ॥ ४३ ॥ अवश्यं वजति । वहत्यस्मिन् । वन् । ऋच्छति । 'ऋ गतौ' (भ्वा० प० से०) । 'अन्येभ्योऽपि[8]—' इति वनिप् । हयति । 'हय गतौ' (भ्वा० प० से०) । सिंधुषु भवः । सपति[9] सेनायाम् । 'षप समवाये' (भ्वा० प० से०) । क्तिच् (३.३.१७४) । त्रयोदश ॥[10]

आजानेयाः कुलीनाः स्युः

अजनमाजः । आजेन क्षेपेणानेयाः प्रापणीयाः । द्वे ॥[11]

---

1. B. and K. read as कल्पना सज्जना 2. The decoration of an elephant [2] 3. M. आस्तीर्यतेनया 4. The coloured woolen cloth spread over an elephant [2] 5. A flock of weak elephants and horses [1] 6. M. बध्यतेस्याम् 7. Stable (for elephants) [2] 8. M. अन्येभ्योपि 9. M. सपति 10. Horse [13] 11. A well-bred horse [2].

विनीता साधुवाहिन ॥ ४४ ॥

साधुवहनशीला । द्वे ॥ ४४ ॥[1]

वनायुजाः पारसीका काम्बोजा वाह्लिका हयाः ।

वनायुषु देशे [षु] जाता । पारसीकदेशे भवा । 'कोपधाच्च' (४ ३ १३७) इत्यण् । कम्बोजेषु भवा । वाह्लिकदेशे भवा । एते हयविशेषा प्रत्येक भिन्ना ॥[2]

ययुरश्वोऽश्वमेधीय

याति । 'यो द्वे च' (उ० १ २१) इति कु । ययु । अश्वमेधाय हित । द्वे ॥[3]

जवनस्तु जवाधिकः ॥ ४५ ॥

जवनशील । 'जु' इति सौत्र । जवन वेगनाधिक ॥ ४५ ॥[4]

पृष्ठ्य स्थौरी

प्रशस्त पृष्ठमस्य । 'अयेभ्योऽपि'[5]— (वा० ५ २ १२०) इति यप्[6] । स्थूलस्यदम् । 'तस्यदम्' (४ ३ १२०) इत्यण् । भारवाहिनाऽश्वस्य' द्वे ॥[7]

सितः कर्कः

करोति । 'कृदाधा—' (उ० ३ ४०) इति क । शुक्लाश्वस्य' एकम् ॥[8]

रथ्या वोढा रथस्य य ।

रथ वहति । 'तद्वहति—' (४ ४ ७६) इति यत् । 'रथवाहकाश्वस्य' एकम् ॥[9]

बाल किशोर

कशति । 'कश शब्दे' (अ० प० म०) 'किशोरादय' (उ० १ ६५) इति साधु । एकम् ॥[10]

वाम्यश्वा वडवा

वाममति वामी । गौरादि (४ १ ४१) । अश्वमतिवामिनमप्या । 'अन्यभ्या.पि—'[11] (वा० ५ १ १००) इति व ॥[12]

---

1 A well trained horse [2] 2 Five varities of horses in relation to the places of their birth [1 each] 3 A horse fit for the asvamedha sacrifice [2] 4 A fleet horse [2] 5 M अन्येभ्योऽपि 6 M यत् 7 A pack horse [2 8 White horse [1] 9 A chariot horse [1] 10 A young horse [1] 11 M अन्येभ्योऽपि 12 A female horse [3]

वाडवं गणे ॥ ४६ ॥

वडवानां समूहः । 'खण्डिकादिभ्यश्च' (४ २ ४५) इत्यञ् ॥ ४६ ॥[1]

त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते ।

'अश्वस्यैकाहगमः' (५ २ १९) इति खञ् । एकम् ॥[2]

कश्यं तु मध्यमश्वानाम्

कशामर्हति । दण्डादि (५ १ ६६) ॥[3]

हेषा ह्रेषा च निःस्वनः ॥ ४७ ॥

'ह्रेषृ शब्दे' (भ्वा० आ० से०) । 'गुरोश्च—' (३ ३ १०३) इत्यः । द्वे ॥ ४७ ॥[4]

निगालस्तु गलोद्देशे

निगलत्यनेन । 'गल अदने' (भ्वा० प० से०) घञ् (३ ३ १२१) । गलस्योद्देशः समीपभागः । घण्टाबन्धसमीपस्य' द्वे ॥[5]

वृन्दे त्वश्वीयमाश्ववत्[6] ।

अश्वानां समूहः । 'केशाश्वाभ्यां यञ्छौ—' (४ २ ४८) । 'अनुदात्तादेरञ्' (४ २ ४४) । 'अश्ववृन्दस्य' द्वे ॥[7]

आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् ॥ ४८ ॥

गतयोऽमूः पञ्चधाराः

अमूरश्वानां पञ्चगतयः । धार्यन्ते अश्वा अनया । भिदादङ् (३ ३ १०४) । 'गतिविशेषाणाम्' एकम् ॥[8]

घोणा तु प्रोथमस्त्रियाम् ।

घोणते । 'घुण भ्रमणे' (भ्वा० आ० से०) । प्रोथति । 'प्रोथृ पर्याप्तौ' (भ्वा० उ० से०) । द्वे ॥[9]

---

1 A flock of female horses [1] 2 What can be travelled over in a day by a horse [1] 3 The middle part of horses [1] 4 Neighing [3] 5 The part near the neck of horse [2] 6 II reads त्वश्वीयमाश्ववत् 7 A number of horses [1] 8 Paces of horses (i) full gallop (ii) trot or ambling (iii) cantering (iv) vaulting and (v) bounding or capering 9 The nose of a horse [2]

कविका तु खलीनोऽस्त्री

कवते। 'कुङ् शब्दे (भ्वा० आ० अ०)। 'अच इ' (उ० ४ १३८)। स्वार्थे कन्। खे मुखबिले लीन । 'ख्याम लोके ॥[1]

शफं क्लीबे खुरः पुमान् ॥४६॥

श फणति। 'फण गतौ' (भ्वा० प० से०)। ड (वा० ३ २ १०१)। खुरति। 'खुर छेदने' (तु० प० से०)। द्वे ॥४९॥[2]

पुच्छोऽस्त्री लूमलाङ्गूले

पुच्छति। 'पुच्छ प्रमादे (?) इति तत्र तस्य अन्त स्वादित्वात्। अत एवाग्रे 'रव मुजागृहि इति माध्यंदिनमन्त्रे रक्षाणोऽप्रयुच्छन्' इति प्रतीकमुपादाय 'पुच्छ प्रमादे' इत्युदाहरन्ति माष्यत्वन । आरोहयन्त्रपल्याणम्' "जीन" 'ल्लादराऽरोह-घुण्डिका' 'रिकाव'। लूयन। लूडो वाहुलकामक्। लङ्गति। 'लगि गतौ' (भ्वा० प० से०)। मर्जिपिञ्जादिभ्य ऊरोलचौ' (उ० ४ ९०)। प्रत्यावण् (५ ४ ३८)। त्रीणि ॥[3]

वालहस्तश्च वालधिः।

वालो'हस्त इव। वाला धीयन्तेऽत्र०। केशवल्लाङ्गूलमात्रस्य' द्वे ॥[6]

त्रिपूत्पावृत्तलुठिनी परावृत्ते मुहुर्भुवि ॥५०॥

'लुठ प्रतिघाते (भ्वा० प० स०)। श्रमशान्त्यर्थं पुन पुनर्भूमौ लुठिन-स्यादवस्य' द्वे ॥५०॥[7]

याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः।

यात्यनेन। चक्रमस्यास्ति। युद्धायदम्। तस्मिन्। शतमङ्गान्यस्य। स्यन्दन। 'चलनशब्दार्थ—' (३ २ १४८) इति युच्। रमन्तेऽनेन[8]। हनिकुषि—' (उ० २ २) इति क्थन्। त्रीणि ॥[10]

असौ पुष्परथश्चक्रयानं न समराय यत् ॥५१॥

पुष्पमिव रथ। चक्रयमप्य [पुष्परथ] अपि। 'युद्ध विना यात्रामवादी सुखभ्रमणरथस्य' एवम् ॥५१॥[11]

---

1 The bit of a bridle [2] 2 Hoof [2] 3 The tail of a horse [3] 4 M ... 5 M धीयतत्र 6 Hairy tail [2] 7 Rolling or wallowing on the ground of a horse [2] 8 M रमन्तेनेन 9 M हनिकुषि 10 A war-chariot [3] 11 A chariot for travelling or for pleasure (but not for war) [1]

कर्णीरथः प्रवहणं डयनं च समं त्रयम् ।

कर्ण. कर्णसमीपदेश. स्कन्ध , सोऽस्यास्ति[1] । वाहकत्वेन कर्णी । स चासौ रथश्च स्कन्धवाह्य इत्यर्थ । प्रवहन्त्यनेन । डीयतेऽनेन[2] । 'चौडोल' लोके ॥[3]

क्लीवेऽनः शकटोऽस्त्रीस्यात्

अनिति अन । असुन् (उ० ४ १८८) । शक्नोति भारं वोढुम् । 'शकादिभ्योऽटन्'[4] (उ० ४ ८१) ॥[5]

गन्त्री कम्बलिवाह्यकम् ॥५२॥

गम्यतेऽनया । ष्ट्रन् । पिद्गौरादिङीष् (४ १ ४१) । कम्बल , सास्ना, साऽस्त्येषां[6] कम्बलिनो वृषास्तैरुह्यते । ण्यत् (३ १.१२४) । स्वार्थे कन् । द्वे ॥ ५२ ॥[8]

शिविका याप्ययानं स्यात्

शिवैव । 'सज्ञाया कन्' (५.३.७५) । याप्यैरधमैर्वा यानम् । 'पालकी' लोके ॥[9]

दोला प्रेङ्खादिका स्त्रियाम् ।

दोलयति । 'दुल उत्क्षेपे' (चु० उ० से०) । प्रेख्य (ङ्खय) ते । 'इखि गतौ' (भ्वा० प० से०) । 'डोली' [लोके] ॥[10]

उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे ॥५३॥

द्वीपिनो व्याघ्रस्य च विकार । 'प्राणिरजत—' (४ ३ १५४) इत्यञ् । द्वैपेन वैयाघ्रेण च चर्मणा परिवृतो रथ । 'द्वैपवैयाघ्रादञ्' (४ २ १२) । 'व्याघ्रचर्मवेष्टितरथस्य' द्वे ॥५३॥[11]

पाण्डुकम्बलसंवीत स्यन्दन पाण्डुकम्बली ।

पाण्डुकम्बलश्चित्रप्रावार. । 'पाण्डुकम्बलादिनि' (४ २ ११) ॥[12]

रथे काम्बलवास्त्राद्या कम्बलादिभिरावृते ॥५४॥

कम्बलेन वस्त्रेण च परिवृतो रथ ॥५४॥[13]

---

1. M सोस्यास्ति 2 M डीयतेनेन 3. Palanquin [3] 4 M शकादिभ्योटन् 5 Cart [2] 6 M गम्यतेनया 7. M सास्त्येषां 8 A carriage covered with a blanket and drawn by oxen [2] 9 Litter [2] 10 Swing or a kind of palanquin itself [2] 11 A chariot covered with the skin of a tiger [2] 12 A chariot covered with a white blanket [1] 13 The chariots covered with blanket and cloth [1 each]

त्रिषु द्वैपादय

रथ्या रथकट्या रथव्रजे ।

रथाना समूह । 'खलगोरथात्' (४ २ ५०) इति यत् । 'इनित्रकट्यचश्च' (४ २ ५१) । रथाना व्रजे । त्रीणि ॥[1]

धू स्त्री क्लीबे यानमुखम्

धर्वति । 'धुर्वी हिंसायाम्' (भ्वा० प० से०) । क्विप् (३ २.१७७) । 'राल्लोप' (६ ४ २१) । यानस्य मुख पुरोभाग । 'कट्टबन्धनस्थानस्य' द्वे ॥[2]

स्याद्रथाङ्गमपस्करः ॥ ५५ ॥

रथस्याङ्गम् । अपकीर्यते स्वस्थाने क्षिप्यते । 'ऋदोरप्' (३ ३ ५७) । 'चक्रभिन्नरथाङ्गस्य' ॥ ५५ ॥[3]

चक्रं रथाङ्गम्

क्रियते गतिरनेन चक्रम् । 'घञर्थे क' (वा० ३ ३ ५८) । 'क्रुञादीना के द्वे' (वा० ६ १ १२) इति द्वित्वम् । द्वे ॥[4]

तस्यान्तो[5]नेमि स्त्री स्यात्प्रधि पुमान् ।

तस्य चक्रस्यान्तो भूस्पर्शिभाग । नयति रथ नेमि । णीजो मि (उ० ४ ३४) । प्रधीयतेऽनेन[6] । धाञ (जु० उ० अ०) कि (३ ३ ९२) । द्वे ॥[7]

पिण्डिका नाभि

पिण्ड्यते अरा यस्याम् । नभ्यतेऽक्षेण[8] । 'णभ हिंसायाम्' (भ्वा० आ० से०) । 'इञजादिभ्य' (वा० ३ ३ १०८) । 'रथचक्रमध्ये मण्डलाकाराया' द्वे ॥[9]

अक्षाग्रकीलके तु द्वयोराणि ॥ ५६ ॥

अक्षस्य नाभिक्षेप्यस्यान्ते कीलके । अणति । 'अणशब्दे (भ्वा० प० से०) । इञ् (उ० ४ ११७) । द्वे ॥ ५६ ॥[10]

---

1 A number of chariots [3] 2 The forepart of a carriage, the part where the yoke is fixed [2] 3 Any part of a chariot except the wheel [2] 4 Wheel [2] 5 Majority reads तस्यान्ते 6 M प्रधीयतेनेन 7 The circumference of a wheel [2] 8 M नभ्यतेणेन 9 The nave of a wheel [2] 10 The pin or bolt at the end of the pole of a carriage [2]

रथगुप्तिर्वरूथो ना

रथस्य गुप्तिरावरणम् । व्रियते रथोऽनेन[1] । 'जॄवृञ्भ्यामूथन्' (उ० २ ६) । 'परप्रहरणाभिघातरक्षार्थं सन्नाहवद्रथावरणस्य' द्वे ॥[2]

कूबरस्तु युगंधरः ।

'कुङ् शब्दे' (तु० आ० से०) । बाहुलकाद्वरच् । युगं धारयति । 'संज्ञायां भृतॄ–' (३ २ ४६) इति खच् । 'युगकाष्ठबन्धनस्थानस्य' द्वे ॥[3]

अनुकर्षो दार्वधःस्थम्

अनुकृष्यते । घञ् (३ ३ १९) । 'रथस्याधस्तलभागदारुणः' एकम् ॥[4]

प्रासङ्गो ना युगाद्युगः[5] ॥ ५७ ॥

प्रसज्यते । 'षञ्ज सङ्गे' (भ्वा० प० अ०) । 'उपसर्गस्य–' (६ ३ १२२) इति दीर्घः । रथाङ्गयुगादन्ययुगम्, वृषभाणां दमनकाले यदा सज्यते ॥ ५७ ॥[6]

सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणम् ।

सर्वं हस्त्यश्वरथादिदोलाद्यम् । वाहयति । ण्यन्तात् कर्तरि ल्युट् (३ ३ ११३) यान्त्यनेन । युज्यतेऽनेन[7] । 'युग्यं च पत्रे' (३ १ १२१) इति क्यबन्तो निपातः । पतन्त्यनेन । 'दाम्नी—' (३ २ १८२) इति ष्ट्रन् । 'धोर्ऋ गतिचातुर्ये' (भ्वा० प० से०) । ल्युट् (३ ३ ११३) । 'वाहनस्य' पञ्च ।[8]

परम्परावाहनं यत्तद्वैनीतकमस्त्रियाम् ॥ ५८ ॥

विनीतकानामिदम् । परम्परया यद्वहति तस्यैकम् ॥ ५८ ॥[9]

आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ।

आधोरयति । ल्यु (३ १ १३४) । हस्तिनं पाति । आतः कः (३ २ ३) । स्वार्थे कन् । हस्तिनमारोहन्ति । चत्वारि ॥[10]

---

1 M रथेनेन 2 A fence of wood or iron with which a chariot is provided as a protection from enemy's attack [2] 3 The pole of a carriage to which the yoke is fixed [2] 4 The wood at the bottom of a chariot [2] 5 II reads युगान्तरम् 6 Yoke (for cattle) [2] 7 M युज्यतेनेन 8 Vehicle in general (as a horse, elephant &c.) [5] 9 A kind of vehicle [1] 10 Elephant-driver or rider [4].

नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः ॥ ५९ ॥
सव्येष्ठदक्षिणस्थौ च सञ्ज्ञा रथकुटुम्बिनः ।

नियच्छति । प्राजति । अजे (भ्वा० प० से०) तृच् (३ १ १३३) । सुवति गमयति । 'षू प्रेरणे' (तु० प० से०) गत्यर्थत्वात्क्त (३ २ १०२) । क्षदति । 'क्षद संवरणे' सौत्र । 'तृन्तृचौ शंसिक्षदादिभ्य —' (उ० २ ९३) । सरत्यस्वान् । 'सर्तेणिच्च' (उ० ४ ८९) इत्यथिन् ॥ ५९ ॥ सव्ये वामे तिष्ठति । सुषामादि (८.३ ९८) । दक्षिणे तिष्ठति । 'सुपि–' (३ २ ४) इति क । रथ कुटुम्बयितु शीलमस्य । 'कुटुम्ब धारणे' (चु० आ० से०) । अष्टौ ॥[1]

रथिन स्यन्दनारोहा

रथेन यान्ति । इनि । स्यन्दनमारोहति । अण् (३ २ १) । 'रथारूढस्य योद्धु' द्वे ॥[2]

अश्वारोहास्तु सादिन ॥ ६० ॥

अश्वमारोहन्ति । सीदन्त्यवश्यम् । 'षद्लृ–' (तु० प० अ०) । आवश्यके णिनि (३ ३ १७०) । द्वे ॥ ६० ॥[3]

भटा योधाश्च[4] योद्धार

भटति । 'भट भृतौ (भ्वा० प० से०) । अच् (३ १ १३४) । युध्यन्ते । अच् (३ १ १३४) । त्रीणि ॥[5]

सेनारक्षास्तु सैनिका ।

सेना रक्षन्ति । अण् (३ २ १) । 'रक्षति' (४ ४ ३३) इति ठक् । 'प्रहरिकादे' द्वे ॥[6]

सेनाया समवेता ये सैन्यास्ते सैनिकाश्च ते ॥ ६१ ॥

सेनाया समवैति । 'सेनाया वा' (४ ४ ४५) इति ण्य । ठक् (४ ४ १) च । 'सेनाया मिलितस्यैकदेशिभूतस्य' द्वे ॥ ६१ ॥[7]

बलिनो ये सहस्रेण साहस्रास्ते सहस्रिण ।

सहस्र बलानि सन्ति येषाम् । 'तप सहस्राभ्या विनीनी' (५ २ १०२) 'अण् च' (५ २ १०३) । 'सहस्रसंख्यासेन बलवत' द्वे ॥[8]

---

1 Charioteer or driver [8] 2 A warrior who fights from a chariot [2] 3 A person riding on a horse [2] 4 B reads योद्धाश्च 5 Warrior [3] 6 The guard of an army [2] 7 Soldier [2] 8 An army consisting of a thousand soldiers [1]

परिधिस्थः परिचरः

परिधौ सेनान्ते तिष्ठति । परितश्चरति । 'सेनाया राज्ञो दण्डकारिण' द्वे । 'प्रयाणे सामन्तस्यापकर्षस्य'—इत्यन्ये ॥[1]

सेनानीर्वाहिनीपतिः ॥ ६२ ॥

सेना नयति । क्विप् (३ २ ६१) । द्वे ॥ ६२ ॥[2]

कञ्चुको वारबाणोऽस्त्री

कञ्च्यते । 'कचि दीप्त्यादौ' (भ्वा० आ० से०) । बाहुलकादुक । बाणं वारयति । राजदन्तादि (२ २ ३१) । 'बालकाङ्गतिसनाहस्य' द्वे ॥[3]

यत्तु मध्ये सकञ्चुकाः ।

बध्नन्ति तत्सारसनमधिकाङ्गः

सारं सनोति । 'षणु दाने' (तु० प० से०) । 'कञ्चुकदार्ढ्यार्थं मध्ये काये निबद्धस्य' द्वे ॥[4]

अथ शीर्षकम् ॥ ६३ ॥

शीर्षण्यं च शिरस्के

शीर्षस्य प्रतिकृति । इवार्थे कन् (५ ३ ९६) ॥ ६३ ॥ शिरसे हितम् । 'ये च तद्धिते (६ १ ६१) इति शीर्षन् । शिरस्त्रायते । 'टोप' लोके ॥[5]

अथ तनुत्रं वर्म दंशनम् ।

उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ॥ ६४ ॥

तनु त्रायते । वृणोति देहम् । वृञ् (स्वा० उ० से०) मनिन् (४ २ ७५) । दश्यतेऽनेन[6] । 'दंशि दशनस्पर्शनयो' (चु० आ० से०) । उरश्छाद्यतेऽनेन[7] । कङ्कते । 'ककि लौल्ये' (भ्वा० आ० से०) । 'शकादिभ्योऽटन्' (उ० ४ ८१) । जागर्ति जगरः । पृषोदरादि (६ ३ १०९) । कं वातं वञ्चति । 'वञ्चु गतौ' (भ्वा० प० से०) । मूलविभुजादि । 'सनाहस्य' सप्त ॥ ६४ ॥[8]

आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ।

अपि नद्धः पिनद्धः । भागुरिमतेन वा, अल्लोप ॥[9]

---

1 An officer employed by a king for punishing offenders [2] 2 General [2] 3 A coat of mail [2] 4 A military belt or girdle [2] 5 Helmet [3] 6 M दश्यतेऽनेन 7 M उरश्छाद्यतेऽनेन 8 Armour [7] 9 A persen wearing clothes, armour &c [4]

संनद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः ॥ ६५ ॥

संनह्यति । वर्म जातमस्य । तारकादिः (५.२.३६) । सज्जति । 'षस्ज गतौ' (भ्वा० प० से०) । दंश संजातोऽस्य[1] । इतच् (५.२.३६) । व्यूढो धृतः कङ्कटो येन । 'धृतसंनाहस्य' पञ्च ॥ ६५ ॥[2]

त्रिष्वामुक्तादयो

आमुक्तादयो (अ० २.८.६५) व्यूढकङ्कटान्ताः (अ० २.८.६५) ॥

वर्मभृतां कावचिकं गणे ।

कवचिना समूहः । 'ठञ् कवचिनश्च' (४.२.४१) ॥[3]

पदातिपत्तिपदगपादातिकपदाजयः ॥ ६६ ॥

पदगश्च पदिकश्च

पादाभ्यामतति । 'अज्यतिभ्याम्—' (उ० ४.१३०), 'पादे च' (उ० ४.१३१) इतीण् । पादस्य पदः (६.३.५२) । पद्यते । बाहुलकात्तिः । पादाभ्यां गच्छति । 'अन्येभ्योऽपि[4]—' (वा० ३.२.४८) इति डः । पादस्य पदः (६.३.५२) । पदातिरेव । विनयादित्वात् (५.४.३४) ठक् । पादाभ्यामजति ॥ ६६ ॥ पद्भ्यागच्छति । पादसमानार्थः पच्छब्दोऽप्यस्ति[5] । पादाभ्यां चरति । पर्पादित्वाद् (४.४.१०) ष्ठन् । 'इके चरतौ' (वा० ६.३.५३) इति पद्भावः सप्त ॥[6]

अथ पादातं पत्तिसंहतिः ।

पदातीना समूहः । भिक्षादिः (४.२.३८) । द्वे ॥[7]

शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः ॥ ६७ ॥

शस्त्रमाजीवन्ति, उपजीवन्ति । काण्डानि शस्त्राणि पृष्ठे यस्य । आयुधेन जीवन्ति । 'आयुधाच्छ च' (४.४.१४) । चात् ठक् । चत्वारि ॥ ६७ ॥[8]

कृतहस्तः सुप्रयोगविशिखः कृतपुङ्खवत् ।

कृतोऽभ्यस्तो[9] हस्तो यस्य । शोभनः प्रयोगोऽस्य[10] । सुप्रयोगो विशिखोऽस्य[11] । कृतोऽभ्यस्तः[12] पुङ्खयुक्तः शरो येन । 'अभ्यस्तशरस्य' त्रीणि ॥[13]

---

1. M. संजातोस्य 2. A person dressed in armour and ready for battle [5] 3. A multitude of men in armour [1] 4. M. अन्येभ्योपि 5. M. पच्छब्दोप्यस्ति 6. Foot-soldier [7] 7. Infantry [1] 8. Mercenary soldier [4] 9. M. कृतोभ्यस्तो 10. M. प्रयोगोस्य 11. M. विशिखोस्य 12. M. कृतोभ्यस्तः 13. Skilled archer [3].

अपराद्धपृषत्कोऽसौ लक्ष्याद्यश्च्युतसायकः ॥ ६८ ॥

अपराद्धः पृषत्को बाणोऽस्य[1]। लक्ष्याद्वेध्यात् च्युतोभ्रष्टः सायकोऽस्य[2]। एक [म्] ॥६८॥[3]

धन्वी धनुष्मान् धानुष्को निषङ्ग्यस्त्री धनुर्धरः ।

धन्वाऽस्यास्ति[4]। व्रीह्यादित्वात् । (५.२.११६) इनिः । धनुरस्यास्ति । मतुप् (५.२.९४) । धनुः प्रहरणमस्य । 'तदस्य प्रहरणम्' (४.४.५७) इति ठक् । निषङ्गोऽस्यास्ति[5]। इनिः (५.२.११५) । अस्त्रमस्यास्ति । धनुषो धरः । षट् ॥[6]

स्यात्काण्डवांस्तु काण्डीरः

काण्डो बाणोऽस्यास्ति[7]। 'बाणधारकस्य' द्वे ॥[8]

शाक्तीकः शक्तिहेतिकः ॥६९॥

शक्तिः प्रहरणमस्य । 'शक्तियष्ट्योरीकक्' (४.४.५९) शक्तिर्हेतिर्यस्य ॥६९॥[9]

याष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ ।

यष्टि प्रहरणमस्य । परश्वधः परशुः प्रहरणमस्य । 'परश्वधाट्ठञ्च' (४.४.५८) एकैकम् ॥[10]

नैस्त्रिंशिकोऽसिहेतिः स्यात्

निस्त्रिंशः प्रहरणमस्य । 'प्रहरणम्' (४.४.५७) इति ठक् । 'खड्गायुधस्य' द्वे ॥[11]

समौ प्रासिककौन्तिकौ ॥७०॥

प्रासः कुन्तश्च प्रहरणमस्य । एकैकम् ॥७०॥[12]

चर्मी फलकपाणिः स्यात्

चर्मास्यास्ति । फलकं पाणौ यस्य । द्वे ॥[13]

---

1. M. बाणोस्य 2. M. सायकोस्य 3. One who has not hit the mark with his arrow [1] 4. M. धन्वास्यास्ति 5. M. निषङ्गोस्यास्ति 6. Archer [6] 7. M. बाणोस्यास्ति 8. One armed with arrows [2] 9. Laneer [2] 10. Warriors armed with a club, and an axe. [1 each] 11. Swordsman [2] 12. Warriors armed with two types of spears [1 each] 13. A soldier armed with a shield [2].

पताको वैजयन्तिकः ।

पताकाऽस्यास्ति[1] । वैजयन्त्या चरति । ठक् (४.४.८) । 'ध्वजधारकस्य' द्वे ॥[2]

अनुप्लवः सहायश्चानुचरोऽभिसरः समाः ॥७१॥

अनुपश्चात् प्लवते । सह अयते । अनु चरति । अभित सरति । 'सहायस्य' चत्वारि ॥७१॥[3]

पुरोगाग्रेसरप्रष्ठाग्रतस्सरपुरस्सराः ।
पुरोगमः पुरोगामी

पुरो गच्छति । ड (वा० ३ २ ४८) । पुरस्सरति । 'पुरोऽग्रत'[4] (३ २ १८) इति टच् । प्रतिष्ठते गच्छति । 'आतश्च—' (३ १ १३६) इति क । 'प्रष्ठोऽग्रगामिनि'[5] (८ ३ ९२) इति ष । अग्रत सरति । पुर सरति । पुरोगच्छति । अच् (३ १ १३४) । णिनौ (३ २ ७८) पुरोगामी । सप्त ॥[6]

मन्दगामी तु मन्थरः ॥७२॥

मन्द गच्छति । मन्थ राति । द्वे ॥७२॥[7]

जङ्घालोऽतिजवस्तुल्यौ

अतिशयिता जङ्घाऽस्य[8] । सिध्मादित्वात् (५ २ ९७) लच् । अतिशयितो जवो वेगोऽस्य[9] द्वे ॥[10]

जङ्घाकरिकजाङ्घिकौ ।

जङ्घेव करो हस्तो यस्य । जङ्घाभ्या जीवति । 'वेतनादिभ्यो जीवति' (४ ४ १२) इति ठक् । 'जङ्घाजीविन' द्वे ॥[11]

तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ॥७३॥

तरोवेगोऽस्यास्ति । 'अस्मायामे—' (५ २ १२१) इति विनि । 'ञित्वरा सम्भ्रमे' (भ्वा० आ० से०) । 'ञीत क्त' (३ २ १८७) । प्रजवति । 'जु' सौत्रो [धातु] वेगे । 'प्रजोरिनि' (३ २ १५६) । 'जुचङ्क्रम्य—' (३ २ १५०) इति युच । अचि (३ १ १३४) जव । 'वेगवत ' षट् ॥७३॥[12]

---

1 M पताकास्यास्ति 2 Standard bearer [2] 3 Follower [3] 4 M पुरोग्रत 5 M प्रष्ठोग्रगामिनि 6 Leader [7] 7 A person who walks slowly 8 M जङ्घास्य 9 M वेगोस्य 10 A man running swiftly [2] 11 Courier [2] 12 Express [6]

जय्यो यः शक्यते जेतुम्

जेतुं शक्यः । 'जि जये, अभिभवे वा' (भ्वा० प० अ०) । 'अचो यत्' (३.३.९७) ॥[1]

जेयो जेतव्यमात्रके ।

शक्यार्थादन्यत्र 'अर्हे कृत्य [तृ] चश्च' (३.३.१६९) इति योग्यताया यत् । एकम् ॥[2]

जैत्रस्तु जेता

जयतेस्तृच् । प्रज्ञाद्यण् (७.४.३८) ॥[3]

यो गच्छत्यलं विद्विषतः प्रति ॥७४॥

सोऽभ्यमित्र्योऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि ।

अमित्रस्याभिमुखम् । 'लक्षणेन—' (२.१.१४) इत्यव्ययीभावः । अभ्यमित्रमलंगामी । 'अभ्यमित्राच्छ च' (५.२.१७) चाद् यत्खौ । 'शत्रूणा संमुखं सामर्थ्येन गच्छतः' त्रीणि ॥[4]

ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः ॥७५॥

अतिशयितमूर्जोऽस्यास्ति[5] । 'ज्योत्स्नातमिस्रा—' (५.२.११४) इति वलज्विनी । ऊर्जस्यातिशय. । 'ऊर्ज बलादौ' (चु० प० से०) । घञ् (३.३.१८) ॥७५॥[6]

स्यादुरस्वानुरसिलः

प्रशस्तमुरोऽस्य[7] । मतुप् (५.२.९४) । पिच्छादित्वात् (५.२.१००) इलच् । 'विपुलोरसः' द्वे ॥[8]

रथिनो रथिको रथी ।

रथोऽस्यास्ति[9] । 'मेघारथाभ्यामिरन्निनचौ' (वा० ५.२.१०९) । 'अत इनिठनौ' (५.२.११५) । त्रीणि ॥[10]

---

1. That which can be conquered [1] 2. Conquerable (in general) [1] 3 Conqueror [2] 4. A warrior who valiantly encounters his enemy [3] 5. M. अतिशयितमूर्जोऽस्यास्ति 6. A mighty or powerful man [2] 7. M. प्रशस्तमुरो ऽस्य 8. A broad-chested man [2] 9. M. रथोऽस्यास्ति 10. The owner of a carriage [3].

कामगाम्यनुकामीनः

कामं यथेष्ट गमनशील । णिनि (३ २ ७८)। 'कामम्' इत्यव्ययम् । कामस्य सदृशम् । यथार्थेऽव्ययीभाव[1] । अनु काम गामी । 'अवार—' (५ २ ११) इति ख । द्वे ।।[2]

हृत्यन्तीनस्तथा भृशम् ।।७६।।

अन्तस्यात्ययोऽत्यन्त[3] गामी । ख (५ २ ११)। 'भृश गामी' इत्यन्वय । 'अतिगमनशीलस्य' एकम् ।।७६।।[4]

शूरो वीरश्च विक्रान्त

शूरयति । 'शूरवीर विक्रान्तौ' (च० उ० से०)। विक्रामति स्म । क्रमे (भ्वा० प० से०) क्त (३ ४ १२) त्रीणि ।।[5]

जेता जिष्णुश्च जित्वर ।

'तृन्' (३ २ १३५), जता । 'ग्लाजिस्थश्च ग्स्नु' (३ २ १३९)। जिष्णु । 'इण्नशजि—' (३ २ १६३) इति क्वरप् । जित्वर ।।[6]

सायुगीनो रणे साधु शस्त्राजीवादयस्त्रिषु ।।७७।।

सयुगे रणे साधु । प्रतिजनादिभ्य खञ्' (४ ४ ९९) ।।७७।।[7]

ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमू ।
वरूथिनी बल सैन्यं चक्र चानीकमस्त्रियाम् ।।७८।।

ध्वजा सन्त्यस्याम् । वाहा सन्त्यस्याम् । इनेन सहिता सेना । प्रियते । 'पृङ् व्यायामे' (तु० आ० अ०)। बाहुलकात्तनन् । अनीक रणोऽस्त्यस्याम्[8] । चमति [दा] मूत्र् । वरूथा[9] सन्त्यस्याम् । बलति । अच् (३ १ १३४)। सेनैव सैन्यम् । चतुर्वर्णादि (वा० ५ १ १२४) । क्रियनेऽनेन[10] । 'के कृञादीनाम्' (वा० ६ १ १२) द्वित्वम् । अनित्यनेन । 'अनिहृषिभ्या किच्च' (उ० ४ १७) इतीकन् । एकादश ।।७८।।[11]

व्यूहस्तु बलविन्यास

व्यूह्यते । बलस्य सेनाया विन्यासो विभज्य स्थापनम् । द्वे 'व्यूहस्य' ।।[12]

---

1 M यथार्थेऽव्ययीभाव 2 One who goes at his will or pleasure [1] 3 M अन्तस्यात्ययोत्यन्त 4 A person who walks too much [1] 5 A brave man [3] 6 A victorious person [3] 7 A skilled warrior [1] 8 M रणास्त्यस्याम् 9 M वरूथा 10 M क्रियतेनेन 11 Army [11] 12 A military array [1]

भेदा दण्डादयो युधि ।

भेदा विशेषाः । दण्डवदवस्थानं दण्डः ॥[1]

प्रत्यासारो व्यूहपार्ष्णिः

प्रतीपमासारयति मग्नान् । 'सृ गतौ' (भ्वा० प० अ०) । व्यूहस्य पार्ष्णिः पृष्ठभागः । 'सैन्यपृष्ठस्थितसैन्यस्य' द्वे ॥[2]

सैन्यपृष्ठे प्रतिग्रहः ॥७९॥

प्रतिगृह्यतेऽनेन[3] । सैन्यस्य पश्चाद्भिन्नसंघातः ॥७९॥[4]

एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।

एक इभः । एको रथः । त्रयोऽश्वाः[5] । पञ्चनराः इति पत्तिः उच्यते ॥[6]

पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥८०॥
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
अनीकिनी दशानीकिन्योऽक्षौहिणी

तिस्रः पत्तयः सेनामुखम् । ततः गुल्मः । ततो गुणः । ततो वाहिनी । ततः पृतना । ततः चमूः । ततः[7] अनीकिनी । ततो दशानीकिनी । ततः । अक्षौहिणीति यथोत्तरत्रिगुणितैः संज्ञा । सेनयामुखमुपक्रमः । गुडति । 'गुड रक्षायाम्' (तु० प० से०) । बाहुलकान्मक् । गण्यते गणः ॥[8]

अथ संपदि ॥८१॥

संपत्तिः श्रीश्च लक्ष्मीश्च

संपद्यतेऽनया[9] । क्विप् (वा० ३.३.९४) ॥ ८१ ॥ 'संपत्तिसाकल्य—' (२.१.६) इति निर्देशात् क्तिन् (३.३.९४) श्रीयते सर्वैः ॥[10]

विपत्त्यां विपदापदौ ॥[11]

आयुधं तु प्रहरणं शस्त्रमस्त्रम्

आयुध्यन्तेऽनेन ।[12] शस्यतेऽनेन[13] । 'शसु हिंसायाम्' (भ्वा० प० से०) ।

1. Different forms of military arrays [1 each] 2. The army at the rear of a military array [2] 3. M. प्रतिगृह्यतेनेन 4. The rear of an army [2] 5. M. त्रयोश्वा: 6. The division of an army consisting of one elephant, one chariot, three horses and five foot-soldiers [1] 7. M. तत 8. Other eight divisions of an army [1 each] 9. M. संपद्यतेनया 10. Prosperity [4] 11. Calamity or adversity [3] 12. M. आयुध्यन्तेनेन 13. M. शस्यतेनेन ।

'दाम्नीशस—' (३ २ १८०) इति ष्ट्रन् । अस्यते । ष्ट्रन् (उ० ४ १५८) । चत्वारि ॥८२॥[1]

अथास्त्रियौ ॥ ८२ ॥

धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् ।
इष्वासोऽपि

धनति । 'धन शब्दे' (भ्वा० प० स०) । 'अर्तिपृवपि–' (उ० २ ११७) इत्युस् । चयस्य वशभेदस्य विकार । धन्वति । 'धवि गतौ' (भ्वा० प० से०) 'कनिन्युवृषि–' (उ० १ १५७) इति कनिन् । शरा अस्यन्तेऽनेन[2] । कौति । कौ विच् (३ २ ७५) । कोदण्डो वशोऽस्य[3] । कर्मणे प्रभवति । 'कर्मण उकञ्' (५ १ १०३) । इषवो बाणा अस्यन्तेऽनेन[4] । सप्त ॥[5]

अथ कर्णस्य कालपृष्ठं शरासनम् ॥ ८३ ॥

कालो यम इव पृष्ठमस्य । कर्णस्य शरासनं धनु ॥ ८३ ॥[6]

कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसके ।

कपिर्हनुमान् ध्वजेऽस्य[7] । गाण्डिर्ग्रन्थिरस्यास्ति । 'कृदिकारात्–' (ग० ४ १ ४५) इति वा ङीष । 'गाण्ड्यजगात्–' (५ २ ११०) इति व । 'अर्जुनधनुष' द्वे ॥[8]

फोटिरस्याटनी

कोटयनेऽनया[9] । कुट प्रतापने' [चुरादि] । अटति । बाहुलकादनि । 'धनुषोऽन्यस्य' द्वे ॥[10]

गोधा[11] तले ज्याघातवारणे ॥ ८४ ॥

गुध परिवेष्टने' (दि० प० से०) । घञ् (३ ३ १२१) । तलति । 'तल प्रतिष्ठायाम्' (भ्वा० प० से०) । व्यक्तिद्वयाद् द्वित्वम् । 'ज्याया गुणस्याघातस्य वारणे' तत्र द्वे ॥ ८४ ॥[12]

---

1 Weapon [4] 2 M अस्यन्तेनेन 3 M वशास्य 4 M अस्यन्तेनेन 5 Bow [7] 6 Karna's bow [1] 7 M ध्वजेस्य 8 Arjuna's bow [2] 9 M काटयनेनया 10 The curved end of a bow [2] 11 B and K read गाधे 12 A leathern fence worn round for safety from a bow [2]

लस्तकस्तु धनुर्मध्यम्

लस्यते स्म। 'लस श्लेषणादौ' (भ्वा० प० से०)। क्तः (३.२.१०२)। स्वार्थे कन् (५.४.३८) द्वे ॥[1]

मौर्वी ज्या शिञ्जिनी गुणः।

मूर्वाया विकारः। 'ज्या वयोहानौ' (क्र्या० प० अ०)। शिङ्क्ते। 'शिजि अव्यक्ते शब्दे' (अ० आ० से०), णिनि। गुण्यते। 'गुण आमन्त्रणे' (चु० उ० से०)। चत्वारि ॥[2]

स्यात्प्रत्यालीढमालीढमित्यादिस्थानपञ्चकम् ॥ ८५ ॥

प्रत्यालेहनम्। लिहः (अ० उ० अ०) क्तः (३.३.११३)। ऊर्ध्वस्यस्य वामपादप्रसारे दक्षिणपादसंकोचे आद्यम्। विपर्यये द्वितीयम्। [इत्यादि[3]] ॥८५॥[4]

लक्ष्यं लक्षं शरव्यं च[5]

लक्ष्यते। 'लक्ष आलोचने' (चु० आ० से०)। शरान् व्ययन्ति। 'व्येञ् संवरणे' (भ्वा० उ० अ०)। डः (वा० ३.२.३)। त्रीणि ॥[6]

शराभ्यास उपासनम्।

शरस्य शरमोक्षस्याभ्यासः। द्वे ॥[7]

पृषत्कबाणविशिखा अजिह्मगखगाशुगाः ॥ ८६ ॥

कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः।

सायकः प्रकरः काण्डः कङ्कपत्रः शिलीमुखः [१] ॥ इति क्षेपकः।

'पृषु सेचने' (भ्वा० प० से०)। शत्रन्वालम्। 'वण शब्दे' (भ्वा० प० से०)। घञ् (३.३.१८) विशिष्टा शिखा अग्रमस्य। अजिह्मं शमानं च गच्छन्ति ॥ ८७ ॥ के लम्बते। मार्गयति। 'मृग अन्वेषणे' (भ्वा० उ० से०)। 'शृ हिंसायाम्' (क्र्या० प० से०)। रोप्यतेऽनेन[8]। 'रुपु विमोहने' (दि० प० से०)। इष्यतेऽनेन[9]। 'इषेः किच्च' (उ० १.१३) इषुः। द्वादश ॥[10]

---

1. The middle of a bow 2. Bow-string [4] 3. What Amara Simha means by the word ityadi is explained by K. as follows: आदिशब्दात्सममसारं वैशाखं मण्डलं ग्रहं च धनुर्वेदप्रसिद्धम् (p. 135) 4. Five positions of an archer being pratyalidha alidha, sampada, vaisakha and mandala [1 each] 5. B. and K. लक्ष्यं लक्षं शरव्यं च 6. Butt (for an arrow) [2] 7. The practice of archery [2] 8. M. रोप्यतेनेन 9. M. इष्यतेनेन 10. Arrow [12].

प्रक्ष्वेडनास्तु नाराचा

प्रकर्षेण क्ष्वेदन्ते । ञिक्ष्विदा (भ्वा० आ० से०) ल्यु (३ ११३४) । पृषोदरादि (६ ३ १०९) । नारमाचरति । ड (वा० ३ २.१०२) । 'सर्वलोहमयस्य शरस्य' द्वे ॥[1]

पक्षो वाज

पक्ष्यतेऽनेन । 'पक्ष परिग्रहे' (भ्वा० प० से०) । वजत्यनेन । 'वज गतौ' (भ्वा० प० से०) । 'शरपक्षस्य' द्वे ॥[3]

त्रिषूत्तरे ॥ ८७ ॥

उत्तरे वक्ष्यमाणा लिप्तका (अ० २ ८ ८८) न्ता ॥ ८७ ॥

निरस्त प्रहिते बाणे

निरस्यते स्म ॥[4]

विषाक्ते दिग्धलिप्तकौ ।

'दिह उपचये' (अ० उ० अ०) क्त (३ २ १०२) । 'विषसंबद्धबाणस्य द्वे ॥[5]

तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयो ॥ ८८ ॥

तूण्याम्

'तूण सकोचे' (चु० आ० से०) । उपासज्यन्तेऽत्र[6] शरा । तूणति शरं संकोच राति । इषवो धीयन्तेऽत्र[7] । 'शराधारस्य' षट् ॥ ८८ ॥[8]

खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टय ।

कौक्षेयका मण्डलाग्रः करवाल.[9] कृपाणवत् ॥८९॥

खण्डयतेऽनेन[10] । 'छापूखडिभ्य कित्' (उ० १ १२४) इति गन् । निर्गत-स्त्रिंशतोऽङ्गुलिभ्य । चन्द्र इव हास प्रभाऽस्य[11] । अस्यते । इन् (उ० ४ ११७) । रेषति । 'रिषु हिंसायाम्' (तु० प० अ०) । क्तिच् (३ ३ १७४) । कुक्षौ भव । 'कुलकुक्षि—' (४ २ ९६) इति ढकञ् । मण्डलमग्रमस्य । करे वाल इव । कृपा नुदति । ड (वा० ३ २ १०१) । 'पूर्वपदात्—' (८ ४ ३) इति ण ॥ ८९ ॥[12]

---

1 An iron arrow [2] 2 M पक्ष्यतेनेन 3 The feathered end of an arrow [2] 4 A discharged arrow [1] 5 A poisoned arrow
6 M उपासज्यन्तेत्र 7. M धीयन्तेत्र 8 Quiver [6] 9 B prefers करपाल 10 M खण्डयतेनेन 11 M प्रभास्य 12 Sword [9]

त्सरुः खड्गादिमुष्टौ स्यात्

त्सरति । 'त्सर छद्मगतौ' (भ्वा० प० से०) । 'शृस्वृस्निहि—' (उ० १ १०) इत्यु ॥[1]

मेखला तन्निबन्धनम् ।

माया इव लाति । 'खड्गादि चर्मादिरचितकटिबन्धनस्य द्वे ॥[2]

फलकोऽस्त्री फलं चर्म

फलति । 'निफला विशरणे (भ्वा० प० से०) । वृत्रादिभ्यो वुन् (उ० ५ ३५) । चरत्यनेन । मनिन् (उ० ४ १४४) । 'ढाल' लोके ॥[3]

संग्राहो मुष्टिरस्य यः ॥ ९० ॥

संगृह्यते । 'ग्रहि मुष्टौ' (३ ३ ३६) इति घञ् । अस्य फलकस्य । एकम् ॥[4]

द्रुघणे मुद्गरघनौ

द्रुर्गो हन्यतेऽनेन[5] । 'करणेऽयोविद्रुषु'[6] (३ ३ ८२) इत्यप् घनादेशश्च । मुदो गरः । हन्यतेऽनेन[7] । 'मूर्तौ घनः' (३ ३ ७७) इत्यप् घनश्च । 'मुग्दर' इति लोके ॥[8]

स्यादीली करवालिका ।

ईलयति । गौरादि ङीष् । करे वालेव । 'गुप्ती' इति लोके ॥[9]

भिन्दिपालः सृगस्तुल्यौ

भिन्दति । 'भिदि अवयवे' (भ्वा० प० से०) । इन् (उ० ४ ११७) । भिन्दिं पालयति । सरति । बाहुलकाद् गक् । 'गोफण' इति ख्यातस्य द्वे । 'नालिकास्त्रम्'— इत्यन्ये ॥[10]

परिघः परिघातनः ॥ ९१ ॥

परितो हन्यतेऽनेन[11] 'परौ घः' (३ ३ ८४) इति साधु । 'लोहबद्धयष्टेः' द्वे ॥ ९१ ॥[12]

---

1 The hilt of swords and other weapons [2] 2 Sword-belt [1] 3 Shield [3] 4 The handle of a shield [1] 5 M हन्यतेनेन 6 M करणेयोविद्रुषु 7 M हन्यतनन 8 Mallet or wooden mace [3] 9 A short sword [2] 10 Sling [2] 11 M हन्यतेरन 12 Stick or club studded with iron [2]

द्वयोः कुठारः स्वधितिः

कुटं वृक्षमृच्छति । 'ऋ गतौ' (भ्वा० प० अ०) । स्वं धियति । 'धि धारणे' (तु० प० अ०) । क्तिन् (३.३ १७४) । द्वे । 'टेगारी' लोके ॥[1]

परशुश्च परश्वधः ।

परं शृणाति । 'आङ्परयो. खनिशॄभ्यां डिच्च' (उ० १.३३) इति कुः । परस्वं दधाति । कः । तालव्यमध्यः [परश्वधः] अपि । द्वे 'फरुहा' लोके ॥[2]

स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ॥ ९२ ॥

शस्यतेऽनया[3] । 'शसु हिंसायाम्' (भ्वा० प० से०) । 'दाम्नीशस–' (३.२.१८२) इति ष्ट्रन् । असेः पुत्रीव । 'छुर छेदने' (तु० प० से०) । क्वुन् (उ० २.३५) । असे धेनुकेव । चत्वारि ॥ ९२ ॥[4]

वा पुंसि शल्यं शङ्कुर्ना

शलति । 'शल गतौ' (भ्वा० प० से०) । अघ्न्यादित्वात् (उ० ४.१११) य । शङ्कतेऽस्मात्[5] । 'खरशङ्कु—' (उ० १.३६) इति साधुः । 'शैल' इति ख्यातस्य द्वे ॥[6]

सर्वला तोमरोऽस्त्रियाम् ।

सर्वं लाति । तालव्यादि [शर्वला] अपि । 'तु' सौत्रो गत्यर्थः । विच् (३.२.७५) । तौर्गते म्रियतेऽनेन[7] । 'गंडासा' [लोके] ॥[8]

प्रासस्तु कुन्तः

प्रास्यते । कुं तनोति । डः । 'भाला' [लोके] ॥[9]

कोणस्तु स्त्रियः पाल्यश्रिकोटयः ॥ ९३ ॥

कुणत्यनेन । 'कुण शब्दे' (तु० प० से०) । पालयति । 'अच इः' (उ० ४.१३८) । अश्यते । अंघ्र्यादि (उ० ४.६६) । 'भुशुण्डी लोहनलिका' "बंदूक" 'नाडिकातिभुशुण्डिका' "तोप" । 'दारुका वह्निचूर्णस्या' "दारु" । दन्त्यमध्यस्वस्रशब्दो दन्त । कोटयति । 'कुट कौटिल्ये' (तु० प० से०) । 'अच इः' (उ० ४.१३८) । चत्वारि ॥ ९३ ॥[10]

---

1. Axe [2] 2 A battle-axe [2] 3. M. शस्यतेनया 4. Knife [4] 5 M. शङ्कतेस्मात् 6 Javelin [2] 7. म्रियतेनेन 8. An axe for cutting fodder [2] 9. Lance or spear [2] 10. The sharp edge or point of a sword or any weapon [4].

सर्वाभिसारः सर्वौघः सर्वसंनहनार्थकः ।

सर्वेण अभिसरणम् । सर्वस्य ओघः । सर्वेषां संनहनमर्थो यस्य । 'सर्वसैन्यसंहननस्य' त्रीणि ॥[1]

लोहाभिहारोऽस्त्रभृतां राज्ञां नीराजनाविधिः ॥९४॥

लोहस्य शस्त्रस्याभिहरणम् । नितरां राजनं तस्या विधिः । 'महानवम्यां प्रस्थानात्प्राक्कृच्छस्त्रवाहनोदिपूजनविधे.' एकम् ॥९४॥[2]

यत्सेनयाभिगमनमरौ तदभिषेणनम् ।

सैनयाभियानम् । 'सत्याप—' (३.१.२१) इति णिचो ल्युट् (३.३.११५) ॥[3]

यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः ॥९५॥

'हुयामाश्रुभसिम्यस्त्रन्' (उ० ४.१६७) । यात्रा । 'व्रजयजो.—' (३.३.९८) इति क्यप्[4] । व्रज्या । 'ग्रहवृ—' (३.३.५८) इत्यप् । गमः ॥९५॥[5]

स्यादासारः प्रसरणम्

आसरणम् । घञ् (३.३.१८) । 'सर्वतोव्याप्यसैन्यप्रसरणस्य' द्वे ॥[6]

प्रचक्रं चलितार्थकम् ।

प्रस्थितं चक्रं सैन्यम् । 'प्रस्थितसैन्यस्य' द्वे ॥[7]

अहितान्प्रत्यभीतस्य रणे यानमभिक्रमः ॥९६॥

अभि क्रमे. (भ्वा० प० से०) घञि (३.३.१८) 'नोदात्त—' (७.३.३४) इति न वृद्धिः । एकम् ॥९६॥[8]

वैतालिका बोधकराः

विविधेन तालेन शब्देन चरति । 'चरति' (४.४.८) इति ठक् । बोधं करोति । ८ : (३.२.२०) । 'प्रातर्जागरणकर्तारि' द्वे ॥[9]

---

1. An attack with a complete army [3] 2. A military ceremony [1] 3. Marching with troops against an enemy [1] 4. M. विच् 5. Marching (in general) [6] 6. Surrounding an enemy, incursion, attack [2] 7. An army in motion [2] 8. Encountering an enemy without fear [1] 9. A bard who wakes up his master by singing songs in the morning [2].

चाक्रिका घाण्टिकास्त्रते ।[1]

चक्रेण समूहेन चरन्ति । घण्टया चरन्ति । बहवो मिलिता ये राज्ञ स्तुत्यादि पठन्ति तेषा द्वे ॥[2]

स्युर्मागधास्तु मगधः

मगध्यति । कण्ड्वादियगन्त । अचि (३ १ १३४) 'यस्य हल' (६ ४ ४९)। 'वशपरम्परासकाना द्वे' ॥[3]

वन्दिनः स्तुतिपाठकाः ॥९७॥

वन्दन्ते । णिनि । 'भाट' लोके । द्वे ॥९७॥[4]

सशप्तकास्तु समयात्सग्रामादनिवर्तिन ।

शपे (भ्वा० उ० अ०) क्त (३ २ ११४)। सयास शपथ कुर्वन्ति । समयाच्छपथाद्धेतो ॥[5]

रेणुर्द्वयो स्त्रिया धूलिः पाशुर्ना न द्वयो रज ॥९८॥

रीयते । 'री गत्यादौ' (क्र्या० प० अ०)। 'अजिवृरी—' (उ० ३ ३८) इति णु । धूयते । बाहुलकाल्लि । 'पशि नाशने' (चु० प० से०)। 'अर्जि दृशकमि—' (उ० १ २७) इति साधु । 'भूरञ्जिभ्या कित्' (उ० ४ २१६) इत्यसुन् । चत्वारि ॥९८॥[6]

चूर्णे क्षोद

चूर्ण्यते । 'चूर्ण पेषणे' [चुरादि] 'क्षुदिर् सपेषणे' (रु० उ० अ०) द्वे ॥[7]— षट् पर्याया '—इत्यन्ये ।

समुत्पिञ्जपिञ्जलौ भृशमाकुले ।

समुत्पिञ्जते । 'पिजि हिंसायाम्' [चुरादि]। पिञ्ज लाति । अति-सकुलस्य' द्वे ॥[8]

पताका वैजयन्ती स्यात्केतन ध्वजमस्त्रियाम् ॥९९॥

पतति । 'बलाकादयश्च' (उ० ४ १४) इत्याक । वैजयन्तस्येयम् ।

---

1 B घाण्टिकार्थका and K घाण्टिका समा 2 Bards singing in chorus praises in honour of a king or gods [2] 3 Minstrel [2] 4 Bhāṭa (panegyrist) [2] 5 A warrior sworn never to return from a battle [1] 6 Dust [4] 7 Powdery dust [2] 8 An army in great disorder [2]

केत्यते । शायतेऽनेन । 'किन संशयादौ' (भ्वा० प० से०) । ध्वजति । 'ध्वज गतौ' (भ्वा० प० से०) । चत्वारि ॥९९॥[1]

सा वीराशंसनं युद्धे भूमिर्यातिभयप्रदा ।

वीरा आशंस्यन्तेऽत्र[2] ॥[3]

अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम् ॥१००॥

अहं पूर्वम्[4] । 'सुप् सुपा' (२.१.४) इति समासः ॥१०१॥[5]

आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि ।

अहो पुरुषस्य भावः । मनोज्ञादित्वात् (५.१.१२३) वुञ् । 'आत्मनि शक्त्याविष्कारस्य' एषम् ॥[6]

अहमहमिका तु सा स्यात्परस्परं यो भवत्यहंकारः ॥१०१॥

'अहमहम्' शब्दोऽस्त्यत्र । व्रीह्यादित्वात् (५.२.११६) ठन् ॥१०१॥[7]

द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च ।
शक्तिः पराक्रमः प्राणो[8]

द्रवत्यनेन । 'द्रुदक्षिभ्यामिनन्' (उ० २.५०) । तरत्यनेन । असुन् (उ० ४.१८८) । एवं सहः । 'बल प्राणने' (भ्वा० प० से०) । शूरस्य भावः । तिष्ठत्यनेन । मनिन् (उ० ४.१४४) । शुष्यत्यनेन । 'अविसिवि—' (उ० १. १४४) इति मन् । क्रमेः (भ्वा० प० से०) घञ् (३.३.१२१) । प्राणित्यनेन[9] दश ॥[10]

विक्रमस्त्वतिशक्तिता ॥१०२॥

अतिशयिता शक्तिर्यस्य तस्य भावः ॥१०२॥[11]

वीरपाणं तु यत्पानं वृत्ते भाविनि वा रणे ।

वीरपानं पानम् ॥[12]

---

1. M. शायतेऽनेन 2. Flag or banner [4] 3. M. आशास्यतेऽत्र 4. A post of danger in battle [1] 5. M. पूर्वः 6. The desire among warriors to be first in the battle [1] 7. A great self-conceit [1] 8. Emulation [1] 9. B. पराक्रमप्राणौ, and K. पराक्रमः प्राणो 10. Strength or might [10] 11. The excess of strength [2] 12. An exciting or refreshing drink taken by soldiers either before or after a battle [3]

युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ॥१०३॥
मृधमास्कन्दनं संख्यं समीकं सांपरायिकम् ।
अस्त्रियां समरानीकरणाः कलहविग्रहौ ॥१०४॥
सम्प्रहाराभिसंपातकलिसंस्फोटसंयुगाः ।
अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः ॥१०५॥
समुदाय स्त्रिय सयत्समित्याजिसमिद्युधः ।

युधे (दि० आ० अ०) क्त—(३ ३ ११४) ल्युटौ (३ ३.११५) जननम् । जन्यम् । 'भव्यगेय—' (३ ४ ६८) इति साधु । 'डुधाञ्' (जु० उ० अ०) 'शॄपॄवृजि— (उ० २ ८१) इति क्यु ॥१०३॥ 'मृधु हिंसायाम्' (भ्वा० उ० से०) । घञर्थे क । ख्याते क, सख्या । सम्यगयनम् । 'ई गत्यादौ' (अ० प० अ०) । बाहुलकात्क । सपरायनम् । 'अय गतौ' (भ्वा० प० से०) ततो विनयादित्वात् (५ ४ ३४) ठक् । समरणम् । 'ॠ गतौ' (क्र्या० प० से०) । घ (३ ३ ११८) । 'अन प्राणने' (अ० प० से०) । 'अनीकादयश्च' इति साधु । 'वशिरण्योश्च' (वा० ३ २ ५८) इत्यप् । कलस्य हननम् । ड (वा० ३ २.१०१) । विग्रहणम् । 'ग्रहवृ—' (३ ३ ५८) इत्यप् ॥ १०४॥ 'पत्लृ गतौ' (भ्वा० प० से०) । घञ् (३ ३ १८) अभिसपात । 'कल शब्दादौ' (भ्वा० आ० से०) । इन् (उ० ४ ११७) । सस्फोटनम् । घञ् (३ ३ १८) । सयोजनम् । प्रतिजनादिषु (४ ४ ९९) पाठान्न गुण । 'मृद क्षोदे (क्र्या० प० से०) । घञ् (३ ३ १८) । 'सग्राम युद्धे' (चु० उ० से०) । 'आङि युद्धे' (३ २ ७२) इति ह्वेञ (भ्वा० उ० अ०) अप्, सप्रसारण च ॥१०५॥ 'दय दानादौ' [भ्वादि] । घञ् (३ ३ १८) । 'यती प्रयत्ने' (भ्वा० आ० से०) । क्विप् (वा० ३ ३ ९४) । सम्पूर्वादिण क्तिन् (३ ३ ९४) । 'अज गतौ' (भ्वा० प० से०) । घञ् । क्विपि तुक् (६ १ ७१) समित् । एकत्रिंशत् ॥[1]

नियुद्ध बाहुयुद्धेऽथ[2]

नितरा युद्धम् ॥[3]

तुमुल रणसंकुले ॥१०६॥

'तु ' सौत्र । मुल्क् । 'रणे व्याकुलतायां ' द्वे ॥१ ६॥[4]

---

1 War, battle or fight [31] 2 B बाहुयुद्धेस्याद् 3 A close or hand to-hand fight [2] 4 The confusion of a battle [2]

क्ष्वेडा तु सिंहनादः स्यात्

क्ष्वेदनं । 'ञिक्ष्विदा—' (भ्वा० आ० से०) । घञ् (३.३.१८) । पृषोदरादिः (६.३.१०९) । सिंहवन्नदनम् । द्वे ॥[1]

करिणां घटना घटा ।

घटनम् । 'घट संघाते' (चु० प० से०) । 'ण्यास—' (३.३.१०७) इति युच् । भिदादङ् (३.३.१०४) । 'हस्तिसंघस्य' द्वे ॥[2]

क्रन्दनं योधसंरावः

योधानां संरावोऽन्योन्यस्पर्धयाह्वानम्[3] । द्वे ॥[4]

बृंहितं करिगर्जितम् ॥ १०७ ॥

करिणां गर्जिते द्वे ॥ १०७ ॥[5]

विस्फारो धनुषः स्वानः

'स्फुर स्फुरणे' (तु० प० से०) घञ् (३.३.१८) । एकम् ॥[6]

पटहाडम्बरौ समौ ।

पटं हन्ति । डः (वा० ३.२.१०१) । आडम्बं राति । 'डबि क्षेपे' (?) । 'पटहस्य' द्वे ॥[7]

प्रसभं तु बलात्कारो हठः

प्रगतं सभायाः । 'बलात्' इति निपातो हठार्थः । 'हठप्लुतिशठत्वयो.' (भ्वा० प० से०) । त्रीणि ॥[8]

अथ स्खलितं छलम् ॥ १०८ ॥

'स्खल संचलने' (भ्वा० प० से०) । क्तः (३.३.११४) । 'छो छेदने' (दि० प० अ०) । वृषादित्वात् (उ० १. १०६) कलच् । 'युद्धमर्यादायाः स्खलनस्य' द्वे ॥ १०८ ॥[9]

अजन्यं क्लीबमुत्पात उपसर्गः समंत्रयम् ।

न जन्यते । 'शकिसहि—' (वा० ३.१.९७) इति यत् । पततिसृज्योपर्ग् । 'भूतानामशुभसूचकमहाभूतविकारस्य' त्रीणि ॥[10]

1. War cry [2] 2. A troop [of elephants assembled for martial purposes [2] 3. M. संरावोऽन्योन्यस्पर्धयाह्वानम् 4. Mutual defiance of warriors [2] 5. The roaring of an elephant [2] 6. The twang of a bow [1] 7. Drum [2] 8. Employing force [3] 9. Deviation from the rules of a war [2] 10. Portent [3].

मूर्च्छा तु कश्मलं मोहोऽपि

मुर्छा (भ्वा० प० से०)। 'गुरोश्च हल' (३ ३ १०२)। 'कशि गतौ' (अ० आ० से०)। 'कुटिकशिकौतिभ्य प्रत्ययस्य मुट्' (उ० १ १०९) इति कल । 'मुह वैचित्त्ये' (दि० प० से०)। त्रीणि ॥[1]

अवमर्दस्तु पीडनम् ॥ १०९ ॥

'मृद क्षोदे' (क्र्या० प० से०)। 'पीड अवगाहने' (चु० प० से०)। 'देशादेरुपद्रवदानस्य' द्वे ॥ १०९ ॥[2]

अभ्यवस्कन्दनं त्वभ्यासादनम्

स्कन्दिर् (भ्वा० प० अ०)। ल्युट् (३ ३ ११५)। 'पद्लृ—' (भ्वा०, तु० प० अ०)। 'प्रहारादिना निःशक्तीकरणस्य' द्वे ॥[3]

विजयो जय ।

'जि अभिभवे' (भ्वा० प० अ०)। 'एरच्' (३ ३ ५६)। द्वे ॥[4]

वैरशुद्धि प्रतीकारो वैरनिर्यातनं च सा ॥ ११० ॥

वैरस्य शुद्धि । कृञो घञ् (३ ३ १८)। वैरस्य निर्यातनम् । 'यत निकारादौ [चुरादि]। वैरशोधनस्य' त्रीणि ॥ ११० ॥[5]

प्रद्रावोद्द्रावसंद्रावा निद्रावो[6] विद्रवो द्रवः ।

अपक्रमोऽपयानं च

प्रद्रवणम् । 'द्रु गतौ' (भ्वा० प० अ०)। घञ् (३ ३ २७)। संद्रवनम् । 'द्रुगतौ' (भ्वा० प० अ०)। 'ऋदोरप्' (३ ३ ५७), विद्रव । क्रमेर्घञ् (३ ३ १८)। यातेर्ल्युट् (३ ३ ११५)। 'पलायनस्य अष्टौ ॥'[7]

रणे भङ्ग पराजय ॥ १११ ॥

भञ्जनम् । 'भञ्जो आमर्दने' (रु० प० से०)। द्वे ॥ १११ ॥[8]

पराजितपराभूतौ

पराजीयते स्म । 'प्राप्ताभिभवस्य' द्वे ॥[9]

1 Swooning or fainting [2] 2 Oppression, giving pain [2] 3 Attacking so as to disable an enemy [2] 4 Victory [2] 5 Revenge [2] 6 B and K read as follows प्रद्रावोद्द्रावसद्राव सदावा 7 Running away [8] 8 Defeat (in war) [2] 9 One defeated in war [2]

त्रिषु नष्टतिरोहितौ ।

'त्रिषु' इत्युभयत्रापि । तिरो धीयते स्म । 'दधातेर्हिः' (७ ४ ४२) । द्वे ॥[1]

प्रमापणं निबर्हणं निकारणं विशारणम् ॥ ११२ ॥
प्रवासनं परासनं निषूदनं निहिंसनम् ।
निर्यापनं सञ्ज्ञपनं निर्ग्रन्थनमपासनम् ॥ ११३ ॥
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ।
निर्वापणं विशसनं मारणं प्रतिघातनम् ॥ ११४ ॥
उद्वासनप्रमथनक्रथनोज्जासनानि च ।
आलम्भपिञ्जविशरघातोन्माथवधा अपि ॥ ११५ ॥

'मीञ् हिंसायाम्' (क्र्या० प० अ०) । स्वार्थे णिच् । 'बर्ह हिंसायाम्' (चु० प० से०) । 'कॄ हिंसायाम्' [चुरादि] । 'शॄ हिंसायाम्' (क्र्या० प० से०) ॥ ११२ ॥ 'वस च्छेदे' (चुरादि) । 'असु क्षेपणे' (दि० प० से०) । 'षूद क्षरणे' (चु० प० से०) । 'ग्रथि कौटिल्ये' (भ्वा० आ० से०) ॥ ११३ ॥ 'स्तृहू हिंसायाम्' (?) । 'क्षणु हिंसायाम्' (त० उ० से०) 'वृजी—' (भ्वा० उ० से०) । 'शसु हिंसायाम्' (भ्वा० प० से०) ॥ ११४ ॥ 'मथे हिंसायाम्' (भ्वा० प० से०) । से०) । 'क्रथ हिंसायाम्' (भ्वा० प० से०) । 'जसु हिंसायाम्' (दि० प० से०) । लभेर्घञ् (३ ३ १८) । 'उपसर्गात्खल्घञोः' (७ १ ६७) इति नुम् । 'पिजि हिंसायाम्' (चुरादि) । अच् (३ ३ ५६) । 'हनो वध च' (३ ३ ७६) इत्यप् । त्रिशत् ॥ ११५ ॥[5]

स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ।
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ॥ ११६ ॥

पञ्चानां भावः । 'लीङ् श्लेषणे' (दि० आ० अ०) । 'एरच्' (३ ३ ५६) । 'अति बन्धने' (भ्वा० प० से०) । घञ् (३ ३ १८) । 'भुजिमृङ्भ्यां युक्त्युकौ' (उ० ३ २१) । 'हृभृ—' (उ० २ ८१) इति धात्र वर्तु ॥११६॥[3]

परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ।
मृतप्रमीतौ त्रिष्वेते

परा-गता असवोऽस्यासु[6] । परं लोकमित । प्रकर्षेण इत । [illegible] ॥[7]

1 A person disappeared from a battle [2] 2 M [illegible] 3 M [illegible] 4 Killing [30] 5 Death 10, 6 M [illegible] 7 A dead man [7]

चिता चित्या चितिः स्त्रियाम् ॥ ११७ ॥

'चिञ् चयने' [स्वादि]। क्त (३ २ १०२) 'चित्याग्निचित्ये च' (३ १ १३२) इति क्यप् ॥ ११७ ॥[1]

कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम् ।

क बध्यतेऽस्मात्[2] । एकम् ॥[3]

श्मशानं स्यात्पितृवन(न)म्

शवा शेरतेऽत्र[4] । पृषोदरादि (६ ३ १०९)। पितॄणा वनम् । द्वे ॥[5]

कुणपः शवमस्त्रियाम् ॥ ११८ ॥

'क्वणः सप्रसारण च' (उ० ३ १४३) इति कपन् । शवति । 'शव गतौ' (भ्वा० प० से०) द्वे ॥ ११८ ॥[6]

प्रग्रहोपग्रहौ वन्द्याम्

प्रगृह्यते । 'ग्रहवृ—' (३ ३ ५८) इत्यप् । वन्द्यते वन्दी । इन् (उ० ४ ११७) । ङीप् (ग० ४ १ ४५) । त्रीणि ॥[7]

कारा स्याद्बन्धनालये ।

कीर्यतेऽत्र[8] । भिदादिपाठात् (३ ३ १०४) अङ्दीर्घो । द्वे ॥[9]

पुंसि भूम्न्यसवः प्राणाश्चैवम्

अस्यन्ते, असवः '—स्वृस्निहि—' (उ० १ १०) इत्युः । प्राणन्त्यनेन । 'अन प्राणने' (अ० प० से०) । घञ् (३ ३ १११) । द्वे ॥[10]

जीवोऽसुधारणम् ॥ ११९ ॥

जीवनं जीवः । असूनां धारणम् । 'जीवनस्य' द्वे ॥ ११९ ॥[11]

आयुर्जीवितकालः

एति । 'एतेर्णिच्च' (उ० २ ११८) इत्युसि । जीवितस्य कालः । द्वे ॥[12]

ना जीवातुर्जीवनौषधम् ।

इति क्षत्रियवर्गः ॥ ८ ॥

जीवत्यनेन । 'जीवे रातुः' (उ० १ ७६) । 'मृतसजीवनौषधस्य' द्वे ॥[13]

इति क्षत्रियवर्गः ॥ ८ ॥

---

1 Pyre [3] 2 M बध्यतेऽस्मात् 3 A headless trunk (especially breathing one) [1] 4 M शेरतेऽत्र 5 Cemetary, burial or burning ground [2] 6 A dead body [2] 7 Prisoner [3] 8 M कीर्यतेऽत्र 9 Prison [2] 10 Breath [2] 11 Life [2] 12 Age or duration of life [2] 13 Medicine for restoring life [2]

उरव्या उरुजा अर्या वैश्या भूमिस्पृशो विशः ।

ब्रह्मण उरोर्जाता । 'शरीरावयवात्—' (४ ३ ५५) यत् । 'ऋ गतौ' (भ्वा० प० अ०) । 'अर्यः स्वामिवैश्ययोः' (३ १ १०३) । 'विश प्रवेशने' (तु० प० अ०) । भूमिं स्पृशन्ति । षट् ॥[1]

आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ॥ १ ॥

आजीव्यतऽनेन ।[2] वर्ततेऽनया ।[3] वार्ता । 'वृत्तेश्च' (वा० ५ २ १०१) इति ण । 'जीवनवृत्ते' ॥ १ ॥[4]

स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः ।

कर्षणम् । 'इक्कृष्यादिभ्यः' (वा० ३ ३ १०८) पशून् पालयन्ति । तेषां भावः । वणिजां कर्म । एते प्रत्येकं जीवनोपायाः ॥[5]

सेवा श्ववृत्तिः

'षेवृ—' (भ्वा० आ० से०) । 'गुरोश्च—' (३ ३ १०३) इत्यः । शुन इव वृत्तिः । 'सेवायां ' द्वे ॥[6]

अनृतं कृषिः

हिंसादोषप्रधानत्वादनृतं कृषिः । द्वे ॥[7]

उञ्छशिलं त्वृतम् ॥ २ ॥

'उञ्छि उञ्छे' (तु० प० से०) घञ् (३ ३ १८) । 'शिल उञ्छे' (तु० प० से०) । क (वा० ३.३ ५८) । त्रीणि ॥ २ ॥[8]

द्वे याचितायाचितयोर्यथासंख्यं मृतामृते ।

याचितं मृतममयाचितममृतम् । द्वे ॥[9]

सत्यानृतं वणिग्भावः स्यात्

सत्यसहितमनृतम् । द्वे ॥[10]

---

1 Vaisya [6] 2 M आजीव्यतेऽनेन 3 M वर्ततेऽनया 4 Profession or livelihood [6] 5 Three means of maintenance (i) agriculture (ii) rearing of animals and (iii) trade 6 Service [2] 7 Agriculture [2] 8 Livelihood by picking or gleaning grains in a field [2] 9 Solicited and unsolicited alms [2 each] 10 Trade [2]

ऋणं पर्युदञ्चनम् ॥ ३ ॥

उद्धारः

'ऋ गतौ' (भ्वा० प० अ०)। क्त (३ २ १०२) 'ऋणमाधमर्ण्ये' (८ २ ६०) इति ण । परित उदञ्च्यते। अञ्चे (भ्वा० प० से०) ल्युट् (३ ३ ११३) ॥ ३ ॥ धृञ् (भ्वा० उ० अ०) घञ् (३ ३ १९)। त्रीणि ॥[1]

अर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ।

अर्थस्य प्रयोग । 'कुस संश्लेषण' (दि० प० से०)। 'कुसेरुम्भो मेदेता' (उ० ४ १०६) इतीद । वृद्धयाजीवनस्य त्रीणि ॥[2]

याच्ञयाप्तं याचितकम्

'अपमित्ययाचिताभ्या कक्कनौ' (४ ४ २१) ॥[3]

निमयादापमित्यकम् ॥४॥

'मेङ् प्राणिदाने' (भ्वा० आ० अ०)। 'उदीचा माङो व्यतिहारे' (३ ४ १९) इति क्त्वा । 'मयतेरिदन्यतरस्याम्' (६ ४ ७०)। तुक् (६ १ ७१)। 'अपमित्य—' प्राप्तम् । परिवर्तनेन प्राप्तमित्यर्थं ॥४॥[4]

उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ।

उत्तममृणमस्य । एवंक्रम् ॥[5]

कुसीदिको वार्धुषिका वृद्ध्याजीवश्च वार्धुषि ॥५॥

कुसीदार्थं[6] प्रयच्छति । 'कुसीददशैक—' (४ ४ ३१) इति ष्ठन् । वृद्धि वृद्धयर्थं प्रयच्छति । 'प्रयच्छति गर्ह्यम्' (४ ४ ३०) इति ठक् । 'वृद्धेर्वृधुषि भाव —' (वा० ४ ४ ३०)। वृद्धि जीविकाऽस्य[7]। वार्धुषि पृषोदरादि (६ ३ १०९)। चत्वारि ॥५॥[8]

क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवल ।

क्षेत्रमाजीवोऽस्य[9] । कर्षति । ण्वुल् (३ १ १३३)। कृषिरस्यास्ति । 'वले' (६ ३ ११८) इति दीर्घ । चत्वारि ॥[10]

---

1 Debt [3] 2 Usury [3] 3 A thing got by begging [2] 4 A thing obtained by barter [1] 5 Creditor and debtor [1 each] 6 M कुसीदार्थं 7 M जीविकास्य 8 Usurer [4] 9 M क्षेत्रमाजीवोस्य 10 Farmer [4]

क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्योद्भवोचितम् ॥६॥

व्रीहीणां शालीनां च भवनं क्षेत्रम्। 'व्रीहिशाल्योर्ढक्' (५.२.२) ॥६॥[1]

यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि यत्।

यवानां यवकानां षष्टिका [नाम्। '—कष्टिका] यत्' (५.२.३) ॥[2]

तिल्यतैलीनवन्माषोमाणुमङ्गाद् द्विरूपता ॥७॥

तिलानां माषाणामुमानां भङ्गानां भवनं क्षेत्रम्। 'विभाषा तिल—' (५.२.४) इति यत्खञौ। माष्यं माषीणमित्यादि ॥७॥[3]

मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमम्।

मुद्गानां कोद्रवाणां च क्षेत्रम्[4]। खञ् (५.२.१) ॥[5]

बीजाकृतं तूप्तकृष्टे[6]

बीजेन सहकृतम्। 'कृञो द्वितीय—' (५.४.५८) इति डाच्। उप्तं च तत्कृष्टं च ॥[7]

सीत्यं कृष्टं च हल्यवत् ॥८॥

सीतया संमितम्। 'नौ वयोधर्म—' (४.४.९१) इति यत्। हलेन कृष्टम्। 'मतजनहलात्—' (४.४.९७) इति यत्। हल्येन तुल्यम्। 'तेन तुल्यम्' (५.१.११५) इति वतिः। त्रीणि ॥८॥[8]

त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन्।

त्रिगुणं कृतम्। 'संख्यायाश्च—' (५.४.५९) इति डाच्। तृतीयं कृतं [तृतीया-] कृतम्। 'कृञो द्वितीय—' (५.४.५८) इति डाच्। त्रिवारं सीतया संमितम्। चत्वारि ॥[9]

द्विगुणाकृते तु सर्वं[10] पूर्वं शम्बाकृतमपीह ॥९॥

द्वितीयाकृतम्। द्विहल्यम्। द्विसीत्यम्। 'संख्यायाः—' (५.२.१३८) इति वः।

1. Two sorts of rice-fields [1 each] 2. Three kinds of barley growing fields [1 each] 3. Fields fit for growing sesamum, kidney-beans, flax &c. [1 each] 4. M. क्षेत्र 5. Fields fit for growing other species of grain [1 each] 6 Majority reads तूप्तकृष्टम् 7. A field ploughed over after sowing [2] 8. A ploughed field [3] 9. A field ploughed thrice [4] 10 Majority reads सर्वं।

'शम्ब' शब्दो द्वितीयकर्षणे वर्तते । 'कृञो द्वितीय—' (५ ४ ५८) इति डाच् । पञ्च ॥९॥[1]

द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः ।

द्रोणस्य वापः । 'तस्य वापः' (५ १ ४५) इति ठञ् । 'द्रोणादिपरिमितव्रीह्यादिवपनयोग्यं क्षेत्रम्' ॥[2]

खारीवापस्तु खारीक उत्तमर्णादयस्त्रिषु ॥१०॥

'खार्या ईकन्' (५ १ ३३) ॥१०॥[3]

पुनपुंसकयोर्वप्रः केदारः क्षेत्रम्

उप्यतेऽत्र[4] । 'वृधिवपिभ्यां रन्' (उ० २ २७) । के जले दारोऽस्य[5] । क्षीयते क्षेत्रम् । 'क्षि निवासगत्योः' (तु० प० अ०) । ष्ट्रन् (उ० ४ १५८) । त्रीणि ॥[6]

अस्य तु ।

कैदारकं स्यात्कैदार्यं क्षेत्रं कैदारिकं गणे ॥११॥

केदाराणां समूहः । 'केदाराद्यञ्च' (४ २ ४०), चाद्वुञ् । क्षेत्राणां समूहः । तस्य समूहः (४ २ ३७) इत्यण् । चत्वारि ॥११॥[7]

लोष्टानि लेष्टवः पुंसि

लोष्टति । 'लोष्ट संघाते' (भ्वा० आ० से०) अच् (३ १ १३४) । लिशति । 'लिश गतौ' (तु० प० से०) । बाहुलकात्तुन् । द्वे 'ढेला' लोके ॥[8]

कोटिशो लोष्टभेदनः ।

कोटिना अग्रेण श्यति । लोष्टानां भेदनः । 'हेंगा' लोके ॥[9]

प्राजनं तोदनं तोत्रम्

प्रकर्षेणाजत्यनेन । तुदत्यनेन । 'दाम्नी—' (३ २ १८२) इति ष्ट्रन् । तोत्रं वृषभादिप्रेरणदण्डः । 'पयना' लोके ॥10

---

1 A field ploughed twice [5] 2 Fields in which one drona and one adhaka of grains can be sown [1 each] 3 A field in which one khari of grains can be sowed [1] 4 M उप्यतेत्र 5 M दारास्य 6 Field [4] 7 A multitude of fields [4] 8 A lump of earth [2] 9 Harrow or instrument (for breaking clods) [2] 10 Whip [3]

खनित्रमवदारणम् ॥ १२ ॥

खन्यतेऽनेन[1]। 'अर्तिलूधू—' (३.२.१८४) इतीत्रः[2]। द्वे ॥ १२ ॥[3]

दात्रं लवित्रम्

दात्यनेन। 'दाप् लवने' (अ० प० अ०)। 'दाम्नी—' (३.२.१८२) इति ष्ट्रन्। लूयतेऽनेन[4]। 'अर्ति—' (३.२ १८४) इति, इत्रः। द्वे। 'हसिआ' लोके ॥[5]

आवन्धो योत्रं योक्त्रम्

आवध्यतेऽनेन[6]। 'यु मिश्रणे' (अ० प० से०)। 'युजिर् योगे' (रु० उ० अ०)। 'दाम्नी—' (३.२.१८२) इति ष्ट्रन्। वृषादेर्गले युगबन्धनम्। 'यु (जु) आ' लोके ॥[7]

अयो फलम्।

निरीषं कुटकं फालः कृषिकः

फलति। 'त्रिफला—' (भ्वा० प० से०)। ईषाया निर्गतम्। तालव्यः [निरीशं] अपि। कुटयति। 'कुट छेदने' (चु० उ० से०)। ह्रस्वमन्ये। फालयति। त्रिफला (भ्वा० प० से०) ण्यन्तः। 'कृषिवृश्च्योः किकन्' (उ० २.४०)। षट्। 'फालस्य' एके। आद्यद्वयं 'फालबन्धकाष्ठस्य' इत्यन्ये ॥[8]

लाङ्गलं हलम् ॥ १३ ॥

गोदारणं च सीरः

लङ्गति। 'लगि गतौ' (भ्वा० प० से०) बाहुलकात्कलच् दीर्घश्च। हलति। 'हल विलेखने' (भ्वा० प० से०) ॥ १३ ॥ गा भूमिं दारयति। सिनोति। 'षिञ् बन्धने' (स्वा० उ० अ०)। 'शुसिमिचीना दीर्घश्च' (उ० २.२५) इति क्रन्। चत्वारि ॥[9]

अथ शम्या स्त्री युगकीलकः।

शाम्यतेऽनया[10]। 'शम उपशमे' (दि० प० से०)। अघ्न्यादिः (उ० ४. १११)। युगस्य कीलः। द्वे ॥[11]

---

1. M. खन्यतेनेन 2. M. इति इत्रः 3. Spade [2] 4. M. लूयतेनेन 5. Sickle [2] 6. M. आवध्यतेनेन 7. The tie of the the yoke of a plough [2] 8. Ploughshare [5] 9. Plough [4] 10. M. शाम्यतेनया 11. The pin of a yoke [2].

ईषा[1] लाङ्गलदण्ड स्यात्

ईषते। 'ईष गत्यादौ' (भ्वा० आ० से०)। 'इगुपध—' (३.१ १३५) इति क। लाङ्गलस्य दण्ड। 'हरिसि' लोके ॥[2]

सीता लाङ्गलपद्धतिः ॥ १४ ॥

'षिञ् बन्धने' (स्वा० उ० अ०)। क्त (३ २ १०२) पृषोदरादि. (६ ३ १०९)। लाङ्गलस्य पद्धति। द्वे ॥ १४ ॥[3]

पुंसि मेधि खले दारु न्यस्त यत्पशुबन्धने।

मेध्यन्ते पशवोऽत्र[4]। 'मेधृ सगमे' (भ्वा० उ० से०) इन् (उ० ४ ११७)। एकम् ॥[5]

आशुर्व्रीहि पाटल स्यात्

अश्नुते। अशू व्याप्तौ' (स्वा० आ० से०)। 'कृवापा–' (उ० १ १) इत्युण्। वर्हत्युपचय गच्छति। इन्। पृषोदरादि (६ ३ १०९)। पाट लाति। त्रीणि 'षष्टिकादे' ॥[6]

सितशूकयवौ समौ ॥ १५ ॥

सित शूक यस्य[7]। यौति। अच् (३ १ १३४)। द्वे ॥१५॥[8]

तोक्मस्तु तत्र हरिते

तकति। '(त) क हसने' (भ्वा० प० से०)। बाहुलकान्मक् ओत्व च। 'अपक्वयवस्य' एकम् ॥[9]

कलायस्तु सतीनकः।

हरेणुखण्डिकौ चास्मिन्

कलमयत। 'अय गतौ' (भ्वा० आ० से०)। सति जीवे इन प्रभु। सत क। हरति। 'हृपृम्यामेणु' (उ० २ १)। खण्डोऽस्यास्ति[10]। ठन् (५ २ ११५)। चत्वारि। मटर' इति 'केराव' इति च ख्याते ॥[11]

---

1 H इषा 2 The pole of a plough [2] 3 Furrow [2] 4 M पशवोत्र 5 The pillar in the midst of a threshing floor to which oxen are bound [2] 6 Rice (ripening within sixty days &c [3] 7 M यस्य H Barley [2] 9 Green barley [1] 10 M खण्ड स्यास्ति 11 Pea [4]

कोरदूषस्तु कोद्रव ॥ १६ ॥

कार दूषयति । के जले उद्रौति । द्वे 'कोदव' लोके ॥ १६ ॥[1]

मङ्गल्यको मसूर

मङ्गले साधु । यत कन् (ज्ञापि० ५ ४ ५) । मस्यते । 'मसी परिणामे' (दि प० से०) । 'मसेरूरन्' (उ० ५ ३) द्वे ॥[2]

अथ मकुष्ठकमयुष्ठकौ ।

मङ्कति । 'मकि मण्डने' (भ्वा० आ० स०) । बाहुलकादु । तत्र तिष्ठति । क्वुन् (उ० २ ३२) । मिनोति मयु । 'डुमिञ्–' (स्वा० उ० अ०) । 'भृमृशी–' (उ० १ ७) इत्यु । मयुश्चासौ स्थकश्च । वनस्थ मुद्ग । 'मोथी' लोके ॥[3]

सर्षपे तु द्वौ तन्तुभकदम्बकौ ॥ १७ ॥

'सर्तेरप पुक् च[4]' (उ० ३ १४१) इत्यप् । [तन्तु] नामाति । कुत्सित-मम्बयति । त्रीणि ॥ १७ ॥[5]

सिद्धार्थस्त्वेष धवल

सिद्ध अर्थोऽस्मात्[6] । एष सर्षप । धवल श्वेत । एकम् ।[7]

गोधूम सुमनस्समौ ।

गुध्यति । 'गुध परिवेष्टने (दि० प० स०) । 'गुधरूम' (उ० ५ २) । सुष्ठु मनोऽस्मात्[9] । द्वे ॥[8]

स्याद्यावकस्तु कुल्माष

[यौति[10]] यावक । वुन्तात्प्रज्ञाद्यण् (५ ४ ३८) । कुत्सितो माष । पृषोदरादि (६ ३ १०९) । 'अर्धस्विन्ना यवादि कुल्माष —इति स्वामी । 'शूकशूया यवादि '—इति रक्षितः । 'बोडा लोके ॥[11]

चणको हरिमन्थक ॥ १८ ॥

चप्यन । 'चण दाने' (भ्वा० प० से०) । क्वुन् (उ० २ ३२) । हरिभिर्मथ्यत । [illegible] ॥ १८ ॥[12]

---

1 Kodrava (Kodava), a kind of grain [2] 2 Masūra, a kind of pulse [2] 3 A kind of kidney bean [3] 4 M सर्तेँ प [illegible] युक् च 5 Mustard [3] 6 M अर्थोस्मात् 7 White mustard [1] 8 M मनोस्मात् 9 Wheat [2] 10 M दवगव (?) 11 A kind of barley [2] 12 Gram [2]

द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले ।

'तिलान्निष्फलात्पिञ्जपजौ' (वा० ४ २ ३६) । 'वन्यतिलस्य' द्वे ।[1]

क्षव क्षुताभिजननो[2] राजिका कृष्णिकासुरी ॥ १९ ॥

क्षौति । अच् (३ १ १३४) । क्षुतमभिजनयति । राजयति । क्वुन् (उ० २ ३२) । कृष्णैव । असुरस्येयम् । 'रायी (ई)' लोके ॥ १९ ॥[3]

स्त्रियौ कङ्गुप्रियङ्गू द्वे

क मुखं गच्छति । मितद्र्वादि (वा० ३ २ १८०) । प्रियं गच्छति । द्वे । 'काकुनि' [लोके] ॥[4]

अतसी स्यादुमा क्षुमा ।

न तस्यति । 'तसु उपक्षये' (दि० प० से०) । उमाति । क्षौति । बाहुलकान्मक् । त्रीणि । 'अलसी [लोके] ॥[5]

मातुलानी तु भङ्गायाम्

मातुलस्य धत्तूरस्य स्त्रीव । भज्यतेऽनया । 'अकर्तरि—' (३ ३.१९) इति घञ् । द्वे ॥[6]

व्रीहिभेदस्त्वणुः पुमान् ॥ २० ॥

अण्यते अणु । 'धान्ये नित्' (उ० १ ९) इत्युः । 'चीना' लोके ॥ २० ॥[7]

किंशारु शस्यशूक स्यात्

किंचित् शृणाति । 'किजरयो श्रिण ' (उ० १ ४) इत्युण् । 'यवाद्यग्रस्य' द्वे ॥[8]

कणिशं शस्यमञ्जरी ।

कणिन स्वावयव श्यति । द्वे । 'बालि' लोके ॥[10]

धान्य व्रीहि स्तम्बकरि

धाने पोषणे साधु । स्तम्ब करोति । 'स्तम्बशकृतोरिन्' (३ २ २४) । 'धान्यस्य' त्रीणि ॥[11]

1 Barren sesamum indicum [2] 2 B क्षुधाभिजननो 3 Black mustard [5] 4 A kind of inferior grain [2] 5 Flax [3] 6 Hemp [2] 7 A kind of grain [1] 8 M शिखं 9 The beard of corn [2] 10 The ear of corn [2] 11 Corn [3]

स्तम्बो गुच्छस्तृणादिनः ॥ २१ ॥

तिष्ठति । 'स्थ स्तोऽम्ब–' (उ० ४ ९६) । आदिना व्रीहियवादे । 'गुङ् शब्दे' (भ्वा० आ० अ०) । क्विप् (वा० ३ ३ ९४) तुक् (६ १ ७१) । गुत छ्यति । 'छो छेदने' (दि० प० अ०) ॥ २१ ॥[1]

नाडी नालं च काण्डोऽस्य

नालयति । नल गन्धे (भ्वा० प० स०) । गौरादि (४ १ ४१) । काण्यते । 'अमन्ताड्ढ' (उ० १ ११४) । अस्य गुच्छस्य । त्रीणि ॥[2]

पलालोऽस्त्री स निष्फलः ।

पलमलति । स काण्ड 'पयरा' [लोके] ॥[3]

कडङ्गरो बुसं क्लीबे

कडति । 'कड मदे' (भ्वा० प० से०) । करड करोति । 'मुर' इति पाठान्तरम् । बुसति । 'बुस उत्सर्गे' (तु० प० स०) ॥[4]

धान्यत्वचि तुषः पुमान्[5] ॥ २२ ॥

तुष्यति । तुष वैकृत्ये' (?) ॥ २२ ॥[6]

शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे

श्यति । 'उल्कादयश्च' (उ० ४ ४१) इति साधु । श्लक्ष्ण कृश तीक्ष्ण च तदग्र च । 'सूड' [लोके] ।[7]

शमी शिम्बा

शाम्यति । अच् (३ ३ १३४) । गौरादि (४ १ ४१) । शिनोति । 'शिञ् निशाने' (स्वा० उ० अ०) । द्वे ॥ 'छीमी' [लोके] ॥[8]

त्रिपूत्तरे ।

उत्तरे, बहुलीकृता (अ० १ ९ २३) न्ता ॥

ऋद्धमावसितं धान्यम्

'ऋधु वृद्धौ' (दि० प० स०) क्त (३ २ १०२) । आ अवपूर्वात्स्यत क्त (३ २ १०२) । 'मर्दनानन्तरमपनीततृणस्य'—इत्यर्थे । 'बहुलीकरणयोग्यस्य धान्यराशेः'—इत्यर्थे ॥[9]

---

1 A clump of grass & c [1] 2 The stalk of a plant [3] 3 Straw [1] 4 Chaff [2] 5 Majority reads पुमांस्तुषः 6 The chaff of grain [2] 7 Awn [1] 8 Pod [2] 9 Ripe corn (when thrashed) [2]

पूतं तु बहुलीकृतम् ॥२३॥

'पूञ् पवने' (क्र्या० उ० से०)। क्त (३ २ १०२)। बहु मान लाति। अबहुलप्रकरणे 'राशीकृतस्य' ॥२३॥[1]

मापादय शमीधान्ये शूकधान्ये यवादय।
शालय कलमाद्या षष्टिकाद्याश्च

शाल्यते। शलने ण्यन्तात् 'अच इ' (उ० ४ १३८)। षष्टिरात्रेण पच्यते ॥[2]

पु स्यमी ॥२४॥

अमी मापाद्या ॥२४॥

तृणधान्यानि नीवारा

तृणानीव धान्यानि। निव्रियन्ते। 'नौ वृ धान्ये' (३ ३ ४८) इति घञ्। 'पसारी' तिन्नी' [इति च] लोके ॥[3]

स्त्री गवेधुर्गवेधुका।

गवा जलेन एधते। मृगय्वादि (उ० १ ३७)। 'डवर' लोके ॥[4]

अयोऽग्रो मुसलोऽस्त्री स्यात्

अयोऽग्रेऽस्य[5]। 'मुस खण्डने' (दि० प० से०) मुस लाति। 'मुसलस्य' द्वे॥[6]

उदूखलमुलूखलम् ॥२५॥

ऊर्ध्वं च तत् ख च लाति। पृषोदरादि (६ ३ १०९)। द्वे ॥२५॥[7]

प्रस्फोटनं शूर्पमस्त्री

प्रस्फोट्यतनेन[8]। 'स्फुट विकसने' (भ्वा० आ० से०)। शूर्प्यतेऽनेन[9]। 'शूर्प माने' (चु० प० से०)। द्वे ॥[10]

---

1 Ripe corn stored after thrashing [2] 2 Leguminous and awned grains, and varieties of rice [1 each] 3 Rice growing wild or without cultivation [2] 4 A kind of grass eaten by cattles [2] 5 अयोग्रेस्य 6 Pestle (used for cleaning rice) [2] 7 Ulukhala, a woden matter used for cleaning rice [2] 8 M प्रस्फोटयतनेन 9 M शूर्प्यतेनेन 10 Winnowing basket [2]

चालनी तितउ पुमान् ।

चाल्यतेऽनया[1] । तनोति । 'तनोतेर्डे उ सन्वच्च' (उ० ५ ५२) । द्वे ॥[2]

स्यूतप्रसेवौ

'षिवु तन्तुसन्ताने' (दि० प० से०) क्त (३ ३ १०२) । 'च्छ्वो —' (६ ४.१९) इत्यूठ् । घञि प्रसेव । 'वस्त्रचर्मादिनिर्मितस्य' द्वे । 'थैली' इति लोके ॥[3]

कण्डोलपिटौ

कण्डयते । 'कडि भेदे' (भ्वा० प० से०) । '—कटिकण्डिभ्य ओलच्' (उ० १ ६६) । 'पिट शब्दसंघातयोः' (भ्वा० प० से०) । 'इगुपध—' (३ १ १३५) इति क । 'पिण्ड'—इति स्वामी । 'वंशादिनिर्मितभाण्डस्य' द्वे । 'डबरा' लोके ॥[4]

कटकिलिञ्जकौ ॥२६॥

कटति । 'कट वर्षादौ' (भ्वा० प० से०) । अच् (३ १ १३४) । क्लिश्यते । 'क्लिश विबाधने' (...) । इन् । क्लिञ्जाच । डान्तात्क पृषोदरादि (६ ३ १०९) द्वे ॥ 'किल्हिरा' लोके ॥[5]

समानौ

रसवत्यां तु पाकस्थानमहानसे ।

रसा सन्त्यस्य सदनस्य । 'अनोऽश्माय —' (५ ४ ९४) इति टच् । त्रीणि ॥[6]

पौरोगवस्तदध्यक्षः

पुरः पूजिता गौर्भूमिः पुरोगवी तस्या अयम् । 'महानसाधिकृतस्य' द्वे ॥[7]

सूपकारस्तु वल्लवः[8] ॥२७॥

आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।

शोभना आपोऽस्मिन्[9] । 'कुसुम्भस्य' इत्यपोऽन्[10] । 'वल्ल संवरणे' (भ्वा० आ० से०) । वल्ल यानि ॥२७॥ अराल कुटिल चरति । अथो मत्त निम्नमराम् ।

---

1 M चाल्यतेनया 2 Sieve [2] 3 Bag [2] 4 Basket [2] 5 A small basket made of green wood [2] 6 Kitchen [3] 7 The superintendent of a kitchen [1] 8 B and K read this half as सूपकारास्तु बल्लवा 9 M आपोऽस्मिन् 10 M इत्यपोऽन् ।

सूदति छागादीन्। ओदन शिल्पमेषाम्। गुण्यन्ते। 'गुण निमन्त्रणे' (चु० उ० से०)। सप्त। 'आद्यद्वय व्यञ्जनकारस्य—' इति स्वामी ॥[1]

आपूपिक कान्दविको भक्ष्यकार

अपूपा पण्यमस्य। '—पण्यम्' (४ ४ ५१) इति ठक्। कन्दो सस्कृतम्। कान्दव पण्यमस्य। त्रीणि ॥[2]

इमे त्रिपु ॥२८॥

इमे पौरोगवादय ॥२८॥

अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका।

अश्मतोऽप्यन्तोऽत्र[3]। शकन्ध्वादि (वा० ६ १ ९४)। उद् धीयतेऽत्र[4]। धाञ (जु० उ० अ०) ल्युट् (३ ३ ११७)। 'ध्मानम्'—इत्यन्ये। अधिश्री यतेऽत्र[5]। 'श्रीञ् पाके (क्र्या० उ० अ०)। ल्युट् (३ ३ ११७)। चुल्यतेऽत्र[6]। 'चुल्ल भावकरणे' (भ्वा० प० से०)। इन् (उ० ४ ११७)। 'कृदिकारात्—' (ग० ४ १ ४५) इति वा ङीप्। अन्त्यते। 'अति बन्धने (भ्वा० आ० से०) ण्वुल ॥ ३ ३ १०९ ॥[7]

अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि ॥ २९ ॥
हसन्यपि

अङ्गारा धीयन्तेऽस्याम्[8]। अङ्गाराणा शकटि। हसति। शतृ (३ २ १२४) ॥२९॥ चत्वारि 'बोरसी' 'अगेठी [इति च] लोके ॥[9]

अथ न स्त्री स्यादङ्गार

अङ्गमाराति। एकम् ॥[10]

अलातमुल्मुकम्।

'ला दाने' (अ० प० अ०)। क्त (३ ३ १३४)। न लातमस्य। 'उप दाहे' (भ्वा० प० से०)। 'उल्मुक्दवि—' (उ० ३.८४) इति साधु। 'अर्ध दग्धकाष्ठस्य द्वे। 'लुआठ' लोके ॥[11]

---

1 Cook [7] 2 Baker or Confectioner [3] 3 M अश्मनोप्यन्तोत्र
4 M उद्धीयतेत्र 5 M अधिश्रीयतेत्र 6 M चुल्यतेत्र 7 Fire place [5]
8 M धीयन्तेस्याम् 9 A portable fire place [4] 10 Charcoal [1]
11 Half burnt wood [2]

क्लीबेऽम्बरीषं भ्राष्ट्र

अम्ब्यतेऽत्र[1]। 'अबि शब्दे' (भ्वा० आ० से०)। 'अम्बरीष' (उ० ४. २९) इति साधु। भृज्यतेऽत्र[2]। 'भ्रस्जिगमिनमि—' (उ० ४.१५९) इति ष्ट्रन्वृद्धी। 'भर्जनपात्रस्य' द्वे ॥[3]

ना कन्दुर्वा स्वेदनी स्त्रियाम् ॥ ३० ॥

'स्कन्दे[4] सलोपश्च' (उ० १.१४) इति कु। स्विद्यतेऽस्याम्[5]। 'कराही'— इति लोके ॥ ३० ॥[6]

अलिंजरः स्यान्मणिकः

अलतमलि। अलिं जरयति। मणिरिव। द्वे 'मेट' लोके ॥[7]

कर्कर्यालुर्गलन्तिका।

कर्कं राति कर्करी। गौरादि (४.१.४१)। आ लूनाति। 'गल अदने' (भ्वा० प० से०) शत्रन्तात्कन्। 'कठवत' लोके। 'कन्दोर्घृतपक्वनिष्पादान-साधनस्य' इत्यन्ये ॥[8]

पिठरः स्थाल्युखा कुण्डम्

'पिठ वन्धे' (भ्वा० प० से०)। पिठ राति। स्थलन्त्यत्र। स्थल स्थाने (भ्वा० प० से०)। ज्वलादि ण (३ १ ४०)। ओखति। 'उख गतौ' (भ्वा० प० से०)। क (३ १.१३५)। कुण्डयति। 'ओदनादिपाकपात्रस्य' चत्वारि। 'हडि' लोके ॥[9]

कलसस्तु त्रिषु द्वयोः ॥ ३१ ॥

घट॰ कुटनिपी

के लसति ॥ ३१ ॥ घटते। 'कुट कौटिल्ये' (तु० प० से०)। नियतं पिबन्त्यनेन। 'घञर्थे क' (वा० ३ ३ ५८)। चत्वारि 'घटस्य' ॥[10]

अस्त्री शरावो वर्धमानक॰।

शरादवनि। वर्धते। शानच् (३ २ १२४)। द्वे। 'कोशा' लोके।[11]

---

1 M अम्ब्यतेत्र 2 M भृज्यतेत्र 3 Frying-pan [2] 4 M. स्वन्दे 5 M स्विद्यतेस्याम् 6 Boiler, pan [2] 7. Water-jar [2] 8 Small pitcher [2] 9 Boiler [4] 10. Water-pot [4] 11. Platter or dish [2]

ऋजीष पिष्टपचनम्

'अर्ज अर्जने' (भ्वा० प० से०)। अर्जेर्ऋज च (उ० ४ २८) इतीषन्। पिष्टं पच्यतेऽत्र[1]। 'तावा' लोके ॥[2]

कंसोऽस्त्री पानभाजनम् ॥ ३२ ॥

कम्यते। 'वृतृवदि—' (उ० ३ ६२) इति सः। क्षीरादिपानस्य भाजनम्। द्वे ॥[3]

कुतूः कृत्ते स्नेहपात्रम्

कुत्सित तौति। तु शब्दे' (अ० प० अ०)। कृत्तेश्चर्मणम्। स्नेहस्य तैलघृतादेर्पात्रम् ॥[4]

सैवाल्पा कुतुपः पुमान्।

कुत्वा डुपच्' (५ ३ ८९) ॥[5]

सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम् ॥ ३३ ॥

आ उप्यतेऽत्र[6]। डुवप् (भ्वा० उ० अ०)। 'भडि कल्याणे' [चुरादि] भन्तादण्। पिबन्त्यनेन। पुत्रं (उ० ४ १५८)। अमन्त्यत्रा पयते। भाजयति। भाज पृथक्कर्मणि ' (चु० उ० से०)। सर्वं[8] स्पातादि पिठरादि च ॥ ३३ ॥[9]

दर्विः कम्बिः खजाका च

दृणाति। 'वृहम्या[10] मिन् (उ० ४ ५३)। ङीपि दर्वी च। कम्पते बाहुलकादिन्। 'खज मन्थे' (भ्वा० प० से०)। खजराक' (उ० ३ १३)। त्रीणि 'करछुलि' लोके ॥[11]

स्यात्तर्दूर्दारुहस्तकः।

तर्दति। 'तर्द हिंसायाम्' (भ्वा० प० से०)। बाहुल्याद्वू। दारुणा हस्त इव। द्वे ॥[12]

अस्त्री शाकं हरितकं शिग्रु

शक्नोत्यनेन भोक्तुम्। घञ् (३ ३ १२१)। हरितो वर्णोऽस्त्यस्य[13]। शिनाति।

---

1 M पच्यतेत्र 2 Pan (for parching flour [2] 3 A drinking vessel such as glass, cup &c [2] 4 A lethern bottle for oil [2] 5 A small lethern bottle for oil [1] 6 M उप्यतेत्र 7 M पृथक्कर्मणि 8 M सर्वं 9 Any vessel or utensil [5] 10 M दविम्या 11 Ladle [3] 12 A wooden ladle [2] 13 M वर्णोस्य।

'शिज् निशाने' (स्वा० उ० अ०)। 'जस्वादयश्च' (उ० ४.१०२) इति साधु.। त्रीणि ॥[1]

अस्य तु नाडिका[2] ॥ ३४ ॥

कडम्बश्च कलम्बश्च

के लम्बते। डलयोरैक्यम्। 'शाकनालस्य' द्वे ॥[3]

वेसवार उपस्कर।

वेस प्रेरण वारयति। उपस्करोति। पिप्पली शुण्ठी तण्डुलादय समाशका वेसवार ॥[4]

तिन्तिडीकं च चुक्रं च वृक्षाम्लम्

तिम्यति। 'तिम आर्द्रीभावे' (दि० प० से०)। 'जमी (ती) कादयश्च' (उ० ४ ३५) इति साधु। 'चक तृप्तौ' (भ्वा० आ० से०)। 'चकिरम्योरु-च्चोपधाया' (उ० २ १४) वृक्षस्याम्लम्। त्रीणि 'चुक' लोके। 'विषामिल' इत्यन्ये ॥[5]

अथ वेल्लजम् ॥ ३५ ॥

मरिचं कोलकं कृष्णमूषणं धर्मपत्तनम्।

'वेल्ल चलने' (भ्वा० प० से०)। वेल्ले जायते ॥ ३५ ॥ म्रियते विषमनेन। बाहुलकादि च। दीर्घमध्य (मरीचम्) अपि। 'कुल संस्त्याने' (भ्वा० प० से०)। वुञ्। 'कृषेर्वर्णे' (उ० ३ ४०) नक्। 'उप दाहे' (भ्वा० प० से०)। धर्मपत्तने जातत्वात्तदारोप। षट् ॥[6]

जीरको जरणोऽजाजी कणा

'ज्या वयोहानौ' (क्र्या० प० अ०)। 'ज्यदन' इति रक्। जरयति। अजं मजति। 'कण शब्दे' (भ्वा० प० से०) चत्वारि ॥[7]

---

1 Vegetable [3] 2 B नालिका 3 The stalk of a vegetable [2] 4 A particular condiment for food (as mustard, pepper &c) [2] 5 Vinegar made by acetous, the fruit of the tamarind used as an acid seasoning [3] 6 Pepper [6] 7 White cumin [4]

कृष्णे तु जीरके ॥ ३६ ॥

सुषवी कारवी पृथ्वी पृथु कालोपकुञ्चिका ।

सुष्ठु सूते सुषव । सोऽस्त्यस्या [1] । के आरवोऽस्या ।[2] प्रथते । 'प्रथ प्रख्याने' (चु० प० से०) । प्रथिम्रदिभ्रस्जा सम्प्रसारणम्—' (उ० १ २८) इति कु । 'वोत –' (४ १ ४४) इति ङीष् । कालो वर्णोऽस्या [3] । उपकुञ्चति । ण्वुल् (३ १ १३३) । मगरैल [लोके] ॥[4]

आर्द्रक शृङ्गवेर स्यात्

आर्द्रायां जातम् । पूर्वाह्णापराह्ण—' (४ ३ २८) इति वुन् । शृङ्गमिव वेर देहोऽस्य[5] । द्वे । आदी [लोके] ॥[6]

अथ छत्रा वितुन्नकम् ॥ ३७ ॥

कुस्तुम्बुरु च धान्याकम्

छत्त्रमस्त्यस्या । अर्श आद्यच्' (५ २ १२७) । विगत तुन्न दु खमस्मात्[7] ॥ ३७ ॥ कुत्सित तुम्बति । तुबि अदने (भ्वा० प० से०) । बाहुलकाद् । धान्यमकति । 'धनिआ [लोके] ॥[8]

अथ शुण्ठी महौषधम् ।

स्त्रीनपुसकयोर्विश्व नागर विश्वभेषजम् ॥ ३८ ॥

शुण्ठति कफम् । शुठि शोषणे' (भ्वा० प० से०) । महच्च तदौषध च । विशति । 'अशूप्रुषि—' (उ० १ १५२) इति क्वन् । नगरे भवम् । विश्वस्य भेषजम् । सोठि' [लोके] ॥ ३८ ॥[9]

आरनालकसौवीरकुल्माषाभिषुतानि च ।

अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिके ॥ ३९ ॥

आर्च्छति । आर । स नालोऽस्य[10] । सुवीरेषु भवम् । अभि षुञ् (स्वा० उ० अ०) क्त० (३ २ १०२) । त्रीण्येव नामानि'–इत्यन्ये । अवन्तिषु सुत । धान्यमभिषुतमम्लम् । कुत्सित जल्पम् । पृषोदरादि (६ ३ १०९) । के अञ्जिकाऽस्या [11] । अष्टौ 'काजी' ॥ ३९ ॥[12]

---

1 M साऽस्त्यस्या 2 M आरवास्या 3 M वर्णोऽस्या 4 Black cumin [6] 5 M देहास्य 6 Ginger [2] 7 M दुष्पमस्मात् 8 Corriander seed [4] 9 Dry ginger [5] 10 M नालास्य 11 M अञ्जिवास्या 12 Sour gruel [8]

सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठम् ।

सहस्रं वेधितुं शीलमस्य । 'विध विधाने' (तु० प० से०) । जत्विव । बह्लीकेषु भवम् । हिमं गच्छति । मृगय्वादि. (उ० १.३७) । 'रमेर्वृद्धिश्च' (उ० १.१०१) इत्यठः । पञ्च । 'हींग' [लोके] ॥[1]

तत्पत्री कारवी पृथ्वी वाष्पिका कवरी पृथु ॥ ४० ॥

तस्य हिङ्गुतरो. पत्नी । वाष्पमिव । कवरीव । पञ्च । 'वनवती' [लोके] ॥ ४० ॥[2]

निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी ।

निशा आह्वाऽस्य[3] काञ्च्यतेऽनया[4] । पीता वर्णेन । हरिं वर्णं द्राति । 'द्रा कुत्सायाम्' (अ० प० अ०) । वरो वर्णोऽस्त्यस्या.[5] । पञ्च ॥[6]

सामुद्रं यत्तु लवणमक्षीवं वशिरं[7] च तत् ॥४१॥

समुद्रे भवम् । लुनाति । नन्द्यादिः (३.१.१३४) 'लवणाल्लुक्' (४.४.२४) इति निर्देशाण्णः । न क्षीवति । 'क्षीवृ मदे' (भ्वादिः) । वशिनं राति । 'पागा' [लोके] ॥४१॥[8]

सैन्धवोऽस्त्री शीतशिवं माणिमन्थं[9] च सिन्धुजे ।

सिन्धुषु भवम् । शीतं च तच्छिवं च । मणिमन्थाख्ये पर्वते भवम् । चत्वारि । 'सेंधव' [लोके] ॥[10]

रौमकं वसुकम्

रुमाया भवम् । अण् (४.३.५३) बन् । वसु कायति । द्वे 'साम्भरि' [लोके] ॥[11]

पाक्यं विडं च कृतके द्वयम् ॥४२॥

पाके साधु । विडति । 'विड भेदने' (तु० प० से०) । द्वे । 'वि (ख) रिआ' [लोके] ॥४२॥[12]

सौवर्चलेऽक्षरुचके

सुष्ठु वर्च्यते । वृषादित्वात् (उ० १.१०६) कलच् । प्रज्ञाद्यण् (५.४.३८) अक्षाणि । रुच रोचने । क्वुन् (उ० २.३२) । त्रीणि । 'सोंचर' [लोके] ॥[13]

---

1. Asafoetida [5] 2. The leaf of an asafoetida plant [5] 3. M. आह्वास्य 4. M. काञ्च्यनेनया 5. M. वर्णोस्त्यस्याः 6. Turmeric [5]
7. D वसिरं 8. Seasalt [2] 9. K. माणिवन्थं 10. Rock-salt [4]
11. Sambhar salt [2] 12. Artificial salt (saltpetre) [2]
13. Sochal salt [2].

तिलक तत्र मेचके ।

मेचके कृष्णवर्णे तस्मिन् ॥[1]

मत्स्यण्डी फाणितं खण्डविकारे

मत्स्य अण्डमिव । खवन्त्यादि । फाण्यते । क्त (३ २ १०२) । खण्डो विकारोऽस्य । त्रीणि[2] । 'राव [लोके] ॥[3]

शर्करा सिता ॥४३॥

शृणाति । 'शॄ करन् (उ० ४ ३) । सिता वर्णेन । द्वे 'चीनी' [लोके]॥४३॥[4]

कूर्चिका क्षीरविकृतिः स्यात्

कूर्चो मस्त्वादिरस्त्यस्या । दध्ना सह पयः पक्वं दधिकूर्चिका द्वे ॥[5]

रसाला तु मार्जिता ।

रसमालाति । माज्यते स्म । क्त (३ २ १०२) । 'कर्पूरादिमिश्रिततक्रविशेषस्य द्वे ॥[6]

स्यात्तेमनं तु निष्ठानम्

तिम्यतेऽनेन[7] । निष्ठीयतेऽत्र[8] । तिष्ठतेल्युट् (३ ३ ११७) । 'व्यञ्जनस्य द्वे ॥[9]

त्रिलिङ्गा वासितावधे ॥४४॥

वासितपर्यन्ता (अ० २ ९ ४६) ॥४४॥

शूलाकृतं भटित्रं च शूल्यम्

शूलेन कृतम् । शूलात्पाके' (५ ४ ६५) इति डाच् । 'भट भृतौ' (भ्वा० प० से०) । 'अशित्रादिभ्य— (उ० ४.१७२) इतीत्र । शूलेन संस्कृतम् । 'शूलोखाद्यत्' (४ २ १७) । लोहशलाकया पक्वमा [स] स्य' त्रीणि ॥[10]

उख्यं तु पैठरम् ।

उखायां संस्कृतम् । पिठरे संस्कृतम् । द्वे ॥[11]

प्रणीतमुपसम्पन्नम्

णीञ् क्त (३ २ १०२) । स पदे (दि० आ० अ०) । क्त (३ ४ ७२) । 'पाके संस्कृतस्य व्यञ्जनादेर्द्वे ॥[12]

---

1 Black salt [1] 2 M विकारोस्य 3 Raw sugar [3] 4 Sugar [2] 5 Inspissated milk [2] 6 Curd mixed with camphor, sugar and other spices [2] 7 M तिम्यनेनेन 8 M निष्ठीयनत्र 9 Condiment [2] 10 Roasted meat [3] 11 Rice &c. boiled in a pot [2] 12 Anything cooked or dressed (such as a condiment) [2]

प्रयस्तं स्यात्सुसंस्कृतम् ॥४५॥

'यसु'[1] प्रयत्ने' (दि० प० से०) । क्तः (३.२.१०२) । 'द्रव्यान्तर-संस्कृतस्य पक्वस्य' द्वे ॥४५॥[2]

स्यात्पिच्छिलं तु विजिलम्

पिच्छाऽस्यास्ति[3] । 'लोमादि—' (५.२.१०) इतीलच् । वेजनं विजिः । 'ओविजी—' (तु० आ० से०) किः । विजिं लाति । 'मण्डयुक्तभक्तस्य जलयुक्तव्यञ्जनस्य च' द्वे ॥[4]

संमृष्टं शोधितं समे ।

मृजिशुध्योः क्ते (३.२.१०२) । द्वे ॥[5]

चिक्कणं मसृणं स्निग्धम्

'चिक्क गतौ' (?) चिक्कमणति । मस्यते । स्निह्यति । क्तः (३.४.७०) त्रीणि ॥[6]

तुल्ये भावितवासिते ॥४६॥

वास्यते । 'वास उपसेवायाम्' (चु० उ० से०) । 'हिङ्ग्वादिना सुगन्धीकृतस्य व्यञ्जनादेः' द्वे ॥४६॥[7]

आपक्वं पौलिरभ्यूषः

ईषत्पक्वम् । पोलति पोलः । 'पुल [म] हत्त्वे' (भ्वा प० से०) । पोलेन निर्वृतः । सुतङ्गमादित्वात् (४.२.८०) इञ् । अभ्यूषति । 'ऊष रुजायाम्—' (भ्वा० प० से०) । 'हरितयवादे [भर्जितस्य]' [त्रीणि] ॥[8]

लाजाः पुंभूम्नि चाक्षताः ।[9]

पृथुकः स्याच्चिपिटकः

'प्रथ प्रख्याने' (चु० उ० से०) । 'पृथुकपाकाः—' (उ० ५.५३) इति साधु । चिपिटमिव । द्वे 'चिउरा' [लोके] ॥[10]

---

1. M. यसु 2. Food seasoned or dressed with condiments [2]
3. M. पिच्छास्यास्ति 4. Boiled rice with scum and sauce mixed with rice-gruel [2] 5. Cleansed grain [2] 6. Soft meals [3]
7. Food seasoned with asafoetida and other condiments [2]
8. Grain half-dressed or scorched or fried with ghee [3]
9. Fried paddy or rice [2] 10. Rice parched and flattened [2].

इत्यागूच् । उष्णमन्नम् । सञ्ज्ञाया[1] (५ २ ७१) कन् । 'श्रा पाके' (अ० प० अ०) । क्तः (३ २ १०२) । 'संयोगादे—' (८ २ ४३) इति नः । विलिम्पति । अच् (३ १ १३४) । गौरादि (४ १ ४१) । तरं लाति । पञ्च । 'लपसी' [लोके] ॥[2]

गव्यं त्रिषु गवां सर्वम्

गोरिदम् । 'गोपयसोर्यत्' (४ ३ १६०) ॥[3]

गोविड् गोमयमस्त्रियाम् ॥ ५० ॥

गोर्विट् । गो पुरीष (४ ३ १४५) मयट् । ५० ॥[4]

तत्तु शुष्कं करीषोऽस्त्री

कीर्यते । 'कॄतॄभ्यामीषन्' (उ० ४ २६) ॥[5]

दुग्धं क्षीरं पयः समम् ।

दुहेः क्तः (३ २ १०२) क्षयणम् । 'क्षीष् हिंसायाम्' (क्र्या० प० से०) । क्षियमीरयति । पीयते । 'पीङ् पाने' (दि० आ० अ०) । असुन् (उ० ४. १८८) ॥[6]

पयस्यमाज्यदध्यादि

पयसो विकारः ॥[7]

द्रप्सं दधि घनेतरत् ॥ ५१ ॥

'दृप हर्षादौ' (दि० प० अ०) । बाहुलकात्सः । 'अनुदात्तस्य च—' (६. १ ५९) इत्यम् । घनात्कठिनादन्यत् ॥ ५१ ॥[8]

घृतमाज्यं हविः सर्पिः

घ्रियते । 'घृ सेके' (भ्वा० प० अ०) । 'अञ्जिघसिभ्यः क्तः' (उ० ३ ८९ । आ अज्यते । हूयते । 'अर्चिशुचि—' (उ० २ १०८) इति, इसिः । सर्पति । इसि[9] (बा०) । चत्वारि ॥[10]

नवनीतं नवोद्धृतम् ।

नवं च तन्नीतं च । द्वे । 'नयनू' [लोके] ॥[11]

---

1 M संज्ञा 2 Gruel [5] 3 Milk, curd or any other thing belonging to a cow [1] 4 Cow-dung [2] 5 Dry cow-dung [1] 6 Milk [3] 7 Ghee, curd and other things made of milk [1] 8 Diluted curd [1] 9 M इसि 10 Ghee or clarined butter [4] 11 Butter [2]

तत्तु हैयङ्गवीनं यत् ह्यो गोदोहोद्भवं घृतम् ॥ ५२ ॥

ह्यो गोदोहादुद्भवति । 'हैयङ्गवीनं संज्ञायाम्' (५.२.२३) इति निपात । 'एकरात्रपर्युषितादुत्पन्नस्य घृतस्यैकम् ॥ ५२ ॥[1]

दण्डाहतं कालशेयमरिष्टमपि गोरसः ।

दण्डेनाहतम्, विलोडितम् । कलश्या मन्थपात्रे भवम् । 'दृतिकुक्षि—' (४.३ ५६) इति ढञ् । न रिष्टमस्मात् । गोरसस्य दुग्धस्य विकारत्वादुपचार । चत्वारि 'घोलस्य' ॥[2]

तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥ ५३ ॥

'तञ्चु गतौ' (भ्वा० प० से०) । 'स्फायि—' (उ० २.१३) इति रक् । उदकेन श्वयति वर्धते । 'टुओश्वि–' (भ्वा० प० से०) क्विप् (३ २ ७६) । अर्धजलचो [ल] स्यैकम् । निर्जलस्यैकम् ॥ ५३ ॥[3]

मण्ड दधिभवं मस्तु

मस्यते । 'सितनि—' (उ० १ ६९) इति तुन् । 'वस्त्रनिस्सृतदधिजलस्य' एकम् ॥[4]

पीयूषोऽभिनवं पय ।

पीयते । 'पीयेरूषन्' (उ० ४ ७६) । 'नवप्रसूतगो पयस ' एकम् । 'पेउस' [लोके] ॥[5]

अशनाया बुभुक्षा क्षुत्

अशनस्येच्छा । 'सुप आत्मन —' (३ १ ८) क्यच् । भोक्तुमिच्छा । 'क्षुध बुभुक्षायाम्' (दि० प० अ०) । क्विप् (३ २.१७८) । त्रीणि ॥[6]

ग्रासस्तु कवलार्थक.[7] ॥ ५४ ॥

ग्रस्यते । घञ् (३ ३.१९) । केन वलते । द्वे ॥ ५४ ॥[8]

---

1 Clarified butter prepared with the preceding day's milk [1] 2 Butter-milk [4] 3 Butter-milk (i) Containing twenty-five percent water (ii) Containing fifty percent water and (iii) pure or without water [1 each] 4 Whey [1] 5 The milk of a cow during the first seven days after calving [1] 6 Hunger [3] 7. Majority reads कवल पुल्लिंग 8 Mouthful [2]

सपीति स्त्री तुल्यपानम्

पिबते (भ्वा० प० अ०) क्तिन (३ ३ ९४) 'घुमास्था–' (६ ४ ६६) इतीत्वम् । समाना पीति । द्वे ॥[1]

सग्धि स्त्री सहभोजनम् ।

अदन ग्धि । समानाग्धि । 'बहुलं छन्दसि' (२ ४ ३९) इति घस् । 'घसिभसो —' (६ ४ १००) इत्युपधालोप । सलोप धत्व जश् च द्वे ॥[2]

उदन्या तु पिपासा तृट्

उदकस्येच्छा । 'अशनाया—' (७ ४ ३४) इति क्यच् । पातुमिच्छा । तर्पणम् । घञ् (३ ३ १८) । चवारि ॥[3]

जग्धिस्तु भोजनम् ॥ ५५ ॥

जेमन लेप[4] आहारो निघसो न्याद इत्यपि ।

क्तिन (३ ३ ९४) 'अदो जग्धि —' (२ ४ ३६) । भुज (रु० आ० अ०) ल्युट् (३ ३ ११५) ॥५५॥ 'जिमु अदने' (भ्वा० प० स०) । 'लिप उपदेहे' (तु० उ० अ०) घञ् (३ ३ १८) । हृञ (भ्वा० उ० अ०) घञ् (३ ३ १८) । अदे (अ० प० अ०) 'नौ ण च (३ ३ ६०) इत्यप् । 'घञपोश्च' (२ ४ ३८) इति घस्लृ । सप्त ॥[5]

सौहित्य तर्पण तृप्ति

सुहितस्य भाव । 'तृप प्रीणने (दि० प० स०) । त्रीणि ॥[6]

फेला भुक्तसमुज्झितम् ॥ ५६ ॥

फेल्यते । 'फेलृ गतौ' (भ्वा० प० से०) अ (३ ३ १०३) पूर्वं भुक्त पश्चात्समुज्झितम् । 'भुक्तोत्सृष्टस्य' द्वे ॥[7]

काम प्रकाम पर्याप्त निकाममिष्ट यथेप्सितम् ।

कमे (भ्वा० आ० स०) घञ (३ ३ १८) । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । क्त (३ ३ ११४) । इष (तु० प० से०) क्त (३ ३ ११४) । आप्तुमिष्टम् । सन्नन्तात् (३ १ ७) क्त (३ ३ ११४) ॥[8]

---

1 Drinking together[2] 2 Eating together [2] 3 Thirst [4] 4 II and I. लद 5 Food [7] 6 Satisfaction [3] 7 Leavings of meal [1] 8 Enough [6]

गोपे गोपालगोसंख्यगोधुगाभीरवल्लवाः ॥ ५७ ॥

गा पाति । गा पालयति । गा सचष्टे । स्याज् (२.४.५४) । गा दोग्धि । आ समन्ताद्भियं राति । 'वल्ल संवरणे' (भ्वा० आ० से०) वल्लं वाति ॥५७॥[1]

गोमहिष्यादिकं पादबन्धनम्

पादे बन्धनमस्य ॥[2]

द्वौ गवीश्वरे ।

गोमान् गोमी

गवामीश्वरः. गावः सन्त्यस्य । मतुप् । 'ज्योत्स्ना—' (५.२.११४) इति मिनि. । त्रीणि ॥[3]

गोकुलं तु गोधनं स्याद् गवां व्रजे ॥ ५८ ॥

गवां कुलम् । गवां धनम् । गवां समूहः ॥५८॥[4]

त्रिष्वाशितंगवीनं तद्गावो यत्राशिताः पुरा ।

'अषड्क्षाशित—' (५.४.७) इति ख । आशिताः भोजिताः ॥[5]

उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥

अनड्वान् सौरभेयो गौः

'उक्ष सेचने' (भ्वा० प० से०) । 'श्वन्नुक्षन्—' (उ० १.१६०) इति निपातः । भन्दति । 'भदि कल्याणे' [भ्वादि] । 'ऋज्रेन्द्र—' (उ० २.२८) इति साधुः । 'वर ईप्सायाम्' (चु० उ० से०) । बलिनमीवरं च ददाति । ऋषति । 'ऋषी गतौ' (तु० प० से०) । 'वृषु सेचने' (भ्वा० प० से०) । 'ऋषिवृषिभ्यां किन्' (उ० ३.१२३) इत्यभच् ॥५९॥ अनः शकटं वहति । 'अनसो डश्च' इति क्विप् । सुरभ्या अपत्यम् । 'स्त्रीभ्यो ढक्' (४.१.१२०) । गच्छति गौः । 'गमेर्डो' (उ० २.६७) । नव ॥[6]

उक्ष्णां संहतिरौक्षकम् ।

उक्ष्णां समूहः । 'गोत्रोक्षोष्ट्र—' (४.२.३९) इति वुञ् । एकम् ॥[7]

---

1. Cowherd [6] 2. Animals whose feet are tied with rope [1] 3. The owner of cattle [3] 4 A herd of cows [2] 5. A place formerly grazed by cattle [1] 6. Ox [9] 7. A multitude of oxen [1].

गव्या गोत्रा गवाम्

गवा सहति । 'खलगोरथात्' (४ २ ५०) इति यत् । 'इनित्रकटयचश्च' (४ २ ५१) । द्वे ॥[1]

वत्सधेन्वोर्वात्सकधैनुके ॥ ६० ॥

वत्सानां समूहः । धेनूनां समूहः । 'अचित्तहस्ति—' (४ २ ४७) इति ठक् । एकम् [एकम्] ॥६०॥[2]

उक्षा महान्महोक्षः स्यात्

महांश्चासावुक्षा च ॥[3]

वृद्धोक्षस्तु जगरद्गवः ।

वृद्धश्चासावुक्षा च । जरंश्चासौ गौश्च । 'गोरतद्धित—' (५ ४ ९२) इति टच्) । द्वे ॥[4]

उत्पन्न उक्षा जातोक्षः

जातश्चासावुक्षा च । कर्षणयोग्य ॥[5]

सद्योजातस्तु तर्णकः ॥ ६१ ॥

तृणोति । 'तृणु भक्षणे' (त० उ० से०) । ण्वुल् (३ १ १३३) ॥६१॥[6]

शकृत्करिस्तु वत्सः स्यात्

शकृत्करोति । 'स्तम्बशकृतोरिन्' (३ २ २४) । वदति । 'वृतॄवदि—' (उ० ३ ६२) स । द्वे ॥[7]

दम्यवत्सतरौ समौ ।

दमनार्हः । तनुर्वत्सः । 'वत्सोक्षाश्व—' (५ ३.९१) इत्यादिना ष्टरच् । वत्सभावमतीत्य द्वितीयं वयः प्राप्तः ॥[8]

आर्षभ्यः षण्डतायोग्यः

'ऋषभोपानहोर्ञ्यः' (५ १ १४) । एकम् ॥[9]

---

1 A multitude of cows [2] 2 Herds of milch-cows and calves [1 each] 3 A large ox [1] 4 An old ox [2] 5 A young bullock [1] 6 A calf born recently [1] 7 A young calf [2] 8 A young bullock requiring training [2] 9 A bullock fit to be a eunuch [1]

षण्डो गोपतिरिट्चरः ॥६२॥

'षणु दाने' (तु० उ० से०)। 'अमन्ताड्डः' (उ० १.११४)। बाहुलकात्सो नः। 'शमेर्ढः' (उ० १.९९) 'शण्ढः' इत्यन्ये। गवां पतिः। एषणमिट्। इषा चरति। त्रीणि। 'साड' लोके ॥ ६२ ॥[1]

स्कन्धप्रदेशस्तु वहः

वहति युगमनेन ॥[2]

सास्ना तु गलकम्बलः।

'षस स्वप्ने' (अ० प० से०)। 'रास्नासास्ना—' (उ० ३.१५) इति साधुः। गलस्य कम्बल.। द्वे ॥[3]

स्यान्नस्तितस्तु नस्योतः

नस कौटिल्ये (भ्वा० आ० से०)। क्त (३ ३.११४)। नस्ते कृतमस्य। नासिकाया भवाम्। नस्य 'नासिकाया—' (वा० ६.१ ६३) नस्। नस्यया नासारज्ज्वा उतः। 'नासारज्जुयुत्तस्य' द्वे ॥[4]

प्रष्ठवाड् युगपार्श्वगः ॥६३॥

प्रष्ठमग्रगामिनं वहति। युगस्य पार्श्वं गच्छति। 'दमनकाले कण्ठारोपितकाष्ठवाहस्य' द्वे ॥[5]

युगादीनां तु वोढारो युग्यप्रासङ्ग्यशाकटाः।

'तद्वहति रथयुगप्रासङ्गम्' (४.४.७६) इति यत्। 'शकटादण्' (४.४.८०) ॥[6]

खनति तेन तद्वोढास्येदं हालिकसैरिकौ ॥६४॥

हलेन सीरेण खनति। हलं वहति। हलस्येदमित्यादि। 'हलसीराट्ठक्' (४.३.१२४) ॥ ६४ ॥[7]

धूर्वहे धुर्यधौरेयधुरीणाः स धुरंधराः।

धुरं वहति। 'धुरो यड्ढकौ' (४.४.७७)। योगविभागात्खः। धुरं धारयति। 'संज्ञायां भृतॄवृ—' (३.२.४६) इति खच् ॥[8]

---

1. Bull [3] 2. The shoulder of an ox [1] 3. The dew-lap of an ox [2] 4. Nozzled (as a bullock) [2] 5. A young bull being trained for the plough [2] 6. Oxen who bear a yoke and draws a cart [1 each] 7. An ox who draws a plough [2] 8. An ox who bears a burden [5].

उभावेकधुरीणैकधुरावेकधुरावहे ॥६५॥

एकधुरा वहति। 'एकधुराल्लुक् च' (४.४.७९) इति खः। त्रीणि ॥६५॥[1]

स तु सर्वधुरीणो यो भवेत्सर्वधुरावहः।

सर्वा धू. सर्वधुरा। 'ऋक्पू.—' (५.४.७४) इत्यप्। 'खः सर्वधुरात्' (४.४.७८)। द्वे ॥[2]

माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी ॥६६॥
अर्जुन्यघ्न्या रोहिणी स्यात्

मही गौ', तस्या अपत्यम्। वसति क्षीरमस्याम्। 'स्फायि—' (उ० २.१३) इति रक्। शृङ्गे स्तोऽस्या.[3] ॥ ६६ ॥ अर्जुनवर्णयोगात्। 'अन्यतो ङीप्' (४. १.४०)। न हन्तुं योग्या। 'अघ्न्यादय.—' (उ० ४.१११) इति साधु। रोहिणी रोहितवर्णेन। नव ॥[4]

उत्तमा गोपु नैचिकी।

नीचैश्चरति। ['चरति'] (४.४.८) इति ठक्। 'अव्ययानाम्' (वा० ६. ४.१४४) इति टिलोप.। 'उत्तमाया गो.' एकम् ॥[5]

वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः ॥६७॥[6]
द्विहायनी द्विवर्षा गौः

द्वौ हायनौ यस्या'। 'दामहायना—' (४.१.२७) इति ङीप्। द्वे वर्षे प्रमाणमस्याः ॥[7]

एकाब्दा त्वेकहायनी।

एकोऽब्दो[8] यस्या. ॥[9]

चतुरब्दा चतुर्हायणी[10] एवं त्र्यब्दा त्रिहायणी ॥६८॥[11]
वशा वन्ध्या

वष्टि। अच् (३.१.१३४)। वन्धे. (भ्वा० प० स०) ण्यत् (३.१. १२४)। द्वे ॥[12]

---

1. An ox fit for one yoke [3] 2 An ox fit for all sorts of yokes [2] 3 M. स्तोऽस्या. 4. Cow [9] 5. An excellent cow [1] 6. Spotted and white cows [1 each] 7. A cow 2 years old [2] 8 M. एक: अब्दो 9. A cow one year old [2] 10. A cow 4 years old [2] 11. A cow 3 years old [2] 12. A barren cow [2].

अवतोका तु स्रवद्गर्भा

अवगमित तोकमपत्यमस्या ॥[1]

अथ संधिनी।

आक्रान्ता वृषभेण

सधानसधा, साऽस्त्यस्या [2]। व्रीह्यादित्वात् (५ २ ११६) इति 'वृषरताया' एकम् ॥[3]

अथ वेहद् गर्भोपघातिनी ॥६९॥

विहन्ति गर्भम्। सरचत्तृपढेहन्' (उ० २ ८५) इति साधु। 'वृषयोगेन गर्भघातिन्या' द्वे ॥६९ ॥[4]

काल्योपसर्या (या) प्रजने

प्रजने गर्भग्रहणे प्राप्तकाला। उपसियते वृषभेण। 'उपसर्याकाल्या— (३ १ १०४) इति साधु। 'गर्भग्रहणयोग्याया' एकम् ॥[5]

प्रष्ठौही बालगर्भिणी।

प्रष्ठ वहति। 'वाह –' (४ १ ६१) इति ङीप्। बाला चासौ गर्भिणी च। 'प्रथम गर्भधृतवत्या' द्वे।[6]

स्यादचण्डी तु सुकरा

न चण्डी। सुख करोति। 'सुशीलाया' द्वे ॥[7]

बहुसूति परेष्टुका ॥७०॥

बह्वी सूतिर्यस्या। परमिच्छति। बाहुलकात्। 'बहुप्रसूताया' द्वे ॥ ७० ॥[8]

चिरप्रसूता[9] बष्कयिणी

चिर प्रसूता। 'वष्क गतौ' (चु० उ० से०)। बाहुलकादयन् बष्कयस्तरुणवत्स, सोऽस्त्यस्या [10]। द्वे ॥ 'बवेन' [लोके] ॥[11]

धेनुः स्यान्नवसूतिका।

'धट इत्व' (उ० ३ ११) इति नु। नव सूत प्रसूतमस्या। द्वे ॥[12]

---

1 A cow miscarrying from accident [2] 2 M मास्त्यस्या 3 A cow united with a bull [1] 4 A cow that miscarries [2] 5 A cow fit for impregnation [2] 6 A cow pregnant for the first time [2] 7 A tractable cow [2] 8 A cow that has often calved [2] 9 B and K चिरसूता 10 M सोस्त्यस्या 11 A cow whose calf is full-grown [2] 12 A milch-cow [2]

सुव्रता सुखसंदोह्या

शोभनं व्रतमस्या । सुखेन सदुह्यते ॥[1]

पीनोघ्नी पीवरस्तनी ॥७१॥

पीनमूधोऽस्या[2] । 'ऊधसोऽनङ्[3], (५.४.१३१) । पीवर[4] स्तनोऽस्या.[5] । 'स्वाङ्गाच्च—' (४ १.५४) इति ङीप् । द्वे ॥ ७१ ॥[6]

द्रोणक्षीरा द्रोणदुग्धा

द्रोणपरिमित क्षीरमस्या । द्रोणं दोग्धि । 'दुह कब् घश्च' (३.२.७०) । द्वे ॥[7]

धेनुष्या बन्धके स्थिता ।

'सज्ञाया धेनुष्या—' (४.४.८९) इति साधु ॥[8]

समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥७२॥

समायां समायां विजायते । 'समां समां विजायते' (५ २ १२) इति खो यादिलोपश्च ॥ ७२ ॥[9]

ऊधस्तु क्लीबमापीनम्

'उन्दी क्लेदने' (ह० प० से०) । असुन् (उ० ४.१८८) । दस्य ध. । 'प्याय पी' (६.१ २८) । 'ओदितश्च' (८.२.४५) इति निष्ठान । 'स्तनस्य' द्वे ॥[10]

नमौ शिवककीलकौ ।

धेनग्र[11] । 'सर्दनीमृष्य—' (उ० १ १५४) इति साधु । 'कील बन्धे' (भ्वा० प० से०) । 'बन्धनकाष्ठस्य' द्वे ॥[12]

न पुंसि दाम संदानम्

यति[13] दाम । मनिन् (उ० ४ १४४) । सपूर्वो दाप् बन्धने । 'दाहनरात्ले पादबन्धनरज्जा ' द्वे ॥[14]

---

1 A cow which can be easily milked [2] 2 M पानमूधोऽस्याः 3 M ऊधसोऽनङ् 4 M पीवर 5 M स्तनोऽस्या. 6 A cow having large udders [2] 7. A cow yielding a drona of milk [2] 8 A cow that has been pledged [1] 9 A cow bearing a calf every year [1] 10 Udder [2] 11 M -नेत्र 12. Wedge [2] 13 M -ति 14 Foot-rope [2]

पशुरज्जुस्तु दामनी ॥७३॥

पशुबन्धनी रज्जु । दामैव । 'प्रज्ञाद्यण्' (५ ४ ३८) । 'अन्' (६ ४. १३७) इति प्रकृतिभाव । 'पशुबन्धनरज्जा ' द्वे ॥ ७३ ॥[1]

वैशाखमन्थमन्थानमन्थानो मन्थदण्डके ।

विशाखा प्रयोजनमस्य । 'विशाखाषाढाद्–' (५ १ ११०) अण् । मथ्यते । घञ् (३.३ १२१) मन्थयति । बाहुलकादानच् । मथ्यते । 'मन्थ ' (उ० ४. ११) इन् कित् । मन्थस्य दण्ड । पञ्च ॥[2]

कुठरो दण्डविष्कम्भ [3]

'कुट कुठ गति प्रतिघाते' (?) । बाहुलकात्करच् । दण्ड विष्कम्नाति । 'स्कम्भु रोधने' [सौत्र] । 'मन्थबन्धनकाष्ठस्य' द्वे ॥[4]

मन्थनी गर्गरी समे ॥७४॥

मथ्यतेऽस्याम्[5] । 'गर्ग' इति शब्द राति । मन्थनपात्रस्य' द्वे ॥ ७४ ॥[6]

उष्ट्रे क्रमेलकमयमहाङ्गा॰

'उष दाहे' (भ्वा॰ प॰ से॰) । ष्ट्रन् (उ॰ ४ १५८) । क्रमे (भ्वा॰ प॰ से॰) विच् (३ २ ७५) । एलयति । 'इल क्षेपे' (तु॰ प॰ स॰) । ण्वुल् (३.१ १३३) । क्रम् चासौ एलकश्च । मयते । 'मीञ् हिंसायाम्' (क्र्या॰ उ॰ अ॰) । महान्त्यङ्गान्यस्य । चत्वारि ॥[7]

करभः शिशु ।

कीर्यते । करे भाति । 'उष्ट्रशिशो ' एकम् ॥[8]

करभा स्युः शृङ्खलका दारवे पादबन्धने ॥७५॥

शृङ्खल बन्धनमस्य । 'काष्ठनबन्धनयुक्तस्य करभस्य' एकम् ॥ ७५ ॥[9]

अजा छागी

अजति । अच् (३ १ १३४) । बाहुल्काद्व वीभाव । 'छापूर्खडिभ्य क्रिद्' (उ॰ १ १२४) इति गन् । द्वे ॥[10]

---

1 Cord for tethering cattle [2] 2 Churning stick [5] 3 B दण्डविष्कम्भे 4 A post round which the rope of a churning-stick passes [2] 5 M मथ्यतस्याम् 6 Pot (used for churning) [2] 7 Camel [4] 8 A young camel [2] 9 A camel tied with wooden rope [1] 10 She-goat [2]

शुभच्छागःवस्तच्छगलका अजे ।

'शुम हिंसायाम्' (भ्वा० प० से०) । कः । 'तुभ' इत्यन्ये । वस्तयति । 'वस्त अर्दने' (चु० आ० से०) । अच् (३.१.१३४)। 'छो गुक् ह्रस्वश्च' (उ० १. ११३) इत्यलच् । पञ्च ॥[1]

मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके ॥७६॥

मेहति । ष्ट्रन् (उ० ४. १४८) । उना शम्भुना रम्यते । 'रभ रामस्ये' (भ्वा० आ० अ०) । बाहुलकाद्रक् । उना रण्यते । उर्णाऽस्यास्ति[3] । 'ऊर्णाया युस्' (५.२.१२३) । 'मिष स्पर्धायाम्' (तु० प० से०) । अच् (३.१.१३४) । वर्षति । 'सृवृषिभ्यां कित्' (उ० ४.४९) इति निः । एलयति । ण्वुल् (३. १.१३३) । सप्त ॥ ७६ ॥[4]

उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम् ।

उष्ट्राणामुरभ्राणामजानां च समूहः । 'गोत्रोक्ष—' (४.२.३९) इति वुञ् ॥[5]

चक्रीवन्तस्तु वालेया रासभा गर्दभाः खराः ॥७७॥

चक्रवद्भ्रमणं चक्र [म्], तदस्यास्ति । 'आसंदीवत्—' (८.२.१२) इति साधुः । बलये उपहाराय संहितः । 'छदिरुपध—' (५.१.१३) इति ढञ् । खं मुखबिलमतिशयितमस्य । 'खमुख–' (वा० ५.२.१०७) इति र. । पञ्च ॥७७॥[6]

वैदेहकः सार्थवाहो नैगमो वणिजो वणिक् ।
पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः ॥७८॥

विदेहेषु भवः । धूमादित्वात् (४.२.१२७) वुञ् । सार्थं वहति । निगमे भवः । पणतेरिज्यादेश्च व. (उ० २.७०) प्रज्ञादि. (५.४.३८) । पण्येना-जीवति । आपणे व्यवहारोऽस्यास्ति[7] । 'अतः—' (५.२.११५) इति ठन् । क्रयविक्रयाभ्यां जीवति । 'वस्नक्रयविक्रयाट्ठन्' (४.४.१३) अष्टौ ॥ ७८ ॥[8]

विक्रेता स्याद्विक्रयिकः

विक्रयेण जीवति । द्वे ॥[9]

---

1. B. prefers स्तभच्छाग 2. Goat [5] 3. M. उर्णास्यास्ति 4. Ram or sheep [7] 5. A multitude of camels, a flock of sheep; and a flock of goat (1 each) 6. Donkey [5] 7. M. व्यवहारो-स्यास्ति 8. Merchant [8] 9. Seller [2]

क्रायक क्रयिक समौ।

क्रीणाति । ण्वुल् । क्रयेण जीवति । ठञ् (४ ४ १३)। 'ग्रहीतु' ह्वे ॥[1]

वाणिज्य तु वणिज्या स्यात्

वणिजा कर्म। ष्यञ् (५ १ १२४)। 'दूतवणिग्भ्या च' इति यत्। 'वणिक्कमण' ह्वे ॥[2]

मूल्य वस्नोऽप्यवक्रय ॥७९॥

मूलेनानाम्यम्। 'नौ वयो—' (४ ४ ९१) इति यत्। वसत्यत्र। 'धापृवसि—' (उ० ३ ६) इति न । अवक्रीयतेऽनेन[3]। 'पुसि—' (३ ३ ११८) इति घ । त्रीणि ॥ ७९ ॥[4]

नीवी परिपणो मूलधनम्

'नीवृ स्थौल्ये (?) नीवी। परिपण्यते वृद्ध्यर्थं प्रयुज्यते। मूल च तद्धन च। त्रीणि ॥[5]

लाभोऽधिक फलम्।

लभ्यते। 'अकर्तरि—' (३ ३ १९) इति घञ्। अध्यारूढम्। 'अधिकम्' (५ २ ७३) इति साधु । फलति। अच् (३ १ १३४)। त्रीणि ॥[6]

परिदान परीवर्तो नैमेयनिमयावपि ॥८०॥

परिवृत्य दानम्। प्रतिदानम् इति पाठा तरम्। परिवर्तनम्। घञ् (३ ३ १८) 'उपसर्गस्य— (६ ३ १२२) इति दीर्घं। 'मङ् प्रणिदान' (भ्वा० आ० अ०)। यत् (३ १ ९७)। चत्वारि 'बदला' लोके ॥[7]

पुमानुपनिधिर्न्यास

'उपसर्गे घा कि' (३ ३ ९२)। न्यस्यत। 'असु क्षेपणे' (दि० प० से०)। घञ् (३ ३ १९)। 'निक्षेपस्य' ह्वे। 'थानी' लोक ॥[8]

प्रतिदानं तदर्पणम्।

प्रतीपदानम्। तस्यार्पणम्। 'स्वामिनो (ने) निक्षेपा (पं) णस्य' ह्वे ॥[9]

क्रये प्रसारित क्रय्यम्

क्रीयत। 'अचो यत्' (३ १ ९७) ॥[10]

---

1 Purchaser [2] 2 Trade [2] 3 M अवक्रीयतनन 4 Price or cost [3] 5 Principal or Capital 6 Profit [8] 7 Barter [4] 8 Deposit or pledge [2] 9 Giving away of a deposit [1] 10 A thing exhibited for sale in the market [1]

क्रेयं क्रेतव्यमात्रके ॥८१॥[1]

विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिषु ।

विक्रीयते । पण्यते । 'अवद्यपण्य—' (३.१.१०१) इति साधु । 'विक्रय-कर्मणः' त्रीणि ॥[2]

क्लीबे सत्यापनं सत्यंकारः सत्याकृतिः स्त्रियाम् ॥८२॥

सत्यस्य करणम् । 'सत्यापपाश—' (३. १. २५) इति णिच् । 'कारे सत्यागदस्य' (६.३.७०) इति मुम् । 'सत्यादशपथे' (५.४.६६) इति डाच् । त्रीणि 'साई' लोके ॥ ८२ ॥[3]

विपणो विक्रयः

विपणनम् । पत्र् (३.३.१८) । 'एरच्' (३.३.५६), विक्रयः । 'विक्रय-क्रियायाः' द्वे ॥[4]

संख्याः संख्येये ह्यादश त्रिषु ।

एकादिरा अष्टादश नवदश पर्यन्ताः संख्याः संख्येये[5] त्रिलिङ्गाश्च । तेन 'दश ब्राह्मणाः' इत्येव, न तु 'ब्राह्मणानां दश' इति ॥

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥८३॥

'विंशति—' आद्यास्तु संख्याः संख्येयसंख्ययोरुभयोरप्यर्थयोरेकवचनान्ताः । संख्येये—'विंशतिर्गावः', संख्यायाम्—गवां विंशतिः ॥ ८३ ॥

संख्यार्थे द्विबहुत्वे स्तः

यदा विंशत्यादीनां संख्या-अर्थस्तदा द्विवचनादि । यथा—'द्वे विंशती', इत्यत्र चत्वारिंशदित्यर्थः ।

तासु चानवतेः स्त्रियः ।

विंशत्याद्या नवतिपर्यन्ताः स्त्रि (स्त्री) लिङ्गाः ।

पङ्क्तेः शतसहस्रादि क्रमाद् दशगुणोत्तरम् । ८४॥

पङ्क्त्यादि दशगुणं शतादि । यथा—'दश पङ्क्तयः शतम्, दशशतानि सहस्रमित्यादि ॥ ८४ ॥

1. Any thing fit to be purchased [1] 2. A thing saleable [3] 3 Ratification of a bargain; verification [3] 4 Selling or sale [2] 5 M. संख्येये ।

यौतव द्रुवय पाय्यमिति मानार्थकं त्रयम् ।

यौतेर्वाहुलकात्तुन् । योतुरिदम् । द्रोर्विकार । 'माने वय' (४ ३ १६२) । मीयतेऽनेन[1] । 'पाय्यसानाय्य—' (३ १ १२९) इति साधु । मानमर्योऽस्य[2] । चत्वारि ॥[3]

मान तुलाङ्गुलिप्रस्थै

मानभेदानाह—तुलेति । तोल्यतेऽनया[4] । तुल उन्माने' (चु० प० से०) । भिदादि (३ ३ १०४) ॥

गुञ्जा पञ्चाद्यमाषक ॥८५॥

मषति । 'मष हिंसायाम् (भ्वा० प० से०) । ण्वुल (३ १ १३३) । आद्यश्चासौ माषकश्च । शास्त्रीयत्वात् ॥ ८६ ॥[5]

ते षोडशाक्ष कर्षोऽस्त्री

'अक्षू व्याप्तौ (भ्वा० प० से०) । अच् (३ १ १३४) । कर्षति । अच् (३ १ १३४) । द्वे ॥[6]

पल कर्षचतुष्टयम् ।

पलति । 'पल गतौ (भ्वा० प० से०) । अच् (३ १ १३४) ॥[7]

सुवर्णविस्तौ हेम्नोऽक्षे

शोभना वर्णोऽस्य[8] । विस उत्सर्गे (दि० प० से०) । क्त (३ २ १०२) द्वे ॥[9]

कुरुविस्तस्तु तत्पले ॥८६॥

कुरुषु विस्त । तस्य हेम्न पल एवम् ॥ ८६ ॥[10]

तुला स्त्रिया पलशतम्[11] भार स्याद्विंशतिस्तुला ।

स्त्रियते । घञ् (३ ३ १९) ॥[12]

---

1 M मीयतेनेन 2 M मानमर्योस्य 3 Measure (in general) [4]
4 M तोल्यतेनया 5 A weight equal to 5 rattis [1] 6 A weight equal to 16 mas'as [1] 7 A weight equal to four karṣas [1]
8 M वर्णोस्य 9 A weight of gold equal to 80 guñjas [1]
10 A weight of gold equal to 320 rattis [1] 11 A weight of gold equal to 100 palas 12 A weight equal to 2000 palas

आचितो दशभारा स्युः

आङ्पूर्वाच्चिञः (स्वा० उ० अ०) क्तः (३.२.१०२) ॥[1]

शाकटो भार आचितः ॥८७॥

शकटेन उह्यते ॥ ८७ ॥ एकम् ॥[2]

कार्षापणः कार्षिकः स्यात्

कर्ष एव । कार्षमापणयति । कर्षस्यायम् ॥[3]

कार्षिके ताम्रिके पणः ॥[4]

अङ्गुलिमानं च नृवर्गे (अ० २.६.८६-८७) उक्तम् ।

प्रस्थमानमाह—

अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥८८॥

कुडवः प्रस्थ इत्याद्या परिमाणार्थकाः पृथक् ।

आढौक्यते । पृषोदरादि (६.३.१०९) । द्रवति । 'द्रुवृ—' (उ० ३.१०) इति निः । खमाराति । गौरादिः (४.१.४१) । उह्यतेऽनेन[5] । निकुञ्चति । 'कुञ्च कौटिल्ये' (भ्वा० प० से०) ॥ ८८ ॥ कुण्ड्यते । बाहुलकाद्वच् । अनित्यो नुम् । प्रस्थीयतेऽनेन[6] । कः (पा० ३.३.५८) । चतुर्भि. कर्षै पलं तदेव निकुञ्चकम् । पलचतुष्टयं कुडवः । तच्चतुष्टयं प्रस्थः । प्रस्थचतुष्टयमाढकः । एवं द्रोणौ गोणी खारीति यथोत्तरचतुर्गुणाः । गोण्येव भारस्तच्चतुष्टयं वाहः ॥[7]

अंशस्तुरीयः पादः स्यात्[8]

पद्यते । 'पदरुज—' (३.३.१६) इति घञ् । एकम् ॥[9]

अंशभागौ तु वण्टके ॥८९॥

अंश्यते । 'अंश विभाजने' (?) । भजेः (भ्वा० उ० अ०) कर्मणि घञ् (३.३.१९) । वण्टयते । 'वटि विभाजने' (चु० प० से०) घञः क. । त्रीणि ॥ ८९ ॥[10]

---

1. A measure of 10 bhāras 2. A weight of 10 bhāras or cart-loads (80,000) tolās 3. Coin [2] 4. A copper coin [1] 5. M. उह्यतेनेन 6. M. प्रस्थीयतेनेन 7. Different measures being āḍhaka, droṇa, khārī, vāha, nikuñcaka, kuḍava and prastha (1 each) 8. B. reads this half as follows : पादस्तुरीयो भाग. स्यात् 9. The fourth part of a thing [1] 10. Part, portion or share [3]

द्रव्य वित्त स्वापतेय रिक्थमृक्थ धन वसु।
हिरण्यं द्रविण द्युम्नमर्थरैविभवा अपि ॥९०॥

द्रुरिव। 'द्रव्य च भव्य (५ ३ १०४) इति माधु। विद्लृ लाभे (तु० उ० अ०)। 'वित्तो भोगप्रत्यययो' (८ २ ५८)। स्वपतौ माधु। पथ्यतिथि-' (४ ४ १०४) इति ढञ्। रिच्यते। 'रिचिर् विरेचन' (रु० उ० अ०)। 'पातृतुदि-' (उ० २ ७) इति थक्। 'ऋ [च] शब्दे (तु० प० स०)। बाहुलकात् थन्। धनति। धन धान्ये' (जु० प० से०)। अच् (३ १ १३४)। 'धृसृवृस्निहि—' (उ० १ १०) इत्यु। 'हर्य गतिकान्त्यो (भ्वा० प से०)। 'हर्यते कन्यन् हिर् च (उ० ५ ४४)। द्रु गतौ (भ्वा० प० अ०)। 'द्यु दक्षिभ्यामिनन्' (उ० २ ५०)। दिवमनति। म्ना अभ्यासे (भ्वा० प० अ०)। 'आत —' (३ २ ३) क। अर्थ्यते। अज् (३ १ १३४)॥ ९॥[1]

स्यात्कोशश्च हिरण्य च हेमरूप्ये कृताकृते।

कुश्यते। 'कुश सश्लेषणे (?)। हेम च रूप्य च। कृत चाकृत च। घटिताघटिते। द्वे॥[2]

ताभ्या यदन्यत्तत्कुप्यम्

'गुपू रक्षणे'। 'राजसूय—' (३ १ ११४) इति साधु। एकम्॥[3]

रूप्य तदूद्वयमाहतम् ॥९१॥

आहत रूपमस्य। रूपादाहतप्रशसयोर्यप्' (५ २ १२०)। एकम्॥९१॥[4]

गारुत्मत मरकतमश्मगर्भो हरिन्मणि।

गरुत्मतो जातम्। मरक तरत्यनेन। ड (वा० ३ २ १०१)। अश्मनो गर्भ। हरिद्वर्णो मणि। चत्वारि॥[5]

शोणरत्न लोहितक पद्मराग

शोण च तद्रत्न च। लोहितमेव। 'लोहितान्मणौ' (५ ४ ३०) इति कन्। पद्ममिव रागोऽस्य[6]। त्रीणि॥[7]

अथ मौक्तिकम् ॥९२॥

मुक्ता

मुक्तैव। 'विनयादिभ्यष्ठक्' (५ ४ ३४)॥ ९२॥ मुचे (तु० उ० अ०) क्त (३ २ १०२)। द्वे॥[8]

1 Wealth [12] 2 Minted or unminted gold, and silver [2]
3 Any metal but gold and silver [1] 4 A stamped coin [1]
5 Emerald [4] 6 M रागोस्य 7 Ruby [3] 8 Pearl [2]

अथ विद्रुमः पुंसि प्रवालं पुंनपुंसकम् ।

विशिष्टो द्रुमः । प्रकृष्टो वालोऽस्य[1] । द्वे ॥[2]

रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ॥९३॥

रमन्तेऽस्मिन्[3] । बाहुलकात् नः । तुक् (६.१.७१) । मण्यते । 'मण शब्दे' (भ्वा० प० से०) इनि । अश्मजातौ मरकतादौ । द्वे ॥ ९३ ॥[4]

स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकम् ।
तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ॥९४॥
चामीकरं जातरूपं महारजतकाञ्चने ।
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ॥९५॥

शोभनो वर्णोऽस्य[5] । कनति । 'कनी दीप्तौ' (भ्वा० प० से०) । 'हर्या-दिभ्य:—' (उ० ५.३५) युन् । 'हि गत्यादौ' (स्वा० प० अ०) । मनिन् (उ० ४. १४४) । 'हट दीप्तौ' (भ्वा० प० से०) । ण्वुल् (३.१.१३३) । तप्यतेऽनेन[6] । अनीयर् (३.१.११३) । शतकुम्भे पर्वते भवम् । गङ्गाया अपत्यम् । शुभ्रादित्वात् (४.१.१२३) ढक् । भरति । मनिन् (उ० ४.१४४) । कर्वत्यनेन । 'कर्व दर्पे' (भ्वा० प० से०) । मद्गुरादि (उ० १.४१) ॥९४॥ चमीकरे भवम् । जातं रूपमस्य । महच्च तद्रजतं च । काञ्चति (ते) । 'काचि दीप्तौ' (भ्वा० आ० से०) । नन्द्यादि- (३.१.१३४) । रोचते । 'युजिरुचितिजां कुश्च' (उ० १.१४६) इति मक् । कृतस्वरे आकरविशेषे भवम् ।[7] जम्बूरसस्य नद्या भवम् । अष्टौ धातव. पदानि स्थानान्यस्य । 'अष्टनः संज्ञायाम्—' (६.३.१२५) इति दीर्घः । एकोन (वि) शतिः ॥९५॥[8]

अलंकारसुवर्णं यच्छृङ्गीकनकमित्यदः ।

अलंकारस्य सुवर्णशृङ्गी कनति । एकम् ॥[9]

दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ॥९६॥

दुष्टो वर्णोऽस्य । रज्यते । 'पृषिरञ्जिभ्यां कित्' (उ० ३.१११) इत्यच् । प्रशस्तं रूपमस्य । 'खर्ज व्यथने' (भ्वा० प० से०) । 'खर्जिपिञ्जादिभ्य ऊरोलचौ' (उ० ४.९०) ॥ ९६ ॥[10]

---

1. M. वालोस्य 2. Coral [2] 3. M. रमन्तेस्मिन् 4. Any kind of jewels and pearls [2] 5. M. वर्णोस्य 6. M. तप्यतेनेन 7. M. भव 8. Gold [19] 9. Gold as or for ornaments [2] 10. Silver [5].

रीति स्त्रियामारकूटो न स्त्रियाम्

'री गतिरेषणयो' (क्र्या० प० अ०)। क्तिन् (३ ३ ९४)। आर कूटयते। 'कूट दाह' (चु० उ० से०)। 'पित्तलस्य' द्वे ॥[1]

अथ ताम्रकम्।

शुल्वं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च ॥९७॥

ताम्यति। 'अमितम्योर्दीर्घश्च' (उ० २ १६) इति रक्। शुल्वयति। 'शुल्व माने' (चु० प० से०)। म्लेच्छस्य मुखमिव। द्वे हेमरूप्ये अत्तुते स्म। 'अशू व्याप्तौ' (स्वा० आ० से०)। क्त (३ ४ ७२)। अतिशयेन वरम्। अतिशायने इष्ठन् (५ ३ ५५)। उ दम्बु वर्णोति। षट ॥ ९७ ॥[2]

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी।

अश्मसार

लोहति। 'लुह गार्ध्ये' (?) शस्यतेऽनन[3]। शसु हिंसायाम् (स्वा० प० से०)। दाम्नी–' (३ १ १८२) इति ष्ट्रन्। तिज निशाने' (चु० प० से०)। 'तिजर्दीर्घश्च' (उ० ३ १८) इति क्स्न। पिण्डयते। 'पिडि सघात' (भ्वा० आ० स०)। काल च तदयश्च। अनात्समाय– (५ ४ ९४) इति टच्। एति। अश्मन[4] सार। सप्त ॥[5]

अथ मण्डूर सिंहानमपि तन्मले ॥९८॥

मण्डते। खर्जूरादि (उ० ४ ९०)। सिंहमाणयति। सिंहाणम्' इति पाठा न्तरम्। तस्य मले ॥ ९८ ॥[6]

सर्व स्यात्तैजसं लौहम्

तैजसो विकार। सर्वधातूनाम्' एकम् ॥[7]

विकारस्त्वयस कुशी।

कु भूमि स्यति। एकम् ॥[8]

क्षार काच

क्षरति। ज्वलादि (३ १ १४०)। 'कच बन्धन दीप्तौ च' (भ्वा० आ० से०)। अच् (३ १ १३४)। प्रज्ञादण् (५ ४ ३८)। द्वे ॥[9]

1 Brass [2] 2 Copper [6] 3 M ... 4 M ... 5 Iron [7] 6 The rust of iron [2] 7 All kinds of metals [1] 8 Wrought iron [1] 9 Glass [2]

अथ चपलो रस सूतश्च पारदे ॥९९॥

'चुप मन्दाया गतौ' (भ्वा० प० से०)। 'चुवेरच्चोपधाया' (उ० १.१११) इति कल । रस्यते । सुष्ठु उत । पार ददाति । पारा ॥ ९९ ॥[1]

गवलं माहिषं शृङ्गम्

गवामलम् । 'महिषशृङ्गस्य' एकम् ॥[2]

अभ्रकं गिरिजामले ।

अभ्रमिव । गिरौ जाता । न मलमस्य । त्रीणि । 'अभरक' [लोके] ॥[3]

स्रोतोञ्जनं तु सौवीरं कापोताञ्जनयामुने ॥१००॥

स्रोतोज्यतेऽनेन[4] । अञ्जु (रु० प० से०) । सुवीरदेशे भवम् । कापोतं कपोतवर्णमञ्जनम् । यमुनाया भवम् । चत्वारि 'सुरमा' [लोके] ॥ १०० ॥[5]

तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरकम्[6] ।

'तुत्थ आवरणे' (चु० प० से०) । तुत्थ च तदञ्जन च । शिखिनो ग्रीवाऽस्यास्ति[7] । विगत तुन्न व्यथनमस्तात् । मयूर इव । चत्वारि 'तु (तू) तिआ' [लोके] ॥[8]

कर्परी दार्विका क्वाथोद्भवं तुत्थं रसाञ्जनम् ॥१०१॥

रसगर्भं तार्क्ष्यशैलम्

'कृपू सामर्थ्ये (भ्वा० आ० से०) । बाहुलकादरट् । दार्वी दारुहरिद्रा । तस्या क्वाथेनोत्पन्न [म्] रसजमञ्जनम् ॥ १०१ ॥ रसो गर्भेऽस्य[9] । तार्क्ष्यशैले भवम् । षट् 'रसवत' ॥[10]

गन्धाश्मनि तु गन्धकः ।

सौगन्धिकश्च

गन्धयुक्तोऽश्मगन्धोऽस्यास्ति[11] । अर्श आद्यच् (५ २ १२७) । स्वार्थे कन् । शोभनो गन्धोऽस्य[12] । विनयादि (५ ४ ३४) ॥[13]

---

1 Quick-silver [4] 2 The horn of a buffalo [1] 3 Talc [3] 4 M स्रोतोज्यतेनेन 5 Antimony applied to eyes as collyrium [4] 6 B and K वितुन्नकमयूरके 7. M ग्रीवास्यास्ति 8 Blue vitriol [4] 9 M गर्भस्य 10 Sulphate or copper 11 M गन्धयुक्तोश्मगन्धोस्यास्ति 12 M गन्धोस्य 13 Sulphur [3]

चक्षुष्याकुलाल्यौ तु कुलत्थिका ॥१०२॥

चक्षुषे हिता । कुल्मलति । 'कर्मण्यण्' (३ २ १) । ङीप् । कुले तिष्ठति । पृषोदरादि (६ ३ १०९) ॥ १०२ ॥[1]

रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ।

रीते पित्तलस्य पुष्पमिव । पुष्पस्य केतु । विनाशकत्वात् । पुष्पमिव । तत स्वार्थेऽण्[2] (५ ४ ३८) । कुसुममिव अञ्जनम् । 'रीतिकाया ध्मायमानाया जातस्य मलस्य' चत्वारि ॥[3]

पिञ्जरं पीतनं तालमालं च हरितालके ॥१०३॥

पिञ्ज वर्णविशेष राति । पीतवर्ण नयति । ड (वा० ३ २ १०१) । तालयति । 'तल प्रतिष्ठायाम्' (चु० प० से०) । आ अलयति । हरित वर्ण मालाति । पञ्च ॥ १०३ ॥[4]

गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु ।

गिरौ भवम् । नद्यादिभ्यश्च' (४ २ ९७) इति ढक् । अर्थ्यंम । यत् (३ १ ९७) । अश्मनो जातम् । शिलाया जतु । पञ्च 'शिलाजतु' ॥[5]

बोलगन्धरसप्राणपिण्डगोपरसाः समाः ॥१०४॥

बोलयति । बुल मज्जने' (चु० प० से०) । गन्धयान् रसोऽस्य[6] । [प्रा] णित्यनेन । अच् (३ १ १३४) । गोभिर्लालनाति । रम्यत । षट् 'बोल' [इति ख्यातस्य] ॥ १०४ ॥[7]

डिण्डीरोऽब्धिकफः फेनः

'डिण्डि (डी)' इति शब्दमीरयति । अब्ध कफ । स्फायते । 'फेनमीनौ' (उ० ३ ३) इति साधु । त्रीणि 'समुद्रफेन [स्य] ॥[8]

सिन्दूरं नागसम्भवम् ।

'स्यन्द सम्प्रसारण च'(उ० १ ६८) इत्यूरन् । नाग सीस सम्भवोऽस्य[9] । द्वे ॥[10]

नागसीसकयोगेष्टवप्राणि

नग भव । मिनोति सी । 'षिञ् बन्धने' (स्वा० उ० अ०) । वाहु-

1 Black antimony [4] 2 M स्वार्थे अण् 3 Calx of brass used as collyrium [4] 4 Yellow orpiment [4] 5 Red-chalk [5] 6 M रसोऽस्य 7 Gum myrrh [6] 8 Foam of sea [3] 9 M. सम्भवम् 10 Red lead [2]

लकाद्दीर्घं । सी स्यति । योगे धातुसम्बन्धे इष्टम् । वृधे (भ्वा० आ० से०) रन् (उ० २ २७) । अन्ये तु 'वप्राणि' इति पठन्ति । डुवप् (भ्वा० उ० अ०) । 'वृधिवपिभ्या रन् (उ० २ २७) । चत्वारि ॥[1]

त्रपु पिच्चटम् ॥१०५॥

रङ्गवङ्गे

त्रपते । 'शॄस्वृस्निहि—' (उ० १ १०) इत्यु । पिच्चयति । '[पि] च्च छेदन' (भ्वादि)। 'शकादिभ्योऽटन्' (उ० ४ ८१) ॥१०५॥ रङ्गति । वङ्गति । चत्वारि ॥[3]

अथ पिचुस्तूल

'पिचुमर्दने' (?)। मृगय्वादि (उ० १.३७)। 'तूल निष्कर्षे' (भ्वा० प० से०) । द्वे ॥ 'रुई' [लोके [॥[4]

अथ कमलोत्तरम् ।

स्यात्कुसुम्भ वह्निशिख महारजनमित्यपि ॥१०६॥

कमलादुत्तरम् । 'कुस सश्लेषणे' (दि० प० से०)। कुसेरुम्भ (उ० ४ १०६)। वह्निवान् शिखाऽस्य[5] । [र] ज्यतऽनेन । क्युन् (उ० २ ७९)। महच्च तद्रजन च । चत्वारि ॥१०६॥[6]

मेषकम्बल ऊर्णायु

मेषलोमकृत कम्बल । ऊर्णाऽस्याति[7] । 'ऊर्णाया युस्' (५ २ १२३)। द्वे ॥[8]

शशोर्ण शशलोमनि ।

शशस्य ऊर्णा । द्वे ॥[9]

मधु क्षौद्र माक्षिकादि

'मन ज्ञाने' (दि० आ० अ०) । 'फलिपाटि—' (उ० १ १८) इति साधु । क्षुद्राभि कृतम् । क्षुद्राभ्रमर—' (४ ३ ११९) इत्यञ् । मक्षिकाभि कृतम् । 'सज्ञायाम्' (४ ३ ११७) इत्यण । त्रीणि ॥[10]

---

1 Lead [4] 2 M रन्वादिभ्य न 3 Tin [4] 4 Cotton [2] 5 M शिखास्य 6 Safflower [4] 7 M ऊर्णास्यास्ति 8 Woolen blanket [2] 9 The hair of a rabbit [2] 10 Honey [3]

मधूच्छिष्टं तु सिक्थकम् ॥१०७॥

मधुन उच्छिष्टम् । 'षि (सि) च क्षरणे' (तु० उ० अ०) । 'पातृतु-दिवचि—' (उ० २ ७) इति स्थक् । द्वे 'मोम' [लोके] ॥१०७॥[1]

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।

नैपाली कुनटी गोला

मनःशब्दवाच्या शिला । मनसा गुप्ता । मनःशब्देन हूयते । 'आतश्च—' (३ ३ १०६) इत्यङ् । नागाना जिह्वेव । नेपाले भवा । कुत्सिता नटीव । गा दीप्ति लाति । सप्त 'मयनशिल' [लोक] ॥[2]

यवक्षारो यवाग्रज ॥१०८॥

पाक्य

यवाना क्षार । यवाग्राज्जाता । पाके साधु । त्रीणि 'य (ज) वाखार' [लोके] ॥[3]

अथस्वर्जिकाक्षार कापोत॰ सुखवर्चक ।

सौवर्चलं स्याद्रुचकम्

स्वर्जिकारस [ज क्षार । क] पोत-वर्णोऽस्यास्ति[4] । सुख वर्चयति । 'वर्च दीप्तौ (भ्वा॰ आ॰ से॰) । सुवर्चलाया इदम् । रोचते । क्वुन् (उ० २ ३२) । पञ्च 'साजीखार' [लोके] ॥[5]

त्वक्क्षीरी वशरोचना ॥१०९॥

त्वचो वशात् क्षीरमस्या । वशो रोच्यनेऽनया[6] । द्वे 'वशलोचन [स्य]' ॥१०९॥[7]

शिग्रुज श्वेतमरिचम्

शिग्रोर्जातम् । श्वेत मरिचमिव । शोभाञ्जनबीजस्य द्वे ॥[8]

मोरट मूलमैक्षवम् ।

मुरति । 'मुरवेष्टन' (तु० प० से०) । 'शकादिभ्योऽटन्'[9] (उ० ४ ८१) । इक्षोरिदम् । एकम् ।[10]

---

1 Lees' wax [2] 2 Red arsenic [7] 3 Saltpetre [3] 4 M वर्णोऽस्यास्ति 5 Natron [5] 6 M रोच्यतेऽनया 7 The manna of bamboos [2] 8 The seed of s'obhāñjana (drum stick) [2] 9 M शकादिभ्योऽटन् । 10 The root of sugarcane [1]

ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि ॥११०॥

ग्रन्थिरिव । पिप्पल्या मूलम् । चटकायाः शिर इव । त्रीणि ॥११०॥[1]

गोलोमी भूतकेशो ना

गोलोम्नामियम् । संज्ञापूर्वकत्वान्न वृद्धिः । भूतानां केश इव । द्वे ॥[2]

पत्त्राङ्गं रक्तचन्दनम् ।

पत्त्रायाङ्गमस्य । द्वे ॥[3]

त्रिकटु त्र्यूषणं व्योषम्

त्रयाणां कटूनां समाहारः । त्रयाणामूषणानां समाहारः । 'उष दाहे' (भ्वा० प० से०) । विशेषेण ओषति । 'उष दाहे' (भ्वा० प० से०) । त्रीणि 'त्रिकटु' [इति ख्यातस्य] ॥[4]

त्रिफला तु फलत्रिकम् ॥१११॥

इति वैद्यवर्गः ॥९॥

त्रयाणां फलानां समाहारः । द्वे ॥ १११ ॥[5]

इति वैद्यवर्गः ॥ ९ ॥

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः ।

'शुच शोके' (भ्वा० प० से०) । 'शुचेर्दश्च' (उ० २.१९) इति रक्, दीर्घश्च । अवरः पश्चाद् वर्णोऽस्य । वृषं धर्मं लाति । जघन्यात्पादाज्जाताः । चत्वारि ॥[1]

अम्बष्ठो वैश्याद् द्विजन्मनोः ।

अम्बे तिष्ठति ॥[1]

शूद्राक्षत्रिययोरुग्रः

'उच समवाये' (दि० प० से०) । 'ऋज्रेन्द्र—' (उ० २ २८) इति साधु ॥[2]

मागध क्षत्रियाविशोः ॥२॥

'मगध वेष्टने' । अच् (३ १ १३४) । प्रज्ञादि (५ ४.३८) ॥ २ ॥[3]

माहिष्योऽर्याक्षत्रिययो

अर्या वैश्या क्षत्रियश्च, तयो सुत । महिष्या [साधुः] ॥[4]

क्षत्तार्याशूद्रयाः सुत ।

क्षदति । 'क्षद सम्भृतौ' । '—शसिक्षदादिभ्य —' (उ० २ ९३) इति तृच् । अर्याऽत्र[5] क्षत्रिया, 'क्षत्रिया च शूद्रजे' इति वचनात् ॥[6]

ब्राह्मण्या क्षत्रियात्सूत

षूङ क्त (३ ४ ७२) ॥[7]

तस्या वैदेहको विश ॥३॥

ब्राह्मण्या वैश्यात्, विदेहेषु भव ॥ ३ ॥[8]

रथकारस्तु माहिष्यात्करण्या यस्य सभवः ।

रथ करोति ॥[9]

स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन य ॥४॥

वृषलेन शूद्रेण ॥ ४ ॥[10]

---

1 The offspring of a man of the Brahmana and women of the Vais'ya caste [1] 2 The descendant of a Kṣatriya father and Sūdra mother [1] 3 The offspring of a vais'ya father and Kṣatriya mother [1] 4 The descendant sprung from a Kṣatriya father and Vais'ya mother [1] 5 M क्षत्र 6 The man born of a Sūdra man and Kṣatriya woman [1] 7. The son of a Kṣatriya by a Brāhmaṇa woman [1] 8 The son of a Vais'ya by a Brāhmaṇa woman [1] 9 The son of a Māhiṣya man by a Karaṇī woman [1] 10 The man born of a Sudra father and Brāhmana mother [1]

कारुः शिल्पी

करोति। 'कृवापा—' (उ० १.१) इत्युण्। शिल्पमस्यास्ति। द्वे ॥[1]

संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः।

शिल्पिभिः समुदितैः श्रेणि.। 'श्रिञ् सेवायाम्' (भ्वा० उ० से०)। 'वहि श्रि—' (उ० ४.५१) इति निः। एकम् ॥[2]

कुलकः स्यात्कुलश्रेष्ठी

कुलं कायति। द्वे 'महरा' ॥[3]

मालाकारस्तु मालिकः ॥५॥

मालाऽस्यास्ति[4]। 'व्रीह्यादिभ्यश्च' (५.२.११६) इति ठन् ॥ ५ ॥[5]

कुम्भकारः कुलालः स्यात्

कुं भूमिं लालयति। द्वे ॥[6]

पलगण्डस्तु लेपकः।

पलं मांसमिव मृदं गण्डति। लिम्पति। द्वे 'राज' [लोके] ॥[7]

तन्तुवायः कुविन्दः स्यात्

तन्तून् वयति। 'ह्वावामश्च' (३.२.२) इत्यण्। कुं भुवं विन्दति। द्वे 'जोल्हा' [लोके] ॥[8]

तुन्नवायस्तु सौचिकः ॥६॥

तुन्नं छिन्नं वयति। सूची शिल्पमस्य। द्वे 'दरजी' [लोके] ॥ ६ ॥[9]

रङ्गाजीवश्चित्रकारः

रङ्गेणाजीवति। द्वे 'चितेर' [लोके] ॥[10]

शस्त्रमार्जोऽसिधावकः।

शस्त्रं मार्ष्टि। अण् (३.२.१.)। असिं धावति। 'सिकिलीगर' द्वे ॥[11]

पादूकृच्चर्मकारः स्यात्

पादूः पादत्राणं करोति। द्वे ॥[12]

---

1. Craftsman [2] 2. A company of craftsmen of the same caste [1] 3. An artisan of eminent birth [1] 4. M. मालास्यास्ति 5. Gardener or garland-maker [2] 6. Potter [2] 7. Mason [2] 8. Weaver [2] 9. Tailor [2] 10. Painter [2] 11. Furbisher of weapons [2] 12. Shoe-maker [2].

व्योकारो लोहकारक ॥७॥

'व्यो' इत्यव्यय लोहवाचि ॥ ७ ॥[1]

नाडिंधम स्वर्णकार कलादो रुक्मकारक.[2] ।

नाडी वशनाली धमति । 'खित्यनव्ययस्य (६ ३ ६६) इति ह्रस्व । कलामादत्ते । चत्वारि ॥[3]

स्याच्छाङ्खिक काम्बविक

शङ्ख शिल्पमस्य । कम्बु शिल्पमस्य । द्वे ॥[4]

शौल्बिकस्ताम्रकुट्टक ॥८॥

शुल्ब शिल्पमस्य । ताम्र कुट्टयति । द्वे 'ठठेर [लोके] ॥[5]

तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट् ।

तक्षो रत्नकर्ता जटितो रत्नविक्रयी' 'जवाहिरी'' । तक्षति । 'युवृपि—' (उ० १ १५७) इत्यादिना कनिन् । वर्धं छेदन (चु० प० स०) । वर्धं करोति । बाहुलकाड्डि । त्वक्षू तनूकरणे (भ्वा० प० से०) । पञ्च ॥[6]

ग्रामाधीनो ग्रामतक्ष

ग्रामतक्षा । 'ग्रामकौटाभ्या तक्ष्ण (५ ४ ९५) इति टच्[7] ॥[8]

कौटतक्षोऽनधीनक. ॥९॥

कुट्या भव । कौट स्वतन्त्र ॥ ९ ॥[9]

क्षुरिमुण्डिदिवाकीर्तिनापितान्तावसायिन ।

क्षुरोऽस्यास्ति[10] । मुण्ड करोति । 'मुण्डमिश्र—' (३ १ २१) इति णिच् । ग्रह्यादित्वात् (३ १ १३४) णिनि । दिवाकीर्तिरस्य । न आपित । 'आप्लृ व्याप्तौ' (स्वा० प० अ०) । णिजन्तात् क्त । अन्तमवसातु शीलमस्य । स्य तेर्णिनि (३ २ ७८) । 'आतो युक्' (७ ३ ३३) । पञ्च ॥[11]

निर्णेजक स्याद्रजक

निर्णेनेक्ति । ण्वुल् (३ १ १३३) । रजति । द्वे 'धावी' [ग्राव] ॥[12]

---

1 Blacksmith [2] 2 B and K. रुक्मकारके 3 Goldsmith [4] 4 Dealer (in shell) [2] 5 Coppersmith [2] 6 Carpenter [5] 7 M इत्यच् 8 A village Carpenter [2] 9 An independent Carpenter [1] 10 M क्षुरास्यास्ति 11 Barber [5] 12 Washerman [2]

शौण्डिको मण्डहारकः ॥१०॥

शुण्डा सुरा पण्यमस्य। मण्डं सुराग्रं हरति। द्वे 'कलवार' [लोके] ॥ १० ॥[1]

जाबालः स्यादजाजीवः

जवं वेगमालाति जवालोऽजः[2], तस्यायम्। अजा आजीवोऽस्य[3]। द्वे ॥[4]

देवाजीवस्तु[5] देवलः।

देवैराजीवति। देवं देवस्वत्वम् [आलाति]। 'वात—' (३ ३ १०६) कः ॥[6]

स्यान्माया शाम्बरी

शम्बरस्य दैत्यभेदस्येयम्। द्वे ॥[7]

मायाकारस्तु प्रातिहारिकः ॥११॥

प्रतिहारो व्याजः प्रयोजनमस्य। 'ऐन्द्रजालिकस्य' द्वे ॥११॥[8]

शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः।

भरता इत्यपि नटाः

शिलालिना प्रोक्तं नटसूत्रमधीयते। 'पाराशर्य—' (४ ३ ११०) इति णिनिः। शिलूषस्य ऋषेरपत्यम्। जायया जीवन्ति। कृशाश्वेन प्रोक्तं नटसूत्रमधीयते। भरतस्य मुनेः शिष्याः। नटति। षट् ॥[9]

चारणास्तु कुशीलवाः ॥१२॥

चारयन्ति कीर्तिम्। कुशीलं वान्ति। 'वन्दिविशेषस्य' द्वे ॥ १२ ॥[10]

मार्दङ्गिका मौरजिकाः

मृदङ्गवादनं शिल्पमस्य। मुरजः शिल्पमस्य। द्वे ॥[11]

पाणिवादास्तु पाणिघाः।

पाणिं वादयति। पाणिं हन्ति। 'पाणिघताडघौ शिल्पिनि' (३ २ ५५) द्वे ॥[12]

---

1 Distiller and seller of spiritous liquors [2] 2 M जवालोऽजः 3 M आजीवोस्य 4 Goat herd [2] 5 B and K देवाजीवी 6 The attendant upon an idol [2] 7 Jugglery [2] 8 Juggler [2] 9 Actor [6] 10 Singer dancer [2] 11 Drummer [2] 12 Striking with the hand, a drummer or one who plays upon any hand instrument [2]

वेणुध्माः स्युर्वैणविकाः

वेणुं धमन्ति । वेणोर्विकारो वैणवम् । 'ओरञ्' (४ ३ १३९) । वैणवं शिल्पमस्य । द्वे ॥[1]

वीणावादास्तु वैणिकाः ॥१३॥

वीणा शिल्पमस्य । द्वे ॥[2]

जीवान्तकः शाकुनिकः

शकुनान् हन्ति । 'पक्षिमत्स्य—' (४ ४ ३५) इति ठक् । द्वे 'चिरैमार' [लोके] ॥[3]

द्वौ वागुरिकजालिकौ ।

वागुरया जालेन च चरति । द्वे ॥[4]

वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥१४॥

वीतंसेन मृगादिबन्धनादिना चरति । कूटेन मृगादिबन्धनयन्त्रेण चरति । मांसं पण्यमस्य ॥ १४ ॥[5]

भृतको भृतिभुक्कर्मकरो वैतनिकोऽपि सः ।

भृञ् (भ्वा० उ० अ०) क्त (३ २ १०२) । भृतिं वेतनं भुङ्क्ते । वेतनेन जीवति । ठक् (४ ४ १२) ॥[6]

वार्तावहो वैवधिकः

वार्तां वहति । ठक् । द्वे 'कबरि (डि) ओ] लोके] ॥[7]

भारवाहस्तु भारिकः ॥१५॥

भारोऽस्यास्ति[8] । 'अत —' (५ २ ११५) म (ठ) न् ॥१५॥[9]

विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः
निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥१६॥

विगतो वर्णोऽस्य[10] । पामान राति । निकृष्टामी लक्ष्मीं चिनोति । प्रकृतौ भव । सज्जनेभ्यः पृथग्भूतो जनः । नितरां हीनः । अपकृष्टे सीदति । अच्

1 Flute player [2] 2 Lutanist [2] 3 Bird-Catcher or hunter of birds [2] 4 Fowler [2] 5 Seller of meat [3] 6 A hired labourer [4] 7 Pedlar [2] 8 M मारोस्यास्ति 9 Porter [2] 10 M वर्णोम्य ।

(३.१.१३४)। जालं करोति। बाहुल्यान्म.। क्षुधं लाति। कः (३.२.३)। इतं शीतं राति। दश ॥१८॥[1]

भृत्ये दासेयदासेरदासगोप्यकचेटकाः।
नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥१७॥

भ्रियते। 'भृञोऽसंज्ञायाम्[2]' (३.१.११२) इति क्यप्। दास्या अपत्यम्। 'द्व्यचः' (४.१.१२१) इति ढक्। 'क्षुद्राभ्यो वा' (४.१.१३१) इति ढ्रक् च। दास्यते। 'दासृ दाने' (भ्वा० उ० से०)। गुपेः (भ्वा० प० से०) ण्यतः (३.१.१२४) कः। चिट परप्रैष्ये' (भ्वा० प० से०)। कृञादिभ्यो वुन् (उ० ५)। नियुज्यते। ण्यत् (३.१.१२४)। किंचित् करोति। 'कियत्त दग्रहपु (वा० ३.३.२१) इत्यप्। प्रेष्यते। 'प्रादूहो—' (वा० ६.१.८९) इति वृद्धिः। भुज्यते। 'रचिभुजिभ्यां किष्यन्' (उ० ४.१७८)। परिचरति। ण्वुल् (३.१.१३३) ॥१७॥[3]

पराचितपरिस्कन्दपरजातपरैधिताः

परेण आश्रितः। परिस्कन्दति। अच् (३.१.१३४)। 'परेश्च' (८.३.७४) इति वा षः। परस्माज्जातः परैरेधित.। चत्वारि ॥[4]

मन्दस्तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः ॥१८॥

'मदि स्तुत्यादौ' (भ्वा० आ० से०)। अच् (३.१.१३४) तुन्दं[5] परिमार्ष्टि। 'तुन्द शोकयोः—' (३.२.५) इति क.। न लसति। अच् (३.१.१३४)। स्वार्थे ष्यञ् (वा० ५.१.१२४)। शीतं करोति। 'शीतोष्णाभ्यां कारिणि—' (५.२.७२) इति कः। उष्णादन्य. ॥१८॥[6]

दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च।

दक्षते। 'दक्ष वृद्धौ' (भ्वा० आ० से०) अच् (३.१.१३४)। चत्यते। 'चते याचने' (भ्वा० उ० से०)। चते उरच् (उ० १.३८)। 'पिश गमापौ' (तु० प० से०)। पेशं लाति। पाटयति। 'फलिपाटि—' (उ.१.१८) इति साधुः। सुष्ठु उत्थानमुद्योगोऽस्य। उष्णत्वमस्यास्ति ॥[7]

1. A low or mean man [10] 2. M. भृञो सञ्ज्ञायाम्
3. Servant 4. [11] One brought up by other [1] 5. M. तुन्द
6. A lazy man [6] 7. A clever or expert man [6].

चण्डालप्लवमातङ्गदिवाकीर्तिजनगमाः ॥१९॥
निषादश्वपचावन्तेवासिचाण्डालपुक्कशाः॥[1]।

चण्डते । 'पतिचण्डिभ्यामालञ्' (उ० १ ११७)। प्लवते । अच् (३ १ १३४)। मतङ्गस्यापत्यम् । दिवा कीर्तिरस्या । अधार्मिकान् जनान् गच्छति ॥ १९ ॥ निषीदति पापमस्मिन् । घञ (३ ३ १२१)। श्वानं पचति । अच् (३ १ १३४)। ग्रामादेरन्ते वसति । णिनि (३ २ ७८)। प्रज्ञाद्यणि चाण्डाल — अपि इत्येके । तन्न । 'कुलालवरुडकर्मारनिषादचण्डालमित्रामित्रेभ्यः छन्दसि (५ ४ ३६ सूत्रे) इति वार्तिकेन छन्दस्यण्विधानवैयर्थ्यात् । पुरं कषति । पृषोदरादि (६ ३ १०९)। दश ॥[2]

भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः ॥२०॥

किरातादयो म्लेच्छाश्च चण्डालजातयः । 'कॄ विक्षेपे' (तु०प०से०)। किर- मतति । शवं राति । पुरि इन्दति । म्लेच्छति । अच् (३ १ १३४) ॥ २० ॥[3]

व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ।

विध्यति । श्याद्व्यधा— (३ १ १४१) इति णः । मृगवधेनाजीवति । मृगान्वधार्थं याति । लुब्ध इव ॥[4]

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ॥२१॥
शुनको भषकः श्वा स्यात्

कुले भवः । 'कुक्षिकुलि-' (४ २ ९६) इति ढकञ् । सरमा शुनी, तदप- त्यम् । कुक्कु' शब्दं राति ॥ २१ ॥ शुनति । 'शुन गतौ' (तु० प० से०)। क्वुन् (उ० २ ३२)। भषति । भष भर्त्सने (भ्वा० प० से०)। 'टुओश्वि-' (भ्वा० प० से०)। श्वन्नुक्षन्— (उ० १ १६०) इति साधु । सप्त ॥[5]

अलर्कस्तु स योगितः ।

अलमर्च्यते । युगि वर्जने (भ्वा० प० से०)। श्वन्तात् स्त (३ २ १०२) 'मत्तुन' एकम् ॥[6]

श्वा विश्वकद्रुर्मृगयाकुशलः

मृगयायां कुशलः । श्वा । विश्वकं द्रवति । एकम् ॥[7]

---

1 B and K पुक्कसाः 2 Candala 3 Three tribes, namely Kirata, S'abara and Pulinda (1 each 4 Hunter [4] 5 Dog [7 6 A mad dog [2] 7 Hound 1]

सरमा शुनी ॥२२॥

सरं माति । शुनी । गौरादिः (४.१.४१) । ङीष् ॥ २२ ॥[1]

विट्चरः शूकरो[2] ग्राम्यः

विशं विष्टां चरति । एकम् ॥[3]

वर्करस्तरुणः पशुः ॥[4]

आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् ॥२३॥

आच्छ (छिद्य) द्यतेऽनेन[5] । मृगा व्यय्यन्तेऽत्र[6] । 'व्यय गतौ' (भ्वा० उ० से०) । डः (वा० ३.२.१०१) । आखिट्यते । 'खिट त्रासे' (भ्वा० प० से०) । मृग्यतेऽत्र[7] । 'परिचर्यामृगया—' (वा० ३.३.१०१) इति साधुः ॥२३॥[8]

दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः ।

दक्षिणे अरुरस्य । दक्षिणे ईर्ममस्य । 'दक्षिणेर्मा लुब्धयोगे' (५.४.१२६) इति साधु ॥[9]

चौरैकागारिकस्तेनदस्युतस्करमोषकाः ॥२४॥

प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः ।

चुरा शीलमस्य । 'छत्रादिभ्यो णः' (४.४.६२) । एकागारं प्रयोजनमस्य । 'एकागारिकट् चोरे' (५.१.११३) । स्तेनयति । 'स्तेन चौर्ये' (चु० उ० से०) । 'दसु उपक्षये' (दि० प० से०) । 'जनिमनिदसिभ्यो युः' (उ० ३.२०) । तत्करोति । 'तद्बृहतो :—' (ग० ६.१.१५७) इति साधुः । मुष्णाति । ण्वुल् (३.१.१३३) ॥२४॥ प्रतिरोद्धुं शीलमस्य । णिनिः (३.२.७८) । पराम् आस्कन्दितुं शीलमस्य । पटत् चरति पटच्चरम्, तस्यायम् । 'मल धारणे' (भ्वा० आ० से०) । इन् (उ० ४.११७) । मलिं म्लोचति । 'म्लुच स्तेये' (भ्वा० प० से०) । टः ॥[10]

चौरिकास्तैन्यचौर्ये च स्तेयम्

चौरस्य भावः, कर्म वा । मनोज्ञादित्वात् (५.१.१३३) वुञ् । स्तेनस्य

1. Bitch [2] 2. B. सूकरो 3. A village hog [1] 4. Any young animal [1] 5. M. आच्छद्यतेनेन 6. M. व्यय्यन्तेत्र 7. M. मृग्यतेत्र 8. Hunting [4] 9. Wounded on the right side (a deer) [1] 10. Thief [10].

भाव ॥ ष्यञ् (५ १ १२४)। चौरस्य कर्म। 'स्तेनाद्यन्नलोपश्च' (५ १ १२५) चौरकर्मण ' चत्वारि ॥[1]

लोप्त्रं तु तद्धनम् ॥२५॥

लुप्यते। ष्ट्रन् (उ० ४ १५८)। एकम् ॥२५॥[2]

वीतंसस्तूपकरणं बन्धने मृगपक्षिणाम्।

वितस्यते। 'मृगादिबन्धनसाधनस्य' एकम् ॥[3]

उन्माथः कूटयन्त्रं स्यात्

उन्मथ्यतेऽनेन[4]। घञ् (३ ३ १२१)। कूटस्वरूप यन्त्रम्। 'मृगादिबन्धन यन्त्रस्य' द्वे ॥[5]

वागुरा मृगबन्धनी ॥२६॥

अवा [गुरते]। गुरी हिंसायाम्' (तु० प० से०)। मृगो बध्यतऽनया[6]। 'जालविशेषस्य' द्वे ॥२६॥[7]

शुल्बं वराटकः स्त्री तु रज्जुस्त्रिषु वटी गुणः।

शुल्बयति। 'शुल्ब विसर्गे' (चु० प० से०)। वरमटति। सृज्यते। 'सृजेरसुम् च' (उ० १ १५)। चारसलोप। वटति। 'वट वेष्टने (भ्वा० प० से०)। गुण्यते। 'गुण आमन्त्रणे (चु० उ० से०)। पञ्च ॥[8]

उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ॥२७॥

उद्घाटयतेऽनेन[9]। 'घट सघाते' (चु० उ० से०)। घटीना यन्त्रम्। प्रहे कूपात्। सलिलमुद्वाह्यतेऽनेन[10]। द्वे ॥२७॥[11]

पुंसि वेमा वापदण्डः

वयति, अनेन। वेञ सर्वत्र' (उ० ४ १४९) इति मनिन्। डुवप् (भ्वा उ० से०)। घञ् (३ ३ १८)। वापस्य दण्ड। केचित् 'वाय' इत्यन्तस्थमध्य पठन्ति। तत्र वेञो घञि 'आतो यु[क्]—' (७ ३ ३३)। द्वे ॥[12]

---

1 Theft [4] 2 The property stolen [1] 3 A net for Continuing beasts and birds [7] 4 M उन्मथ्यतेऽनेन 5 A trap for deers, birds &c [2] 6 M बध्यतेऽनया 7 A trap for catching deers [2] 8 Rope [5] 9 M उद्घाट्यतेऽनेन 10 M सलिलमुद्वाह्यतेऽनेन 11 The rope and bucket for a well [2] 12 Loom [2]

सूत्राणि नरि तन्तवः ।

सूत्र्यते । 'सूत्र वेष्टने' (चु० उ० से०) । नरि पुंसि । तन्यते । 'सितनि–' (उ० १ ६९) इति तुन् । द्वे ॥[1]

वाणिर्व्यूतिः स्त्रियौ तुल्ये

वण शब्दे' चुरादि । 'अच इः' (उ० ४ १३८) । विशिष्टा ऊतिः । वेञ क्तिन् (३ ३ ९७) । 'वस्त्रादिव्यूते ' द्वे ॥[2]

पुस्तं लेप्यादिकर्मणि ॥२८॥

'पुस्त आदरादौ' (चु० प० से०) । एकम् ॥२८॥[3]

पाञ्चालिका[4] पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता ।

पञ्चालदेशे भवा । जनपदतदवध्योः' (४ २ १२४) इति वुञ् । पुत्रीव । द्वे ॥[5]

पिटकः पेटकः

पेटति । 'पिट सङ्घाते' (भ्वा० प० से०) । अच् । ण्वुलि (३ १ १३३) पेटक । द्वे 'पेटारी' [लोके] ॥[6]

पेटा मञ्जूषा

मज्जति । 'मस्जेर्नुम् च' (उ० ४ ७७) इत्यूषन् । द्वे 'सदूप (ख)' लोके][7] । 'चत्वार्येकार्थानि' इत्यन्ये ।

अथ विहङ्गिका ॥२९॥

भारयष्टिः

विहङ्ग इव ॥२९॥ भारस्य यष्टिः । द्वे 'कावडि' [लोके] ॥[8]

तदालम्बि शिक्यं काचः

तामालम्बितुं शीलमस्य । शक्नोति । पृषोदरादि (६ ३ १०९) । 'कच बन्धने' (भ्वा० आ० से०) घञ् (३ ३ १२१) द्वे ॥[9]

अथ पादुका ।

पादूरुपानत् स्त्री

पद्यते । णिच् (उ० १ ८५) स्वार्थे कन् । पाद उपनह्यते । 'णह बन्धने'

---

1 Thread [2] 2 Weaving [2] 3 Plastering, painting, anointing [1] 4 B prefers पञ्चालिका 5 Doll [2] 6 Basket [2] 7 Box [2] 8 A pole for carryin burdens [2] 9 A string so fastened to the yoke as to support burdens [2]

(दि० उ० अ०) । क्विप् (वा० ३ ३ ९४) । 'नहिवृति—' (६ ३ ११६) इति दीर्घं ॥[1]

सैवानुपदीना पदायता ॥३०॥

पदस्यानु । अनुपद बद्धा । 'अनुपदसर्वा–' (५ २ ९) इति ख । पदायता। पदवद्दीर्घा । 'मोजा' लोके ॥ ३० ॥[2]

नध्री वध्री वरत्रा स्याद्

नह्यतेऽनया[3] । 'दाम्नी–' (३ २ १८२) इति ष्ट्रन् । वर्धते । 'वृधिवपिभ्या रन्' (उ० २ २७) । वर त्रायते । 'चर्ममयरज्जो' त्रीणि ॥[4]

अश्वादेस्ताडनी कशा ।

ताड्यतेऽनया । 'तड आघाते' (चु० प० से०) । कशति । 'कश शब्दे' । एक 'कोडा' [लोके] ॥[5]

चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ॥३१॥

चण्डालेन कृता । 'कुल्[ला] दिभ्यो वुञ्' (४ ३ ११८) । 'कडि मदे' (भ्वा० प० से०) । बाहुलकादोलच् । कण्डोलस्य चण्डालस्य वीणा ॥ त्रीणि 'किंगिरी' [लोके] ॥ ३१ ॥[6]

नाराची स्यादेषणिका

स्वल्पो नाराचो बाणभेद । गौरादि (४ १ ४१) । इष्यतेऽनया । ल्युट् (३ ३ ११७) । क । 'सुवर्णतुलायाः' द्वे । 'काटा' [लोके] ॥[7]

शाणस्तुनिकषः कषः ।

शाण्यते । 'शाण दाने' (भ्वा० प० से०) । घञ् (३ ३ १९) । निकषति । 'कष हिंसायाम्' । (भ्वा० प० से०) । 'सुवर्णपरीक्षापाषाणस्य' त्रीणि । 'कसवटी' [लोके] ॥[9]

व्रश्चनः पत्रपरशुः

वृश्च्यतेऽनेन[10] । पत्रमिव परशु । 'सुवर्णादिच्छेदनद्रव्यस्य' द्वे । 'सुहान' [लोके] ॥[11]

---

1 Shoe, slipper [3] 2 A shoes of the length of the foot [1] 3 M नह्यतेऽनया 4 A leather strap [3] 5 Whip [1] 6 The lute of a Caṇḍāla [3] 7 The scale of a gold smith [2] 8 M एवं 9 Touch stone [3] 10 M वृश्च्यतेऽनेन 11 File [2]

ईषिका[1] तूलिका समे ॥३२॥

ईषति । 'ईष उञ्छे' (भ्वा० प० से०) क्वुन् (उ० २ ३२) । तूल निष्कर्षे (भ्वा० प० से०) । 'वारणादिशलाकाया' द्वे ॥ ३२ ॥[2]

तैजसावर्तनी मूषा

तेजसो[3] विकार । सुवर्णादिरावर्त्यते पच्यतेऽस्याम्[4] । 'मूष स्तेये' (भ्वा० प० से०) । क (३ ३ १२५) । द्वे 'घरिया' [लोके] ॥[5]

भस्त्रा चर्मप्रसेविका ।

'भस दीप्तौ' (जु० प० से०) । 'हुयामा—' (उ० ४ १६७) इति ष्ट्रन् । चर्मणा प्रसीव्यते । द्वे ॥[6]

आस्फोटनी वेधनिका

आस्फोट्यतेऽनया[7] । विध्यतेऽनया[8] । 'मुक्तादिवेधिन्या' द्वे ॥[9]

कृपाणी कर्तरी समे ॥३३॥

कृपामणति । वर्तनं वर्तं त राति । द्वे ॥[10]

वृक्षादनो[11] वृक्षभेदी

वृक्षमत्ति । वृक्ष भेत्तु शीलमस्य । 'काष्ठभक्षणस्य' द्वे ॥[12]

टङ्कः पाषाणदारणः ।

टङ्कयति । 'टकि बन्धे' [चुरादि] । पाषाणो दार्यतेऽनेन[13] । द्वे 'टाकी' [लोके] ॥[14]

क्रकचोऽस्त्री करपत्रम्

'क्र' इति कचति । 'कच शब्दे' (भ्वा० आ० से०) । करात्पतति । द्वे 'आरा' [लोके] ॥[15]

आरा चर्मप्रभेदिका ॥३४॥

आ समन्तात् । 'आरा शस्त्र्याम्' इति साधु । चर्मण प्रभेदिका । द्वे 'रापी' [लोके] ॥ ३४ ॥[16]

---

1 K एषिका 2 The brush or pencil of a painter [2] 3 M तैजसा 4 M पच्यतेऽस्याम् 5 Crucible [2] 6 Bellows [2] 7. M आस्फोट्यतेऽनया 8 M विध्यतेऽनया 9 A sharp-pointed instrument for perforating shells and jewels [2] 10 Scissor [2] 11 B वृक्षादनी 12 Hatchet [2] 13 M दार्यतेऽनेन 14 The chisel of a stone-cutter [2] 15 Saw [2] 16 The awl of a shoemaker [2]

सूर्मी स्थूणायः प्रतिमा

शोभना ऊर्मिरस्या । गौरादि (४.१ ४१)। तिष्ठति । 'रास्नासास्ना-स्थूणा—' (उ० ३ १५) इति साधु । अयसो लोहस्य प्रतिमा । त्रीणि ॥[1]

शिल्पं कर्म कलादिकम् ।

'शील समाधौ' (भ्वा० प० से०)। 'शष्पशिल्प-' (उ० ३ २८) इति साधु । कला नृत्यगीतादिस्तत् पष्टि ॥ एकम् ॥[2]

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ॥३५॥

प्रतिकृतिरर्चा पुंसि प्रतिनिधिः

प्रतिकृत्य मीयतेऽनेन[3]। प्रतिकृतिर्बिम्बस्य । प्रतियात्यतेऽनया[4] । यत निकारोपस्कारयो' [चुरादिः] ॥३५॥ प्रकृष्टा च्छाया । प्रकृष्टा कृति । 'अर्च पूजायाम्' (भ्वा० प० से०)। 'गुरोश्च—' (३ ३ १०३) इत्यः । प्रतिनिधीयते सदृशीक्रियते । 'प्रतिमाया ' अष्टौ ॥[5]

उपमोपमानं स्यात् ।

'उपमातेर्माने अङ्' (३ ३ १०६)। द्वे ॥[6]

वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् ॥३६॥

साधारणः समानश्च

समति । 'सम वैकलव्ये' (भ्वा० प० से०)। तुलया संमित. । समान इव पश्यति । दृग्दृत्—' (६ ३.८६) इति क्विन्विचनो क्सश्च ॥३६॥ सह आधारणेन वर्तते । समानमानमस्य । सप्त वाच्यलिङ्गा अमी ॥[7]

स्युरुत्तरपदे त्वमी ।

निभसंकाशनीकाशप्रतीकाशोपमादयः ॥३७॥

निभादय उत्तरपदस्था एव सदृशवचना वाच्यलिङ्गा. । पितृनिभ पुत्र, मातृनिभा कन्या । नियत भाति । स काशते । नितरा काशते । 'इक. काशे' (६.३.१२३) इति दीर्घं ॥३७॥[8]

---

1. An iron image or statue [3] 2. Art (fine or mechanical) [1] 3 M मीयतेनेन 4 M. प्रतियान्यतेनया 5 Image, Picture [8] 6 Resemblance or similarity [2] 7. Equal (as a thing to another) [5] 8 Like (only when Compounded) [5]

कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम्।
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ॥३८॥

कर्मणा सम्पद्यते। 'कर्मवेषाद्यत्' (५ १ १००)। कर्माणि विधीयन्तेऽनया[1]। भ्रियतेऽनया[2]। संज्ञायां समज—' (३ ३ ९९) इति क्यप्। क्तिनि भृतिः। भृञ (भ्वा० उ० अ०) मनिन् (उ० ४ १४४)। वीयतेऽनेन[3]। 'वी गत्यादौ' (अ० प० अ०)। 'वीपतिभ्यां तनन्' (उ० ३.१५०)। भरणे साधु। भ्रियतेऽनेन[4]। मूलेनानाम्यम्। निर्विशन्ति (न्त) अनेन। यत्। पण्यते। नित्य पण—' (३ ३ ६६) इत्यप्। एकादश ॥३८॥[5]

सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा।
गन्धोत्तमा प्रसन्नेराकादम्बर्यः परिस्रुता ॥३९॥
मदिरा कश्यमद्ये चापि[9]

सुष्ठु राति। हलिनो बलस्य प्रिया। हलत्यङ्गानि। 'हल विलेखने' (भ्वा० प० से०)। ज्वलादि (३ १ १४०)। परितः स्रवति। क्विप्। तुक् (६ १ ७१)। वरुणाल्योऽपि[7] वरुण, तस्यात्मजा। गन्धेनोत्तमा। सीदतः क्त (३ ४ ७२)। इ काम राति। कादम्ब राति। गौरादि (४ १ ४१)। परिस्रुता ॥१९॥ माद्यन्त्यनया। 'इषिमदिमुदि—' (उ० १ ५१) इत्यादिना किरच्। कशामर्हति कश्यम्[8]। माद्यन्त्यनेन। 'गदमद—' (३ १ १००) इति यत्। त्रयोदश ॥[9]

अवदंशस्तु भक्षणम्।

अवदश्यते। 'पानरुचिजननभक्षणस्य' एकम् ॥[10]

शुण्डा पानं मदस्थानम्

शुन्यत शुण्डा। 'शुन गतौ' (तु० प० से०)। 'उमन्ताड्' (उ० १ ११४)। निपात्य। मदस्य स्थानम्। त्रीणि 'पानगृहस्य' ॥[11]

मधुवारा मधुक्रमाः ॥४०॥

मधुनो वार। मधुन क्रम। 'मधुपानावसरस्य' द्वे ॥४०॥[12]

---

1 M विधीयन्तेनया 2 M भ्रियतेनया 3 M वीयतेनन 4 M भ्रियतेन 5 Wage, salary, remuneration [11] 6 B कश्यमद्येऽपि 7 M वरुणात्मजाऽपि 8 M कश्य 9 Wine [13] 10 Any pungent food which excites thirst [1] 11 Dram shop [3] 12 Tippling [2]

मध्वासवो माधवको मधुमाध्वीकमद्वयोः ।

मधूकपुष्पं मधु, तस्यासव । मधुना कृत. । 'कुलालादिभ्यो वुञ्' (४.३. ११८) । मन्यते । 'फलिपाटि—' (उ० १ १८) इति साधु । मधुन इयं माध्वी । 'मृद्वीका द्राक्षा, तस्या विकार'—इत्यन्ये । अद्वयोः क्लीवम् । चत्वारि । 'द्वौ द्वौ' इत्यन्ये ॥[1]

मैरेयमासवः सी (शी) धुः

मिराया देशविशेषे भवम् । 'नद्यादिभ्यो ढक्' (४.२ ९७) । आसूयते । 'पूञ् अभिषवे' (स्वा० उ० अ०) । 'ऋदोरप्' (३ ३ ५७) । शेरतेऽनेन[2] । 'शीङोधुक्' (उ० ४ ३८) । त्रीणि ॥[3]

मेदको जगलः समौ ॥४१॥

मेद्यति । 'कृञादिभ्यो वुन्' (उ० ५ ३५) । भृश गलति । 'गल अदने' (भ्वा० प० से०) । यङ्लुगन्तादच् (३ १ १३४) । सज्ञापूर्वकत्वान्न दीर्घ. (७ ४.८३) ॥४१॥[4]

सधानं स्यादभिषव

धाञो ल्युट् (३ ३. ११३) । 'आस्रादिसध नस्य' द्वे ॥[5]

किण्व पुंसि तु नग्नहू. ।

'कण शब्दे' (भ्वा० प० से०) । 'उल्वादयश्च' (उ० ४ ९५) इति साधु. । नग्नस्य ह्वानम् । ह्वेञ् (भ्वा० उ० अ०) । क्विप् (वा० ३ ३ ९४) । 'नानाद्रव्यकृतसुराबीजस्य' द्वे । 'मत्तनग्नकृताह्वानस्य' इत्यन्ये ॥[6]

कारोत्तर सुरामण्डः

कारेण क्रियया उत्तर । सुराया मण्ड । द्वे ॥[7]

आपानं पानगोष्ठिका ॥४२॥

आसम्भूय पिबन्त्यत्र ॥ ४२ ॥[8]

---

1 Sweet spiritous liquor made from honey or vine [4]

2. M. शेरतेनेन 3 Rum [3] 4 The liquor used for distillation [2] 5 Distillation or extraction of liquors [2] 6 The drug or seed used to cause fermentation in the manufacture of spirits [2] 7 The froth or scum of spiritous liquor during fermentation [2] 8 A drinking party [2]

चषकोऽस्त्री पानपात्रम्

चष्यतेऽनेन । 'चष भक्षणे' (भ्वा० उ० से०) । द्वे ॥[1]

सरकोऽप्यनुतर्षणम् ।

'सृङ् गतौ' । 'अपि' शब्दात् 'सरक' अप्यस्त्री । 'मद्यपानस्य' द्वे ॥[2]

धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः ॥४३॥

धुर्वति । 'हसिमृगृ—' (उ० ३.८६) इति तन् । अक्षैर्दीव्यति । णिनिः (३ २.७८) । कितेन याति । अक्षेषु धूर्तः । पञ्च ॥ ४३ ॥[3]

स्युर्लग्नकाः प्रतिभुवः

'ओ (ओ) लस्जी—' (तु० आ० से०) क्तः (३ ४ ७२) । स्वार्थे कः । प्रतिनिधिर्भवति । द्वे 'जामिन' [लोके] ॥[4]

सभिका द्यूतकारकाः ।

सभाद्यूतमस्यास्ति । व्रीह्यादि. (५ २.११६) । द्वे ॥[5]

द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ॥४४॥

दिवे. (दि० प० से०) क्त (३.३ ११४) । अक्षाः पाशकाः सन्त्यस्याम् । कितवस्य कर्म । पणो ग्लहोऽस्त्यस्मिन्[6] ॥ ४४ ॥[7]

पणोऽक्षेषु ग्लहः

पण्यते उत्सृज्यते । ग्लह्यते । 'ग्लह आदाने' (भ्वा० आ० से०) 'द्यूते लभ्यमानस्य' द्वे ॥[8]

अक्षास्तु देवनाः पाशकाश्च ते ।

अश्नुवते । 'अशू व्याप्तौ' (स्वा० प० से०) । पाशयन्ति, पशयन्ति [वा] । 'पश बन्धने' चुरादि । त्रीणि ॥[9]

परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् ॥४५॥

परितो नयनम् । एकम् ॥ ४५ ॥[10]

---

1 Goblet or drinking vessel [2] 2 Drinking [2] 3 Gambler [5] 4 Surety [2] 5 One who keeps a gambling-house [2] 6 M. ग्लहोऽस्त्यस्मिन् 7. Gambling [5] 8 A thing staked in gambling [2] 9 Dice [3] 10 Moving a piece at Chess, draughts &c.

अष्टापदं शारिफलम्

पङ्क्तौ पङ्क्तौ अष्टौ पदान्यस्य । शारीणां फलम् । 'शारीणां खेलनाधार-पट्टस्य' द्वे ॥[1]

प्राणिद्यूतं समाह्वयः ।

प्राणिभिः कृतं द्यूतम् । सम्यगाहूयन्तेऽत्र[2] । 'पुंसि–' (३.३.११८) इति घः । द्वे ॥[3]

उक्ता भूरिप्रयोगत्वादेकस्मिन्येऽत्र यौगिकाः ॥४३॥
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ।
इति शूद्रवर्गः ॥१०॥

यौगिका मार्दङ्गिकादयः । प्रचुरप्रयोगदर्शनादेकस्मिल्लिङ्गे उक्तास्ते तद्धर्मयोगादन्यत्र वृत्तौ सत्यां लिङ्गान्तरेऽपि[4] बोध्याः । यथा—'मार्दङ्गिककुलम्' इत्यादि ॥

इतिशूद्रवर्गः ॥ १० ॥

इति श्रीमदाचार्यकृष्णामित्रकृतायाममरकोशटीकायां द्वितीयं काण्डं समाप्तं ॥ २ ॥

---

1 Draught-board, Chess board 2 M सम्यगाहूयन्तेत्र 3 Gambling with fighting animals 4 M लिङ्गान्तरेपि ।

अमरकोशः

कृष्णमित्रटीकोपेतः

तृतीयः काण्डः

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि ।
लिङ्गादि संग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥१॥

श्रीरामाय नमः । सामान्ये सामान्यकाण्डेऽस्मिन्[1] विशेष्यनिघ्नादिभिः शब्दैः, उपलक्षिता वर्गा उच्यन्ते । कीदृशाः वर्गाः ? स्वर्गादिवर्गाः पूर्वोक्ताः संश्रय आश्रयो येषाम् । सुकृत्यादयो देवासुरमनुष्येष्वेव संबध्यन्ते । लिङ्गान्यादौ येषां तानि तेषां संग्रहाः । आदिना नाम (मा) नि ॥ १ ॥

स्त्रीदाराद्यैर्यद्विशेष्यं यादृशं[2] प्रस्तुतं पदैः ।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥२॥

स्त्रीदाराद्यैः पदैर्यादृशैर्यैर्लिङ्गसंख्याकैर्यादृशं विशेष्यं स्त्रीदारादिकं प्रकान्तम्, तस्य गुणादिशब्दास्तथा तादृग्लिङ्गवचना भेदका विशेषणानि भवन्ति । गुणशब्दा यथा—'प्रवीणा स्त्री, प्रवीणा दाराः, प्रवीणं कलत्रम् ।' द्रव्यशब्दो यथा—'दण्डिनी स्त्री, दण्डिनो दारा.' । क्रिया शब्दाः 'पाचिका स्त्री' इत्यादि ॥ २ ॥

सुकृती पुण्यवान् धन्यः

सुकृतमस्यास्ति । धने साधुः । त्रीणि ॥[3]

महेच्छस्तु महाशयः ।

महतीच्छाऽस्य[4] । महानाशयोऽस्य[5] । द्वे ॥[6]

हृदयालुः सहृदयः

प्रशस्तं हृदयमस्य । सह हृदयेन । द्वे ॥[7]

---

1. M. सामान्यकाण्डे अस्मिन् 2. B. यादृशैः 3. A. lucky man [3] 4. M. महतीच्छास्य 5. M. महानाशयोऽस्य 6. A noble-minded or maganimous person [2] 7. A good hearted man [2].

महोत्साहो महोद्यमः ॥ ३ ॥

महानुत्साहोऽस्य[1]। 'दुस्साध्येऽपि तत्पर' द्वे ॥ ३ ॥[2]

प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिता ।

वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥ ४ ॥

प्रकृष्टा वीणाऽस्य[3]। निपुणति। 'पुण कर्मणि शुभे (तु० प० से०)। क (३ १ १३५)। अभिजानाति। 'आतश्च–' (३ १ १६९) इति क। नितरा स्नात। 'निनदीभ्या स्नाते' (८ ३ ८९) इति ष। शिक्षा सजाताऽस्य[4]। विज्ञान बुद्धि प्रयोजनमस्य। 'तत्र नियुक्त' (४ ४ ६९) इति ठक्। कृत सस्कृत मुखमस्य। कृत प्रशस्त कर्मास्य। कुश लाति ॥ ४ ॥[5]

पूज्य प्रतीक्ष्य

पूज्यते। प्रतीक्ष्यते। द्वे ॥[6]

साशयिकः सशयापन्नमानस ।

सशयमापन्न । द्वे ॥[7]

दक्षिणीयो[8] दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ॥ ५ ॥

दक्षिणामर्हति। कडङ्क (ग) रदक्षिणाच्छ च' (५ १ ६९)। 'दक्षिणा योग्यस्य' त्रीणि ॥ ५ ॥[9]

स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे ।

'वदेरान्य' (उ० ३ १०४)। स्थूलैर्महद्भिर्लक्ष्यते। ण्यत् (३ २ १२४)। दाने शौण्ड विख्यात। 'बहुप्रदस्य' चत्वारि ॥[10]

जैवातृकः स्यादायुष्मान्

जीवति। 'जीवेरातृकन्—' (उ० १ ८०)। 'आयुष्मत' द्वे ॥[11]

अन्तर्वाणिस्तु शास्त्रवित् ॥ ६ ॥

अन्तर्वाण्यस्य। शास्त्र वेत्ति ॥ ६ ॥[12]

---

1 M महानुत्साहोस्य 2 A man possessed of great energy [2] 3 M वीणास्य 4 M सजातास्य 5 A learned or proficient person [10] 6 A venerable person [2] 7 A doubtful person [2] 8 M दक्षिणेयो 9 A person worthy of gift [3] 10 A munificent man [4] 11 A long lived person [2] 12 A very learned scholar [2]

परीक्षकः कारणिकः

परीक्ष्यते । ण्वुल् (३.१.१३३)। करणैः प्रयोजनमस्य । ठक् (४.४.८) । द्वे ॥[1]

वरदस्तु समर्धकः ।

समृध्नोति । 'ऋधु वृद्धौ' (स्वा० प० से०) । ण्वुल् (३.१.१३३) द्वे ॥[2]

हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥

हृष्यति । ताच्छील्ये चानश् (३.२.१२९) । विकुरुते । प्रकृष्टं मनोऽस्य[3] । चत्वारि ॥ ७ ॥[4]

दुर्मना विमना अन्तर्मनाः स्यात्

दुःस्थितं मनोऽस्य[5] । त्रीणि ॥[6]

उत्क उन्मनाः ।

उद्गतं मनोऽस्य[7] । उच्छब्दात्कन् । 'उत्कण्ठितमनसः' द्वे ॥[8]

दक्षिणे सरलोदारौ

दक्षते । 'द्रुदक्षिभ्यामिनन्' (उ० २.५०) । सरं लाति । उद् आराति । आतः कः (३.१.१३६) त्रीणि ॥[9]

सुकलो दातृभोक्तरि ॥ ८ ॥

शोभना कलाऽस्य[10] । एकम् ॥ ८ ॥[11]

तत्परे प्रसितासक्तौ

तत्परमुत्तमं यस्य । प्रकर्षेण सितः । 'षिञ् बन्धने' (स्वा० उ० अ०) । आ सजति स्म । त्रीणि ॥[12]

इष्टार्थोद्युक्त उत्सुकः ।

इष्टो यः अर्थः तत्र य उद्युक्तः । उच्छब्दः उद्योगार्थः सुशब्दः । सोमते । ततः क्वन् । द्वे ॥[13]

---

1. Judge; examiner [2] 2. A benefactor or granter of a boon [2] 3. M. मनोस्य 4. A happy man [4] 5. M. मनोस्य 6. A sad man [5] 7. M. मनोस्य 8. An anxious person [2] 9. A courteous man [3] 10. M. कलास्य 11. A person who is liberal in giving gifts and enjoying wealth [1] 12. A man engaged in any work [3] 13. A person striving for any desired object [2].

प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥

प्रतीयते स्म । इण (अ० प० अ०) क्त । 'प्रथ प्रख्याने' (भ्वा० आ० से०) । क्त (३ ४ ७२) । 'विद्लृ लाभे' (तु० उ० अ०) । 'वित्तो भोग प्रत्ययमो' (८ २ ५८) इति साधु । षट् ॥ ९ ॥[1]

गुणै प्रतीते तु कृतलक्षणाहितलक्षणौ

कृतमुच्चारित लक्षण नाम यस्य । आहृतमभ्यस्त लक्षणमस्य । 'गुणै प्रसिद्धस्य' द्वे ॥ १० ॥[2]

इभ्य आढ्यो धनी

इभमर्हति । दण्डादि (५.१ ६६) आध्यायति । [आ] त क (३ १ १३६) । पृषोदरादि (६ ३ १०९) । 'बहुधनस्य' त्रीणि ॥[3]

स्वामी त्वीश्वर पतिरीशिता ॥ १० ॥

अधिभूर्नायको नेता प्रभु परिवृढोऽधिप ।

स्वमस्यास्ति । 'स्वामिन्नैश्वर्ये (५ २ १२६) । ईष्टे । स्थेश—' (३ २ १७५) इति वरच् । पातेर्डति ' (उ० ४ ५७) । ईष्टे । तृच् (३ १ १३३) ॥ १० ॥ अधिभवति । क्विप् (३ २ १७९) । णीञ् (भ्वा० उ० से०) 'ण्वुल्तृचौ (३ १ १३३) । प्रभवति । विप्रसम्य—' (३ २ १८०) इति डु । 'वृहि वृद्धौ' (भ्वा० प० स०) । प्रभौ परिवृढ ' (७ २ १२१) इति साधु । अधिपाति । क (३ १ १३६) । दश ॥[4]

अधिकर्द्धि समृद्ध० स्यात्

अधिका ऋद्धिरस्य । 'ऋधु [वृ] द्धौ (स्वा० प० से०) । क्त (३ ४ ७२) । 'अतिसम्पन्नस्य' द्वे ॥[5]

कुटुम्बव्यापृतस्तु यः ॥ ११ ॥

स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।

कुटुम्बपोषणे व्यापृत उद्युक्त ॥ ११ ॥ अभ्यागारे नियुक्त । त्रीणि ॥[6]

वराङ्गरूपोपेतो यः सिंहसंहननो हि सः ॥ १२ ॥

वराणि श्रेष्ठानि अङ्गानि रूपाणि च यानि तैरुपेत । सिंहस्येव संहनन देहोऽस्य[7] ॥ १२ ॥[8]

1 A famous man [6] 2 A man noted for his good qualities [2] 3 A rich man [3] 4 Lord master [10] 5 A prosperous person [2] 6 One who is diligent in supporting a family [3] 7 M देहोऽस्य E A handsome person [1]

निर्धार्यः कार्यकर्ता यः सपतन् सत्त्वसंपदा ।

धृञ् (भ्वा० उ० अ०) ण्यत् (३.१.१२४) । 'निर्वार्य' इति पाठे 'वृञ् वरणे' (स्वा० उ० से०) । सत्त्वस्य वित्तस्य संपदुत्कर्षः तया संपतन्संपद्यमानः । 'निस्सार्यकार्यकर्तुः' एकम् ॥[1]

अवाचि मूकः

न वागस्य । 'मू' इति कायति । द्वे ॥[2]

अथ मनोजवः स पितृसंनिभः ॥ १३ ॥

मनोजेऽभिलाषे[3] वसति । पितेव सम्यग्विभाति । 'पितृसमस्य' द्वे ॥ १३ ॥[4]

सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः ।

कोकति (ते) । 'कुक आदाने' (भ्वा० आ० से०) । पृषोदरादिः (६.३.१०९) एकम् ॥[5]

लक्ष्मीवांल्लक्ष्मणः श्रीलः श्रीमान्

'लक्ष्म्या अच्च' (ग० ५.२.१००) इति नः । चत्वारि ॥[6]

स्निग्धस्तु वत्सलः ॥ १४ ॥

'ष्णिह प्रीतौ' (दि० प० अ०) । क्तः । 'वत्सांसा [सा] भ्यां कामबले' (५.२.९८) इति लच् ॥ १४ ॥[7]

स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ।

दयाऽस्यास्ति[8] । 'स्पृहिगृहि—' (३.२.१५८) इत्यालुच् । करुणा शीलमस्य । ठक् (४.४.६१) । सुष्ठु उः शंभु, स्वि रतः । चत्वारि ॥[9]

स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दोनिरवग्रहः ॥१५॥

स्व आत्मा तन्त्रं प्रधानमस्य । अपगतमावृतमावरणमस्य । स्वेनेरितुं शीलः । स्वः छन्दोऽभिप्रायोऽस्य[10] । निर्गतोऽवग्रहान्नियमनात्[11] पञ्च ॥ १५ ॥[12]

---

1. One who works diligently [2] 2. A mute [2] 3. M. मनोजेऽभिलाषे 4. A fatherly child [2] 5. One who gives a girl in marriage with due ceremony and suitable decoration [1] 6. A wealthy or fortunate man [4] 7. An affectionate person [2] 8. M. दयास्यास्ति 9. A kind man [4] 10. M. छन्दोभिप्रायोस्य 11. M. निर्गतोवग्रहान्नियमनात् 12. An independent man [5].

परतन्त्रः पराधीन परवान्नाथवानपि ।

पर अधि उपर्यस्य पराधीन । 'अपडक्ष—' (५४७) इति ख । पर स्वाम्यस्यास्ति । चत्वारि ॥[1]

अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ ॥१६॥

इनमधिगत । निहृयते निगृह्यते । क (वा० ३ ३ ५८) । आयत्यते । यते (भ्वा० आ० से०) क्त (३ ४ ७२) । गृह्यते । 'पदास्वैरि—' (३ १ ११९) इति क्यप् ॥ १६ ॥[2]

खलपू स्याद्बहुकरः

खल पुनाति । 'भुव मार्जयत द्वे ॥[3]

दीर्घसूत्रश्चिरक्रिय ।

दीर्घं सूत्र व्यवस्था यस्य । विलम्बन क्रियाकर्तुं ' द्वे ॥[4]

जाल्मोऽसमीक्ष्यकारी स्यात्

जालयति । बाहुलकात् म । द्वे ॥[5]

कुण्ठो मन्द क्रियासु य ॥ १७ ॥

'कुटि आलस्ये' (भ्वा० प० से०) । मन्दोऽलस [6] एकम् ॥ १७ ॥[7]

कर्मक्षमोऽलङ्कर्मीण॰

कर्मसु क्षमः । अल समर्थ कर्मण । 'अपडक्ष–' (५ ४ ७) इति ख । द्वे ॥[8]

क्रियावान् कर्मसूद्यत ।

क्रियाऽस्यास्ति[9] । एकम् ॥[10]

स कार्मं कर्मशीलो य

कर्मशीलमस्य । 'छत्रादिभ्यो ण ' (४ ४ ६२) । द्वे ॥[11]

कर्मशूरस्तु कर्मठ ॥१८॥

---

1 A person dependent on another [4] 2 A dependent person (in general) [5] 3 Sweeper [2] 4 A man working slowly [2] 5 An inconsiderate person [2] 6 M मन्दोलस 7 An indolent man [1] 8 A person able to do a work [2] 9 M क्रियास्यास्ति 10 A person engaged in any work [2] 11 An assiduous man [2]

कर्मणि शूरः। 'कर्मणि घटोऽठच्[1]' (५.२.३५) 'प्रयत्नेन प्रारब्धकर्मसमापकस्य' द्वे ॥ १८ ॥[2]

कर्म (मर) ण्यभुक्कर्मकरः

कर्मसु साधु। मरण्यं वेतनं भुङ्क्ते। 'कर्मणि भृतौ' (३.२.२२) इति टः। कर्मकरः। द्वे ॥[3]

कर्मकारस्तु तत्क्रियः ॥

तत्क्रियः कर्मकारक्रियः। 'यो वेतनं विना कर्म करोति तस्य' एकम् ॥[4]

अपस्नातो मृतस्नातः

अपकृष्टं स्नातः। मृते स्नातः। द्वे ॥[5]

आमिषाशी तु शौष्कलः ॥१९॥

आमिषमश्नाति। शुष्कं लाति तस्यायम्। द्वे ॥[6]

बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः।

बुभुक्षा जाताऽस्य[7]। 'वसतिक्षुधोः—' (७.२.५२) इतीट्। अत्तुमिच्छुः। 'सनाशंस—' (३.२.१६८) इत्युः। अशनाया जाताऽस्य[8]। चत्वारि ॥[9]

परान्नः परपिण्डाद.

परान्नं नित्यमस्य। परपिण्डमत्ति। द्वे ॥[10]

भक्षको घस्मरोऽद्मरः ॥२०॥

भक्षयति। ण्वुल् (३.१.१३३)। 'सृघस्यदः क्मरच्' (३.२.१६०)। 'भक्षणपरस्य' त्रीणि ॥ २० ॥[11]

आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ॥

दिवेः क्तः (३.४.७२)। 'दिवोऽविजिगीषायाम्[12]' (८.२.४९) इति नः। उदरे प्रसृतः। 'उदराट्ठगाद्यूने' (५.२.६७) ॥[13]

---

1. M. घटोठच् 2. A man completing his work diligently [2] 3. A hired labourer or servant [2] 4. A labourer performing work without any remuneration [1] 5. One who has bathed after a death or funeral [2] 6. Non-vegetarian [2] 7. M. जातास्य 8. M. जातास्य 9. A hungry man [4] 10. A person living or subsisting on the food of others [2] 11. A glutton [2] 12. M. दिवोविजिगीषायाम् 13. A voracious person [2].

उभौ त्वात्मंभरिः कुक्षिंभरि स्वोदरपूरके ॥२१॥

आत्मानं च कुक्षिं च बिभर्ति। 'फलेग्रहिरात्मंभरिश्च' (३ २ २६) इति साधु। चात्कुक्षिंभरि द्वे ॥ २१ ॥[1]

सर्वान्नीनस्तु सर्वान्नभोजी

सर्वेषामन्नानि भुङ्क्ते। 'अनुपदसर्वान्न—' (५ २ ९) इति ख। द्वे ॥[2]

गृध्नस्तु गर्धनः।

लुब्धोऽभिलाषुकस्तृष्णक्

'गृधु अभिकाङ्क्षायाम्' (दि० प० से०)। 'त्रसिगृधि—' (३ २ १४०) इति क्नु। 'जुचङ्क्रम्य' (३ २ १५०) इति युच्। 'लुभ गार्ध्ये' (दि० प० से०) क्त (३ ४ ७२)। अभिलषति। लषपत— (३ २ १५४) इत्युकञ्। तृष्यति। 'स्वपितृषोर्नजिङ्' (३ २ १७२)। पञ्च ॥[3]

समौ लोलुपलोलुभौ ॥२२॥

गर्हितं लुम्पति। 'लुपसद—' (३ १ २४) इति यङन्तादच्। भृशं लुभ्यति। यङन्तादच्। 'अतिलुब्धस्य' द्वे ॥२२॥[4]

सोन्मादस्[5] तून्मदिष्णुः स्यात्

उन्माद्यति। तच्छील। अलंकृञादिना (३ २ १३६) इष्णुच्। द्वे ॥[6]

अविनीतः समुद्धतः।

न विनीतः। हन्तेः क्तः। द्वे ॥[7]

मत्ते शौण्डोत्कटक्षीबाः

मदे क्त (३ ४ ७२)। शुण्डाया पानागारे भवः। उद्गतः कटः आवरणमस्य। 'क्षीबृ मदे' (भ्वा० आ० से०)। 'अनुपसर्गात्फुल्ल—' (८ २ ५५) इति साधु। चत्वारि ॥[8]

कामुके कमितानुकः ॥२३॥

कम्रः कामयिताभीकः कमनः कामनोऽभिकः।

कामयते। 'लषपत—' (३ २ १५४) इत्युकञ्। णिङ् भावे तृच्। अनु

---

1 A selfish man Caring to feed his own belly [2] 2 A person accepting meals from every one [2] 3 A greedy person [5] 4 A very greedy man [2] 5 B उन्मद 6 A mad man [2] 7 An ill behaved person [2] 8 An intoxicated man [2]

कामयते । अभिकामयते । 'अनुकामिका—' (५.२.७४) इति साधुः ॥२३॥ 'नमिकम्पि —' (३.२.१६७) इति रः । 'अनुक—' (५.२.७४) इति अभीकः साधुः । नव ॥[1]

विधेयो विनयग्राही वचनेस्थित आश्रवः ॥२४॥

'अचो यत्' (३.१.९७) । विनयं गृह्णाति । आशृणोति । अच् (३.१.१३४) 'विधातुं शक्यस्य' चत्वारि ॥२४॥[2]

वश्यः प्रणेयः

'वशं गतः' (४.४.८६) यत् । प्रणीयते । यत् (३.१.९७) ॥[3]

निभृतविनीतप्रश्रिताः समाः ।

भृञः (भ्वा० उ० अ०) क्तः (३.२.१०२) श्रिञः (भ्वा० उ० से०) क्तः (३.२.१०२) । 'विनययुक्तस्य' त्रीणि ॥[4]

धृष्टे धृष्णुः-[5]वियातश्च

ञिधृषा (स्वा० प० से०) क्तः । 'त्रसिगृधि—' (३.२.१४०) इति क्नुः । 'धृष्टस्य' । विरुद्धं यातं गमनमस्य । त्रीणि ॥[6]

प्रगल्भः प्रतिभान्विते ॥२५॥

प्रगल्भते । अच् (३.१.१३४) । प्रतिभया अन्वितः । द्वे ॥२५॥[7]

स्यादधृष्टे तु शालीनः

शालाप्रवेशमर्हति । 'शालीनकौपीने—' (५.२.२०) इति साधुः । 'सलज्जस्य' द्वे ॥[8]

विलक्षो विस्मयान्विते ।

विरुद्धं लक्षयते, निष्प्रतिपत्तिरित्यर्थः द्वे ॥[9]

अधीरे कातरः

ईषत्तरति ॥[10]

---

1. A lustful person [9] 2. An obedient person [4] 3. A submissive man [2] 4. A humble or well-behaved person [4] 5. B. prefers धृष्णक् 6. A shameless man [3] 7. A person endowed with genious [2] 8. A modest man [2] 9. An astonished person [2] 10. An impatient man [2].

त्रस्नौ भीरुभीरुकभीलुका ॥२६॥

विभेति । 'भिय क्रुक्लुकनौ' (३ ३ १७४) । 'क्रुकनपि' (वा० ३ २ १७४) 'भयशीलस्य' चत्वारि ॥२६॥[1]

आशंसुराशंसितरि

आशंसते । 'सनाशंस—' (३ २ १६८) इत्यु । 'इष्टार्थप्राप्तीच्छो' द्वे ॥[2]

गृह्यालुर्ग्रहीतरि ।

'गृह ग्रहणे' चुरादि । 'स्पृहिगृहि—' (३ २ १५८) इत्यालुच् । द्वे ॥[3]

श्रद्धालु श्रद्धया युक्त

'स्पृहि—' (३ २ १५८) इत्यालुच्, श्रद्धालु ॥[4]

पतयालुश्च पातुके ॥२७॥

पतति । आलुच् (३ २ १५८) । लपपत—' (२ १५४) इत्युकञ् । द्वे ॥२७॥[5]

लज्जाशीलेऽपत्रपिष्णु

अपत्रपते । अलङ्कृञादिना (३ २.१३६) इष्णुच् । [redacted] ॥[6]

वन्दारुरभिवादके ।

'शृ वन्द्योरारु' (३ २ १७३) । द्वे ॥[7]

शरारुर्घातुको हिंस्रे[8]

शृणाति । 'शृ हिंसायाम् (क्रया० प० स०) । आ [रु] 'लपपत—' (३ २ १५४) इत्युकञ् । 'नमिकम्पि— (३ २ १६७) इति र । त्रीणि ॥[9]

स्याद्वर्धिष्णुस्तु[10] वर्धन ॥ २८ ॥

वृध (भ्वा० आ० से०) इष्णुच् (३ २ १३६) । 'अनुदात्तेत—' (३ २ १४९) इति युच् ॥२८॥[11]

उत्पतिष्णुस्तूत्पतित

ऊर्ध्वपतनशील । द्वे ॥[12]

---

1 A timid person [4] 2 A hopeful man [2] 3 Taker acceptor, holder [2] 4 A faithful man [2] [redacted] A man tending to fall [2] 6 A bashful person [2] 7 Saluter [2] 8 B and K. हिंस्र 9 A noxious man [3] 10 B स्याद्वर्धिष्णुश्च 11 Growing [2] 12 Going up [2]

अलंकरिष्णुस्तु मण्डनः ।

'कृधमण्डार्थेभ्यश्च' (३.२.१५१) इति युच् । द्वे ॥[1]

भूष्णुर्भविष्णुर्भविता

भवनशीलः । 'ग्लाजि—' (३.२.१३९) इति ग्स्नुः । चाद्भुवः । 'भुवश्च' (३.२.१३८) इतीष्णुच् । त्रीणि ॥[2]

वर्तिष्णुर्वर्तनः समौ ॥ २६ ॥

'वर्तनशीलस्य' द्वे ॥ २६ ॥[3]

निराकरिष्णुः क्षिप्नुः स्यात्

क्षिपे (तु० उ० अ०) 'त्रसि—' (३.२.१४०) इति क्नुः । द्वे ॥[4]

सान्द्रस्निग्धस्तु मेदुरः ।

सान्द्रः स्निग्धः, घनचिक्कणः । 'भञ्जभासमिदो घुरच्' (३.२.१६१) द्वे ॥[5]

ज्ञाता तु विदुरो विन्दुः

वेत्ति । 'विदिभिदि—' (३.२.१६२) इति कुरच् । 'विन्दुरिच्छुः' (३.२.१६९) इति साधुः । त्रीणि ॥[6]

विकासी तु विकस्वरः ॥ ३० ॥

विकसति । 'वौ कष—' (३.२.१४३) इति घिनुण् । 'स्थेशभास—' (३.२.१७५) इति वरच् । 'विकसनशीलस्य' द्वे ॥ ३० ॥[7]

विसृत्वरो विसृमरः प्रसारी च विसारिणि ।

'सृ गतौ' (भ्वा० प० अ०) 'इण्नशजि—' (३.२.१६३) इति क्वरप् । 'सृघसि—' (३.२.१६०) इति क्मरच् । प्रे लप—' (३.२.१४५) इति सरतेर्घिनुण् । चत्वारि ॥[8]

सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥ ३१ ॥

सहेरिष्णुच्—(३.२.१३६) युचौ (३.२.१४९) । तिजेः क्षमायाम् । सन् (३.१.५) ॥ ३१ ॥[9]

---

1. Decorating [2] 2. Becoming [3] 3. Abiding, staying [2] 4. Repudiating [2] 5. Smooth, soft; thick, dense [2] 6. Awise or learned man [3] 7. Opening or blossoming [2] 8. Sprading about [2] 9. A person who is Capable of enduring [6].

क्रोधनोऽमर्षणः क्रोधी (कोपी)

क्रुधमण्डा—' (३. .१५) इति युच् । कोपी । णिनिः (३.३.१७०) । त्रीणि ॥[1]

चण्डस्त्वत्यन्तकोपनः ।

'चडिकोपे' (भ्वा० आ० से०) । द्वे ॥[2]

जागरूको जागरिता

जागतेर्जागरूकश्च (३ १.१६५) ॥[3]

घूर्णितः प्रचलायितः ॥ ३२ ॥

'घूर्ण भ्रमणे' (भ्वा० आ० से०) । क्त (३ ४.७२) प्रचल इवाचरित — ॥ ३२ ॥[4]

स्वप्नक् शयालुर्निद्रालु

स्वपिति । 'स्वपितृषोर्नजिङ्' (३.२.१७२) 'शीङश्च' (वा०३.२.१५८) इत्यालुच् । 'द्रा कुत्सायाम्' (अ० प० अ०) । 'स्पृहिगृहि—' (३.२.१५८) इत्यालुच् । त्रीणि ॥[5]

निद्राणशयितौ समौ ।

द्राते क्ते (३ ४ ७२) 'संयोगादे' (८ २ ४३) इति नः । द्वे ॥[6]

पराङ्मुखः पराचीन

पराञ्चति । 'ऋत्विग्—' (३.२ ५९) आदिना क्विन् । पराक् मुखमस्य । 'विभाषाञ्चे —' (५ ४.८) इति स्वार्थे खः । 'विमुखस्य' द्वे ॥[7]

स्यादवाङप्यधोमुखः ॥ ३३ ॥

अवाञ्चति । द्वे ॥ ३३ ॥[8]

देवानञ्चति देवद्र्यङ्

'विष्वग्देवयो —' (६.३.९२) इत्यद्रि ॥[9]

विष्वद्र्यङ् विष्वगञ्चति ।

विष्वक्सर्वत , अञ्चति गच्छति ॥[10]

---

1. An angry man [3] 2. A wrathful person [2] 3. A wakeful man [2] 4. One noding his head (while asleep in sitting posture) [2] 5. A sleepy person [3] 6. A person who is sleeping [2] 7. A man with his face turned away [2] 8. A Person with his face downwards [2] 9. A worshipper of gods [1] 10 One who is all-pervading, or going everywhere [1]

य सहाञ्चति सध्र्यङ् स

'सहस्य सध्रिः' (६ ३ ९५) ॥[1]

स तिर्यङ् यस्तिरोऽञ्चति ॥ ३४ ॥

तिरसस्तिरि (६ ३ ९४) ॥ ३४ ॥[2]

वदो वदावदो वक्ता

वदति । अच् (३ १ १३४)। 'चरिचरि—' (वा० ६ १ १२) इति द्वित्वादि । त्रीणि ॥[3]

वागीशो वाक्पतिः समौ ।

वाचामीश । 'षष्ठीवचनस्य' द्वे ॥[4]

वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि ॥३५॥

वाचो युक्तौ पटु । 'वाग्दिक्पश्यद्भ्यः' (वा० ६ ३ २१) इत्यलुक् । प्रशस्ता वागस्य । 'वाचो ग्मिनिः' (५ २ १२४) । 'कुवादिषु' (ग० ४ १ १५१) 'वावदूक' शब्दपाठाद् 'वदेः' ऊक । चत्वारि ॥३५॥[5]

स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।

'जल्पभिक्ष—' (३ २ १५५) इति षाकन् । 'आलजाटचौ बहुभाषिणि' (५ २ १२५) ॥[6]

दुर्मुखे मुखराबद्धमुखौ

दुर्निन्दित मुखमस्य । 'खमुख—' (वा० ५ २ १०७) इति र । न बद्ध मुखमस्य । 'अप्रियवादिनः' त्रीणि ॥[7]

शक्लः[8] प्रियंवदे ॥३६॥

शक्ते क्ल । प्रिय वदति । द्वे ॥३६॥[9]

लोहलः स्यादस्फुटवाक्

'रह त्यनादौ । लोह लाति । द्वे ॥[10]

---

1 A person going along [1] 2 A person going in an oblique direction [1] 3 Speaker [3] 4 Orator [2] 5 An eloquent man [4] 6 A talkative or garrulous person [4] 7 A scurrilous man [3] 8 B शक्र 9 A sweet speaking person [2] 10 One who speaks indistinctly [2]

गर्ह्यवादी तु कद्वदः

कुत्सित वदति । को कद् (६ ३ १०२) । द्वे ॥[1]

समौ कुवादकुचरौ

कुत्सितो वादोऽस्य[2] । कुत्सित चरति । 'कुत्सितवादिन' द्वे ।[3]

स्यादसौम्यस्वरोऽस्वरः ॥३७॥

असौम्यो रूक्ष स्वरोऽस्य[4] । द्वे ॥३७॥[5]

रवण शब्दनः

रौति । 'चलनशब्दार्थात्—' (३ २ १४८) इति युच् । द्वे ॥[6]

नान्दीवादी नान्दीकरः समौ ।

नान्दीवदनशील । नाटकादौ मङ्गलार्थं भेर्यादिवादन नान्दी ॥[7]

जडोऽज्ञे

'जल घातने' (भ्वा० प० से०) । लस्य ड । द्वे ॥[8]

अनेडमूकस्तु[9] वक्तु श्रोतुमशिक्षिते ॥३८॥

अनेडराडसदृश , स चासौ मूकश्च । वाक्श्रुतिहीन ॥३८॥[10]

तूष्णींशीलस्तु तूष्णीकः

तूष्णी शीलमस्य । 'शीले को मलोपश्च' (वा० ५ ३ ७१) । 'मौनिन' द्वे ॥[11]

नग्नोऽवासा दिगम्बरः ॥

'ओलस्जी व्रीडे' (तु० आ० से०) । क्त (३ ४ ७२) । न वासोऽस्य ।[12] दिग् अम्बरमस्य । त्रीणि ॥[13]

निष्कासितोऽवकृष्टः स्यात्

'कस गतौ' (भ्वा० प० से०) । ण्यन्तात्क्त (३ २ १०२) । अवकृष्यते निरस्यते । द्वे ॥[14]

---

1 One who speaks ill [2] 2 M वादोऽस्य 3 An abusing man [2] 4 M स्वरोऽस्य 5 A harsh voiced person [2] 6 Anything sounding [2] 7 The speaker of nandi (benediction) [2] 8 A stupid [2] 9 B एडमूकस्तु 10 A deaf mute [1] 11 A silent man [2] 12 M वासोऽस्य 14 A nude person [3] 14 One who is expelled or turned out [2]

अपध्वस्तस्तु धिक्कृतः ॥३९॥

ध्वंसेः (भ्वा० आ० से०) क्तः (३.२.१०२)। 'धिक्' इति कृता। द्वे ॥३९॥[1]

आत्तगर्वोऽभिभूतः स्यात्

आत्तो गर्वोऽस्य[2]। 'गन्धः'— इत्यन्ये। द्वे ॥[3]

दापितः[4] साधितः समौ।

दाप्यते। दापः (जु० उ० अ०) ण्यन्तात्क्तः। दापितस्य धनस्य पुरुषस्य वा। द्वे ॥[5]

प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः ॥४०॥

दिशेः (तु० उ० अ०) असेः (दि० प० से०) च क्तः (३.२.१०२)। चत्वारि ॥४०॥[6]

निकृतः स्याद् विप्रकृतः

निः क्रियते खलीक्रियते स्म। द्वे ॥[7]

विप्रलब्धस्तु वञ्चितः।

'वञ्चु गतौ' (भ्वा० प० से०)। ण्यन्तात्क्तः (३.२.१०२)। द्वे ॥[8]

मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥४१॥

मनो हतं यस्य। 'हतमनोभङ्गस्य' चत्वारि ॥४१॥[9]

अधिक्षिप्तः प्रतिक्षिप्तः

क्षिपेः (तु० उ० अ०) क्तः (३.२.१०२)। 'कृताक्षेपस्य' द्वे ॥[10]

बद्धे कीलितसंयतौ।

'कील बन्धे' (भ्वा० प० से०) क्तः (३.२.१०२)। त्रीणि ॥[11]

आपन्न आपत्प्राप्तः स्यात्

पदेः (दि० आ० अ०) क्तः (३.२.१०२)। आपदं प्राप्तः। द्वे ॥[12]

---

1. A person reproached [2] 2. M. गर्वोस्य 3. A humiliated man [2] 4. B. refers to also another reading दावितः 5. A person or thing caused to be given [2] 6. Anything turned down with contempt [4] 7. An insulted man [2] 8. One who is cheated [2] 9. A disappointed person [4] 10. A person censured [2] 11. One tied or fastened [2] 12. A distressed person [2].

कादिशीको भयद्रुत ॥ ४२ ॥

'का दिशं यामि' इत्याह । पृषोदरादि (६ ३ १०९) । भयाद् द्रुत । द्वे ॥ ४२ ॥[1]

आक्षारित क्षारितोऽभिशस्ते

आक्षायत । 'क्षर सचलने' (भ्वा० प० से०) । ण्यन्त । 'शसु हिंसायाम्' (भ्वा० प० से०) क्त (३ २ १०२) । 'मिथ्याव्यभिचारादिना दूषितस्य' त्रीणि ॥[2]

सङ्कसुकोऽस्थिरे ।

'समि कस उकन्' (उ० २ २९) । 'चलस्वभावस्य' द्वे ॥[3]

व्यसनार्तोपरक्तौ द्वौ

व्यसननार्त । रञ्जे (भ्वा० प० अ०) क्त (३ २ १०२) । 'पीडायुक्तस्य' द्वे ॥[4]

विहस्तव्याकुलौ समौ ॥ ४३ ॥

विक्षिप्तो हस्तोऽस्य[5] । व्याकोलति । 'कुल संस्त्यान (भ्वा० प० से०) । द्वे ॥ ४३ ॥[6]

विक्लवो विह्वल

विक्लवते । क्लुङ् गतौ' (भ्वा० आ० स०) । विह्वलति । 'ह्वल [चल] ने' [भ्वा० प० से०] । 'धारणायामशक्तस्य द्वे ॥[7]

स्यात्तु विवशोऽरिष्टदुष्टधी ।

अरिष्टन मरणचिह्नेन दुष्टा धीर्यस्य ॥[8]

कश्य कशार्हे

कशामर्हति । दण्डादि (५ १ ६६) । ताडनार्हस्य' द्वे ॥[9]

सन्नद्धे त्वाततायी वधोद्यते ॥ ४४ ॥

आतत यथा तथा अयने । 'अय गतौ' (भ्वा० आ० स०) ॥ ४४ ॥[10]

---

1 A person fleeing from fear [2] 2 A man falsely accused of adultery &c [3] 3 A fickle person [2] 4 A man involved in distress [2] 5 M हस्तोऽस्य 6 A perplexed person [2] 7 An agitated man [2] 8 One apprehensive of his death [2] 9 One who deserves flogging [2] 10 A person endeavouring to kill some one [1]

द्वेष्ये त्वक्षिगतः

'द्विष अप्रीतौ' (अ० उ० अ०)। ण्यत् (३ १ १२४)। अक्षिविषय गत ।
'द्वेष्यार्हस्त' द्वे ॥[1]

वध्य शीर्षच्छेद्य इमौ समौ।

वधमर्हं। शीर्षस्य शिरसच्छेद, तमर्हति। द्वे ॥[2]

विष्यो विषेण यो वध्यः

विषेण वध्य। 'नौवय—' (४ ४ ९१) इति यत्।[3]

मुश (स) ल्यो मुश (स) लेन य ॥ ४५ ॥

मुसलौ दण्डादि ॥ ४५ ॥[4]

शिवियवानोऽकृष्णकर्मा

'शिवदि दवेये' (भ्वा० आ० से०)। लिट् वयानज्वा (३ २ १०६)।
अकृष्ण शुक्ल कर्मास्य ॥ 'अपापकर्मण' द्वे ॥[5]

चपलश्चिकुर समौ।

चपति। चप सान्त्वने' (भ्वा० प० स०)। वृषादित्वात् (उ० १ १०६)
कलच्। 'चि' इति अव्ययत कुरति। 'कुर शब्दे (तु० प० से०)। 'दोषम-
निश्चित्य वधादिकमाचरत' द्वे ॥[6]

दोषैकदृक् पुरोभागी

दोष एकस्मिन् दृग्यस्य। पुराग्रे' भजते। द्वे दोषदर्शिन' ॥[8]

निकृतस्त्वनृजु शठ ॥ ४६ ॥

'कृता छेदने' (तु० प० से०)। क्त। 'शठ कैतवे' (भ्वा० प० से०)।
त्रीणि ॥ ४६ ॥[9]

कर्णेजप सूचक स्यात्

कर्णे जपति। स्तम्बकर्णयो—' (३ २ १३) इत्यच्। 'सूच पैशुन्य' (चु०
उ० से०)। द्वे ॥[10]

---

1 An eye-sore [2] 2 A person fit to be beheaded [2] 3 A man deserving death by poison [1] 4 A person to be pounded or put to death with a club [1] 5 A sinful or wicked man [2] 6 A rash or inconsiderate person [2] 7 M पुस्तिके 8 A fault finding man [2] 9 A rouge [3]

10 Whisperer [2]

पिशुनो दुर्जन खल ।

पिशति । 'पिश अवयवे' (तु० प० से०) । 'क्षुधिपिशि–' (उ० ३ ५५) इति उनन् । दुष्टो जन । ख छिद्र लाति ॥[1]

नृशसो घातुक क्रूर पाप

नॄन् शसति हन्ति । हति, तच्छील । 'लषपत–' (३ २ १५४) इत्युकञ् । कृन्तति । कृते (तु० प० से०) '–क्रू च' (उ० २ २१) इति रक्प्रत्यये क्रूभाव । पापमस्यास्ति । 'परद्रोहकारिण ' चत्वारि ॥[2]

धूर्तस्तु वञ्चक ॥ ४७ ॥

धुर्वति । 'धुर्वी हिंसायाम्' (भ्वा० प० से०) । 'हसिमृग्रि—' (उ०३ ८६) इति तन् । राल्लोप (६ ४ २१) । 'वञ्चु गतौ (भ्वा० प० से०) । द्वे ॥४७॥[3]

अज्ञे मूढयथाजातमूर्खवैधेयबालिशा ।

मुह्यति । क्त । जात जन्मकालविरूपमनतिक्रम्य वर्तते । 'मुहे खो मूर् च' (उ० ५ २२) । विधय एव वैधय । बडिशस्याय प्रिय । डस्य ल ॥[4]

कदर्ये कृपणक्षुद्रकिंपचानमितपचा ॥४८॥

कुत्सितोऽर्यः स्वामी । कद् (६ ३ १०१) ल्युट् (३ ३ ११३) क्षुद्यते । 'स्फायि—' (उ०२ १३) इति रक् । किं पचति । ताच्छील्ये चानश् (३ २ १२९) । मित पचति । मितनखे च (३ २ ३४) इति खच् । पञ्च ॥४८॥[5]

नि स्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि स ।

निर्गत स्वमस्य । दुष्टा विधास्य[6] । 'दीङ् क्षये' (दि० आ० अ०) । क्त (३ ४ ७२) स्वादित्वात् 'ओदितश्च' (८ २ ४५) इति न । दरिद्राति । अच् (३ १ १३४) पञ्च ॥[7]

वनीयको याचनको मार्गणो याचकार्थिनौ ॥४९॥

'वनु याचने' (त० आ० स०) । वनिमिच्छति । क्यजन्तात् (३ १ ८) ण्वुल् (३ १ १३३) । याचे (भ्वा० उ० स०) ल्यु (३ १ १३४) । 'मृग अन्वेषणे' (चु० आ० से०) युच् । अर्थोऽस्यास्ति[8] ॥४९॥[9]

अहंकारवानहंयुः शुभंयुस्तु शुभान्वित ।

'अहंशुभमोर्युस् (५ २ १४०) ॥[10]

---

1 Slanderer [3] 2 A cruel person [4] 3 A cheat [2] 4 A foolish man [6] 5 Miser [5] 6 M विधास्य 7 A poor person [5] 8 M अर्थोऽस्यास्ति 9 Begger [5] 10 A proud and an auspicious man [2 each]

दिव्योपपादुका देवाः

देवा दिव्योपपादुका उच्यन्ते । दिवि भवा दिव्याः । 'लपपत–' (३.२.१५५) इत्युकञ् । दिव्याश्च ते उपपादुकाश्च ते ॥[1]

नृगवाद्या जरायुजाः ॥५०॥

जरायोर्गर्भाज्जाताः ॥५०॥[2]

स्वेदजाः कृमिदंशाद्याः

स्वेद ऊष्मा । तस्माज्जाताः ॥[3]

पक्षिसर्पादयोऽण्डजाः[4] ।

उद्भिदस्तरुगुल्माद्याः[5] उद्भिदुद्भिज्जमुद्भिदम् ॥५१॥

उद्भिनत्ति भुवम् । उद्भिदो जातम् । 'इगुपध–' (३.१.१३५) इति कः ॥ ५१ ॥[6]

सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥५२॥

सुष्ठु द्रियते । 'ग्रहवृद–' (३.३.५८) इत्यप् । पृषोदरादिः (६.३.१०९) । रुचं राति । चरति मनोऽस्मिन्[7] । 'दृसनि–' (उ० १.३) इति ञुण् । शोभनं समं सर्वमस्य । 'सुविनिर्दुर्भ्यः' (८.३.८८) इति षः । साधेः (स्वा० प० अ०) 'कृवापा–' (उ० १.१) इत्युण् शुभेः (भ्वा० आ० से०) युच् (३.२.१४९) । कमेः (भ्वा० आ० से०) क्तः (३.२.१०२) । मनो रमयति । रुच्यते । 'राजसूय–' (३.१.११४) इति साधु । मन एव शं यत्र । मन्ज्यते । 'मजि ध्वनौ' सौत्रम् । बाहुलकादुः । मञ्जु मञ्जुत्वं लाति ॥५२॥[8]

तदासेचनकं[9] तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।

आसिच्यते मनोऽत्र[10] । ल्युटः (३.३.११७) कन् (५.३.७५) ॥[11]

अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥५३॥

इषेः (तु० प० से०) क्तः (३.२.१०२) । आप्लृः (स्वा० प० अ०)

---

1. Gods; divine beings [1] 2. Any being born from the womb as man, cow &c. [1] 3. Insects generated by warm vapour or sweat [1] 4. Birds and other beings born from eggs [1] 5. Trees, plants &c. which sprout [1] 6. One which sprouts or germinates [3] 7. M. मनोऽस्मिन् 8. Beautiful [12] 9. B. तदसेचनकं 10. M. मनोऽत्र 11. Charming [1].

सन (३ १ ७) क्त (३ २ १०२)। 'हृदयस्य प्रियम्' (४ ४ ९५) इति यत्। दया जातास्य[1]। वल्लत। 'वल्ल संवरणे' (भ्वा० आ० से०)। 'रासिवल्लिभ्या च' (उ० ३ १२५) इत्य मच्। प्रीणाति। प्रीञ (क्र्या० उ० अ०) क (३ १ १३५) ॥५३॥[2]

निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ।

कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ॥५४॥

कृपे (भ्वा० प० अ० तु० अ० अ०) क्त (३ २ १०२) ऋच्छति। ऋ गतौ' [भ्वादि]। अवद्यावमाधमार्वरेफा कुत्सिते' (उ० ५ ५४) इति निपात । 'रिफ कत्थनादौ (तु० प० से०)। याप्यते। याते (अ० प० अ०) ण्यन्ताद्यत् (३ १ ९७)। अर्वाति। पक्षे वकारस्य धकारो निपातात्। कुत्सित पूयते। 'पूयी विशरणे (भ्वा० आ० से०)। कुत्सा जातास्य[3]। न उद्यते। खेटति। 'खिट त्रासे (भ्वा० प० से०)। गर्हं कुत्सायाम् (भ्वा० आ० से०)। 'ऋहलोर्ण्यत् (३ १ १२४)। अणति अणक। अच (३ १ १३४) कुत्साया कन् (५ ३ ७४) ॥४४॥[4]

मलीमस तु मलिन कच्चर मलदूषितम्।

मलोऽस्यास्ति[5]। 'ज्योत्स्नातमिस्रा– (५ २ ११४) इति साधु। कुत्सितं चरति। रथवदयोश्च (६ ३ १०२) इति कात्वत्। चत्वारि ॥[6]

पूत पवित्र मेध्य च

पूयते स्म। पूङ (भ्वा० आ० स०) क्त (३ २ १०२)। 'कर्तरि चर्षिदेवतयो (३ २ १८६) इतीत्र। मधनीयम्। ण्यत्। (३ १ १२४) त्रीणि ॥[7]

वीध्र तु विमलात्मकम् ॥५५

विशषण इन्ध। 'वाविन्ध' (उ० २ २६) इति क्रन्। 'स्वभावनिर्मलस्य' द्वे ॥५५॥[8]

निर्णिक्त शोधित मृष्ट निश्शोध्यमनवस्करम्।

णिजे (जु० उ० अ०) क्त (३ २ १०२)। मृजे (अ० प० से०) क्त (३ २ १०२)। निष्क्रान्त शोध्यात्। नास्त्यवस्करोऽत्र[9]। 'अपनीतमलस्य' पञ्च' ॥[10]

---

1 M जातास्य 2 Favourite [6] 3 M जातास्य 4 Mean vile [13] 5 M मलोस्यास्ति 6 Dirty [4] 7 Sacred [3] 8 Pure (by nature) [2] 9 M नास्त्यवस्करोऽत्र 10 Purified, cleansed [5]

असारं फल्गु

न सारोऽत्र[1]। 'त्रिफला–' (म्वा० प० से०)। 'फलिपाटि—' (उ० १ १८) इति साधु ह्रं ॥[2]

शून्यं तु वशिकं तुच्छरिक्तके ॥५६॥

शुने हितम्। 'शुन सम्प्रसारणं वा च दीर्घं' (ग० ८ १२) [इति यत्]। वशीव। इवे कन्। तुदा व्यथया छ्यति। क[3]। रिचे· (चु० उ० से०) क्त (३ २ १०२)। चत्वारि ॥५६॥[4]

क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः ।
मुख्यवर्यवरेण्याश्च प्रवर्होनवरार्ध्यवत् ॥५७॥
पराध्याग्रप्राग्रहरप्राग्र्यमग्र्याग्रीयम्—अग्रियं[5]।

प्रदधाति। ल्युट् (३ १ ११३)। प्रकृष्टं मुखमस्य। प्रविच्यते। विचिर्–' (रु० उ० अ०)। घञ् (३ ३ १९)। नास्त्युत्तमोऽस्मात्[6]। उत्ताम्यति। अच् (३ १ १३४)। मुखमिव। शाखादित्वात् (५ ३ १०३) य। 'वर ईप्सायाम्' चुरादि। यत् (३ १ ९७)। 'वृञ एण्य' (उ० ३ ९८)। 'वृह वृद्धौ' (म्वा० प० से०)। अच् (३ १ १३४)। अवरस्मिनर्धे भव। 'अघायत्' (४ ३ ४)। स पूर्वाच्च (४ ३ ५) न अवरार्ध्यं ॥५७॥ परस्मिनर्धे भव। अगति अग्रम्। 'ऋज्रेन्द्र—' (उ० २ २८) इति साधु। प्रकृष्टमग्रं हरति। प्राग्रे भव। 'अग्रायत्' (४ ४ ११६)। 'घच्छौ च' (४ ४ ११७)। सप्तदश ॥[7]

श्रेयान् श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ॥५८॥

अतिशयेन प्रशस्य। 'अतिशायने तमबिष्ठनौ' (५ ३ ५५)। 'द्विवचनविभज्य—' (५ ३ ५७) इत्यसुन्। 'प्रशस्यस्य श्र' (५ ३ ६०)। पुष्यति। 'पुष क्नित्' (उ० ४ ४) इति करन्। अतिशयेन सन्, सत्तम। पञ्च ॥५८॥[8]

स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥५९॥

पुरुषो व्याघ्र इव पुरुषव्याघ्रः। पुमांश्चासौ गौश्च। 'गो—' (५ ४ ९२) इति टच्। एते श्रेष्ठस्य वाचकाः ॥५९॥

---

1 M सारोत्र 2 Worthless [2] 3 M क 4 Void, empty [4]
5 B and K अग्रियम् 6 M नास्त्युत्तमोस्मात् 7 Chief [17]
8 Excellent, best [5]

अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ।

न प्राग्र्य प्रधानमप्राग्र्यम् । उपसृज्यते । ल्युट् (३ ३ ११३) त्रीणि ॥[1]

विशङ्कट पृथुबृहद्विशालं पृथुलं महत् ॥६०॥

वड्रोरुविपुलम्

विस्तृतम् । 'वे शालच्छङ्कटचौ' (५ २ २८) । प्रथते । 'प्रथिम्र (म्र) दि' (उ० १ २८) इति कु । बर्हति । 'वृह वृद्धौ' (भ्वा० प० से०) । महति । 'वर्तमाने पृषन्महत्—' (उ० २ ८४) इति साधु ॥६०॥ वलते । 'वल संवरणे' (भ्वा० आ० से०) । बाहुलकाद्रक् । लस्य ड । 'उङ् शब्दे' (भ्वादि) । विपोलति । 'पुल महत्त्वे' (भ्वा० प० से०) । नव ॥[2]

पीनपीव्नी तु[3] स्थूलपीवरे ।

'प्याय पी' (६ १ २८) । 'ओदितश्च' (८ २ ४५) इति न । प्यायते । 'प्यैङ् वृद्धौ' (भ्वा० आ० अ०) । 'धाप्यो सम्प्रसारण च' (उ० ४ ११४) इति वनिप् । स्त्रिया ङीप् । 'स्थूल बृहणे' (चु० आ० से०) । अच् (३ १. १३४) । पीवाम राति ॥[4]

स्तोकाल्पक्षुल्लकाः श्लक्ष्ण सूक्ष्म दभ्रं कृशं तनु ॥६१॥

स्त्रिया मात्रात्रुटी[5] पुंसि लवलेशकणाणव[6] ।

स्तुच्यते । 'ष्टुच प्रसादे' (भ्वा० आ० से०) । घञ् (३ ३ १९) । अल्यते । 'अल भूषणादौ' (भ्वा० प० से०) । बाहुलकात् । क्षुदिर संपेषणे (रु० उ० अ०) । क्षुद लाति । सुष्ठु उत्यते । दभ्यते । 'स्फायि—' (उ० २ १३) इति रक् । 'कृश तनूकरणे' (दि० प० से०) । तन्यते । '—तनिचरि—' (उ० १ ७) इत्यु । ६१ ॥ मीयते । ष्ट्रन् (उ० ४ १५८) । त्रुट्यते । 'त्रुट छेदने' (चु० आ० म०) । इन् । लूयते । 'ऋदोरप्' (३ ३ ५७) । 'लिश गतौ' (तु० प० अ०) । 'कण निमीलने' (चु० उ० से०) । अच् (३ १.१३४) । 'अण शब्दे' (भ्वा० प० से०) । 'अणश्च' (उ० १ ८) इत्यु । चतुर्दश ॥[6]

अत्यल्पेऽल्पिष्ठमल्पीय कनीयोऽणीय इत्यपि ॥६२॥

अतिशयनाल्प । युवाल्पयो कन् (५ ३ ६४) अतिशयनाणु । चत्वारि ॥६२॥[7]

1 Subordinate [3] 2 Large or great (in size) [9] 3 B न 4 Fat [4] 5 B मात्र त्रुटि 6 Little, small [14] 7 Smallest or least [4]

प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु।
पुरुहू (हु) पुरु भूयिष्ठं स्फिरं भूयश्च भूरि च ॥६३॥

प्रगतं चुराया । प्रकर्षेणाज्यते । 'अञ्जू व्यक्त्यादौ' (रु० प० से०)। 'बहि वृद्धौ' (भ्वा० आ० से०)। 'लङ्घिबह्योर्नलोपश्च' (उ० १.२९)। इत्युः । 'पुरु' इति हूयते पुरुहू । 'पुरून् हन्ति गच्छति । हृतेडं. (वा० ३ २.१०१)।' —इत्यन्ये । 'पॄ पालने' (जु० प० से०)। 'पॄभिदि—' (उ० १.२३) इति कु । अतिशयेन बहु । 'बहोर्लोपो भू च बहो' (६.४.१५८)। स्फायी (भ्वा० आ० से०)। 'अजिरशिशिर—' (उ० १ ५३) इति स्फिर.। 'स्फार.' इत्यन्ये । अतिशयन बहु । अदिभूशुभिभ्य. क्रिन् (उ० ४.६५)। द्वादश ॥६३॥[1]

परश्शताद्यास्ते येषां परा संख्या शतादिकात् ।

शतात्परे । पारस्करादित्वात् (६ १.१५७) सुट् ॥[2]

गणनीये तु गणेयं (यम्)

गणयितुं शक्य । अनीयर् (३.१.९६)। संज्ञापूर्वकत्वाण्णिलोपाभावे 'अचो यत्' (३.१.९७)। द्वे ॥[3]

संख्याते[4] गणितम्

ख्याते' (अ० प० अ०) क्त (३.२.१०२)। द्वे ॥[5]

अथ समं सर्वम् ॥६४॥

विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निश्शेषम् ।
समग्रं सकलं पूर्णमखण्डं स्यादनूनके ॥६५॥

समति । 'षम वैक्लव्ये' (भ्वा० प० से०)। सरति । 'सर्वनिघृष्व—' (उ० १.१५४) इति साधु ॥ ६४ ॥ विशति । 'अशूप्रुषि—' (उ० १ १५२) इति क्वन् । 'कृती वेष्टने' (रु० प० से०)। 'कृत्यशूभ्यां क्स्न' (उ० ३ १७)। समस्यते । असे (दि० प० से०) क्त (३ २ १०२)। निवृत्त खिलमस्मात् । संगतमग्रमस्य । सह कलाभि । पूर्यते । क्त । न खण्ड्यते । अच् । 'ऊन परिहाणे (चु० उ० स०)। अच् (३ १ १३४)। न ऊनम् । चतुर्दश ॥ ६५ ॥[6]

---

1 Ample, abundant [12] 2 Figures more than hundred, thousand &c [1 each] 3 Numerable [2] 4 B सख्यान 5. Numbered or counted [2] 6 All, whole, entire [14].

घनं निरन्तरं सान्द्रम्

हन्यते । 'मूर्तौ घनः' (३ ३ ७७) । सह अद्र्यते । 'अदि बन्धने' (भ्वा० प० से०) । रक् । त्रीणि ॥[1]

पेलवं विरलं तनु ।

पिल्यते । 'पिल भेदने' (तु० प० से०) । पेलोऽस्यास्ति[2] । वि राति । अन्तरबाहुल्यकात् कलन् । त्रीणि ॥[3]

समीपे निकटासन्नसंनिकृष्टसनीडवत् ॥ ६६ ॥

सदेशाभ्यास (श) सविधसमर्यादसवेशवत् ।

उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम् ॥ ६७ ॥

सगता आपोऽस्मिन्[4] । निकटति । 'कटे वर्षादौ' (भ्वा० प० से०) । आसदे क्त । सह नीडेन । समानो देशोऽस्य । अभ्यस्यते । 'असु क्षेपणे' (सह नीडेन । समानो देशोऽस्य । अभ्यस्यते । 'अशू व्याप्तौ' (स्वा० आ० से०) । समाना विधाऽस्य[5] । समाना मर्यादाऽस्य[6] । समानो वेशोऽस्य[7] । उपगतं कण्ठम् । अन्तोऽस्यास्ति[8] । ठन् (५ २ ११५) । अभ्यर्द्यते स्म । अर्देः (भ्वा० प० से०) क्त । अभिमुखमग्रमस्य । अभेस्तसिल् । पञ्चदश ॥ ६७ ॥[9]

संसक्ते त्वव्यवहितमपटान्तरमित्यपि ।

'षञ्ज सङ्गे' (भ्वा० प० अ०) क्त (३ २ १०२) । 'दधातेर्हिः' (७ ४ ४२) । नास्ति पटेन अन्तरं व्यवधानमत्र । 'अपदान्तरम्' इत्यन्ये । त्रीणि ॥[10]

नेदिष्ठमन्तिकतमम्

अतिशयेनान्तिकम् । 'अन्तिकबाढयोर्नेदसाधौ' (५ ३ ६३) । द्वे ॥[11]

स्याद्दूरं विप्रकृष्टकम् ॥ ६८ ॥

दुःखेन[12] ईयते । 'दुरीणो लोपश्च' (उ० २ २०) । द्वे ॥ ६८ ॥[13]

दवीयश्च दविष्ठं च सुदूरे

अत्यन्तं दूरम् । त्रीणि ॥[14]

---

1 Dense, thick [3] 2 M पेलोस्यास्ति 3, Sparse [3] 4 M आपोस्मिन् 5 M विधास्य 6 M मर्यादास्य 7 M वेशोस्य 8 M अन्तोस्यास्ति 9 Near, close by, adjacent [15] 10 Contiguous [3] 11 Nearest [2] 12 M दुःखेन 13 Far [2] 14 Far away [3]

दीर्घमायतम् ।

दृणाति । 'दृ विदारणे' (क्र्या० प० से०) । बाहुलकाद्घ । आयमे क्तः (३ २ १०२) । द्वे ॥[1]

वर्तुलं निस्तलं वृत्तम्

वर्तते । बाहुलकादुलच् । निर्गतं तलमस्य[2] । वर्तनं स्म । क्त (३ ४ ७२) ॥[3]

बन्धुरं तून्नतानतम् ॥ ६९ ॥

बध्नाति गतिम्, बन्धुरम् । उन्नतस्तदुपाधिवशादानतम् ॥ ६९ ॥[4]

उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे

उच्चीयते । ड । प्रकृष्टा अंशवोऽस्य[5] । नमे क्त । ऊर्ध्वमग्रमस्य । श्रिञ (भ्वा० प० से०) क्त (३ ४ ७२) । तुज्यते । 'तुजि हिंसायाम्' (भ्वा० प० से०) । घञ् (३ ३ १९) षट् ॥[6]

अथ वामने ।

न्यङ्नीचखर्वह्रस्वाः स्युः

वामोऽस्त्यस्य[7] । न्यचति । ऋत्विगादिना (३ २ ५९) क्विन् । निम्न चीयते । खर्वति । 'खर्व गतौ' (भ्वा० प० से०) । ह्रसति । 'ह्रस शब्दे' (भ्वा० प० से०) । बाहुलकाद्व । पञ्च ॥[8]

अवाग्रेऽवनतानतम्[9] ॥ ७० ॥

अवनतमग्रमस्य । अवनमति स्म अवनतम् । आनमति स्मानतम् । त्रीणि 'अधोमुखस्य' ॥ ७० ॥[10]

अरालं वृजिनं जिह्ममूर्मिमत्कुञ्चितं नतम् ।

आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥ ७१ ॥

अरा सन्त्यस्य । 'वृजी वर्जने' (अ० आ० से०) । 'वृजे कित्व' (उ० २. ४७) इतीनन्) 'जहातः सन्वदालोपश्च' (उ० १.१४१) इति मन् । व्यधेः (दि० प० अ०) क्त (३ २ १०२) । कुटि कौटिल्यं लाति । 'भुजो कौटिल्ये'

1. Long [2] 2 M जल्मस्य 3 Round, circular [3] 4 Uneven [2] 5 M अग्रवोम्य 6 High, tall [6] 7 M वामोरस्तस्य 8 Short, small [5] 9 B अवाग्रेऽवनतानत 10 Bent down or down-Cast [3].

(तु० प० से०)। क्न (३४७२)। 'वेल्ल चलने' (भ्वा० प० से०)। वञ्चे (भ्वा० प० से०) 'स्फायि—' (उ० २१३) इति रक्। एकादश ॥ ७१ ॥[1]

अजावजिह्मप्रगुणौ

'अर्ज अर्जने' (भ्वा० प० से०)। 'अर्जिदृशि—' (उ० १ २७) इति साधु । प्रकृष्टो गुणोऽस्य[2]। त्रीणि ॥[3]

व्यस्ते त्वप्रगुणाकुलौ।

'कुल संस्त्याने' (भ्वा० प० से०)। 'व्याकुलस्य' त्रीणि ॥[4]

शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः ॥७२॥

शश्वद्भव । 'ध्रुव स्थैर्ये' (तु० प० से०)। नियत भव । त्यद् नेर्ध्रुवे' (वा० ४ २ १०४)। सदा सना च भव । सायचिरम्—' (४ ३ २३) इति ट्युट्युलौ । पञ्च ॥७२॥[5]

स्थास्नुः स्थिरतर. स्थेयान्

स्थानशील । 'ग्लाजि—' (३ २ १३९) इति क्स्नु । अतिशयेन स्थिर । ईयसुनि (५ ३ ५७) 'प्रियस्थिर—' (६ ४ १५७) इति साधु । 'अतिस्थिरस्य' त्रीणि ॥[6]

एकरूपतया तु य ।

कालव्यापी स कूटस्थः

कूटवत्तिष्ठति ॥[7]

स्थावरो जङ्गमेतर ॥७३॥

'स्थेशभास—' (३ २ १७५) इति वरच् । जङ्गमादितर । द्वे ॥७३॥[8]

चरिष्णुजङ्गमचर त्रसमिङ्ग चराचरम्।

चरति । 'अलङ्कृञ्—' (३ २ १३६) इतीष्णुच् । कुटिल गच्छति । गमर्यङन्तादच् (३ १ १३४)। त्रसति । अच् (३ १ १३४)। इङ्गति । 'इगि गतौ' (भ्वा० प० से०)। 'चरिचलि—' (वा० ६ १ १२) इति द्वित्वादि ॥[9]

---

1 Crooked curved [11] 2 M गुणास्य 3 Straight [3] 4 Bewildered [2] 5 Eterna , firm [5] 6 Ever lasting [3] 7 Kūṭasth (Supreme Soul) [1] 8 Immoveable [2] 9 Moveable [5]

चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम् ॥७४॥
चञ्चलं तरलं चैव पारिप्लवपरिप्लवे ।

'चलनशब्द—' (३ २ १४८) इति युच् । 'नमिकम्पि—' (३ २ १६७) इति र । लोडति । 'चरिचलि—' (वा० ६ १ १२) इति द्वित्वादि ॥७४॥ 'चञ्चु गतौ' (भ्वा० प० से०) । तर लाति । परिप्लवन । 'प्लुङ् गतौ' (भ्वा० आ० से०) प्रज्ञाद्यण् (५ ४ ३८) । दश ॥[1]

अतिरिक्तः समधिकः
अतिरिच्यते । क्त (३ २ १०२) । सम्यगधिक । द्वे ॥[2]

दृढसंधिस्तु संहतः ॥७५॥

दृढसंधिरस्य । द्वे ॥७५॥[3]

कक्खटं कठिनं क्रूरं कठोरं निष्ठुरं दृढम् ।
जरठं मूर्तिमन्मूर्तम्

कक्खति । 'कख हसने' (भ्वा० प० से०) । 'शकादिभ्योऽटन्' (उ० ४ ८१) 'कवर्गद्वितीयादि [खक्खटम्]' इत्यन्य । 'खक्ख' हसने इत्यपरे । 'कठ कृच्छ्रजीवने' (भ्वा० प० से०) । बाहुलकादिनच् । कृन्तति । कृन्ते क्रू रक् च । 'कठिचकिभ्यामोरन्' (उ० १ ६४) । नितिष्ठति । मद्गुरादि (उ० १ ४१) । 'दृहदृहि वृद्धौ' (भ्वा० प० से०) । क्त । 'दृढ स्थूल—' (७ २ २०) इति साधु । जीर्यति । बाहुलकादठच् । मुच्छा (भ्वा० प० से०) क्त (३ ४ ७२) । नव ॥[5]

प्रवृद्धं प्रौढमेधितम् ॥७६॥

प्र वहे (भ्वा० उ० अ०) क्त (३ २ १०२) । त्रीणि ॥७६॥[6]

पुराणे[7] प्रतनप्रत्नपुरातनचिरंतनाः ।

पुरा भवम् । 'सायंचिरम्—' (४ ३ २३) इति टघुट्युलौ । 'नश्च पुराणे—' (वा० ५ ४ २५) पुरात्नप्रत्नौ प्रादेशश्च । चिर भवम् ॥[8]

प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ॥७७॥
नूत्नश्च

प्रति नवमग्रमस्य । अभिनूयते । 'णु स्तुतौ' (अ० प० अ०) । 'ऋदोरप्'

---

1 Trembling, shaking [10] 2 Excessive [2] 3 Closely joined or firmly united [2] 4 M शकादिभ्योऽन् 5 Hard, cruel [9] 6 Grown, increased [3] 7 B and K पुराण 8 old, ancient [5]

(३ ३ ५७)। 'अचो यत्' (३ १ ९७) नव्य । नवस्य नू लप्तनप्खाश्च प्रत्यया (वा० ४ ४ ३०) ॥[1]

सुकुमारं तु कोमलं मृदुलं मृदु ।

सुकुमार्यते । 'कुमार क्रीडायाम्' (चु० प० से०) । काम्यतेरलच्, अत उत्वं च । मृद्यते । 'मृद क्षोदे' (क्र्या प० से०) । 'प्रथि मृदि—' (उ० १ २८) इति कु । चत्वारि ॥[2]

अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् ॥७८॥

अन्वञ्चति । क्विन् (३ २ ५९) । अनुगतमक्षमिन्द्रियम् । अनु गच्छति । पदस्य पश्चात् ॥७८॥[3]

प्रत्यक्षं स्यादैन्द्रियकम्

प्रतिगतमक्षमिन्द्रियम् । इन्द्रियेषु भवम् । द्वे ॥[4]

अप्रत्यक्षमतीन्द्रियम् ।

'अत्यध्यक्षम्' अपि क्वचित्पाठ । अतिक्रान्तमिन्द्रियम् । 'इन्द्रियेणाज्ञातस्य' द्वे[5] ॥

एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि ॥७९॥

अप्येकसर्ग एकाग्र्य (ग्र्यो) ऽप्येकायनगतोऽपि सः ।

एक अविच्छिन्न तानो विस्तारोऽस्य[6] । अनन्या एकरूपा वृत्तिर्व्यापारोऽस्य[7] । एकमग्र पुरोगत ज्ञेयमस्य । एकमयनमस्य ॥७९॥ एक सर्गो निश्चयोऽस्य[8] । एकाग्र एव ऐकाग्र्य । एकमयन गत । सप्त ॥[9]

पुरस्तादि पूर्वपौरस्त्यप्रथमाद्या

आ प्रथम दीयते गृह्यते । 'उपसर्गे घो कि' (३ ३ ९२) पूर्वति । 'पूर्व पूरणे' (भ्वा० प० से०) । पुरो भव । 'दक्षिणापश्चात्पुरसस्त्यक्' (४ २ ९८) । 'प्रथ प्रख्याने (भ्वा० आ० से०) । 'प्रथेरमच्' (उ० ५ ६८) । पञ्च ॥[10]

अथास्त्रियाम् ॥८०॥

अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमम् ।

अन्तति । 'अति बन्धने' (भ्वा० प० से०) । जघने भवम् । दिगादि

---

1 New [7] 2 Tender, delicate soft [4] 3 Afterwards or going after [4] 4 Perceptible to the senses [2] 5 Imperceptible to the senses [2] 6 M विस्तारोस्य 7 M वृत्तिर्व्यापारोस्य 8 M निश्चयोस्य 9 A concentrated man [7] 10 First [5]

(४ ३ ५४)। 'चरेश्च' (उ० ५ ८९) इत्यमच्। पश्चादमवम्। अग्रादि-पश्चाड्डिमच्' (वा० ४ ३ २३) ॥[1]

मोघं निरर्थकम्

मुह्यन्त्यस्मिन्। घञ् (३ ३ १२१) न्यङ्क्वादि (७ ३ ५३) द्वे ॥[2]

स्पष्टं स्फुटं प्रव्यक्तमुल्बणम् ॥८१॥

'स्पश बाधनस्पर्शनयो' (भ्वा० उ० स०)। क्त। (३ २ १०२)। 'वा दान्त-' (७ २ २७) इति साधु। स्फुटति। क (३ १ १३५) उद्वणति। 'वण शब्दे' (भ्वा० प० से०)। पृषोदरादि (६ ३ १०९)। चत्वारि ॥८१॥[3]

साधारणं तु सामान्यम्

समानमाधरणमस्य। सम मानमस्य। ष्यञ्। द्वे ॥[4]

एकाकी त्वेक एककः।

'एकादाकिनिच्चासहाये' (५ ३ ५२)। चात्कन्लुकौ।[5]

भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि ॥८२॥

भिन्नोऽर्थो[6] येषाम्। अन्य एव। 'अल्पाच्तरम्' (२ २ ३४) इतिवत्स्वार्थे तरप्। एति। 'इण्भी-' (उ० ३ ४३) इति कन्। तनोति। 'तनोतेरनश्च व' (उ० २ ६३)। अनिति। 'अन प्राणने' (अ० प० से०)। अन्न्यादि (उ० ४ १११)। इतं राति ॥८२॥[7]

उच्चावचं नैकभेदम्

उदक् चावाक् च। मयूरव्यंसकादि (२ १ ७२)। न एको भेदोऽत्र[8]। 'अनेकप्रकारस्य' द्वे ॥[9]

उच्चण्डमविलम्बितम्।

'चडि कोपे' (भ्वा० आ० से०) घञ्। (३ ३ १८) द्वे ॥[10]

अरुन्तुदं तु मर्मस्पृक्

अरुपि तुदति। 'विध्वरुषोस्तुद' (३ २ ३५) इति खच्। मर्म स्पृशति। द्वे ॥[11]

अबाधं तु निर्गलम् ॥८३॥

न बाधाऽस्य[12]। निष्क्रान्तमर्गलाया। 'अबाधितस्य' द्वे ॥८३॥[13]

---

1 Last [6] 2 Futile [2] 3 Clear [4] 4 General [2] 5 Alone [3] 6 M भिन्ना अर्थो 7 Other, different [6] 8 M भेदोऽ 9 Various, diverse [2] 10 quick [2] 11 Poignant (as words) [2] 12 M बाधास्य 13 Unobstructed, unrestrained [2]

प्रसव्यं प्रतिकूलं स्यादपसव्यमपष्ठु च ।

प्रगत सव्यात् । प्रतीप कूलात् । अपतिष्ठति । 'अप दु सुषु स्थ' (उ० १ २५) इति कु । 'विरुद्धार्थस्य' त्रीणि ॥[1]

वामं शरीरं सव्यं स्यादपसव्यं तु दक्षिणे ॥८४॥

सूयते । 'पू पूरणे' (तु० प० से०) । यत् (३ १ ९७) । अपक्रान्त सव्यात् । एवैकम् ॥[2]

सङ्कटं ना तु सबाध

सकटति । 'कटे वर्षादौ' (भ्वा० प० से०) । स बाधन्तेऽत्र[3] । 'सकीर्णस्य' द्वे ॥[4]

कलिलं गहनं समम् ।[5]

कलते । 'सलिकलि-- (उ० १ ५४) इतीलच् । गाहते । पृषोदरादित्वात् (६ ३ १०६) ह्रस्व । 'दुष्प्रवेशस्य' द्वे ॥[6]

सकीर्णं संकुलाकीर्णे

किर (तु० प० से०) क्त (३ २ १०२) । 'कुल सस्त्याने' (भ्वा० प० से०) । त्रीणि ॥[7]

मुण्डितं परिवापितम् ॥८४॥

पर्येण्यन्तात्क्त (३ २ १०२) ॥ द्वे ॥ ८४ ॥[8]

ग्रन्थितं[9] संदितं दृब्धम्

'ग्रन्थ सदर्भे' (क्र्या० प० से०) । 'दो अवखण्डने' (दि० प० अ०) । क्त (३ २ १०२) । 'द्यतिस्यति--' (७ ४ ४०) इतीत्वम् । 'दृभी ग्रंथे' (तु० प० से०) क्त । त्रीणि ॥[10]

विसृतं विस्तृतं ततम् ।

'सृ गतौ' (भ्वा० प० अ०) । क्त (३ ४ ७२) । त्रीणि ॥[11]

अन्तर्गतं विस्मृतं स्यात्

'स्मृ आध्याने' (भ्वा० प० अ०) द्वे ॥[12]

प्राप्तप्रणिहिते समे ॥८५॥

प्राप्ते क्तः । 'दधातेर्हि' (७ ४ ४२) । 'स्थापितस्य' द्वे ॥८५॥[13]

---

1 Contradictory [3] 2 The left and right parts of a body [1 each] 3 M बाध तेत्र 4 Narrow [2] 5 M and K. समे 6 Impenetrable [2] 7 Crowded [3] 8 Shaved [2] 9 K. ग्रथित 10 Strung tied together [3] 11 extended, spread out [2] 12 Forgotten [2] 13 Obatained attained [2]

वेल्लितप्रेङ्खिताधूतचलिताकम्पिता धुते ।

'वेल्ल चलने' (भ्वा० प० से०)। 'इखि गतौ' (भ्वा० प० से०)। 'धू विधूनने' (तु० प० से०)। आकम्प्यते। 'धुञ् कम्पने' (क्र्या० प० से०) षट् ॥[1]

नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताः समाः ॥८७॥

'णुद प्रेरणे' (तु० उ० अ०)। 'नुदविद—' (८.२.५६) इति वा नः। अस्यते. क्त (३.२.१०२) निष्ठीव्यते स्म। 'च्छ्वोः —' (६.४.१९) इत्यूठ्। आविध्यते स्म। क्षिपेः (तु० उ० से०) क्तः। 'ईर गतौ' (अ० आ० से०)। सप्त ॥[2]

परिक्षिप्तं तु निवृतम्

'वृञ् आवरणे' (क्र्या० उ० से०)। क्त. (३.२.१०२)। 'परिखादिना वेष्टितस्य' द्वे ॥[3]

मूषितं मुषितार्थकम्।

'मूष स्तेये' (भ्वा० प० से०)। 'चोरितस्य' द्वे ॥[4]

प्रवृद्धप्रसृते

वृधे (भ्वा० आ० से०) क्त (३ ४ ७२)। 'सृ गतौ' (भ्वा० प० अ०) द्वे ॥[5]

न्यस्तनिसृष्टे

असे. (दि० प० से०) क्तः (३ २.१०२)। सृजे. (दि० आ० अ०) [क्तः]। 'त्यक्तस्य' द्वे ॥[6]

गुणिताहते ॥८८॥

'गुण आमन्त्रणे' (चु० उ० से०)। आ 'हन्' (अ० प० अ०)। "गुणितस्य' द्वे ॥८८॥[7]

निदिग्धोपचिते

'दिह उपचये' (अ० उ० अ०)। चिञ् (स्वा० उ० अ०)। 'पुष्टिं प्रापितस्य' द्वे ॥[8]

1 Shaken, oscillated [6] 2 A person put or set in motion [7] 3 Sorrounded or encircled with trench &c [2] 4 Stolen [2] 5 Full-grown [2] 6 Thrown, laid down [2] 7. Multiplied [2] 8 Increased, accumulated [2].

गूढगुप्ते

गूह्यते । द्वे ॥[1]

गुण्ठितरूषिते ।[2]

'गुडि वेष्टने' । रुषिर्वेष्टनार्थः । द्वे 'गोटालीका' [लोके] ॥[3]

द्रुतावदीर्णे

'द्रु गतौ' (भ्वा० प० अ०) । 'दृ विदारणे' (क्र्या० प० से०) । 'द्रवीकृतस्य' द्वे ॥[4]

उद्गूर्णोद्यते

'गुरी उद्यमने' (दि० आ० से०) । उद् यमे (भ्वा० प० अ०) क्तः (३ २ १०२) । 'उत्तोलितस्य' द्वे ॥[5]

काचितशिक्षिते[6] ॥८९॥

काच्यते । शिक्षा कारिता । द्वे ॥८९॥[7]

घ्राणघ्राते

जिघ्रतेर्नुदविद (८ २ ५६) इति वा न । द्वे ॥[8]

दिग्धलिप्ते

दिह् (अ० उ० अ०) । लिप (तु० उ० अ०) । द्वे ॥[9]

समुदक्तोद्धृते समे ।

समु [द] च्यते । 'अञ्चु गतौ (भ्वा० प० से०) । 'हृञ् हरणे (भ्वा० उ० से०) । 'कूपादेर्निष्कासितस्य द्वे ॥[10]

वेष्टितं स्याद्वलयितं संवीतं रुद्धमावृतम् ॥ ९० ॥

'वेष्ट वेष्टने (भ्वा० आ० से०) । वलयं जातमस्य । व्येञ् (भ्वा० उ० अ०) । क्त (३ २ १०२) । रुधिर् (रु० उ० अ०) । वृञ् आवरणे' (क्र्या० उ० से०) । 'नद्यादिवेष्टितस्य पञ्च ॥ ९० ॥[11]

---

1 Hidden [2] 2 B prefers गुण्ठितरूषिते 3 Covered with dust [2] 4 Liquidised melted [2] 5 Raised lifted up [2] 6 B कचित शक्षिते 7 Anything put on a hanging loop or swing made of rope [2] 8 Smelt [2] 9 Smeared or anointed [2] 10 Raised drawn up (as water from a well) [2] 11 Encircled surrounded [5]

रुग्णं भुग्ने

'रुजो भङ्गे' (तु० प० अ०)। 'भुजो कौटिल्ये' (तु० प० अ०) 'वक्रस्य' द्वे ॥[1]

अथ निशितक्ष्णुतशातानि तेजिते।

श्यते क्तः (३ २ १०२)। 'शाच्छो—' (७ ४ ४१) इति वेत्वम्। 'क्ष्णु तेजने' (अ० प० से०)। 'तिज निशाने' (चु० प० स०)। 'शाणादावारोपितस्य' चत्वारि ॥[2]

स्याद्विनाशोन्मुखं पक्वम्

'पचो वः' (८.२ ५२)। द्वे ॥[3]

ह्रीणह्रीतौ तु लज्जिते ॥ ९१ ॥

'ह्री लज्जायाम्' (जु० प० अ०)। 'नुदविद' (८ २ ५६) इति वा नः। त्रीणि ॥ ९१ ॥[4]

वृत्ते तु वृत्तव्यावृत्तौ

वृञ्‌,वृञ्भ्यां [illegible] (३ २ १०२)। 'वावृतु वर्तने' इति मते ततः क्तः। 'वृतस्य' व [राद्वे] ॥[5]

संयोजित उपाहित।

धुञे (१० उ० अ०) मन (३.२ १०२)। 'दधातेर्हिः' (७.४ ४२)। द्वे ॥[6]

प्राप्य गम्य समासाद्यम्

आप्नोतेः (३ १ १२४)। गम (भ्वा० प० अ०) यत्। षद्लृ (तु० प० अ०) ण्यत् (३ १ १२४)। त्रीणि ॥[7]

स्यन्नं रीणं स्नुतं स्नुतम्[8] ॥ ९२ ॥

स्यन्दे (भ्वा० आ० स०) क्तः (३ २ १०२) 'रदाभ्याम्—' (८ २. ४२) इति नः। 'रीङ् स्रवणे' (दि० आ० अ०)। 'स्नु गतौ' (भ्वा० प० अ०)। 'स्नु (ष्णु) प्रस्रवणे' (अ० प० से०) ॥ ९२ ॥[9]

1 Broken or shattered [2] 2 Sharpened [4] 3 Ripen or about to perish [2] 4 Ashamed [3] 5 Chosen, selected as a husband &c [2] 6 Connected, joined [2] 7 Obtainable, knowable [3] 8 B स्रुत 9 Dropped or flowed (as water &c) [3]

सगूढं स्यात्संकलित

गूहते (भ्वा० उ० अ०) [क्त] । 'कल संख्याने' (भ्वा० आ० से०) । 'अङ्कान्तरेणैकीकृतस्य' द्वे ॥[1]

अवगीतं ख्यातगर्हणं ।

'गै शब्दे (भ्वा० प० से०) । 'घुमास्था–' (६ ४ ४६) इति [इत्वम्] । सख्यात गर्हणमस्य । 'प्रसिद्धनिन्दस्य' द्वे ॥[2]

विविधं स्याद्बहुविधो नानारूपः पृथग्विधः ॥ ९३ ॥

विविधा विधाऽस्य[3] । नानारूप यस्य । चत्वारि ॥ ९३ ॥[4]

अवरीणो धिक्कृतश्चापि

'रीङ् स्रवणे (दि० आ० अ०) अवरीण । निन्दितस्य द्वे ॥[5]

अवध्वस्तोऽवचूर्णित ।

'ध्वसु गतौ' (भ्वा० आ० स०) । अवचूर्ण्यते । चुरादे क्त । द्वे ॥[6]

अनायासकृत फाण्टम्

'फण गतौ' (भ्वा० प० म०) । क्षुब्धस्वान्त— (७ २ १८) इति साधु । 'क्वाथविशेषस्य' द्वे ॥[7]

स्वनितं ध्वनितं समे ॥ ९४ ॥

'स्वन ध्वन शब्दे' (भ्वा० प० स०) ॥ ° ८ ॥ द्वे ॥[8]

बद्धे सदानित मूतमुदित सदित सितम् ।

बन्ध बन्धने (क्र्या० प० से०) । दान अव खण्डन (भ्वा० उ० से०) । 'मूङ् बन्धने (भ्वा० आ० म०) । उत्पूर्वाद् वन (दि० प० अ०) ग (३ २ १०२) 'द्यतिस्यति—' (३ ४ ४०) इतीत्वम् । 'षिञ् बन्धने (स्वा० उ० अ०) । षट् ॥[9]

निष्पक्वं क्वथितम्

निश्चयेन पक्वम् । 'क्वथ निष्पाके (भ्वा० प० म०) । द्वे ॥ ॥[10]

पाके क्षीराज्यहविषा[11] शृतम् ॥ ९५ ॥

क्षीरादीनां पाके । 'शृत पाके' (६ १.२७) इति साधु । एकम् ॥ ९५ ॥[12]

---

1 Added (as a figure to another) [2] 2 A notoriously vile person [2] 3 M विधास्य 4 Manifold, of Various sorts [4] 5 Despised [2] 6 Powdered [2] 7 An infusion or decoction easily prepared [2] 8 S und [2] 9 Fettered tied [6] 10 Well cooked [2] 11 B [illegible] 12 Boiled milk, ghee &c. [1]

निर्वाणो मुनिवह्न्यादौ निर्वातस्तु गतेऽनिले[1] ।

निर्वाति स्म । 'निर्वाणोऽवाते' (८२५०) इति साधु । निर्गतो वात । एकैकम् ॥[2]

पक्वं परिणतम्[3]

परिणमति स्म । द्वे ॥[4]

गून हन्ने

'गु पुरीषोत्सर्गे' (तु० प० अ०) । 'दुग्वोर्दीर्घश्च' (वा० ८२४४) इति न । हद पुरीषोत्सर्गे' (भ्वा० आ० अ०) । 'रदाभ्याम्—' (८२४२) इति न । 'गुदनिस्सृतपुरीषस्य' द्वे ॥[5]

मीढं तु मूत्रिते ॥९६॥

'मिह सेचने' (भ्वा० प० अ०) । क्त (३२१०२) । द्वे ॥९६॥[6]

पुष्टं तु पुषितम्

'पुष पुष्टौ' (दि० प० अ०) । मोवादिकस्यपरित्वेद् । 'कृतपोषणस्य' द्वे ॥[7]

सोढं[8] क्षान्तम्

सहे (भ्वा० आ० से०) क्त (३२१०२) । 'क्षमूष सहने' (दि० प० से०) ।[9]

उद्वान्तमुद्गतम्[10] ।

'टुवमु उद्गिरणे' (भ्वा० प० से०) । क्त (३२१०२) गमे (भ्वा० प० अ०) क्त (३२१०२) । 'वमित्वा त्यक्तस्य' द्वे ॥[11]

दान्तस्तु दमिते

दम्यते स्म । 'दमु उपशमे' (दि० प० से०) 'वा दान्तशान्त—' (७२२७) इति साधु । 'इतदमनस्य वृषादे' द्वे ॥[12]

शान्तं शमिते

शम क्त (३२१०२) । द्वे ॥[13]

---

1 B गतानिले 2 An extinguished lamp and a liberated muni, and a place sheltered from wind [1 each] 3 B and K पक्वं परिणते 4 Ripened, fully developed [2] 5 Voided by stool as ordure [2] 6 Discharged or voided as urine [2] 7 Nourished, brought up [2] 8 B and K सोढे 9 Forgiven [2] 10 B उद्वान्तमुद्गते 11 Vomited [2] 12. Tamed [2] 13 Appeased [2]

प्रार्थितेऽर्दितः ॥९७॥

'अर्थ उपयाच्ञायाम्' (चु० आ० से०) । 'अर्द गत्यादौ' (भ्वा० प० से०) द्वे ॥९७॥[1]

ज्ञप्तस्तु ज्ञपिते

ज्ञप्यतेस्म । मारणादौ ज्ञा मित् । वा दान्त–' (७ २ २७) इति साधु । द्वे ॥[2]

छन्नश्छादिते

'छिद अपवारणे' (चु० उ० से०) । 'वा दान्त–' (७ २ २७) इति साधु । द्वे ॥[3]

पूजितेऽञ्चित ।

'पूज पूजायाम्' (चु० प० से०) । 'अञ्चु पूजायाम्' (भ्वा० प० से०) ॥[4]

पूर्णस्तु पूरिते

'पूरी आप्यायने' (दि० आ० से०) । प्राग्वत् ॥[5]

क्लिष्ट क्लेशिते[6]

'क्लिशू विबाधने' (चु० प० से०) । 'क्लिशः क्त्वानिष्ठयो' (७ २ ५२) इति वेट् । द्वे ॥[7]

अवसिते सित ॥९८॥

अवस्यति स्म । 'द्यतिस्यति–' (७ ४ ४०) इतीत्वम् । 'समाहस्य' द्वे ॥९८॥[8]

प्रुष्टप्लुष्टोषिता दग्धे

'प्रुषु प्लुषु दाहे' (भ्वा० प० से०) । 'उष दाहे' (भ्वा० प० से०) ॥[9]

तष्टत्वष्टौ तनूकृते ।

'तक्षू त्वक्षू तनूकरणे' (भ्वा० प० से०) । त्रीणि ॥[10]

वेधितच्छिद्रितौ विद्धे

'विध विधाने' (तु० प० से०) । छिद्र जातमस्य । त्रीणि ॥[11]

विन्नवित्तौ विचारिते ॥९९॥

'विद विचारणे' (रु० आ० अ०) । 'नुदविद–' (८ २ ५६) इति वा न । त्रीणि ॥९९॥[12]

---

1 Begged, requested [2] 2 Made known, informed [2] 3 Covered, concealed [2] 4 Revered, honourd [2] 5 Filled, completed [2] 6 B and K क्लिशितं 7 Distressed [2] 8 Finished [2] 9 Burnt [4] 10 Hewn (as a wood) [3] 11 Pierced [3] 12 Considered, examined [3]

निष्प्रभे विगतारोकौ

नास्ति रोचनं रोको दीप्तिरस्य । त्रीणि ॥[1]

विलीने विद्रुतद्रुतौ ।

'लीङ् श्लेषणे' (दि० आ० अ०) । 'स्वादय ओदित' इति न ॥ त्रीणि ॥[2]

सिद्धे निर्वृत्तनिष्पन्नौ

'षिधु—' (दि० प० अ०) । 'वृतु—' (भ्वा आ० से०) । 'पद—' (दि० आ० अ०) । त्रीणि ॥[3]

दारिते भिन्नभेदितौ ॥१००॥

इभिदो. क्त (३.२.१०२) । त्रीणि ॥१००॥[4]

ऊतं स्यूतमुत चेति त्रितयं तन्तुसतते ।

'ऊयी तन्तुसन्ताने' (भ्वा० आ० से०) । सिवे. (दि० प० से०) 'च्छ्वो —' (६.४.१९) इत्यूठ् । 'वेञ्—' (भ्वा० प० अ०) क्त. (३.२.१०२) । तन्तुभि. सततम् ॥[5]

स्यादर्हितं नमसितं नमस्यित[6] मपचायितार्चितापचितम् ॥१०१॥

'अर्ह पूजायाम्' (भ्वा० प० से०) । नमः कृतम् । 'नमो वरिव —' (३.१.१९) इति क्यच् । 'क्यस्य विभाषा' (६.४.५०) इति यलोप. । अपचायते स्म । 'चायृ पूजानिशामनयो' (भ्वा उ० से०) । 'अर्च पूजायाम्' (भ्वा० प० से०) । 'चायतेश्चि' । 'नमस्कृतस्य' षट् ॥१०१॥[7]

वरिवसितं वरिवस्यितमुपासितं चोपचरितं च ।

वरिवः कृतम् 'नमो वरिव —' (३.१.१९) इति क्यच् । 'क्यस्य विभाषा' (६.४.५०) । 'आस उपवेशने' (अ० आ० से०) । 'चर (र) गतौ' । चत्वारि ॥[8]

संतापितसंतप्तौ[9] धूपितधूपायितौ च दूनश्च ॥१०२॥

'तापदाहे' चुरादि । 'तप संतापे' (भ्वा० प० अ०) । 'धूप संतापे' (भ्वा० प० से०) । 'आयादय —' (३.१.३१) इति वा आय । 'टुदु उपतापे' (स्वा० प० अ०) । 'दुग्वो दीर्घश्च' (वा० ८.४.४४) पञ्च ॥१०२॥[10]

---

1. Lustreless, pale-looking [3] 2 Dissolved [3] 3 Accomplished, effected [3] 4 Broken, torn, split [3] 5 Woven; sewn (as cloth) [5] 6 B and K. नमस्यितनमसित— 7. Saluted, respected [6] 8. Worshipped, adored [4] 9 B संतापितसंतप्तौ and K संतापितसंतप्तौ 10 Heated, tormented [5]

हृष्टे मत्तस्तृप्तः प्रह्लन्नः प्रमुदित प्रीत.।

'हृष तुष्टौ' (दि० प० से०)। क्त (३४७२)। 'मदी हर्षे' (दि० प० से०)। 'तृप प्रीणने' (दि० प० अ०)। 'ह्लादी सुखे च' (भ्वा० आ० से०)। 'ह्लादो निष्ठायाम्' (६४९५) इति ह्रस्वः। षट् ॥[1]

छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ॥१०३॥

छिदे (रु० उ० से०) क्त (३२१०२)। 'छो च्छेदने' (दि०प०अ०) 'शाच्छोरन्यतरस्याम्' (७४४१) इति वा वेत्त्वम्। 'लूञ्' (क्र्या० उ० से०),। 'कृती' (तु० प० से०) छेदने'। 'दाप् लवने' (अ० प० अ०)। दो (दि० प० अ०)। 'द्यतिस्यति—' (७४४०) इत्यात्वम्। 'ओव्रश्चू—' (तु० प० से०) अष्टौ। १०३ ॥[2]

स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम्।

'स्रंसु ध्वंसु भ्रंसु—' (भ्वा० आ० से०)। स्कन्दिर (भ्वा० प० से०) पद (दि० आ० अ०) गतौ। 'च्युङ् गतौ' (भ्वा० आ० अ०)। 'गल अदने' (चु० उ० से०) ॥[3]

लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ॥१०४॥

'विद्लृ लाभे' (तु० उ० अ०)। 'भू प्राप्तौ' (चु० आ० से०)। आसाद्यत स्म। षट् ॥१०४॥[4]

अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम्।

अन्वेष्यते स्म। 'एषृ गतौ' (भ्वा० आ० से०)। 'गवेष मार्गणे' (चु० उ० से०)। 'इषु इच्छायाम्' (तु० प० से०)। 'मार्ग अन्वेषणे' (चु०उ०से०) 'मृग अन्वेषणे' (चु० आ० से०)। पञ्च ॥[5]

आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ॥१०५॥

'अर्द गतौ' (भ्वा० प० से०) 'अर्देर्दीर्घश्च' (उ० २१८) इति रक्। सह आर्द्रेण। 'क्लिदू आर्द्रीभावे' (दि० प० से०)। 'तिम ष्टिम आर्द्रीभावे' (दि० प० से०)। 'उन्दी क्लेदने' (रु० प० से०)। 'नुदविद—' (८२. ५५) इति वा न। सप्त ॥१०५॥[6]

1 Pleased, satisfied [6] 2 Cut, lopped [8] 3 Fallen, dropped down [7] 4 Got, obtained received [6] 5 Searched, sought inquired or looked for [5] 6 Wet moisten [7]

त्राणं त्रातं रक्षितमवितं गोपायितं [च] गुप्तं [च]।
त्रैङ् (भ्वा० आ० अ०)। 'नुद—' (८.२.५५) इति वा न.। षट् ॥[1]

अवगणितमवमतावज्ञाते अवमानितं च परिभूते ॥१०६॥
'गण संख्याने' (चु० उ० से०)। मन (दि० आ० अ०)। 'मान पूजायाम्' (भ्वा० आ० से०)। पञ्च ॥१०६॥[2]

त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टम्।
'त्यज हानौ' (भ्वा० प० अ०)। ओहाक् (जु० प० अ०)। 'घुमास्था' (६.४.६६) इतीत्वम्। 'धूञ् कम्पने' (स्वा० उ० अ०)। 'उज्झ उत्सर्गे' (तु० प० से०)। 'धू [विधू] नने' (तु० प० से०)। 'सृज विसर्गे' [दिवादि०]। षट् ॥[3]

उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम् ॥१०७॥
वचभाषवदजल्पख्याभ्य क्त (३.२.१०२)। 'दधातेर्हि.' (७.४.४२)। 'लप व्यक्तया वाचि' (भ्वा० प० से०)। सप्त ॥१०७॥[4]

बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते।
'बुध अवगमने' (दि० आ० अ०)। अनिट्। 'बुधिर् बोधने' सेट् च। 'मनु अवबोधने' (त० आ० से०)। 'यस्य विभाषा' (७.२.१५) इत्यस्यानित्यत्वादिट्। 'विद ज्ञाने' (अ० प० से०)। 'पद गतौ' (दि० आ० अ०) अव स्यते 'द्यतिस्यति—' (७.४.४०) इतीत्वम् ॥ सप्त ॥[5]

ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ॥ १०८॥
संगीर्णविदितमश्रुतसमाहितोपश्रुतोपगतम् ।
अनङ्गमङ्गं कृतम्। 'श्रु श्रवणे' (भ्वा० प० अ०) ॥१०८॥ 'गॄ निगरणे' (तु० प० से०)। 'विद ज्ञाने' (अ० प० से०)। 'दधातेर्हि.' (७.४.४२)। उपश्रुते स्म। एकादश ॥[6]

ईलितशस्तपणायितपनायितप्रणुतपणितपनितानि ॥१०९॥
अपि गीर्णवर्णिताभिष्टुतेडितानि स्तुतार्थानि।
'ईड स्तुतौ' (अ० आ० से०)। 'णुमु स्तुतौ' (भ्वा० प० से०)। 'पण

1. Saved, preserved, protected [6] 2. Contemned, disregarded [5] 3 Abandoned, forsaken, left; quitted [6] 4 Said spoken, uttered [7] 5 Known; understood [7] 6 Accepted, promised [11]

व्यवहारे' (भ्वा० आ० से०)। णु स्तुतौ' (अ० प० से०) ॥१०९॥ 'गॄ शब्दे' (क्र्या० प० से०)। 'वर्ण वर्णक्रियादौ' (चु० उ० से०)। ष्टुञ् स्तुतौ' (अ० उ० अ०)। द्वादश ॥[1]

भक्षितचर्वितलिप्तप्रत्यवसितगिलितखादितप्सातम् ॥ ११० ॥
अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशित भुक्ते ।

'भक्ष अदने' (चु० प० से०)। 'प्सा भक्षण' (अ० प० अ०) ॥ ११० ॥ अद्यते स्म। 'अदोऽनन्ने'' (३ २ ६८) इति ज्ञापकाज्जग्धिर्वा। 'ग्रसु ग्लसु अदने' (भ्वा० आ० से०)। 'अश भोजने' (क्र्या० प० से०) ॥[3]

क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः ॥ १११ ॥
क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः ।

अतिशयेन क्षिप्र । 'स्थूलदूर–' (६ ४ १५६) इतीष्ठनि साधु । अतिशयेन क्षुद्र । प्रिय । 'प्रियस्थिर' (६ ४ १५७) इति साधु। एव गुरस्थूलयो 'स्थूलदूर—' (६ ४ १५६) इति साधु । बहुलस्य बह ॥[4]

साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृन्दिष्ठाः ॥ ११२ ॥
बाढव्यायतबहुगुरुवामनवृन्दारकातिशये ॥

इति विशेष्यनिघ्नवर्ग ॥ १ ॥

'अन्तिकबाढयोर्नेदसाधौ (५ ३ ६३)। एव दीर्घगुरुह्रस्ववृन्दारकाणाम् ॥[5]

इतिविशेष्यनिघ्न [वर्ग] ॥ १ ॥

प्रकृतिप्रत्ययार्थाद्यै सकीर्णे लिङ्गमुन्नयेत् ।

सकीर्णे अस्मिन् वर्गे लिङ्ग प्रकृत्यर्थादिना बोद्धव्यम्। तथया प्रकृतिभूतस्य परशब्दस्य त्रिलिङ्गत्वात्तेन सह समास 'परस्पर' शब्दोऽपि[6] त्रिलिङ्ग । प्रत्ययनत्तिना 'स्तोत्रादि'। अर्थेन 'कर्मैव कार्मणम्' इत्यादौ ।

---

1 Praised, commended, applauded [12] 2 M कृदान्ते
3 Eaten, chewed licked, swallowed [14] 4 Quickest, smallest, dearest, greatest, fattest, and most [1 each]
5 Best or most excellent, largest, most abundant, haviest, shortest, ard very great or handsome [1 each]
6 M शब्दोऽपि।

कर्म क्रिया

क्रियते यत्तत्कर्म। मनिन् (उ० ४ १४४)। कृञ श च' (३ ३ १००)। रिङ् (७ ४ २८)। इयङ् (६ ४ ७७)। 'क्रियाया' द्वे ॥[1]

तत्सातत्ये गम्ये स्युरपरस्परा ॥ १ ॥

क्रियाया सातत्ये त्वर्थे। 'अपरस्परा क्रिया सातत्ये' (६ १ १४४) इति निपात ॥१॥[2]

साकल्यासङ्गवचने पारायणतुरायणे।

साकल्य च आसङ्गस्च तयोर्वचने बोधने। पारयन येन। 'पूर्वपदात्—' (८ ४ ३) इति ण। 'तुर त्वरणे' (जु० प० से०)। तु (तु) रस्य अयन-मसक्त गमनम्। 'परायणम्' इति पाठान्तरम् ॥[3]

यदृच्छा स्वैरिता

'ऋच्छ गत्यादौ' (तु० प० से०)। 'गुरोश्च' (३ ३ १०४) इत्य। या चासौ ऋच्छा च। स्वैनेरितु शीलमस्य, तस्य भाव। 'स्वातन्त्र्यस्य' द्वे ॥[4]

हेतुशून्या त्वास्था[5] विलक्षणम् ॥ २ ॥

हेतुना कारणेन शून्या या आस्था स्थिति। विगत लक्षणमालोचन यत्र। एकम् ॥ २ ॥[6]

शमथस्तु शम शान्ति

'शमादिभ्योऽथच्'। घञि 'नोदात्त—' (७ ४ ३३) इति न वृद्धि। 'क्रोधा-द्यभावस्य' त्रीणि ॥[7]

दान्तिस्तु दमथो दम।

क्लेशादिसहिष्णुता दम ॥[8]

अवदान कर्मवृत्तम्

'दैप् शोधने' (भ्वा० प० अ०)। ल्युट् (३ ३ ११४)। वृत्ते (भ्वा० आ० से०) भावे क्त (३ ३ ११४)। 'प्रशस्तकर्मणो' द्वे ॥[9]

---

1 Action, work [2] 2 Continuous work or worker [1] 3 Full and relevant statements [1 each] 4 Independence [2] 5 B स्वास्था 6 Vain or useless state [1] 7 Calmness or absence of passion &c. [3] 8 Self restraint or forbearance of pain &c [3] 9 Valorous or glorious act [2]

काम्यदानं प्रवारणम् ॥ ३ ॥

काम्यस्यादानम् । 'वृञ् वरणे' चुरादिः । 'कामनापूर्वकं दानम्' द्वे ॥३॥[1]

वशक्रिया संवननम्

वशस्य क्रिया करणम् । संपूर्वः 'वनु याचने' (त० आ० से०) इति वशीकरणार्थं । 'वशीकरणस्य' द्वे ॥[2]

मूलकर्म तु कार्मणम् ।

मूलैरोषधिभिर्यद्वशीकरणम् । कर्मैव कार्मण [म्] '[त] द्युक्तात्कर्मणोऽण्' (५.४.३६) । द्वे ॥[3]

विधूननं विधुवनम्

'धूञ् कम्पने' (चु० प० अ०) 'धञ्प्रीञो—' (वा० ७.३.३७) इति नुक् । 'धू विधूनने' (तु० प० से०) । ल्युट् ३.३ ११५) । '–कुटाद्–' (१.२.१) इति ङित्वाद्गुणाभाव. । 'कम्पनस्य' द्वे ॥[4]

तर्पणं प्रीणनावनम् ॥ ४ ॥

तृप (दि० प० अ०) । प्रीञ् (क्र्या० उ० अ) । अव (भ्वा० प० से०) । 'प्रीतौ' त्रीणि ॥ ४ ॥[5]

पर्याप्तिः स्यात्परित्राणं हस्तधारणमित्यपि[6] ।

हस्तेन हस्तस्य वा धारणम् । प्रहर्तुमुद्यतस्य रोध इत्यर्थ. । त्रीणि ॥[7]

सेवनं सीवनं स्यूतिः

सीव्यते. पृषोदरादित्वात् (६ ३ १०९) वा दीर्घ । क्तिन् (३.३.९४) 'च्छ्वो —' (६ ४ १९) इत्यूठ् । त्रीणि ॥[8]

विदरः स्फुटनं भिदा ॥ ५ ॥

'ॠदोरप्' (३.३.५७) ॥ ५ ॥[9]

आक्रोशनमभीषङ्गः

'षञ्ज सङ्गे' (भ्वा० प० अ०) । 'उपसर्गस्य घञि—' (६.३.१२२) दीर्घः । 'शापस्य' द्वे ॥[10]

---

1. A free-will offering [2] 2. Subjection [2] 3. Bewitching by means of herbs [2] 4. Shaking; trembling [2] 5 Pleasing, satisfying [3] 6. Some read हस्तवारणमित्यपि 7. Protection or warding off a blow (with the hand) [3] 8 Sewing, stitching [3] 9 Breaking, bursting, tearing [3] 10 Curse [2]

सवेदो वेदना न ना।

वेत्तेर्युच् (३ ३ १८)। 'विद चेतनाख्यानादौ' चुरादि । 'अनुभवस्य' द्वे ॥[1]

समूर्च्छनमभिव्याप्ति

'आप्लृ व्याप्तौ' (स्वा० प० अ०)। क्तिन् (वा० ३ ३ ९४)। 'सर्व-व्याप्तस्य' द्वे ॥[2]

याञ्चा भिक्षार्थनार्दना ॥ ६ ॥

अर्द (चु० आ० स०)। ण्यन्त । चत्वारि ॥६॥[3]

वर्धनं छेदने

'वर्ध छेदनपूरणयो' (चु० प० स०)। द्वे ॥[4]

अथ द्वे आनन्दनसभाजने।

आप्रच्छन्नम्

'टुनदि-' (भ्वा० प० से०)। 'सभाज प्रीतिसेवनयो' (चु० उ० से०)। प्रच्छ ज्ञीप्सायाम्' (तु० प० अ०)। 'आलिङ्गनादिनाऽऽनन्दनस्य'[5] त्रीणि ॥[6]

अथाम्नायः सम्प्रदायः

'म्ना अभ्यासे' (भ्वा० प० अ०)। घञ् (३ ३ १८)। दाञ (जु० उ० अ०) घञ् (३ ३ १८)। 'परम्परानुगतसदुपदेशस्य' द्वे ॥[7]

क्षये क्षिया ॥७॥

'क्षि क्षये' (भ्वा० प० अ०)। अच् (३ ३ ५३)। 'क्षीष् हिंसायाम्' (क्र्या० प० अ०)। भिदादि (३ ३ १०४)। 'हाने' द्वे ॥७॥[8]

ग्रहे ग्राह

'ग्रहवृ—' (३ ३ ५८) इत्यप्। घञि ग्राह । 'ग्रहणस्य' द्वे ॥[9]

वशः कान्ती

'वशिरण्यो —(वा० ३ ३ ५८) इत्यप्। द्वे ॥[10]

रक्षणस्त्राणे

रक्षे (भ्वा० प० से०)। 'यजयाच—' (३ ३ ९०) इति नङ्। द्वे ॥[11]

---

1 Experience [2] 2 Universal pervasion [2] 3 Begging [4]
4 Cutting [2] 5 M आलिङ्गनादिनानन्दनस्य 6 The courteous treatment of a friend or guest at meeting and parting [3]
7 Traditional teaching, doctrine [2] 8 Decay, loss [2]
9 Taking, holding [2] 10 Wish, desire [2] 11 Protection [2]

रण क्वणे ।

'रण क्वण शब्दे' (भ्वा० प० से०) द्वे ॥[1]

व्यधो वेधे

'व्यधजपो —' (३ ३ ६१) इत्यप् । 'विध विधाने' (तु० प० से०)। घञ् (३ ३ १८) । 'वेधनस्य' द्वे ॥

पचा पाके

पचे. (भ्वा० उ० अ०) अङ् (३ ३ १०४) । द्वे ॥[3]

हवो हूती

ह्वेञ् (भ्वा० उ० अ०) । 'ह्व सम्प्रसारणम्—' (३ ३ ७२) इत्यप् । द्वे ॥[4]

वरो वृतौ ॥८॥

'वृञ्—' (भ्वा० उ० से०) । 'ग्रहवृ—' (३ ३ ५८) इत्यप् द्वे ॥ ८॥[5]

ओषः प्लोषे

'उष प्लुष दाहे' (भ्वा० प० से०) । घञ् (३ ३ १८) ॥[6]

नयो नाये

'णीञ्—' (भ्वा० उ० अ०) । एरच् (३ ३ ५६) 'श्रिणीभुवोऽनुपसर्गे' (३ ३ २४) इति घञ् । 'न्ययो न्याय' इति पाठान्तरम् । 'नीते' द्वे ॥[8]

ज्या निर्जीर्णौ

'ग्लाज्याहाभ्यो नि' (वा० ३ ३ ९५) । 'ऋल्वादिभ्य क्तिन्निष्ठावत्—' (वा० ८ २ ४४) इति न । 'जीर्णताया' द्वे ॥[9]

भ्रमो भ्रमौ ॥

'इक् कृष्यादिभ्य' (वा० ३ ३ १०८) । भ्रमि । द्वे ॥[10]

स्फातिर्वृद्धौ

'स्फायी वृद्धौ' (भ्वा० आ० से०) । द्वे ॥[11]

प्रथा ख्यातौ

'प्रथ प्रख्याने' (भ्वा० आ० से०) । भिदादि (३ ३ १०४) ॥[12]

स्पृष्टि पृक्तौ

'स्पृश स्पर्शे' (तु० प० अ०) । 'पृची सम्पर्के' (रु० प० से०) । द्वे ॥[13]

1 Sound [2] 2 Piercing, perforation [2] 3 Cooking [2] 4 Calling [2] 5 Boon [2] 6 Burning [2] 7 M[illegible] 8 Policy [2] 9 Old age, decrepitude [2] 10 Moving, roamingabout [2] 11 Growth, increase [2] 12 Fame [2] 13 Touch, Contact [2]

स्नवः स्रवे ॥९॥

'ष्णु प्रस्रवणे' (अ० प० से०)। 'स्रु गतौ' (भ्वा० प० अ०)। 'प्रस्रवणस्य' द्वे ॥९॥[1]

एधा[2] समृद्धौ

